THE KUPPUSWAMI SAS[TRI]
RESEARCH INSTITUTE,
MADRAS.

THE
KASHI SANSKRIT SERIES
(*HARIDĀS SANSKRIT GRANTHAMĀLĀ*)
NO. 106.

643

(Nyaya Section, No. 16.)

S. Kuppuswami
7/10/35

THE
NYĀYA MAÑJARĪ
of
JAYANTA BHAṬṬA

With Notes by

PANDIT S'RI SŪRYA NÂRÂYAṆA S'UKLA
Nyāya Vyākaraṇāchārya
Professor, Govt. Sanskrit College, Benares.

Edited by

PANDIT DHUNDHIRĀJA S'ĀSTRI
Nyāyopādhyāya Kāvyatīrtha
Principal N. V. Vidyalaya, Benares.

(**Part II**)

BENARES.
JAI KRISHNADAS-HARIDAS GUPTA
The Chowkhamba Sanskrit Series Office,
1934.

[*Registered According to Act XXV of 1867*
All Rights Reserved by the Publisher.]

1934.

PRINTED BY

JAI KRISHNA DAS GUPTA

Vidya Vilas Press,

Benares City.

हरिदाससंस्कृतग्रन्थमालासमाख्य—
काशीसंस्कृतसीरिज़पुस्तकमालायाः
१०६
न्यायविभागे (१६) षोडशं पुष्पम् ।

* श्रीः *

न्यायमञ्जरी ।

गौतमसूत्रतात्पर्यविवृतिः ।

पदवाक्यप्रमाणपारावारपारीणश्रीजयन्तभट्टकृता ।

तदुत्तरभागः ।

वाराणसेयराजकीयसंस्कृतपाठशालानव्यप्राच्यन्यायशास्त्राध्यापकेन
न्यायव्याकरणाचार्यसूर्यनारायणशर्मशुक्लेन विषमस्थल
विवरणपूर्वकं सम्पादितः काशीस्थ नित्यानन्द वेद-
विद्यालय प्रधानाध्यापकेन पण्डितढुण्ढिराज-
शास्त्रिणा संशोधितः ।

प्रकाशकः—
जयकृष्णदास हरिदास गुप्तः—
चौखम्बा संस्कृत सीरिज़ आफिस,
बनारस सिटी ।

१९९१

अस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

भूमिका ।

श्रीविश्वेश्वरः शरणम्

नाविदितमिदं तत्रभवतां भवतां दार्शनिकानां यद्वाराणसेयराजकीय संस्कृतमहाविद्यालयाध्यक्षैः प्राच्यप्रतीच्योभयदर्शननिष्णातैर्महामहोपाध्याय **श्रीगोपीनाथकविराज एम. ए.** महोदयैः प्राचीनन्यायशास्त्रि-परीक्षायां पाठ्यत्वेन पदवाक्यप्रमाणपारावारपारीण श्रीमद्भट्टजयन्तप्रणीत **न्यायमञ्जर्याः प्रमेयप्रकरणं** निर्धारितमिति विद्यार्थिनामनुरोधेन प्रमेयप्रकरणादिर्निग्रहस्थानप्रकरणान्तो द्वितीयो भागः प्रथमं प्रकाश्यते ।

इतः परं प्रमाणप्रकरणाभिधः प्रथमो भागोऽपि झटिति प्रकाशमेष्यति, तदानीमेव च ग्रन्थकर्तुः समयादिकं सविस्तरं निवेदयिष्यते, इदानीं तु अयं ग्रन्थकारः न्याये साहित्ये व्याकरणे मीमांसायां च महत्पाण्डित्यमासादितवानिति अनेन ग्रन्थेन समो न्यायदर्शने कोऽपि ग्रन्थो नास्तीति च निवेद्य विरमामि ।

अस्य द्वितीयभागस्य मुद्रणवेलायां श्रीमन्माध्वसम्प्रदायाचार्य दार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्य तर्करत्नन्यायरत्नगोस्वामि**दामोदरशास्त्रि**महोदयैरन्तिमपूर्वरूपस्य (प्रूफ) दर्शनेनाहमनुगृहीत इति तेषामनुग्रहं शिरसा बिभर्मि ।

एवं मदन्तेवासिना व्याकरणाचार्यब्रह्मदत्तमिश्रेण प्रूफदर्शने साहाय्यं कृतमिति एनं शुभाशिषाऽभिनन्दामि इति—

१९९१ वि० भा० शु०	**सूर्यनारायणशर्म शुक्लः ।**
अनन्तचतुर्दशी	काशी ।

643

न्यायमञ्जर्या उत्तरार्द्धे प्रतिपादितानां विषयाणां सूचीपत्रम् ।

२ प्रमेयप्रकरणे

विषयः	पृष्ठम्
प्रमेयपरीक्षा	१
शरीरात्मवादिचार्वाकमतम्	३
मीमांसकमतेनात्मप्रत्यक्षत्वम्	३
ज्ञानात्मवादखण्डनम्	४
अहंप्रत्ययस्य शरीरालम्बनत्वेनात्मनः परोक्षत्वम्	६
नैयायिकमतेनात्मनः प्रत्यक्षत्वम्	७
आत्मनोऽनुमानगम्यत्वम्	७
पीलुपाकवादिमतम्	११
पिठरपाकवादिमतम्	१२
भूतचैतन्यवादनिरासः	१३
इन्द्रियचैतन्यवादनिरासः	१३
मनश्चैतन्यवादनिरासः	१४
ज्ञानाश्रयत्वेनात्मनः साधनम्	१४
विज्ञानवादपूर्वपक्षः	१५
सर्वभावानां क्षणिकत्वम्	१६
क्षणभङ्गे प्रत्यभिज्ञाया अबाधकत्वम्	२०
प्रत्यभिज्ञानिरूपणम्	२१
क्षणिकत्वस्य प्रत्यक्षगम्यत्वम्	२२
क्षणिकत्वेऽनुमानस्याबाधकत्वम्	२४
क्षणभङ्गनिरासोपक्रमः	२५
क्षणि वहेतोर्विरुद्धत्वम्	२९
प्रत्यभिज्ञायां भूतकालस्य विषयत्वम्	३१
क्षणभङ्गनिरासः	३३
प्रत्यक्षस्य स्थिरवस्तुग्राहकत्वम्	३५
क्षणभङ्गभङ्गोपसंहारः	३६
चार्वाकमतेन पूर्वपक्षः	३९

विषयः	पृष्ठम्
चार्वाकमतनिरासः	३९
अदृष्टसाधनम्	४२
नित्यात्मसाधनम्	४४
शरीरनिरूपणम्	४५
शरीरपरीक्षा	४७
शरीरस्य पार्थिवत्वम्	४७
इन्द्रियपरीक्षा	४८
साङ्ख्यमतेनेन्द्रियाणामाहङ्कारिकत्वम्	४९
भौतिकत्वेऽपीन्द्रियाणां प्राप्यकारित्वम्	४९
इन्द्रियाणामाहङ्कारिकत्वखण्डनम्	५२
एकेन्द्रियवादः	५३
एकेन्द्रियवादनिरासः	५३
वागादीनामिन्द्रियत्वखण्डनम्	५४
अन्तःकरणत्रैविध्यखण्डनम्	५५
अर्थस्वरूपनिरूपणम्	५५
	५८
सांख्यमतोपपादनम्	५८
सांख्यमतखण्डनम्	६१
सत्कार्यवादः	६३
सत्कार्यवादनिरासः	६४
मनसो लक्षणम्	६७
प्रवृत्तिलक्षणम्	६९
प्रवृत्तिभेदाः	६९
दोषलक्षणम्	७०
दोषभेदाः	७०
दोषशमनोपायः	७१
प्रत्यभावलक्षणम्	७१
परमाणुसाधनम्	७२

विषयः	पृष्ठम्
ईश्वरसाधनम्	७१
द्व्यणुकादिक्रमेण कार्योत्पत्तिनिरूपणम्	७३
फललक्षणम्	७४
दुःखलक्षणम्	७५
तार्किकाभिमतापवर्गनिरूपणम्	७७
वेदान्त्यभिमतापवर्गनिरूपणम्	७७
वेदान्त्यभिमतमोक्षस्वरूपखण्डनम्	७८
सुखसत्तासमर्थनम्	८०
मोक्षोपायनिरूपणम्	८२
मोक्षोपायानुष्ठानासम्भवः	८२
मोक्षोपायानुष्ठानोपपादनम्	८४
विषयेषु दोषभावना	८६
ज्ञानकर्मसमुच्चयवादः	८९
ज्ञानकर्मसमुच्चयवादनिरासः	९०
आत्मनि विप्रतिपत्तिप्रदर्शनम्	९१
स्वमतेनात्मतत्त्वज्ञाननिरूपणम्	९२
ब्रह्मवादिमतेन मोक्षोपायनिरूपणम्	९४
ब्रह्मवादिमतखण्डनम्	९६
शब्दाद्वैतवादिवैयाकरणमतखण्डनम्	९९
शब्दाध्यासवादखण्डनम्	१००
शब्दविवर्तवादखण्डनम्	१०१
विज्ञानाद्वैतमतम्	१०३
विज्ञानाद्वैतमतखण्डनम्	१०७
असत्ख्यातिनिरासः	११०
आत्मख्यातिनिरासः	१११
बाह्यार्थशून्यत्वनिरासः	११४
बाह्यार्थसाधनम्	११६
अपवर्गनिरूपणोपसंहारः	११७

३ संशयप्रकरणे—

संशयलक्षणम्	११८
आचार्यव्याख्यानम्	११८
व्याख्यानान्तरम्	१२०
विभागजविभागखण्डनम्	१२२

४ प्रयोजनप्रकरणे

विषयः	पृष्ठम्
प्रयोजनलक्षणम्	१२५

५ दृष्टान्तप्रकरणे

दृष्टान्तलक्षणम्	१२७

६ सिद्धान्तप्रकरणे—

सिद्धान्तलक्षणम्	१२७
सिद्धान्तस्य चातुर्विध्यम्	१२८
सर्वतन्त्रसिद्धान्तस्य लक्षणम्	१२८
प्रतितन्त्रसिद्धान्तस्य लक्षणम्	१२८
अधिकरणसिद्धान्तस्य लक्षणम्	१२८
अभ्युपगमसिद्धान्तस्य लक्षणम्	१२९

७ अवयवप्रकरणे—

प्रतिज्ञालक्षणम्	१३२
हेतुलक्षणम्	१३४
केवलव्यतिरेक्याक्षेपः	१३७
केवलव्यतिरेकिस्थापनम्	१३७
उदाहरणलक्षणम्	१३८
उपनयलक्षणम्	२४०
उपनयाङ्गीकारे आक्षेपः	१४१
उपनयाक्षेपसमाधिः	१४२
निगमनलक्षणम्	१४२
प्रतिज्ञावयवाक्षेपः	१४३
प्रतिज्ञाक्षेपसमाधिः	१४३
अवयवेषु प्रमाणाभिसंप्लवः	१४४

८ तर्कप्रकरणे—

तर्कलक्षणम्	१४४

९ निर्णयप्रकरणे—

निर्णयलक्षणम्	१४८

१० वादप्रकरणे—

वादलक्षणम्	१५०

११ जल्पप्रकरणे—

जल्पलक्षणम्	१५१

१२ वितण्डाप्रकरणे—

विषयः	पृष्ठम्
वितण्डालक्षणम्	१५३

१३ हेत्वाभासप्रकरणे—

सव्यभिचारलक्षणम्	१५४
विरुद्धलक्षणम्	१५६
प्रकरणसम (सत्प्रतिपक्ष) लक्षणम्	१५८
सत्प्रतिपक्षस्योदाहरणान्तरम्	१६१
सत्प्रतिपक्षोदाहरणान्तरदूषणम्	१६१
असिद्धलक्षणम्	१६२
अन्यथासिद्धनिरूपणम्	१६३
बाधितलक्षणम्	१६७

१४ छलप्रकरणे

छललक्षणम्	१६८
छलभेदाः	१६८
वाक्छललक्षणम्	२६९
सामान्यच्छललक्षणम्	१७०
उपचारच्छललक्षणम्	१७१
छलपरीक्षा	१७२

१५ जातिप्रकरणे

जातिलक्षणम्	१७३
जातिभेदाः	१७३
जातिव्युत्पादनपरीक्षा	१७४
साधर्म्यवैधर्म्यसमलक्षणे	१७६
उत्कर्षसमादीनां षण्णां लक्षणानि	१७७
प्राप्त्यप्राप्तिसमलक्षणे	१७८
प्रसङ्गप्रतिदृष्टान्तसमलक्षणे	१७८
अनुत्पत्तिसमलक्षणम्	२७९
संशयसमलक्षणम्	१८०
प्रकरणसमलक्षणम्	१८१
अहेतुसमलक्षणम्	१८१
अर्थापत्तिसमलक्षणम्	१८२

विषयः	पृष्ठम्
अविशेषसमलक्षणम्	१८३
उपपत्तिसमलक्षणम्	१८३
उपलब्धिसमलक्षणम्	१८४
अनुपलब्धिसमलक्षणम्	१८४
अनित्यसमलक्षणम्	१८५
नित्यसमलक्षणम्	१८६
कार्यसमलक्षणम्	१८७

१६ निग्रहस्थानप्रकरणे-

निग्रहस्थानलक्षणम्	१९०
निग्रहस्थानभेदाः	१९१
प्रतिज्ञाहानिलक्षणम्	१९२
प्रतिज्ञान्तरलक्षणम्	१९३
प्रतिज्ञाविरोधलक्षणम्	१९४
प्रतिज्ञासंन्यासलक्षणम्	१९५
हेत्वन्तरलक्षणम्	१९६
अर्थान्तरलक्षणम्	१९७
निरर्थकलक्षणम्	१८७
अविज्ञातार्थलक्षणम्	१९८
अपार्थकलक्षणम्	१९९
अप्राप्तकाललक्षणम्	१९९
न्यूनलक्षणम्	२००
	२००
पुनरुक्तलक्षणम्	२०१
अननुभाषणलक्षणम्	२०२
अज्ञानलक्षणम्	२०३
अप्रतिभालक्षणम्	२०४
विक्षेपलक्षणम्	२०४
मतानुज्ञालक्षणम्	२०५
निरनुयोज्यानुयोगलक्षणम्	२०६
अपसिद्धान्तलक्षणम्	२०७

न्यायमञ्जर्या उत्तरभागस्य शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृ०	पं०
मिथ्याज्ञाने	मिथ्याज्ञान-	२	५
समर्थने	समर्पणे	२	८
सामथ्य	सामर्थ्यं	२	८
दुःखान्ते	दुःखान्तं	२	२३
ज्ञातृसमाना	ज्ञानसमाना	३	२५
चतस्मिन्	चैतस्मिन्	४	६
आत्मवर्त्तिनो	आत्मनो	४	२६
भिन्न	भिन्नं	९	२५
काऽत्र	कोऽत्र	१०	१
नियमा	नियमो	१०	३
प्रमातृभेदा	प्रमातृभेद	१०	१४
समथः	समर्थः	१३	११
वृत्त	वृत्ति	१३	२६
नैवं	नैव	१४	२८
फलापभोगा	फलोपभोगो	१६	१
विकृत	विकृति	१६	१४
समथेन	समर्थेन	१७	२१
सामथ्य	सामर्थ्यं	१८	६
भाविना	भाविनी	१९	१३
कुम्भा	कुम्भा	२०	१५

अशुद्धम्	शुद्धम्	पृ०	पं०
समथ	समर्थं	२१	११
तत्तत्लक्षणा	तत्लक्षणा	२२	२६
मेष	मेषा	२४	३
पिनगम्यते	नाधिगच्छति	२४	२६
सुखमप्य	सुखं नैवा	२४	२७
निर्वत्य	निर्वर्त्यं	५८	१०
मागणा	मार्गणा	७४	२७
माक्षः	मोक्षः	८०	१४
धर्म	धर्मि	१२९	२८
मितिडप	मितिरूप	१४१	२६
तस्याएवपुनर्वचनं-निगमनमसाधनाङ्ग-वचनत्वादपार्थकम्	अयं पाठो नास्ति	१४३	७
लक्षणा	लक्षणीया	१४५	११
नजाने	नजाने जाने	१४८	२८
साधारणाद्	साधारणवद्	१५५	२०
रणाविरु	णविरु	१५६	२०
वृत्तीति	वृत्ती इति	१६०	३
साधना	साधन	१८७	३१
न्तरीकत्व	न्तरीयकत्व	१८८	५

सूचना—

६४ पृष्ठानन्तरं ४१ पृष्ठादारभ्य ४८ पृष्ठपर्यन्तम् ६५-६६-इत्येवं क्रमेण ७२ पर्यन्तमङ्का बोध्याः ।

रेफपातो मात्रापातश्च बहुत्र जात इति सुधीभिः समीकृत्य पठनीयः ।

श्रीविश्वेश्वरः शरणम् ।

जयन्तभट्टकृत—

न्यायमञ्जरी ।

तत्र प्रमेयप्रकरणम् ।

प्रमेयपरीक्षारम्भः ।

एवं प्रमाणपदार्थे परीक्षिते सति यदर्थं तत्परीक्षणं तत्प्रमेयमिदानीं दर्शयितुमाह—

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥(१)

प्रमाणवदिहाप्येतत्सूत्रं व्याख्यायि सूरिभिः ।
एवं विभागसामान्यलक्षणप्रतिपादकम् ॥
प्रमेयश्रुतिरात्मादिपदपर्यन्तवर्त्तिनी ।
तेषामेव प्रमेयत्वं नान्यस्येति नियच्छति ॥

यथा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्येवकारादिश्रुतिमन्तरेणापि शब्दसामर्थ्यात्त एव भोजनक्रियायोगिनोऽवगम्यन्ते नान्ये तथेहाप्यात्मादयः प्रमेयमित्युक्ते तथैव तदितरप्रमेयनिषेधोऽवधार्यते,

ननु कथं द्वादशविधमेव प्रमेयमुपपद्यते यावता समानतन्त्रे (२)पृथिव्यादीनि नव द्रव्याणि, रूपादयश्चतुर्विंशतिगुणाः, उत्क्षेपणादीनि पञ्च कर्माणि, परापरभेदेन द्विविधं सामान्यं, नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः, एकः समवाय, इति षट्पदार्थीमनुक्रम्य तदवान्तरविशेषैरानन्त्यं प्रमेयस्योपवर्णितमिति ?

उच्यते—किं पुनरिह प्रमेयं विवक्षितमिति तत्सामान्यलक्षणं तावत्परीक्ष्यताम् ? आह—सूक्तमिदं कस्यापि 'कर्णे पृष्टः कटिं चालयती'ति द्वादशविधत्वमाक्षिप्तं न प्रतिसमाधत्ते भवान् प्रमेयस्य सामान्यलक्षणं; तु परीक्षत एव,

उच्यते—अलं केलिना, एतदेवात्र प्रतिसमाधानं भवति न हि प्रमाणविषयमात्रमिह प्रमेयमभिमतमेवंविधस्य प्रसिद्धत्वेन लक्षणानर्हत्वात् प्रमाण एव ज्ञाते सति तद्विषयोऽर्थः प्रमेयमिति ज्ञायत एव किं तेन लक्षितेन; तस्माद्विशिष्टमिह प्रमेयं लक्ष्यते,

---

(१) गौ० सू० अ० १ आ० १ सू० ९ । (२) कणाददर्शने ।

ज्ञातं सम्यगसम्यग्वा यन्मोक्षाय भवाय वा ।
तत्प्रमेयमिहाभीष्टं न प्रमाणार्थमात्रकम् ॥

तच्च द्वादशविधमेव भवति न न्यूनमधिकं वेति समाहित इत्थं भवति विभागाक्षेपः, कुतः पुनरेष प्रमेयविशेषो लभ्यते, निःश्रेयसार्थत्वाच्छास्त्रस्य, प्रमेयज्ञानस्य(१) प्रमाणज्ञानवदन्यज्ञानोपयोगितामन्तरेण स्वत एव मिथ्याज्ञाने निवृत्त्यादिक्रमेणापवर्गे हेतुत्वप्रतिज्ञानात् तथाविधस्य चापवर्गोपायत्वस्यात्मादिष्वेव भावात्,

भवत्वेवं, सूत्रस्य तु कथमीदृशप्रमेयविशेषसमर्थने सामर्थ्यं–विशेषात्तुशब्दप्रयोगसामर्थ्याच्च ? सत्यमाकाशकालदिगादि प्रमाणविषयत्वात् प्रमेयं भवति तत्तु न सप्रयोजनम्, आत्मशरीरेन्द्रियार्थमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयं निःश्रेयसहेतुत्वादित्याशयः, तदित्थमेष तुशब्दो निःश्रेयसाङ्गभूतप्रमेयान्तरपरिहारद्वारेण विशिष्टमात्मादि प्रमेयमिह सूचयति,

तद्द्वादशविधत्वेऽपि हेयोपादेयभेदतः ।
द्विधोच्यते मुमुक्षूणां तथैव ध्यानसिद्धये ॥
तत्र देहादिदुःखान्तं हेयमेव व्यवस्थितम् ।
उपादेयोऽपवर्गस्तु द्विधाऽवस्थितिरात्मनः ॥
सुखदुःखादिभोक्तृत्वस्वभावो हेय एव सः ।
उपादेयस्तु भोगादिव्यवहारपराङ्मुखः ॥

आत्मनो हि भोगाधिष्ठानं शरीरं, भोगसाधनानीन्द्रियाणि, भोक्तव्या इन्द्रियार्थाः, भोगो बुद्धिः, आन्तरं हि भोगकारणं मनः, प्रवृत्तिः पुण्यपापात्मिका, रागादयश्च दोषाः शरीरादिजन्महेतवः, एतत्कृतश्च शरीरादियोगाध्यासः प्रेत्यभावः, एतत्कृतमेव च संसारे सुखदुःखरूपं हि फलं, तच्च द्विविधमेव–विवेकवतः सर्वं दुःखमेवेति, एवं शरीरादिदुःखान्ते हेयतयैव भावनीयम्, एतदनुषक्तश्चात्माऽपि तथैव, एतद्वियुक्तस्त्वात्मैवापवर्ग उच्यते, स चोपादेयतया भावनीय इत्यत एवात्मपदसंगृहीतस्याप्यस्य पुनर्निर्देशः स हि परमः पुरुषार्थ इति, एवमिदं द्वादशभेदं प्रमेयं हेयोपादेयतया तत्त्वज्ञानेन भावयन्नभ्यासात्तद्विषयविपरीतग्रहात्मकं मिथ्याज्ञानं क्षिणोति,

तत्त्वज्ञानेन तेनास्य मिथ्याज्ञानेऽपबाधिते ।
रागद्वेषादयो दोषास्तन्मूलाः क्षयमाप्नुयुः ॥
क्षीणदोषस्य नोदेति प्रवृत्तिः पुण्यपापिका ।
तदभावान्न तत्कार्यं शरीराद्युपजायते ॥
अशरीरश्च नैवात्मा स्पृश्यते दुःखडम्बरैः ।

(१) 'प्रमेयस्य' इति ख० पु० पाठः ।

अशेषदुःखोपरमस्त्वपवर्गोऽभिधीयते ॥

तदित्थमेव द्वादशविधं प्रमेयमतिगहनसंसारमारवस्थल (१) प्रभवतीव्रसंतापनिर्वापणमहाहृदतामुपयातीति तदेवादेशार्हमिति सिद्धम् ।

शरीरात्मवादिचार्वाकमतम् ।

विरक्तसंकथास्तावदसंजातफलोचिताः ।
आत्मैव त्वस्ति नास्तीति कथं न परिचिन्त्यते ॥
तथा च लौकायतिकाः परलोकापवादिनः ।
चैतन्यखचितात्कायान्नात्माऽन्योऽस्तीति मन्वते ॥

न तावदात्मा प्रत्यक्षतो गृह्यते घटादिवद् बाह्येन्द्रियेण, सुखादिवन्मनसा परिच्छेत्तुमशक्यत्वाद्, अनुमानं तु न प्रमाणमेव चार्वाकाणां, न चात्मसिद्धौ किंचन लिङ्गमस्ति । ज्ञानादियोगस्तु भूतानामेव परिणामविशेषोपपादितशक्त्यतिशयजुषां भविष्यति, यथा गुडपिष्टादयः प्रागसतीमपि मदशक्तिमासादितसुराकारपरिणामाः प्रपद्यन्ते तथा मृदाद्यवस्थायामचेतानान्यपि भूतानि शरीराकारपरिणतानि चैतन्यं स्प्रक्ष्यन्ति । कालान्ते स्वव्याध्यादिना विशेषमवजहति तान्येव चैतन्यशून्यतामुपयास्यन्ति, चैतन्यत्वानपायाच्च तावन्तं कालं तान्येव स्मृत्यनुसंधानादिव्यवहारनिवहनिर्वाहणनिपुणतामनुभविष्यन्तीति किमनुमानक आत्मा स्याद्, आगमास्तु मनोरथाधिरूढप्रामाण्याः कथमात्मानमवबोधयितुं शक्यन्ते, अयमपि चागमोऽस्त्येव 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ती'ति तदात्मनो नित्यस्य परलोकिनोऽभावात्कृतमेताभिरपार्थकपरिश्रमकारिणीभिः परलोककथाभिः ।

मीमांसकमतेनात्मप्रत्यक्षत्वनिरूपणम्—

तत्र प्रत्यक्षमात्मानमौपवर्षाः (२)प्रपेदिरे ।
अहंप्रत्ययगम्यत्वात्स्वयूथ्या (३)अपि के चन ॥

अस्त्ययमहंप्रत्ययः कश्चिच्छरीरसमानाधिकरणः स्थूलोऽहं कृशोऽहं, कश्चिज्ज्ञातृसमानाधिकरणो जानाम्यहं स्मराम्यहमिति, तत्र स्थूलादिसमानाधिकरणस्तावदास्तामहंप्रत्ययः,

ज्ञानेच्छासुखदुःखादिसामानाधिकरण्यभाक् ।
यस्त्वहंप्रत्ययस्तत्र नात्मनोऽन्यः प्रकाशते ॥

---

(१) मरोरिदं मारवं तच्च तत्स्थलं मारवस्थलं संसार एव मारवस्थलं संसारमारवस्थलं, संसार एव मरुदेश इति यावत् तत्राधिकः सूर्यकृतस्तापो भवतीति ।

(२) उपवर्षो मीमांसासूत्रवृत्तिकारः पाणिनिगुरोर्वर्षस्य कनिष्ठभ्राता, औपवर्षाः=मीमांसकाः । (३) नैयायिकैकदेशिनः ।

न हि ज्ञानसुखेच्छाऽऽदियोगः कर्मेन्द्रियादिषु ।
न च ज्ञानादिशून्येऽर्थे जानामीत्यादिसंविदः ॥
ज्ञानमात्रावभासोऽपि वारितः प्रत्यभिज्ञया ।
ज्ञात(१)वानहमेवादावहमेवाद्य वेद्मि च ॥
नोत्तरस्य न पूर्वस्य न ज्ञानक्षणयोर्द्वयोः ।
न संतानस्य चतस्मिन्प्रत्ययेऽस्त्यवभासनम् ॥
नोत्तरो ज्ञातवान्पूर्वं पूर्वो जानाति नाधुना ।
न द्वयोर्द्वयमप्यस्ति संतानस्तु न वास्तवः ॥

अवस्तुत्वाच्च नासौ पूर्वं किं चिज्ज्ञातवान्न चाद्य किं चिज्जानातीति, तस्मादहमेव ह्यो ज्ञातवानहमेवाद्य जानामीत्यस्मिन्प्रत्यये ह्यश्चाद्य चानुवर्त्तमानो ज्ञाता प्रतीयत इति गम्यते, न चासौ कायो;(२) बाल्याद्यवस्थाभेदेन नानात्वादचेतनत्वाच्च, एवं सप्रत्यभिज्ञाहंप्रत्ययग्राह्ये ज्ञातरि सिद्धे सोऽयं स्थूलादिसमानाधिकरणोऽहंप्रत्ययस्तदभेदोपचारेण शरीरे वर्तमानो मिथ्येति कल्पयिष्यते, न पुनरेतदनुरोधेन ज्ञानादिसमानाधिकरणाहंप्रत्ययस्य मिथ्यात्वकल्पनं युक्तमबाधितत्वाद्, न खल्वहं जानामीति प्रत्ययः केन चिदल्पीयसा दोषरेणुना धूसरीकर्त्तुं पार्यते तदस्यात्मैव मुख्यो विषयस्तदतिरिक्तं वस्तु भाक्तमिति; तस्मादहंप्रत्ययगम्यत्वादात्मा प्रत्यक्ष इति ।

ज्ञानात्मवादिखण्डनम्—

अत्र वदन्ति—शब्दमात्रोच्चारणमेतदहं जानाम्यहमिच्छाम्यहं सुख्यहं दुःखीति न तु ज्ञानादिस्वरूपातिरिक्तस्तदाश्रयः कश्चिदेतासु बुद्धिषु परिस्फुरतीति, कथमेकस्यामेव संविदि कर्ता च कर्म चात्मा भवेत् ?

ग्राह्यग्राहकतैकस्य ज्ञानस्यापाकरिष्यते ।
त्वयाऽपि नेष्यते चेति तथा सत्यात्मनोऽपि सा ॥

यच्चावस्थाकृतं भेदमवलम्ब्य ग्राह्यग्राहकभावसमर्थनमेकस्यैवात्मनः कृतं किल द्रव्यादिस्वरूपमात्मनो ग्राह्यं ज्ञातृरूपं च ग्राहकमिति, तदनुपपन्नं, द्रव्यादिस्वरूपे ग्राह्ये न ज्ञातरि ग्राहकता साधिता स्याद्, आत्मवर्त्तिनोऽपि द्रव्यादिरूपस्य घटादितुल्यत्वाद्,

यदपि निपुणंमन्यैरुच्यते भवतु ज्ञातृतैव (३)ग्राहिका तथाऽपि विषयोपाधिकृतोऽस्त्येव भेदः, घटावच्छिन्ना हि ज्ञातृता ग्राह्या शुद्धैव तु ज्ञातृता ग्राहि-

---

(१) 'ज्ञातव्यमह' ख० पु० पाठः ।
(२) 'कायो' इत्यस्य स्थाने 'वयो इति । ख० पु० पाठः सचायुक्तः ।
(३) ज्ञातृतैव—ज्ञानमेव ग्राहकमित्यर्थः ।

केति, अन्यत्र तु शुद्धविषयग्रहणमेव भवति घटोऽयमिति—तदेतदपि सरलमतिप्रतारणमात्रम्, तथा हि घटोऽयमित्यत्र घटमात्रप्रवणैव बुद्धिः; इयांस्तु विशेषः पूर्वं केवलं घटग्रहणमधुना तु ज्ञानविशिष्टघटावमर्श इति ।

अहंप्रत्ययस्य शरीरालम्बनत्वेनात्मनः परोक्षत्वम्—

ननु विभज्यमानायां प्रतीतौ घटोऽयमिति तावद्विषयग्रहणं, जानामीति ज्ञानग्रहणमपि भवतु नाम, अहमिति तु कस्य ग्रहणम्? न चैकस्यामेव प्रतीतावंशविभागेन प्रामाण्यमप्रामाण्यं वा वक्तुं युक्तम्—घटमिति जानामीति च प्रमाणमहमिति तु न प्रमाणमिति, तस्मादत्र ज्ञातुरवभासोऽभ्युपेयः, उक्तमत्र नैकस्यां प्रतीतावात्मनः कर्मता कर्तृता च स्याद्, यस्तूपाधिस्त्वनयोर्नेतुमुपक्रान्तः सोऽयं न घटते घटप्रवणत्वादहं जानामीतिप्रतीतेर्विभज्यमानत्वेऽपि घटमिति जानामीति चांशद्वयं विषयनिष्ठमेव जातम्—अहमिति त्वयमंशो यद्यात्मविषयो दृश्यते तर्हि स एव शुद्धोऽवशिष्यते ग्राह्यग्राहकश्चेति नावस्थाकृतस्तद्भेदः समर्थितः स्याद्, भेदाभावेन चैकस्यैव ग्राह्यग्राहकभावमुपाधि(१)मभिदधता विज्ञानवादवर्त्म संश्रितं स्यात्तस्मादहंप्रत्ययस्य ग्राहकाद्भिन्नं ग्राह्यमभिधित्सता शरीरमेव ग्राह्यमभ्युपगन्तव्यं ज्ञानसामानाधिकरण्यानुपपत्तेश्च वरमस्य नात्मालम्बनता, अत एव कृशश्यामसामानाधिकरण्यधीः शरीरालम्बनत्वस्य साक्षिणी न विरोत्स्यते,

ननु ममेदं शरीरमिति भेदप्रतिभासात्कथमहंप्रत्ययः शरीरालम्बनः स्याद्? भोः साधो! नैवंविधेषु प्रत्ययेषु विश्वास्यत्वमर्हसि ममात्मेत्यपि भेदप्रत्ययस्य दर्शनादवस्थाभेदादिना यथा तथा तत्समर्थनमास्थीयते तदिह शरीरालम्बनत्वेऽपि सैव सरणिरनुसरिष्यते; तस्मादहंप्रत्ययः शरीरालम्बन एवेति, स च ज्ञानादिसमानाधिकरणो मिथ्या स्थूलादिसमानाधिकरणस्तु सम्यगिति, ये तु मम शरीरं ममात्मेति च बुद्धी ते द्वे अपि मिथ्या ममप्रत्ययस्याहंप्रत्ययवदात्मानालम्बनत्वाच्छरीरे च भेदानुपपत्तेः,

> मम पाणिर्भुजो वेति भिन्नत्वादुपपद्यते ।
> शरीरं तु ममेत्येषा कल्पना राहुमूर्धवत् ॥

तस्मादहङ्कारममकारयोर्द्वयोरप्यविषयत्वादात्मा परोक्ष इति सिद्धम् ।

अपरे पुनराहुः—न ग्राह्यग्राहकरूपोभयसम्पत्तेरेकस्य कर्मत्वं कर्तृत्वं च युगपदात्मनो मन्यामहे किन्तु चितिशक्तिस्वभावमपरसाधनमपरोक्षमात्मतत्त्वं प्रचक्ष्महे न ह्यात्मा जन्येन(२) ज्ञानेन घटादिरिव प्रकाशतेऽपि तु स्वत एव प्रकाशते। चेत-

---

(१) 'अनुपाधिकम्' इति ख०पु०पा० । उपाधिकृतमिति तु युक्तः प्रतिभाति ।

(२) 'अन्यजन्येन' इति ख० पु० पाठः ।

नत्वमपि तस्य नैसर्गिकमेव न करणोपजनितचितियोगनिबन्धनम्, चिद्योगाद्धि चेतनत्वे घटादावपि तत्प्रसङ्गो न चास्ति नियमहेतुरनेककारकपरिघट्टिततनुरपि चितिरात्मानमेव ज्ञातारं करोति न कारकान्तरमिति, तस्मात्स्वत एव चित्स्वभावताऽस्य भद्रिका, तदिदमात्मप्रकाशनं संविद्वदवगन्तव्यम्, यदाहुः 'संवित्संवित्तयैव संवेद्या न वेद्यतये'ति । नास्याः कर्मभावो विद्यत इत्यर्थः एवमात्मा ग्राहकतयैव प्रकाशते न ग्राह्यतयैवेति तद्द्वैरूप्यस्य चोदनमनुपपन्नमिति,

एतदपि न चतुरश्रम्—अपरसाधनमिति कोऽर्थ उपायान्तरनिरपेक्षमेव प्रकाशमानमात्मतत्त्वमास्त इति, तदयुक्तमकरणिकायाः प्रतीतेरदृष्टत्वाद्, अपूर्वं च तत्किमपि यथाऽभ्युपगतं प्रमाणातिरिक्तमेव प्रमाणं स्याद्, न च नियमकारणमत्र पश्यामः तथा प्रकाशमानः स एवात्मा प्रकाशते न परात्मेति, प्रकाशमानत्वेनात्मनो नूनमनुभूयमानता वाच्याऽनुभूयमानता चानुभवकर्मत्वमितरथाऽस्याः प्रत्यक्षतैव न स्यात् ।

अथोच्यते—न प्रत्यक्ष आत्मा किं त्वपरोक्षइति नेदमर्थान्तरवचनं शिशव एवं प्रतार्यन्ते न प्रामाणिकाः, प्रत्यक्षश्च न भवत्यपरोक्षश्च भवतीति चित्रम् प्रत्यक्षज्ञानकर्मत्वमस्य नास्तीति चेत्, तर्ह्यपरोक्षत्वमपि मा भूत् । प्रकाशत्वादपरोक्षत्वमिति चेन्न, दीपादेः प्रकाशस्याप्यन्धादिभिरगृह्यमाणस्य प्रकाशमानत्वायोगात्तस्मात्प्रकाशते चिदात्मा नूनमनुभूयेतापीति बलात्कर्मत्वमपरिहार्यमतश्च तदवस्थैव द्वैरूप्यचोदना, प्रकाशज्ञानपक्षं च प्रतिक्षेप्स्यामः, स चात्मन्यपि तुल्यो न्यायः, कल्पनाद्वैरूप्यं च भवतामात्मा च स्वप्रकाशः संविच्च स्वप्रकाशेति, न च निपुणमतिरपि विवेकमीदृशमुपदर्शयितुं शक्नोति भवान् इयं स्वप्रकाशा फलरूपा संविद्, अयं स्वप्रकाशो ज्ञातृरूप आत्मेति चित्रं चेदं यत्तयोर्द्वयोः प्रकाशयोरन्तराले तद्व्यापारः परोक्षज्ञानाख्यः संपन्न इति,

ननु घटमहं जानामीत्यत्र त्रयप्रतिभासो घटमिति विषयः प्रकाशते; अहमित्यात्मा; जानामीति संविदिति, उक्तमत्र घटं जानामीति ज्ञानविशेषणविषयप्रतिभासः, अहमिति तु शरीरे ज्ञातृत्वभ्रम एकस्यात्मनो ग्राह्यग्राहकत्वानुपपत्तेः–

यदपि स्वतश्चेतनस्वभावत्वमात्मनः कथ्यते तदपि न सोपपत्तिकम्,

सचेतनश्चिता योगात्तद्योगेन विना जडः ।
नार्थावभासादन्यद्धि चैतन्यं नाम मन्महे ॥

यदि च स्वत एवार्थावभाससामर्थ्यपक्षे च सर्वस्य सर्वज्ञताऽऽपत्तिरतोऽवश्यं ज्ञानसमवायनिबन्धनमेवात्मनश्चेतयितृत्वं, न च घटादिभिरतिप्रसङ्ग आशङ्कनीयः, पदार्थस्वभावोपनतस्यैव क्रियावैचित्र्यस्य सर्वलोकप्रसिद्धत्वाच्चेतनादिक्रियाः कर्मसमवायिन्यो न भवन्ति गमनादिक्रियास्तु कर्तृसमवायिन्य एव न च वस्तुशक्तिरनुयोज्या भवति,

न जडत्वाविशेषेऽपि कर्मादौ समवैति चेत् ।
न द्रव्यत्वाविशेषेऽपि गन्धः स्पृशति पावकम् ॥

तस्मान्न प्रत्यक्ष आत्मा नापि स्वतश्चेतयितेति स्थितम् ।

नैयायिकमतेनात्मनः प्रत्यक्षत्वोपपादनम्–

स्वयूथ्यास्तु केचिदाचक्षते—यदेकस्य कर्तृत्वकर्मत्वमनुपपन्नमित्यप्रत्यक्ष-आत्मेष्यते तदयमनुमानेनापि कथं ग्रहीष्यते ?

आत्मानमात्मनाऽऽत्मैव लिङ्गादनुमिनोति हि ।
तत्र नूनमुपेतव्या कर्तृता कर्मताऽस्य च ॥
तत्रानुमानज्ञानस्य यथाऽऽत्मा याति कर्मताम् ।
तथाऽहंप्रत्ययस्यैव प्रत्यक्षस्यापि गच्छतु ॥
देहादिव्यतिरिक्तश्च यथा लिङ्गेन गम्यते ।
तथाऽहंप्रत्ययेनापि गम्यतां तद्विलक्षणः ॥

न चात्मनः किं रूपं यत्प्रत्यक्षेण साक्षात्क्रियते ? यद्येवं सुखादेरपि किं रूपं-यन्मानसप्रत्यक्षसमधिगम्यमिष्यते ?

नन्वानन्दादिस्वभावरूपं प्रसिद्धमेव सुखादेः, तर्हि तदाधारत्वमात्मनोऽपि रूपमवगच्छतु भवान्,

सुखादि चेत्यमानं हि स्वतन्त्रं नानुभूयते ।
मतुबर्थानुवेधात्तु सिद्धं ग्रहणमात्मनः ॥
इदं सुखमिति ज्ञानं दृश्यते न घटादिवत् ।
अहं सुखीति तु ज्ञप्तिरात्मनोऽपि प्रकाशिका ॥

अपि च—

ज्ञातृज्ञानविशिष्टार्थग्रहणं किल भाष्यकृत् ।
स्वयं प्रादीदृशत्तच्च किं वा युक्तमुपेक्षितुम् ॥
विशेष्यबुद्धिमिच्छन्ति नागृहीतविशेषणाम् ।
पूर्वं चाननुभूतस्य स्मरणं नावकल्पते ॥
न चानुमानतः पूर्वं ज्ञात्वाऽऽत्मानं विशेषणम् ।
तद्विशिष्टार्थबुद्धिः स्यात् स्मरणानवधारणात् ॥

तस्मात्प्रत्यक्ष आत्मा ।

सामानाधिकरण्यं च स्मरणानुभवादिषु ।
अनुसन्धीयमानं यद्दृश्यते तत्कथं भवेत् ॥

आत्मनोऽनुमानगम्यत्वनिरूपणम्–

पूर्वमहममुमर्थमनुभूतवानहमेवाद्य पुनरनुभवामीति तुल्यविषयत्वावच्छु-स्यकर्तृकताऽपि तत्र प्रकाशते, इतरथा त्वनुमातुमप्यात्मा न शक्यते ।

ज्ञानेच्छासुखदुःखादि किलेदं लिङ्गमात्मनः ।
एकाश्रयतया ज्ञातमनुसंधातृबोधकम् ॥
तथात्वेन च तज्ज्ञानमाश्रयज्ञानपूर्वकम् ।
ज्ञाते तत्राफलं लिङ्गमज्ञाते तु न लिङ्गता ॥
तस्मात्प्रत्यक्ष एवात्मा वरमभ्युपगम्यताम् ।
वृद्धागमानुसारेण संविदालोकनेन च ॥
अथ वाऽभिनिवेशेन किमनेन प्रयोजनम् ।
अनुमेयत्वमेवास्तु लिङ्गेनेच्छाऽऽदिनाऽऽत्मनः ॥

तदाह सूत्रकारः–'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्'(१), इच्छा नाम तावदित्थमुपजायते यज्जातीयमर्थमित्थमुपयुञ्जानः पुरुषः पुरा सुखमनुभूतवान् पुनः कालान्तरे तज्जातीयमुपलभ्य सुखसाधनतामनुस्मृत्य तमादातुमिच्छति सेयमनेन क्रमेण समुपजायमानेच्छा पूर्वापरानुसंधानसमर्थमाश्रयमनुमापयति कार्यस्य निराधारस्यानुपपत्तेराश्रयमात्रप्रतीतौ चान्वयव्यतिरेकवानेव हेतुर्भवति, इच्छा धर्मिण्याश्रितेति साध्यो धर्मः कार्यत्वाद् घटादिवद् गुणत्वादिति वा हेतुर्वक्तव्यः, गुणत्वं चेच्छाऽऽदीनामचाक्षुषप्रत्यक्षत्वादिना रसादिवद्दर्शितमाचार्यैः(२), एवमन्वयव्यतिरेकवताऽमुना हेतुनाऽधिष्ठानमात्रेऽनुमिते तदधिष्ठानत्वे च देहेन्द्रियादौ प्रसक्ते पूर्वानुभूतसुखसाधनत्वानुसंधानसव्यपेक्षतदुत्पादनपर्यालोचनया तत्कार्यसमानकर्तृकत्वावगमाच्छरीरादिविलक्षणाश्रया(३), शरीरादिषु बाधकोपपत्तौ सत्यां कार्यत्वादित्यत्र च साधर्म्यदृष्टान्तो न संभवतीति वैधर्म्यदृष्टान्तः–कार्यत्वे निर्विशेषणे य एव साधर्म्यदृष्टान्तो घटः स एव वैधर्म्यदृष्टान्तः सविशेषणे, यत्र विलक्षणाश्रितत्वं नास्ति तत्र सविशेषणं कार्यत्वमपि नास्ति यथा घटादाविति तु शक्यते वक्तुम्, तत्र कार्यमात्रयोगेऽपि सविशेषणानां कार्यत्वाभावाद्विलक्षणाश्रितत्वं नास्ति भूताश्रितत्वेन प्रत्यक्षमुपलभ्यमानत्वात् ।

ननु चान्वयदर्शनमन्तरेण केवलव्यतिरेकः प्रतीयमानः संदिग्धो भवति किं तत्साध्याभावकृतैव तस्य तस्माद्व्यावृत्तिरुत निमित्तान्तरकृतेति, संदिग्धव्यतिरेकस्य हेतोरगमकत्वं निश्चितव्यभिचारहेतुवदिति तार्किकाः,

उच्यते–स्यादेतदेवं यदि प्रथममनवगतान्वय एव केवलव्यतिरेकशरणो हेतुः प्रयुज्यते, यतस्त्वन्वयव्यतिरेकताऽवकाशं लभते घटो हि भूतलाश्रितत्वेन प्रत्यक्षमुपलभ्यते तदस्य विशेषणाश्रयविरहादेव सविशेषणहेतुशून्यता जाता निर्विशेषणावस्थायां तद्योगदर्शनादिति न संदिग्धो व्यतिरेकः, अथ वा शरीरत्वं सामान्यमिह वैधर्म्यदृष्टान्तीकर्तव्यं, तत्र हि सर्वात्मना कार्यत्वस्पर्शोऽपि नास्ति

---

(१) गौतमसूत्रम् अ० १ आ० १ सू० १०॥
(२) वल्लभाचार्यैः। (३) इच्छेति शेषः ।

न च तद्विलक्षणाश्रितं ; शरीराश्रितत्वस्य प्रत्यक्षत उपलम्भादिति, तदियमिच्छा प्रथमपदार्थदर्शनादिकार्यसमानकर्तृकतयाऽवगम्यमाना शरीरादिविलक्षणमाश्रयमवगमयति सविशेषणात्कार्यत्वादिति स्थितम्, यश्च स विलक्षण आश्रयस्तत्रात्मसंज्ञाऽऽगमिकी,

एवमेव द्वेषादेरात्मलिङ्गता वक्तव्या, यज्जातीयस्यार्थस्य सन्निधानाद् दुःखमनुभूतवान् पुरुषः तज्जातीयमर्थं पुनरुपलभमानो दुःखसाधनतामनुसंधाय तं द्वेष्टीति सोऽपि प्रतिसंधातारमेकमन्तरेण नोपपद्यते, आभ्यामिच्छाद्वेषाभ्यामनन्तरं प्रयत्नः समुत्पद्यते सोऽपि यथोक्तेन क्रमेणानुसंधानपूर्वक एव प्रयतमानस्य सुखदुःखे भवतः, ते अपि तथैव द्रष्टव्ये, ज्ञानं यद्यपि प्रथममनुसंधाननिरपेक्षमपि भवति तदपि च शक्यत एवात्मलिङ्गमभिधातुं तथाऽप्यनुसंधानपूर्वेच्छाऽऽदिकार्यप्रकरणान्निर्णयात्मकमिह ज्ञानमुदाहर्तव्यं, तत्र हि बुभुत्साविमर्शादिपूर्वकत्वमुपकल्प्यते तदेवमिच्छाऽऽदीन्यात्मलिङ्गानीति स्थितम्,

शास्त्रे चानेकहेतूक्तिर्न दोषाय कथास्विव ।
शिष्यः कश्चित्क्व चित्किंचिदनुस्मृत्याभिधास्यति ॥

इति कारुणिको मुनिरनेकमिह हेतुमार्गमुपदिष्टवान्,

नन्वत्र चोदितमनुसंधातारमन्तरेण तदेतदिच्छाऽऽदिकार्यं नावकल्पत इति कथं ज्ञायते ? एकत्र प्रमातरि तद्दर्शनादिति यदुच्यते तदिदमेकप्रमातृग्रहणादात्मप्रत्यक्षत्वमङ्गीकृतं स्यादिति व्यर्थमनुमानम्; अग्रहणे तु प्रमातुरेकस्य तत्पूर्वकेच्छाऽऽदेः प्रतिबन्धाग्रहणादशक्यमनुमानमिति, परिहृतमेतत् कार्यत्वेनैव लिङ्गत्वमिच्छाऽऽदेरुपवर्णितमस्माभिर्न स्मरणादिसमानाश्रयतयेति, किमर्थस्तर्हि प्रतिसंधानोपन्यासः ? शरीरादिषु तदाश्रयत्वप्रतिषेधार्थः, न त्वेवं व्याख्यातवन्तो वयमेकस्य प्रमातुरिच्छाऽऽदिकार्याश्रयत्वदर्शनादेकाश्रयत्वानुमानमिति तस्मान्न दोषः, शरीराश्रयत्वप्रतिषेधसाधनत्वेऽपि हेतोर्व्याप्तिग्रहणासम्भवाद्, ग्राहक(१)बुद्धिदर्शनस्मरणेच्छाऽऽदिकार्यजातमेकत्र प्रमातृनियततयाऽनवधारितम्, तत्कथमस्मदवस्थाऽऽदिभिन्नशरीराद्याश्रयत्वनिषेधस्य तत्पूर्वकस्य वाऽऽत्माश्रितत्वस्य सिद्धिः,

क एवमाह न गृहीतमेककर्तृकतया कार्यमिच्छाऽऽदीति, ? यदि गृहीतं तर्हि वक्तव्यं क गृहीतं केन वा प्रमाणेन गृहीतमिति ? स्वात्मन्येवेति चेत्सोऽयं प्रत्यक्ष आत्मा भवेद् एवमनभ्युपगमे न व्याप्तिग्रहणमिति,

उच्यते—न च प्रत्यक्ष आत्मा न च व्याप्तेरग्रहणं न चैव धर्म्यन्तरे व्याप्तिर्गृह्यते किं तु स्वसंतान एव तथाऽपि न सिद्ध्यति प्रमातृनियतानुमानं; कथमिव सिद्ध्यति संतानान्तरेषु प्रतिसंधानस्य दृष्टत्वात्,

---

(१) 'ग्राहक' इत्यस्य स्थाने 'यावद्' इति क० पु० पा० ।

किं च काऽत्र व्याप्तिग्रहणकालः प्रमातृवद्धि तद्भेदेन भवितव्यं, ततः किम् ? इदं ततो भवति कथं स्वसंतान एव व्याप्तिर्गृह्यतां कथं च तत्रैव प्रमातृनियमाऽनुमीयतामिति सेयमुभयतः पाशा रज्जुः; आत्मा वा प्रत्यक्षो व्याप्तिर्वा दुरवगमेति, नैतदेवं, यथा शाक्यपक्षे सत्त्वात्क्षणिकत्वानुमाने व्याप्तिग्रहणं तथेहापि भविष्यति, तत्र हि यैव क्रमयौगपद्यव्यावृत्त्या सत्त्वस्य नित्येभ्यो व्यावृत्तिः स एव क्षणिकैरन्वय इति धर्म्यन्तरनिरपेक्षतयैव साध्येऽपि धर्मिणि प्रतिबन्धग्रहणं चानुमानं च दर्शितं, तद्वदिहाप्येकप्रमातृपूर्वकत्वेन प्रतिसंधानस्य धर्म्यन्तरे यद्यपि ग्रहणं नास्ति तथाऽपि संतानान्तरभेदे यदस्य दर्शनं तदेवैककर्तृकत्वदर्शनमिति कोऽनयोर्हेतुत्वे विशेषः,

ननु तत्र (१)चित्येभ्यः क्रमयौगपद्यव्यावृत्त्या व्यावृत्तं सत्त्वं शक्यग्रहणमिह तु प्रमातृभेदेन प्रतिसंधानव्यावृत्तिर्दुरवगमा स्वसंतानेऽपि ज्ञानक्षणा भिन्ना एव प्रमातारः, न च तेभ्यो व्यावृत्तं प्रतिसंधानमिति, तिष्ठत्वन्वयो व्यतिरेकमुखेनापि कष्टमिदमनुमानं वर्तते स्वसंताने संतानान्तरवत्प्रमातृभेदाग्रहणात् तद्भेदग्रहे हि स्वसन्तानविवेको न स्यान्न चैवं प्रमातृभेदाग्रहणाभावात्पुनरप्यात्मा प्रत्यक्ष आयातः,

मैवम्—नात्मा प्रत्यक्षः प्रमातृभेदो हि स्वसंताने न गृह्यते, अन्यच्च भेदाग्रहणमन्यच्च तदैक्यग्रहणं भेदाग्रहवदेव च व्याप्तिसिद्धेर्न कष्टमनुमानम्,

ननु च स्वसन्ताने प्रमातृभेदाग्रहणं किं प्रमातुरेकत्वादुत ज्ञानानां कार्यकारणभावादिति न निश्चीयते ततश्च संदिग्धो व्यतिरेकः यथा ज्ञानानां कार्यकारणभावो नास्ति यथा च न तत्कृतोऽयं व्यवहारस्तथाऽनन्तरमेव वक्ष्यामः, तस्मादिच्छाऽऽदिकार्येण युक्तमेकप्रमात्रनुमानम्,

> ननु चाश्रितमिच्छाऽऽदि देह एव भविष्यति ।
> भूतानामेव चैतन्यमिति प्राह बृहस्पतिः ॥

उक्तं च मदशक्तिवद्विज्ञानमिति, उच्यते—शरीरं तावन्नेच्छाऽऽदेराश्रयः शैशवयौवनवार्धकादिदशाभेदेन भिन्नत्वात्,

> तथा हि नान्यदृष्टोऽर्थः स्मर्तुमन्येन शक्यते ।
> न चान्येन स्मृते तस्मिन्नन्यस्येच्छोपजायते ॥
> तेनाद्यादर्थविज्ञानात्प्रभृतीच्छासमुद्भवात् ।
> एकस्य कार्यचक्रस्य वक्तव्यः कश्चिदाश्रयः ॥

शरीरं च बाल्याद्यवस्थाभेदेन भिन्नमतस्तस्य नाश्रयो भवितुमर्हति सन्तानान्तरवद् यथा हि देवदत्तदृष्टेऽर्थे यज्ञदत्तस्य न स्मरणमेवं बालशरीराद्यनुभूते युवशरीरस्य तन्न स्यात्,

---

(१) 'चित्येभ्यः' इत्यत्र 'नित्येभ्यः' इति० क० पु० पा० ।

नन्ववस्थामात्रमेव भिन्नमवस्थातृशरीरस्वरूपमभिन्नमेव प्रत्यभिज्ञाप्रत्ययप्रामाण्यादवगम्यते, न चेयं प्रत्यभिज्ञा लूनपुनर्जातनखादिप्रत्यभिज्ञावदन्यथासिद्धा विनाशस्यासम्भवात्, स्तम्बादौ हि क्षणभङ्गित्वप्रतिषेधः प्रत्यभिज्ञयैव करिष्यते सा चेहापि तादृश्येव, तदयुक्तम्–स्तम्बादौ नानात्वकारणाग्रहणाद् इह तु रूपपरिमाणपरिवेशाद्यन्यत्वदर्शनात्सादृश्यनिबन्धनेयं भ्रान्तिरेव प्रत्यभिज्ञा न खलु शिशुशरीरे तरुणशरीरे जरच्छरीरे च तुल्यमेव परिमाणाद्युपलभ्यते,

आहारपरिणामाच्च देहभेदोऽवगम्यते ।
पाकजोत्पत्तिमार्गेण न जीर्येतान्नमन्यथा ॥
न भवेत्परिपोषो हि दधिक्षीरादिभक्षणे ।
काञ्चनाद्युपयोगेन दृश्यते तस्य रक्तता ॥
क्षीणैरवयवैः कैश्चित्कैश्चित्त्वभिनवोद्गतैः ।
अभिन्न एवावयवी कथं भवितुमर्हति ॥

तथा च केचित्पच्यमानस्य घटादेरपि प्रागवस्थाविसदृशरूपादियोगिनः पाककारणभूतवेगवदग्निद्रव्यसंयोगपर्यालोचनयैव प्रलयोदयौ कल्पितवन्तः ।

पीलुपाकवादिमतम्–

यद्यपि कन्दुकनिक्षिप्ता घटादयः तृणपर्णादिपिहितवपुषोऽपि तद्विवरप्रसृतेन नयनरश्मिना न विनष्टा इत्युपलभ्यन्ते, यद्यपि तत्संख्या तत्परिमाणं तत्सन्निवेशास्तद्देशाश्च पक्वा अपि दृश्यन्ते यद्यपि ततो विभक्ता न विभाव्यन्ते; ततः तेषांकर्त्रादिकारणकलापासंभवात्पुनर्घटनमघटमानमिव लक्ष्यते; तथाऽपि तेषामनुमानेन विनाशः परिकल्प्यते, सर्वावयवेष्वन्तर्बहिश्च पाकपूर्वकपूर्वरूपादिविलक्षणगुणोपलब्धेरन्तः प्रवेशः कृशानोरनुमीयते, तेन वेगवता वह्निद्रव्येण नोदनादभिघाताद्वा नूनं घटाद्यारम्भकेष्ववयवेषु क्रिया जायते क्रियातो विभागः विभागाद् द्रव्यारम्भकसंयोगविनाशस्तद्विनाशाद् द्रव्यविनाश इति, अनुप्रवेशपक्षेऽपि सूक्ष्मविवरपरिकल्पनादवश्यमवयवसंयोगविघटनं घटादेरिति विनाश एव, अपि च पाकानन्तरं कन्दुकादपकृष्यमाणाः पिठरादयः केचित्स्फुटिताः केचिद्वक्रतां गताः केचित्संनिवेशान्तरमेव प्रतिपन्ना दृश्यन्ते तस्मादपि पश्यामो नश्यन्तीति, तत्संख्यत्वादिति सर्वमनैकान्तिकं सूक्ष्मप्रविद्धकण्ठकोणैः कुम्भादिभिः, पूर्वोक्तनीत्या नष्टेषु घटादिकार्यद्रव्येषु परमाणव एव पच्यन्ते, पक्वाश्च श्यामादिगुणानवजहतो रक्तादिगुणान्तरयोगमनुभवन्तः प्राणिगतसुखदुःखोपभोगसाधनभूतादृष्टप्रेर्यमाणाः परस्परं संयुज्य द्व्यणुकादिप्रक्रमेण तादृशमेव घटादिकार्यमारभन्ते तत्रामुष्मिन्क्षणेऽमुष्य कार्यस्य प्रसवोऽमुष्य प्रलय-इति प्रक्रिया न लिख्यते ग्रन्थविस्तरभयादप्रयोजनत्वाच्चेति, एवं तपनातपदृश्यमानेष्वाम्रादिफलेष्वेष एव न्यायः, शरीरेऽप्युदर्येण तेजसा पच्यमाने-

ष्वन्नपानादिषु रसमलधातुभावेन परिणाममुपगच्छत्सु प्रायेण प्रतिक्षणमुत्पाद-विनाशौ सम्भवत इति स्थैर्याभावात्कथमनुसन्धानादिकार्ययोगोऽस्येति ।

पिठरपाकवादिमतम्—

अपरे—पुनः प्रत्यक्षबलवत्तया घटादेरविनाशमेव पच्यमानस्य मन्यन्ते सुषिरद्रव्यारम्भाच्चान्तर्बहिश्च पाकोऽप्युपपत्स्यते दृश्यते च पक्वेऽपि कलशे निषिक्तानामपां बहिः शीतस्पर्शग्रहणमतश्च पाककाले ज्वलदनलशिखाकलाऽनुप्रवेशकृतविनाशबलादपि शिशिरतरनीरकणनिकरानुप्रवेशकृतनाशप्रसङ्गः, न चेदृशी प्रमाणदृष्टिरतः प्रकृतिसुषिरतयैव कार्यद्रव्यस्य घटादेरारम्भादन्तरन्तस्तेजःकणानुप्रवेशकृतपाकोपपत्तेरलं विनाशकल्पनया पिठरपाकपक्ष एव पेशलः,

यादृगेव हि निक्षिप्तो घटः पाकाय कन्दुके(१) ।
पाकेऽपि तादृगेवासावुद्गतो दृश्यते ततः ॥

क्वचित्तु संनिवेशान्तरदर्शनं काष्ठाद्यभिघातकृतमुपपत्स्यते पावकसंपर्कस्य तत्कारित्वे तु सर्वत्र तथाभावः स्यात्, तस्मादविनष्टा एव घटादयः पच्यन्ते सोऽयं तु घटादिन्यायः शरीरे नेष्यते,

न ह्यन्नपाकस्थैर्येऽपि तत्र कुम्भादिपाकवत् ।
चयापचययुक्तं हि शरीरमुपलभ्यते ॥

तस्मात्परिमाणादिभेददर्शनान्नैकं शरीरमिति ज्वालाऽऽदिप्रत्यभिज्ञावत्तत्प्रत्यभिज्ञेति स्थितम् ।

यदप्युच्यते—अवस्थानामेव नानात्वमवस्थाता पुनरेक एव देहाख्य इति तदप्ययुक्तम्, भेदाभेदविकल्पानुपपत्तेः, यदि शरीराद्व्यतिरिक्ता एव तदवस्थाः तदाऽवस्थानामप्यन्योन्यं भेदो न स्याद्, अथ व्यतिरिक्ताः शरीरादवस्थाः तर्हि भेदेन तदुपग्रहो दर्शयितव्यः, न चासावस्ति गोत्वादावनुवृत्त्या बुद्धिरनन्यथासिद्धा सती न केन चित्प्रतिहन्यते, इह पुनरवस्थान्तरैकत्वग्राहिणी बुद्धिः पूर्वनीत्या प्रमाणबाधितत्वाद् भ्रान्तेति, तस्माच्छरीरस्य भिन्नत्वात्संतानान्तरवत् स्मृत्यनुसंधानादिकार्ययोगो दुर्घट इति न तस्येच्छाऽऽदिकार्याश्रयत्वम्, इतश्च न शरीरस्य ज्ञानादियोगः परिणामित्वात्क्षीरादिवत् रूपादिमत्त्वात्तद्वदेव, अनेकसमूहस्वभावत्वात् त्रिदण्डादिवत् सन्निवेशविशिष्टत्वाच्च बाह्यभूतवत्, चैतन्यशून्यं शरीरं शरीरत्वान्मृतशरीरवत्, न शरीरधर्मश्चैतन्यमयावद्द्रव्यभावित्वात्, न च कण्डूवादिभिर्व्यभिचारः तदुपजनापाययोर्निमित्तान्तरजन्यत्वदर्शनादिह च तदभावाद्विशेषगुणत्वे सतीति वा विशेषणोपादानान्न व्यभिचारः, तद्विशेषगुणत्वे हि चैतन्यस्य रूपादिवत्तदवस्थानादविनाशप्रसङ्गः ।

---

(१) कन्दुकम्—'पजावा' इति प्रसिद्धः ।

यत्तु मदशक्तिवदित्युक्तम् तत्र मदशक्तेर्दृष्टत्वादभ्युपगमो न ज्ञानस्य तत्र दर्शनम् ।

भूतचैतन्यवादनिरासः–

ननु ज्ञानमपि तदन्वयव्यतिरेकानुविधायि प्रायेण दृश्यते भूतेष्वन्नपानादद्युपयोगपुष्टेषु पट्वी चेतना भवति तद्विपर्यये विपर्ययः, ब्राह्मीघृतादद्युपयोगसंस्कृते च कुमारशरीरे पटुप्रज्ञता जायते, वर्षासु च स्वेदादिनाऽतिदवीयसैव कालेन दध्याद्यवयवा एव चलन्तः पूतनादिक्रिमिरूपा उपलभ्यन्ते, चैतन्यगुरुलाघवव्यवहारोऽपि भूतातिशयसदसत्त्वकृतो भविष्यतीति भूतचैतन्यवादपक्ष एव युक्तियुक्तो लक्ष्यते,

नैतच्चारु--चेष्टेन्द्रियार्थाश्रयः शरीरं(१) वक्ष्यते तत्र तदनुग्रहादिन्द्रियानुग्रहे सति पटुकरणत्वाद्विषयग्रहणपाटवं, न हि विषयग्रहणादन्यच्चैतन्यं नाम, एतेन ब्राह्मीघृतोपयोगोऽपि व्याख्यातः, व्यापकत्वादात्मनः सर्वत्र भावे सति भोगायतनत्वेन कदा चित्केषां चिद् भूतावयवानां समुपादानतः शुक्रशोणितादिवद्दध्यवयवान्विकृतानुपादास्यते तथा च स्वेदजादिभेदे बहुभेदो भूतसर्गः प्रवर्त्तते विचित्रकर्मपरिपाकापेक्षयेति यत्किंचिदेतत् , तस्मान्न सर्वथा भूतानां चैतन्यमिति सिद्धम् ।

इन्द्रियचैतन्यवादनिरासः–

नापीन्द्रियाणि यथोक्तस्य ज्ञानादेः कार्यस्याश्रयतां प्रतिपद्यन्ते दर्शनस्पर्शनाभ्यामेकार्थग्रहणाद्(२) यमर्थमद्राक्षं चक्षुषा तमेवैतर्हि स्पर्शनेन स्पृशामि यमस्प्राक्षं स्पर्शनेन तमधुना चक्षुषा पश्यामीति कतरदिन्द्रियमेवमनुसन्दधीत न चक्षु स्पर्शाविषयत्वात् , न त्वगिन्द्रियं रूपाविषयत्वात्तस्मादुभयविषयग्रहणसमथः कश्चिदनुसंधाताऽस्तीति स इन्द्रियव्यतिरिक्तो गम्यते,

अमुनैव प्रसङ्गेन रूपादिव्यतिरेकिणः ।
वक्तव्या गुणिनः सिद्धिरेतद्बुद्धिनिबन्धना ॥
रूपादिषु स्वतन्त्रेषु न ह्येष प्रत्ययो भवेत् ।
न रूपमस्य विषयो न स्पर्शो न च तद् द्वयम् ॥

अतश्च न गुणव्यतिरिक्तो गुणी भेदेनाग्रहणादित्यसिद्धः परोक्तो हेतुः भेदग्रहणस्य दर्शितत्वात् , वृत्तविकल्पादीनां तु प्रतिसमाधानं सामान्यसमर्थनावसरे कथितमवयविसिद्धौ वक्ष्यते चेत्यलमवान्तरचिन्तया, इतश्च नेन्द्रियाणां चैतन्यं करणत्वाद्वास्यादिवत्, भौतिकानि चेन्द्रियाणि वर्णयिष्यामः, तेन य एष भूतचैतन्यनिराकरणे न्यायो वर्णितः स तेष्वपि योजनीयोऽतश्चैवमिन्द्रियान्तरविकारात् ,(३)

---

(१) गौतमसूत्र अ० १ आ० १ सू० ११ ।
(२) गौ० सू० अ० ३ आ० १ सू० १ (३) गौ० सू० अ० ३ आ० १ सू० १२

आम्रे हि चक्षुषा दृष्टे रसनिष्यन्दसुन्दरे ।
रसनस्य विकारः स्यान्नु दन्तोदकविप्लवः ॥
बहूनामिन्द्रियाणां च भिन्नाभिप्रायता भवेत् ।
तेनैकत्रैव सन्ताने नानाचेतनता भवेत् ॥

अतितुच्छश्चायमिन्द्रियचैतन्यपक्ष इति किमत्र बहु लिख्यते ।

मनश्चैतन्यवादनिरासः—

ननु मनस्तर्हीच्छाऽऽदेरधिष्ठानं भविष्यति तद्धि नित्यमेकं सर्वविषयमभौतिकमिति न प्राक्तनदोषैः स्पृश्यते ? उच्यते—मनसोऽपि तदाश्रयत्वमनुपपन्नं, कुतो ? ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् मनसो हीच्छाऽऽद्याश्रयत्वे ज्ञानादौ कर्तृत्वात्तस्यापि बाह्यगन्धादिविषयज्ञानायौगपद्यानुपपत्तेस्तद्ग्रहणे घ्राणाद्यधिष्ठानपटुना केन चिदान्तरसुखदुःखादिविषयग्राहिणा स्मृत्यादिक्रियाकारिणा च करणेन भवितव्यमिति तत्रात्मसंज्ञा भवेदात्मनि च कर्तरि मनः संज्ञेति,

न चास्य बाह्यकरणैः सिध्यन्ति सकलाः क्रियाः ।
न च स्मृतिसुखेच्छाऽऽदौ (१)शक्ताः स्युश्चक्षुरादयः ॥

चैतन्याश्रयतयाऽऽत्मनः साधनम्—

तेनेच्छासुखकृतिदुःखवेदनानामाधारो न खलु मनो न चेन्द्रियाणि ।
देहोऽपि व्रजति न तत्समाश्रयत्वं तेनान्यं पुरुषमतः प्रकल्पयामः ॥

दिक्प्रदर्शनमिदं कृतमिच्छाद्वेषयत्नसुखदुःखमतीनाम् ।
लिङ्गताकथनमात्मनि तत्र त्वस्ति हेतुनिवहो बहुरन्यः ॥
कर्तृप्रयोज्यता खलु दृष्टा दात्रादिकरणजातस्य ।
त्वक्श्रोत्राद्यपि करणं तथैव कर्त्रा प्रयुज्येत ॥
हिताहितप्राप्तिविमर्शयोग्या चेष्टा च दृष्टा नियता शरीरे ।
तच्चेतनाधिष्ठिततामुष्य गन्त्रीरथादेरिव कल्पयामः ॥
प्राणादिमारुतानामन्तश्चलतां चलाचलगतीनाम् ।
सहजनिजकर्मविकृतौ कारणमनुमीयते किञ्चित् ॥
इदं च देहादितरत्र दुर्लभं निरीक्ष्य वृद्धिक्षतभग्नरोहणम् ।
ध्रुवं ग्रहस्येव गतिः प्रकल्पते निजाश्रमक्षेमपरायणो नरः ॥

युक्तं च नैवं मनसा ह्यनधिष्ठितानां स्वार्थप्रमाकरणकौशलमिन्द्रियाणाम् ।
स्यात्कश्चिदिष्टविषयानुगुणप्रयत्नो यत्प्रेरितं सदधितिष्ठति तानि चेतः ॥

ज्ञानप्रयत्नादिमतोऽथ कस्य दृष्टान्तता स्यात्करणादिलिङ्गे ।
कार्यं च नः पर्यनुयोग एष सामान्यमात्रस्य तवापि सिद्धेः ॥

---

(१) 'शक्तानिचक्षुरादीनि' ख० पु० पा० ।

प्रत्यक्षादिप्रमाणैर्यो व्यवहारः स चात्मना ।
विना नित्येन नेत्येवं ततस्तस्य प्रकल्पनम् ॥
यत्प्रत्यक्षं प्रत्यभिज्ञास्वभावं ज्ञात्रन्यत्वेत्तस्य न ह्यात्मलाभः ।
ग्राह्यस्यैक्यं यद्वदर्थस्य तस्मात्सिद्ध्यत्येवं ग्राहकस्यापि पुंसः ॥
अविनाभावग्रहणं लिङ्गज्ञानं तदन्वयस्मरणम् ।
लिङ्गिप्रमितिरितीदं न बोद्धृभेदेऽनुमानं स्यात् ॥
ज्ञाते वनेचरमुखादतिदेशवाक्ये दृष्टे मृगे विपिनवर्त्तिनि गोसदृक्षे ।
तत्संज्ञतामितिफलं लभते प्रमातृभेदे न चेद मुपमानमितिप्रतिष्ठम् ॥
वर्णानां श्रवणं क्रमेण समयस्मृत्या पदार्थग्रह-
स्तत्संस्कारजमन्त्यवर्णकलनाकाले तदालोचनम् ।
आकाङ्क्षादिनिबन्धनान्वयकृतं वाक्यार्थसम्पिण्डनं-
ज्ञात्रैकेन विनाऽतिदुर्घटमतो नित्यात्मसिद्धिर्ध्रुवम् ॥
मयेदं पूर्वेद्युर्विहितमिदमन्येद्युरपरं विधातव्यं चेति श्रुतिकृषिवणिज्यादिषु जनाः ।
यदेवं चेष्टन्ते निपुणमनुसन्धाय तदमी ध्रुवं सर्वावस्थानुगतमवगच्छन्ति पुरुषम् ॥
इत्यादि लक्षणमवादि तदेतदिच्छाद्वेषप्रयत्नसुखदुःखसमाश्रयत्वम् ।
तत्सङ्गिनं तदिह हेयतया व्यवस्येत्तद्विप्रयुक्तमधिगम्यतया मुमुक्षुः ॥

विज्ञानात्मवादिनः पूर्वपक्षः—

अथो तथागताः प्राहुः किं पुंसा कल्पितेन वा ।
ज्ञानमात्रेण पूर्वोक्तो व्यवहारोऽवकल्पते ॥
ज्ञानं किमात्मवन्नित्यं सौगतैरुपगम्यते ।
प्राग्दर्शितानुसन्धानस्मरणादिक्रियाक्षमम् ॥
ज्ञानं बौद्धगृहे तावत्कुतो नित्यं भविष्यति ।
अन्येऽपि सर्वे संस्काराः क्षणिका इति गृह्यताम् ॥
क्षणिकं चेष्यते कार्यं न क्वचित्किञ्चिदाश्रितम् ।
स्वतन्त्रं ज्ञानमेवातो नान्यस्तेनाऽनुमीयते ॥
ज्ञानस्यैव प्रभेदोऽयमिच्छाद्वेषसुखादिकः ।
न वस्त्वन्तरमित्येवं न ततोऽप्यन्यकल्पनम् ॥
गुणत्वमपि नास्त्यस्य यतोऽधिष्ठानकल्पना ।
न गुणव्यतिरिक्तश्च गुणी नामास्ति कश्चन ॥
निराश्रयेषु विज्ञानस्कन्धेषु क्षणभङ्गिषु ।
कथं स्मृत्यादि कार्यं वा परलोकोऽपि वा कथम् ॥

सत्यपि वा परलोके कथमकृताभ्यागमकृतविप्रणाशौ पराक्रियेते, येन हि

ज्ञानेन चैत्यवन्दनादि कर्म कृतं तस्य विनाशान्न तत्फलापभोगो, यस्य च फलोपभोगः तेन न तत्कर्म कृतमिति, नैष दोषः—कार्यकारणभावस्य नियामकत्वादनादिप्रबन्धप्रवृत्तो हि ज्ञानानां हेतुफलभावप्रवाहः, एष एव च सन्तान इत्युच्यते, तत्कृतश्चायमनुसंधानादिकार्यनियमः, सन्तानानादित्वादविच्छेदाच्च परलोकोऽपि न क्लिष्टकल्पनः, यद्यपि च सन्तत्यन्तरपतितज्ञानजन्यमपि सन्तत्यन्तरे ज्ञानं दृश्यते तथाऽपि न तादृशः कार्यकारणभावेन सन्तानव्यवहारः प्रतिसन्धानादिकार्यनिर्वाहो वा किन्तूपादानरूपतद्विशेषणनिबन्धन एवैष निर्वहति नियमः, तस्मिन्नेव सति स्वरूपसन्तानविभागोऽवकल्पते,

स्मृतिवत्परिहर्त्तव्यौ कृतनाशाकृतागमौ ।
तत्सन्तानोपसंक्रान्त्या कुसुमे बीजरागवत् ॥

आह च—

यस्मिन्नेव च सन्तान आहिता कर्मवासना ।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा ॥

नित्यस्त्वात्माऽभ्युपगम्यमानो यदि सुखादिजन्मना विकृतिमनुभवति तदयं नित्य एव धर्मादिवदुक्तः स्यात्, निर्विकारत्वे तु सताऽसता वा सुखदुःखादिना कर्मफलेन कस्तस्य विशेष इति कर्मवैफल्यमेव, तदुक्तम्—

वर्षातपाभ्यां किं व्योम्नः चर्मण्यस्ति तयोः फलम् ।
चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्समः ॥ इति ।

तस्मादुत्सृज्यतामेष मूर्धाभिषिक्तो प्रथमो मोहः आत्मग्रहो नाम, तन्निवृत्त्या चात्मीयग्रहोऽपि विरंस्यति अहमेव न किं ममेति, तदिदमहंकारममकारग्रन्थिप्रहाणेन नैरात्म्यदर्शनमेव निर्वाणद्वारमालम्ब्यताम्, तस्य च मार्गः क्षणिकपदार्थनिश्चयः, क्षणिकेषु हि सर्वभावेषु निराश्रयेषु ज्ञानस्याप्याश्रयविरहात्कुतस्त्यमात्मकल्पनमिति ।

सर्वभावानां क्षणिकत्वम्—

कथं पुनरेष सकलप्रमाऽतीतः क्षणिकपदार्थवादः शक्यते शाक्यैरभ्युपगन्तुम्?

न खलु क्षणभङ्गित्वे भावानामक्षजा मतिः ।
न भूमिरनुमानस्य विकल्पनियतस्थितेः ॥
स्मरणप्रत्यभिज्ञाने प्रत्युत स्थैर्यसाधके ।
एवं च वञ्चनामात्रमाशुनाशित्वदेशना ॥

उच्यते—प्रत्यक्षगम्यं क्षणिकत्वं भवति न भवत्येष करिष्यते विचारः, अनुमानं तु संप्रत्येवमभिधीयते—सत्त्वात्क्षणिकाः पदार्था इति, सत्त्वं तावदर्थक्रियाकारित्वमुच्यते, यथाऽर्थमर्थक्रियासमर्थं यत्तदेव परमार्थसदिति, सत्प्रत्य-

यगम्यत्वे हि सत्त्वे (१)केशोण्डुकादेरपि सत्त्वप्रसङ्गः, सत्तासंबन्धे सत्त्वे सामान्यादीनां तदसंबन्धादसत्त्वं स्याद्, अर्थक्रियासामर्थ्यसत्त्वानुवर्त्ती च लौकिको व्यवहारः सत्यपि पुत्रे तत्कार्यादर्शनादपुत्रा वयमिति व्यपदिशन्ति लौकिकाः, पुत्रादन्यस्मिन्नपि तत्कार्यकारिणि सति सपुत्रा वयमिति च ब्रुवते, तस्मादर्थक्रियाकारित्वमेव सत्त्वम्, भवत्वेवं-तस्य तु कुत्र कथं वा क्षणिकत्वेन व्याप्तिग्रहणम्? कुत्रेति यत्पृच्छसि यत्र रोचते महाभागाय घटे पटे वा गृह्यतां व्याप्तिः, किं साध्यधर्मिण्येव व्याप्तिग्रहणमुपपद्यते? धीमन्! कोऽत्र प्रमादः, न हि दैवनिर्मितः कश्चित्साध्यधर्मी नाम, ग्रहीतुं शक्यते चेद्व्याप्तिः यत्र तत्र वा गृह्यतामिति, तदुच्यते-भावानां हि सत्त्वं क्षण (क्रम)यौगपद्याभ्यां व्याप्तम्,

नित्येषु च पदार्थेषु व्यापकानुपलम्भनात् ।
तद्व्याप्तमपि सत्त्वं हि बलात्तेभ्यो निवर्त्तते ॥
न च राशिस्तृतीयोऽस्ति तेन गत्यन्तरक्षयात् ।
क्षणिकानेव तान्भावान् सत्त्वं समवलम्बते ॥
तच्च स्वग्राहकाद्बोधादसन्दिग्धं प्रतीयते ।
ज्ञानोत्पत्त्यैव तद्धेतोरसामर्थ्यं पराकृते ॥
असमर्थात्समुत्पादो दृश्यते न हि कस्य चित् ।
शक्ताशक्तप्रसक्तत्वे तत्र बोधोऽस्ति संशयः ॥
अत एव च तज्ज्ञानं प्रमाणं जगदुः स्वतः ।
स्वरूपे शक्तिजत्वे तु संशयादेरसंभवात् ॥

THE KUPPUSWAMI SASTRI RESEARCH INSTITUTE MYLAPORE MADRAS

किमिदं रजतमुत शुक्तिकेति विशेषांशे संशेरतां नाम प्रमातारः, न तु सामर्थ्यं प्रति दोला काचित्संभवति, किमिदं ज्ञानं समर्थेन जनितमुत तदितरेणेत्यसमर्थस्य जनकत्वानुपपत्तेः, व्यापकानुपलम्भस्यापि व्याप्तिग्राहिणः स्वतः प्रामाण्यम्, संशयविपर्ययोस्तत्राप्यभावात्,

कथं पुनर्नित्येषु पदार्थेषु सत्त्वव्यापकयोः क्रमयौगपद्ययोरनुपलम्भः? उच्यते-नित्यो हि भावः क्रमेण वा कार्यं कुर्याद्यौगपद्येन वा, परस्परविरहस्थितात्मनां तृतीयप्रकारानुपपत्तेः,

न तावत्क्रमेण, स हि समर्थो वाऽसमर्थो वा? समर्थश्चेत्क्रमेण कथं समर्थस्य क्षेपा(२)योगाद्, असमर्थस्त्वसमर्थत्वादेव न करोति किं चिदिति तस्यापि किं क्रमे-

(१) चिरकालाध्ययनखिन्नस्योत्थितस्य नीललोहितादिगुणविशिष्टः कश्चिन्नयनस्याग्रे परिस्फुरति, अथ वा करसंमृदितलोचनरश्मिषु येयं केशपिण्डावस्था स केशोण्डूकः, केशसमूहो वा केशोण्डूकः, स च मिथ्यैव तस्यापि सत्त्वं स्यादिति भावः ।

(२) क्षेपो विलम्बः ।

ण ? सहकार्यपेक्षया करोतीति चेद् न–असमर्थस्य सहकारिणा ऽपि सामर्थ्याधानानुपपत्तेः, समर्थस्य स्वत एव सामर्थ्ये सति सहकारित्ववैयर्थ्यात् , सहकारिसन्निधानेऽपि चास्य स्वरूपेण वा कर्तृत्वं स्यात्पररूपेण वा ? स्वरूपस्य च प्रागपि भावात्तस्य च कारकत्वात् किं सहकारिणा, पररूपेण कर्तृत्वे पूर्वरूपपरित्यागात्तद्रूपान्तरापत्तेश्च क्षणिकत्वमुपपद्यते, एवं सहकार्यपि समर्थासमर्थतया विकल्पनीयः, स्वतोऽपि सामर्थ्ये किं परोपकरणादैन्येन, असमर्थस्य तु सचिवः किमागत्यापि सर्वत्र कार्यं साचिव्यमुपगच्छेत् ?

किञ्चित्करश्चेद्वक्तव्यं किं करोतीति, उपकारमिति चेत्स उपक्रियमाणाद्भिन्नोऽभिन्नो वा ? अभिन्नश्चेत्स एव कृतः स्यात् , भेदे तस्य किमायातं यदसौ न पूर्ववदास्ते, कार्यादपि भेदाभेदाभ्यां चिन्त्य उपकारः, न कार्याद्भिन्नोऽनुपलम्भाद् द्वयकारणभावाच्च, कार्यादव्यतिरिक्ते तूपकारे सहकारिणा क्रियमाणे कार्यमेव तेन कृतं स्यादिति मूलकारणानर्थक्यम् ,

ननु चैक एव भावः कारकः स एव हि समर्थस्तदितरपदार्थसन्निधानं तु स्वहेतुवशादुपनतमिति नोपालम्भमर्हति,

नैतद्युक्तमेकस्य कदा चिदपि कारकत्वानुपलब्धेस्तत्सामर्थ्यस्य दुरधिगमत्वात् , एवं ह्यसौ समर्थ उच्यते यद्येकः कदा चित्कार्यमुत्पादयन्दृश्येत न तु विस्मृत्यापि दृश्यते,

अथ कार्यस्यायं स्वभावो यदेकस्मान्नोत्पद्यते कारणं तु शक्तमेवेति ?

तदप्ययुक्तम्—कार्यस्वभावपराधीनत्वेन कारणस्य सामर्थ्यविरहप्रङ्गात् , एवं ह्यसौ समर्थः कथ्येत यदि कार्यस्वभावमनादृत्य स्वतन्त्र एक एव प्रसह्य कार्यं जनयेन्न चैवं दृश्यत इति यत्किंचिदेतत् ,

अथ समर्थमेव कारणं तस्य त्वयं स्वभावो यत्सहसैव कार्यं न करोति कतिपयक्षणव्यवधाने तु करोतीति,

यद्येवं न कदाचित्कार्योत्पादः स्यात् , कार्योत्पादसमयेऽपि कतिपयक्षणव्यवहितकार्यजननस्वभावानपायात् , पुनः कतिपयक्षणाद्यवेक्षणं स्यात् , तेष्वपि कतिपयेषु क्षणेष्वतिक्रान्तेषु स एवास्य स्वभावस्तदवस्थ इति पुनरप्येवं भवेदिति कदा नाम कार्यं जनयेत् ? तदेवमादिदोषोपहतत्वान्न क्रमेण भावानामर्थक्रियासामर्थ्यम् ,

नापि युगपद् , लोके तथा व्यवहारादर्शनात् , युगपत्कृतकस्यापि स्थिरस्य पुनरकरणे हेत्वभावः, पुनश्च कुर्वन्नपि भावः कार्यं न तदेव कुर्यात् , कृतस्य करणायोगात् , कार्यान्तरकरणे तु स एवायं पुनः क्रमपक्ष आपतेदित्येवं क्रमयौगपद्ये नित्येभ्यः पदार्थेभ्यः निवर्तेते , ते च निवर्तमाने सत्त्वस्य व्यापके इति सत्त्वं तेभ्य आदायैव निवर्त्तेते , तेभ्यः प्रच्युतं सत्त्वं गत्यन्तरविरहात्क्षणिकेष्वेव

निविशते(१), अतो यद्यपि कार्ये हेतौ धूमाग्न्योरिव स्वभावहेतावपि वा क चिद् वृक्षत्वशिंशपात्वयोरिव पूर्वमिह साध्यसाधनधर्मयोर्ग्रहणं धर्म्यन्तरे न वृत्तं तथाऽपि साध्यधर्मिण्येव व्याप्तिग्रहणमुपपत्स्यते विपक्षव्यावृत्तेः सुपरिनिश्चितत्वात्, यैव च विपक्षाद्व्यावृत्तिः स एव चास्य हेतोः स्वसाध्येनान्वयः, न ह्येवं संभवति नित्येभ्यश्च व्यावृत्तं सत्त्वं क्षणिकेषु च न निष्ठमिति, तृतीयराश्यभावान्निराश्रयत्वानुपपत्तेश्च, तदेवं क चिद्धर्मिणि व्याप्तौ गृहीतायां यदि स एव कदा चित्परं प्रति दृष्टान्तीक्रियते तदैवं नाम भवतु को दोष इति,

ननु व्यापकानुपलब्धेरनुमानमनुमानेन चानुमानस्य व्याप्तिग्रहणेऽनवस्था?

नानवस्था, तावत्येव पर्यवसानात्, न हि व्यापकानुपलब्धेरनुमानान्तराद्व्याप्तिनिश्चयः, किं तु प्रत्यक्षविकल्पादेव, तदनया व्याप्तिनिश्चयात्सिद्धमेतद्यत्सत्तत्क्षणिकमिति,

अन्ये तु नीत्यन्तरेण व्याप्तिनिश्चयमाचक्षते—विरुद्धयोरेकपरिच्छेदेऽन्यतरनिवृत्तिरवश्यंभाविनी विरुद्धत्वादेव, विरुद्धे च सत्त्वनित्यत्वे पूर्वोक्तयैव नीत्या, (२)सत्त्वं च विस्पष्टमुपलभ्यते भावानामिति तदुपलम्भान्नित्यत्वनिवृत्तिः, नित्यत्वनिवृत्तेरेव क्षणिकत्वनिश्चयः, प्रकारान्तराभावाद्,

ननु शीतोष्णयोः पृथगुपलम्भाद्विरोधनिश्चये युक्त एकग्रहणे द्वितीयव्युदासः, इह तु सत्त्वमेवोपलभ्यते न नित्यत्वमिति कथं तद्विरोधादितरव्यावृत्तिः?

नैष दोषः, पृथगुभयानुपलम्भेऽपि सत्त्वबुद्ध्यैव नित्यत्वनिराससिद्धेः, कथमन्यविषयबुद्धिरन्यमुदस्यति ? उच्यते—

द्विचन्द्रदर्शनस्यैकशशभृद्बिम्बवेदिनी ।
धीरतद्विषयत्वेऽपि तद्व्यवच्छेदकारिणी ॥
सत्त्वं नानास्वभावत्वं स्थैर्यमेकस्वभावता ।
तयोर्विरोधो युक्त्याऽपि वक्तुं न हि न शक्यते ॥

तस्मात्सत्त्वप्रतीतेरेव नित्यत्वनिवृत्तिः, सैव च क्षणिकत्वव्याप्तिरिति सिद्धं सत्त्वात्क्षणिकत्वम् ।

अपि च सर्वदा कार्यानुत्पादात्कारकावस्था नूनमेकक्षणस्थायिनी भावा-

---

(१) निविशत इति-अयम्भावः सत्त्वमर्थक्रियाकारित्वं न तु सत्तायोगित्वम् सामान्यादौ सत्तायोगित्वाभावेनासत्त्वप्रसङ्गात, तच्च क्रमयौगपद्याभ्यां व्याप्तं ते च नित्येषु न सम्भवतः इतिसत्त्वव्यापकयोः क्रमयौगपद्ययोर्नित्येषु निवृत्त्या सत्त्वमपि निवर्तते इति क्षणिकेष्वेव सत्त्वं पर्यवस्यतीति ।

(२) नीत्येति । सत्त्वव्यापकयोः क्रमयौगपद्ययोर्नित्ये निवृत्त्या सत्त्वस्यापि निवृत्तिरिति रीत्येत्यर्थः । तेन सत्त्वनित्ययोर्विरुद्धत्वमिति भावः ।

नाभ्युपगन्तव्या व्यापारावेशवशेन वा श्रोत्रियादिपक्षे, सहकार्यादिसन्निधानापादनेन वा नैयायिकादिपक्षे, कारकत्वं नाम वस्तुनो रूपमेकक्षणवृत्त्येव कार्योत्पत्त्यैव तत्कल्पनात्, ततः पूर्वमुत्तरकालं वा कारकायोगात्, कारकत्वमेव च परमार्थसदकारकस्य ज्ञानजनकत्वाभावादस्तित्वमपि दुर्वचमतश्च सर्ववादिभिरेव प्रायेण क्षणिकत्वमिदमभ्युपगतमिति यश एव केवलं सौगताः पीतवन्तः, तस्मात्सिद्धं यत्कारकं यच्च सत्तत्क्षणिकमिति,

अतश्च क्षणभङ्गिनो भावाः प्रलयं प्रति हेतुनिरपेक्षत्वात्, भावो हि स्वतोनश्वरात्मा भवेत्तद्विपरीतो वा—

विनश्वरस्वभावेऽस्मिन् कृतं प्रलयहेतुभिः।
अनश्वरस्वभावेऽपि कृतं प्रलयहेतुभिः॥

क तर्हि मुद्गरादीनां व्यापारः? विजातीयसन्ततिजन्मनीति ब्रूमः, अभावस्तु तज्जन्यो न संभवत्येव प्रमाणविरुद्धत्वात्, भावो हि स्वरूपेण न भवति न त्वभावोऽपि भवतीति, स्वरूपं भवनात्मकं चेत्सर्वदैव भवेदेव न न भवेत्, अभावात्मकं तु तदेव न भवेत्परापेक्षाया अभावात्, न हि मुद्गरादिकारणान्तरसापेक्षः कुम्भादेर्विनाशो भवितुमर्हत्युत्पत्ताविव नाशेऽपि समर्थासमर्थभिन्नाभिन्नोपकारिसहकार्यादिविकल्पकलापानपायात्,

अथ कतिपयक्षणव्यवहितविनाशस्वभावो भाव इष्यते तर्हि प्राक्तननयेन कदा चिदपि न विनश्येत्, विनाशसमयेऽपि तत्स्वभावानपायेन पुनः कतिपयक्षणापेक्षणप्रसङ्गात्, अपि च यदाऽपि तेन नष्टव्यं तदाऽप्यस्य न स्वरूपादतिरिक्तः कश्चन विनाशहेतुरवतरति, तच्च स्वरूपाद्यपेक्षणे तस्य तादृशमेवेति तदैव वा नश्येन्न कदा चिद्वा,

अथ मृत्योरपक्रान्तस्तस्य चेत्प्रथमः क्षणः।
अविनाशिस्वभावस्त्वादास्तां युगशतान्यपि॥

न चैवमभ्युपगम्यते, तस्मादात्मलाभाविनाभावो भावानां विनाश इति सिद्धः क्षणभङ्गः।

क्षणभङ्गे प्रत्यभिज्ञाया अबाधकत्वकथनम्।

यदपि क्षणभङ्गसाधनस्य पदार्थस्थैर्यावसायि प्रत्यभिज्ञानमनुमानस्य बाधकमभिधीयते, तदपि न पेशलमशिथिलप्रतिबन्धहेतौ बाधकस्य निरवकाशत्वात्, उक्तं हि—'बाधाविनाभावयोर्विरोधान्नैकत्र समावेश' इति, अनुष्णस्तेजोऽवयवी कृतकत्वादित्यत्रापि प्रतिबन्धवैधुर्यमेव साध्यसिद्धिं विरुणद्धि नाध्यक्षबाध्यत्वम्, अथ वा किमनेन निर्बन्धनेन—

अग्निशैत्यानुमानादौ युक्तं प्रत्यक्षबाधनम्।
तस्य ह्यनन्यथासिद्धेरिह त्वेवं न युज्यते॥

प्रत्यभिज्ञायाः क्षणभङ्गपक्षेऽपि सदृशपरापरक्षणगणप्रसवप्रतारितमनोमाना- पलभ्यमानत्वात्, एवं च सति— कालः

यदि हि व्याप्तिशैथिल्यं सिद्धं किं प्रत्यभिज्ञया।
अथ न व्याप्तिशैथिल्यं सिद्धं किं प्रत्यभिज्ञया॥

न च प्रत्यभिज्ञैव व्याप्तिविप्लवकारणमितरेतराश्रयप्रसङ्गात्, व्याप्तिं; एव नानुमाने न्यग्भूते प्रत्यभिज्ञा प्रमाणं भवति तस्यां च प्रमाणीभूतायां व्या धुर्यादनुमानाप्रामाण्यम्, अनुमानप्रामाण्येऽपि समानो दोष इति चेन्न, प्रतिबन्धमहिम्नैव प्रामाण्यसिद्धेः, न हि तस्य प्रतिभिज्ञादौर्बल्यनि प्रामाण्यम्।

प्रत्यभिज्ञास्वरूपनिरूपणम्।

अपि च केयं प्रत्यभिज्ञा नामेति नैपुण्येन निरूपयितुमर्हन्त्यत्र भवन्तः, स एवायं कुम्भ इत्येकं ज्ञानमुत द्वे एते स्मृत्यनुभवज्ञाने? यद्येकं तदस्य कार॰ वाच्यं यत उत्पद्यते? नेन्द्रियं स इत्यस्मिन्नंशे तस्यासामर्थ्यात, न संस्कारस्तस्या- ध्ययमित्यंशे कौशलाभावात,

उभाभ्यां न च सम्भूय तज्ज्ञानमुपजन्यते।
पृथक् पृथक् स्वकार्ये हि निर्ज्ञातं कौशलं तयोः॥

संस्कारस्य स्मृतिरेव कार्यमिन्द्रियस्यानुभव एव, संभूय न ताभ्यामेकं का- र्यमारभ्यते, न हि मृत्पिण्डतन्तुनिर्वर्त्यमेकं घटपटरूपं कार्यमुपलब्धम्, न चे- न्द्रियं केवलमीदृशि कार्ये समर्थं, यथासन्निहिताकारमात्रग्राह्यविचारकमिन्द्रि- यं प्रत्यभिज्ञानमातनोतीति विस्मयः! तस्माद् द्वे एते ज्ञाने, स इति स्मरण- मयमित्यनुभवः,

स्मृतिः स्मर्त्तव्यविषया ग्रहणं ग्राह्यगोचरम्।
न तदैक्यपरामर्शि दृश्यते प्रत्ययान्तरम॥
यथा निरन्तरोत्पन्ने घटज्ञानपटस्मृती।
न तुल्यविषये तद्वदेते अपि भविष्यतः॥
यद्वा भवतु नामेदमेकमेव हि वेदनम्।
तथाऽपि कीदृशं वस्तु स्पृशतीति परीक्ष्यताम्॥
अतीतकालयुक्तं चेत्स्मरणान्न विशिष्यते।
अनागतविशिष्टं चेत्सङ्कल्पप्रायमेव तत॥
वर्तमानैकनिष्ठं चेत्स्थिरत्वं तर्हि सुस्थितम।
कालत्रयपरीतं चेद्विरोधात्तत्तु दुर्लभम्॥
परस्परपरित्यागव्यवस्थितनिजात्मनाम्।
एकत्र न समावेशः कथं चिदुपपद्यते॥

नामुपगाथा हि—

दृनेन व नीलाभावाविनाभूतलौहिताद्यपसारणम् ।
स्यैव त कुर्वता नीलबोधेन नीलं भवति निश्चितम् ॥

मार्थसतद्वदिहापि—

प्रायेण तदभावाविनाभूतस्वस्वकालान्यपोहनम् ।
तस्मा वेदयन्वर्तमानार्थज्ञानं तद्ग्राहिता भवेत् ॥

एतेन पूर्वज्ञानविशिष्टार्थग्राहित्वं प्रत्यभिज्ञायाः प्रत्युक्तम्, नश्वरात्वज्ञानस्येदानीमसत्त्वेन विशेषणत्वानुपपत्तेः, अगृहीतविशेषणायाश्च विशि- ावाद्, अर्थोपजननापायरहितवस्तुस्वरूपग्राहिणी प्रत्यभिज्ञेत्युच्यते, दप्ययुक्तम्, वर्तमानैकनिष्ठतायाः प्रदर्शितत्वात्, भावानां च विनाश- मनोर्वर्तमानो वा कालः स्यादन्यो वा ? तदन्यस्तावद् ग्रहीतुमशक्य इत्युक्तम्, मानमाने तु तदुत्पादविनाशकाले कथ्यमाने तद्ग्रहणात्तदविनाभूतौ भावानामु- त्पादविनाशावपि गृहीतौ स्याताम्,

सेयं तपस्विनी स्थैर्यं प्रसाधयितुमागता ।
प्रत्यभिज्ञा विनाशित्वं प्रतिष्ठाप्य गमिष्यति(१) ॥

अपि च लूनपुनर्जातकेशनखादिषु सादृश्यदृश्यमानप्रत्यभिज्ञा स्तम्भादि- ष्वपि तद्वदेव न स्थिरतामुपपादयेत्, तत्र बाधकयोगादिति चेदिहाप्युक्त एव बाधकः परस्परविरोधिभूतादिकालसमावेशस्यैकत्र दुर्घटत्वादिति, तस्मात्प्रत्य- भिज्ञाप्रत्ययस्य बाधकस्याभावात्सिद्धमानुमानिकं भावानां क्षणिकत्वम् ।

क्षणिकत्वस्य प्रत्यक्षगम्यत्वम् ।

अपरे पुनः प्रत्यक्षगम्यमेव क्षणिकत्वमाचक्षते—

नातीतानागतौ कालौ विचारयति चाक्षुषम् ।
वर्तमानक्षणश्चैक इति तन्निष्ठमेव तत् ॥

यदि वर्तमानातिरिक्तग्राहि प्रत्यक्षमिष्यते तद्वक्तव्यं किं पूर्वं विज्ञानमना- गतकालावच्छिन्नपदार्थग्रहणनिपुणम्, अथोत्तरज्ञानमतीतकालालिङ्गितभावाकल- नकुशलमिति ? तत्राद्यज्ञानसमुपजननसमये तत्क्षणातिरिक्तभाविकालासन्निधा- नान्न तेन तद्ग्रहणम्, अनागतग्रहणे वा कथमागामिजन्मग्रहणं न स्यादुत्तरज्ञान- प्रसवसमयेऽपि भूतकालस्य भूतत्वादेव न सन्निधानमसन्निहितभूतकालग्रहणे वा पूर्वजन्मग्रहणप्रसङ्गः,

---

(१) अमुमर्थमेवाह शास्त्रदीपिकाकारः—

विवादाध्यासिता भावाः सत्त्वात्क्षणविनाशिनः ।
दीपवत्प्रत्यभिज्ञापि स्यात्प्रदीपवदेव नः ॥ इत्यनेन ।

अथ वर्तमानानुप्रवेशेन भूतभाविनोः कालयोर्ग्रहणं मन्यसे तत्र वर्तमानानुप्रवेशाद्वर्तमान एव गृहीतः स्यान्न भूतो भावी वा, अथ न कश्चिदेव कालः क्वचिद्गृह्यते, अर्थ एव प्रकाश्यः केवल इति,

तदयुक्तं, तदवच्छिन्नभावप्रतिभासस्य भवद्भिरेवाभ्युपगमात्,

ननु कोऽयं कालो नाम शाक्यानाम् ? न कश्चिद्वास्तवः, किं काल्पनिक एव व्यवहारः—

सर्वथेन्द्रियजं ज्ञानं वर्तमानैकगोचरम् ।
पूर्वापरदशास्पर्शकौशलं नावलम्बते ॥
वर्त्तमानः कियान्काल एक एव क्षणस्ततः ।
पूर्वः क्षणोऽतीततां स्पृशत्युत्तरस्त्वनागतताम् ॥

ननु पचति पठतीति वर्तमानोऽपि वितत एव कालः प्रतीयते ?

नैतत्सारम्—

न ह्यस्ति कालावयवी नानाक्षणगणात्मकः ।
वर्तमानक्षणो दीर्घ इति बालिशभाषितम् ॥

क्षणसमुदायात्मकत्वं तु नानारूपत्वमेव तस्य भवेत्, अतीतानागतक्षणात्पूर्वमूर्ध्वं वा तदस्तित्वान्नास्तित्वमपि न गृहीतमेवेति कथं क्षणिकत्वम् ? क एवमाह न गृहीतं नास्तित्वमनुपलब्ध एव नास्तित्वव्यवहारात्, उपलम्भो हि भवेन्नासत्ताऽनुपलम्भाच्च नास्तित्वम्, दर्शनादर्शने एव सदसत्त्वयोर्लक्षणम्; तस्मात्क्षणान्तरं तदनुपलम्भाद् नास्तित्वमेवेत्येवं क्षणिकत्वग्राहि प्रत्यक्षमिति स्थितम्,

ननु च प्रत्यभिज्ञातो दीर्घकालत्वनिश्चयः ।
किमद्यापि न मुक्तोऽसि तत्प्रामाण्यकुतृष्णया ॥

परीक्षितं हि तस्याः स्वरूपं कार्यं कारणं च,

न शक्नोतीव सा स्थैर्यमुपपादयितुं निजम् ॥
न पूर्वं नोत्तरं ज्ञानं ग्राहि कालान्तरस्थितेः ।
तदिदं बोध्यमानोऽपि रागान्धो नावबुद्ध्यते ॥

पूर्वं हि ज्ञानं तत्कालमेव उत्तरमपि स्वकालमेव वस्तु गृह्णाति, मध्ये तु नास्त्येव ग्रहणमग्रहणमेव मध्यमाहुः,

नन्वविच्छिन्नदृष्टीनां न हि त्रुट्यदवस्थितिः ।
स्तम्भादिरवभातीति कथमेतस्य भङ्गिता ॥

नैतदेवम्, तत्राप्येकक्षणवृत्तित्वाज्ज्ञानस्य, क्षणान्तरे तु ज्ञानमेव नास्ति, कस्य विच्छिन्नसत्ता, कस्यात्रुटितसत्ता, कस्य वा बोधकम् ?

नन्वस्त्येव क्षणान्तरे तु ज्ञानमविच्छिन्नत्वाद् दृष्टेरिति चेद्,

मैवम्-बुद्धेरदीर्घकालत्वाज्ज्ञानान्तरोत्पादन एवासावित्यवधारयत्वायुष्मान्,

तस्माद्यथैव सन्तानवृत्त्या ज्ञानक्षणोदयः ।
तथैवोत्पाद्यतामेषा स्तम्भक्षणपरम्परा ॥

सोऽयमविच्छिन्नदृष्टीनामत्रुटितपदार्थसत्ताग्रहणाभिमान इत्थमुत्थितः,

स्थिरेणापि न बोधेन दीर्घग्राह्यस्थितिग्रहः ।
न ह्यसन्निहितग्राहि प्रत्यक्षमिति वर्णितम् ॥
तत्काले सन्निधिर्नास्ति क्षणयोर्भूतभाविनोः ।
वर्तमानक्षणश्चैको न दीर्घत्वं प्रपद्यते ॥
तेन बुद्धिस्थिरत्वेऽपि स्थैर्यमर्थस्य दुर्वचम् ।
न त्वनन्तरया नीत्या तस्या अपि चिरं स्थितिः ॥

साऽपि हि स्वसंवेद्यत्वादेकक्षणपरीतैव प्रकाशत इति तस्मात्क्षणिकग्राहि प्रत्यक्षमिति सिद्धम् ।

क्षणिकत्वेऽनुमानस्याबाधकत्वकथनम् ।

ननु स्थैर्यं पदार्थानामनुमानात्प्रतीयते ।
अन्वयव्यतिरेकाभ्यां मुद्गरादिर्विनाशकः ॥
निश्चीयते घटादीनां तेन पूर्वं तदागमात् ।
विनाशरहितत्वेन सिद्ध्यत्येषामवस्थितिः ॥

नानुपलम्भव्यतिरिक्तस्य हेतुमतो विनाशस्यानुपपत्तेरुपलम्भ एवास्तित्वं भावानामनुपलम्भाच्च नास्तित्वं, न च घटानुपलब्धिर्मुद्गरादिकार्या, ततः प्रागपि भावात्,

ननु दृश्यानुपलब्धेरसत्त्वनिश्चयः स च कपालकाल एव घटस्यावकल्पते मध्ये तु दर्शनमन्यथाऽपि स्यादिति नादर्शनमात्रमेव नास्तित्वं ? मैवम्-त्वदभिमतोऽपि मध्ये ऽपि दृश्यस्यैव घटस्यानुपलम्भनम्, तद्वा कपालकाले ऽपि सर्वेषामिति का प्रमा ? यदहं न वेद्मि, तत्परोऽपि नैवं वेत्ति चेत्तर्हि मध्येऽपि घटं सर्व एव न पश्येयुरिति नास्त्येवासौ, कपालीभूतघटवत्, अपि च-

यदि यत्त्वं न जानासि तदन्योऽपि न ।
स्वजायाजघनस्पर्शसुखमन्योऽधिगच्छतु ॥

तदलं ते परगृहवृत्तान्तचिन्तया, यत्पश्यसि तदस्तीति जानीहि यन्न पश्यसि तन्नास्तीति विद्धि, एवमनुलम्भ एव भावानां विनाश इति न तस्य मुद्गरादिकार्यत्वमतोऽनुमानमपि न स्थैर्यसाधकम्, तस्माद्यथोक्तक्रमेण प्रत्यक्षमेव क्षणिकपदार्थपरिच्छेत्रिति स्थितम्,

स्मरणप्रत्यभिज्ञानस्वकर्मफलभोक्तृता ।
क्षणिकत्वेऽपि कथितः कार्यकारणभावतः ॥

तदेवमुपपन्नेयं गृह्यतां क्षणभङ्गिता ।
त्यज्यतां दीर्घसंसारकारिणः स्थिरताग्रहः(१) ॥

क्षणभङ्गनिरासः ।

अत्राभिधीयते नैव (२)प्रमाणद्वयमध्यदः ।
भावानां क्षणभङ्गित्वमुपपादयितुं क्षमम् ॥
अर्थक्रियासमर्थत्वं सत्त्वं यत्तावदुच्यते ।
तदसत्कूटहेमादि(३)व्यभिचारावधारणात् ॥
किं त्वबाधितसद्बुद्धिगम्यता सत्त्वमिष्यते ।
सदसद्व्यपदेशस्तु (४)पुत्रादावौपचारिकः ॥

---

(१) अयन्तावदत्र क्षणभङ्गवादिमतनिष्कर्षः ।

अर्थक्रियाकारित्वं सत्त्वं तच्च क्रमाक्रमाभ्यां व्याप्तम् क्रमाक्रमौ च क्षणिकत्वे एव सम्भवतः न तु स्थायित्वे ।

तथाहि—स्थायी पदार्थः सर्वाः क्रिया युगपत्कर्तुं न प्रभवति तथा सति द्वितीयक्षणे कृत्याभावात् अर्थक्रियाकारित्वाभावादसल्लक्षणापत्तेः; नापि क्रमः सम्भवति, स्थायी भावो हि सर्वार्थक्रियासमर्थः किमिति कांचिदेवारभते नान्यां समर्थस्य विलम्बे कारणाभावात् । नच सहकार्यपेक्षया विलम्बत इति वाच्यम्, अकिञ्चित्कराश्चेत्सहकारिणस्तदाऽनपेक्ष्याः, किञ्चित्कराश्चेत्तदा तैरेव क्रियते ते एव कारणं तदनन्तरं कार्यनिष्पत्तेः, तस्मात् नाक्षणिकस्य सत्ता सम्भवतीति सन्मात्रानुबन्धित्वं क्षणिकत्वस्य,

किञ्च यद्येषामवश्यंभावि न तत्र हेत्वन्तरापेक्षा कृतकानां च भावानामवश्यंभावी विनाशः तेन सिद्धं घटादीनां क्षणिकत्वम्, तथाहि—ध्रुवभावित्वं हि हेत्वन्तरानपेक्षित्वव्याप्तमग्न्युष्णत्वादिषूपलब्धमिति प्रकृते विनाशस्य ध्रुवभाविता सापेक्षत्वं प्रतिक्षिपति निरपेक्षश्च विनाशः स्वाभाविको जन्मान्तरमेव भवतीति सिद्धः क्षणभङ्गः ।

किञ्च प्रयत्नरक्षितानामपि घटादीनां मुसलादिप्रहारमन्तरेव कियतापि कालेन अवयवविश्लेषवशेन विनाश उपलभ्यते स चायमुत्पत्तिप्रभृति किञ्चित्किञ्चिदन्यथात्वमन्तरेण नोपपद्यते, अभिनवपुराणावस्थयोश्च घटयोः प्रत्यक्षेणैवान्यथात्वमुपलभ्यते न चैकस्य घटस्य नानारूपत्वं सम्भवति नानात्वैकत्वयोर्विरोधात् तस्मात्प्रतिक्षणमन्यत्वं घटादेरिति क्षणिकत्वसिद्धिरित्यलम् ।

(२) प्रमाणद्वयं—प्रत्यक्षमनुमानं चेत्यर्थः ।

(३) कूटहेम—कृत्रिमहेम ।

(४) ननु अर्थक्रियासामर्थ्यमेव सत्त्वमत एव सत्यपि पुत्रे तत्कार्यादर्शनादपुत्रा वयमिति व्यपदिशन्ति लौकिकाः पुत्रादन्यस्मिन् पुत्रकार्यकारिणि सपुत्रा वयमिति च ब्रुवते तस्मादबाधितसद्बुद्धिविषयत्वं न सत्त्वमित्यत आह—पुत्रादाविति । औपचा-

एवं च बाधकाभावपर्येषण(१)परायणम् ।
न सत्त्वग्राहकं ज्ञा(मा)नं स्वतः प्रामाण्यमर्हति ॥
सत्त्वे च संशयोऽप्यस्ति सकलप्राणिसाक्षिकः ।
उपलब्ध्यव्यवस्थात(२) इत्येवं वर्णयिष्यते ॥
अर्थक्रियासमर्थस्य त्वदुक्तं सत्त्वमस्तु वा ।
तदपि व्याप्तिशून्यत्वान्न हेतुर्गन्धवत्त्ववत् ॥
क्षणिकस्यापि भावस्य सत्त्वं नास्त्येव, सोऽपि हि ।
क्रमेण युगपद्वाऽपि न कार्यकरणे क्षमः ॥
क्षणिकस्य क्रमः कीदृग्युगपत्करणेषु नः ।
एकवस्तुक्रमस्यापि रूपभेदः प्रसज्यते ॥
कार्याण्येकेन रूपेण भिन्नानि जनयेत्कथम् ।
रूपभेदविरोधात्तु वस्तुनो नास्तिता भवेत् ॥
स्थिते च वस्तुसद्भावे क्षणिकत्वं परीक्ष्यते ।
तदसत्त्वे तु तच्चिन्ता व्योम्नि(३) रोमन्थकेलिवत् ॥
ज्ञाने क्षणिकचिन्ता चेत्किं तस्यापि पराकृतौ ।
वदन्त्येतानि शास्त्राणि ज्ञेयाभावे च तत्कुतः ॥

अपि च—क्षणिकत्वपक्षे किमेकस्मादेकोत्पादः उत बहुभ्य एकोत्पत्तिरथैकस्मादनेकनिष्पत्तिराहो बहुभ्यो बहुसंभव इति परीक्षणीयम्, न तावदेकस्मादेकोत्पत्तिरलौकिकत्वात्, एकस्मादप्यग्नेर्भस्मधूमेन्धनविकाराद्यनेककार्योत्पाददर्शनात् कार्यसिद्धये च सर्वसहकारिसन्निधापनप्रयत्नदर्शनात् 'नैकं किंचिदेकंजनकम्' इति ग्रन्थविरोधाच्च, एतेन तृतीयः पक्षो निरस्त एकस्मादनेकनिष्पत्तिरिति, एकश्च नैकं जनयत्क्रमेण जनयेद्युगपद्वा ? न क्रमेण स्थैर्यप्रसङ्गात्, न युगपददृष्टत्वात्, एकस्य चानेककार्यकरणशक्तियोगे तद्भेदान्नानात्वप्रसङ्गः,

विरुद्धधर्मयोगेऽपि यदि चैकत्वमिष्यते ।
अनेकक्षणयोगेऽपि भाव एकोऽभ्युपेयताम् ॥

अथ बहुभ्य एकोत्पादनमिति पक्ष आश्रीयते, तद्वक्तव्यं किमेतदेकं कार्यं कैर्वा बहुभिरुत्पाद्यते इति ? न ह्यस्माकमिव भवतामनेकावयवनिवहनिर्मितमवयविस्वरूपं कार्यमस्ति, संचितैः संचिता एव जन्यन्त इत्यभ्युपगमाद्, यदि

रिक्त एव सपुत्रा वयमपुत्रा वयमिति व्यवहारो न मुख्यः अबाधितसद्बुद्धिविषयत्वरूपसत्त्वस्य बाधितसद्बुद्धिविषयत्वरूपासत्त्वस्य चाभावादिति भावः ।

(२) उपलब्धीति । समानानेकधर्मोपपत्तेरिति सूत्रे इत्यर्थः ।

(१) पर्येषणम्—अन्वेषणम् ।

(३) रोमन्थकेलिः—चर्वितचर्वणम् । व्योम्नश्चर्वणासम्भवादित्यर्थः ।

चानेककार्यमेकमुच्यते तदस्य कारणभेदोपनतस्वभावनानात्वयोगादेकत्वमेव तावद्विरुध्यते, अन्यथात्वे हि न कारणाधीनं भावानां रूपमित्याकस्मिकत्वप्रसङ्गः, कारणभेदोपपादितनानात्वस्यापि यदि वैकत्वं तदस्य नानाकालयोगिनोऽप्येकत्वं स्यात्, असत्त्वं भिन्नस्वभावस्य वस्तुन इति पूर्ववद्वक्तव्यम्, लोचनालोकमनस्कारादिकारणभेदान्, कार्यमप्येकरूपं ज्ञानमिति चेन्न, तस्य भवन्मते विषयाकारग्राहकत्वस्वसंवेदनरूपभेदान्निराकारज्ञानवादिनो हि बौद्धस्य प्रतिकर्मव्यवस्थानमिष्यते जनकस्य कर्मणः प्रतिभासे स्थैर्यप्रसङ्गादेकसामग्र्यधीनत्वपक्षस्यासंभवात्, संभवेऽपि ग्राह्यनियमनिमित्तस्याभावादिति ।

अथोच्यते–किमनभ्युपगतपक्षोपमर्दनेन बहुभ्यो बहुसंभव इत्येष एव नः पक्षः, सन्तानवृत्त्या वर्तमानपूर्वसामग्रीसारूप्यमुत्तरसामग्रीमारभते विजातीयकरणानुप्रवेशे तु विरूपम्–इति,

अथ केयं सामग्री नाम ? न समग्रेभ्यो भिन्ना पृथगनुपलम्भादव्यतिरेके तु समग्र एव सामग्री, तत्र पूर्वसमुदायेनोत्तरसमुदायारम्भे तदन्तर्गतं समुदायिनमेकमेव एक उत्पादयेदेकं वा संभूयेति, तत्राद्ये पक्षे सैवेयमेकस्मादेकोत्पत्तिरुक्ता स्यात्सा च प्रतिषिद्धा,

अथैकैकफलसमुदायिनिष्पत्तौ सर्वसमुदायिनं व्यापारयेत्, क्रमेण वा यौगपद्येन वा ? तत्र क्रमपक्षे क्षणिकत्वहानिः, ये हि तत्र पञ्चदश समुदायिनः क्षणं तत्र वर्तन्ते ते तत एकं तमुत्पाद्य पुनरपरमारभेरन् पुनरन्यमिति तावत्कालप्रतीक्षणादक्षणिकत्वम्,

अथ युगपदेव सर्वनिष्पत्तौ सर्वे व्याप्रियन्ते, तर्हि(१)निकुरुम्बरूपादेव कारणादुत्पन्नमिति कारणविवेकनियमाभावाद्रूपरसादिप्रविभागो न स्यात्, इदं रूपमेष रस इति कथं निश्चीयते, चित्रमुत्पादितमिति सर्वं रूपं स्यात्सर्वो रसो, यद्वा न रूपं न रसोऽन्यदेव किंचिद्वस्त्वन्तरं स्यात्,

अथोच्यते–यद्यपि रूपरसादिसामग्री तत्सामग्र्या एव जनिका तथाऽपि क्वचित्किंचिदुपादानकारणमिति तत्सहकारिकारणं, तत्र रूपक्षणनिष्पत्तौ रूपस्योपादानकारणत्वादितरेषां च सहकारिकारणत्वान्न पदार्थसंकर–इति, एतदयुक्तं सर्वथा कारणत्वानपायात्, अपि च येन रूपेण रूपस्य रूपं प्रत्युपादानकारणता तेनैव यदि रसं प्रति सहकारिकारणता तदा पुनरपि रूपरसयोरविशेषः,

अथान्येन रूपेण रूपस्य रूपोपादानताऽन्येन च रससहकारितेति, तर्हि स्वभावभेदान्नानात्वं, नानात्वे त्वस्थैर्यमसत्त्वं वेत्युक्तम्,

अथ नास्त्येतयोः किंचिद्विरुद्धत्वं स्वभावयोः ।
कथं बौद्धगृहे जातस्त्वमेवमतिभाषसे ॥

(१) निकुरुम्बरूपात्–समुदायरूपात् ।

भावानां परस्परपरिहारव्यवस्थितरूपत्वमस्त्येवैषां लाक्षणिको विरोधः,

अपि च क्षणिकत्वे पदार्थानामिदमत्रोपादानकारणमिदं सहकारिकारणमिति विशेषोऽपि दुरवगमः, तथा हि किमिदमुपादानं नाम ? किं स्वसंतानविनाशेन बीजादिवत्कार्यजननमुपादानमुत स्वविशेषसमर्पणेनोत्पादकमिति, यदि पूर्वः पक्षः, परलोकचर्चा चार्वाकवदुपेक्षिता स्यात् ज्ञानसन्तानविनाशेन ज्ञानान्तरारम्भप्रसङ्गात् , स्वविशेषार्पणपक्षेऽपि सर्वविशेषार्पणं स्यात्कतिपयविशेषार्पणं वा, सर्वविशेषार्पणे निर्विकल्पकस्य नोपादानकारणं स्यात् ,

लिङ्गदर्शनजन्या च प्रतिबन्धस्मृतिः(१) कथम् ।
कथं वा रसविज्ञानं रूपज्ञानादनन्तरम् ॥

सन्तानभूयस्त्वाद्भविष्यतीति चेन्नैकप्रमात्रधीनप्रतिसन्धानोपनिबन्धनव्यवहारप्रतिबन्धविप्लवप्रसङ्गात्, नित्यमेकमात्मानमन्तरेण सन्तानैकतायामपि तावदसौ व्यवहारो नावकल्पते किमुतैकत्रैव देवदत्ते सन्तानभूयस्त्वे सतीति, कतिपयविशेषार्पणेन तु यद्युपादानता, तदानीं रूपमपि ज्ञानोपादानकारणतां प्रतिपद्येत तस्मान्नोपादानं नाम किंचित्, तन्निरासे च तद्वैलक्षण्यलक्ष्यमाणस्वरूपस्य सहकारिणोऽपि व्युदासो वेदितव्यः, अपि च—

प्रतिक्षिपसि तत्पक्षे सर्वथा सहकारिणम् ।
भिन्नाभिन्नोपकारादिविकल्पास्त्वत्प्रकल्पिताः ॥
सहकारिप्रतिक्षेपकारिणः क्वाधुना गताः ।
अां ज्ञातं युक्तिशक्त्यैव युष्माभिरुपकल्पितः ।
दोषो न बाधते युष्मान् मन्त्रोत्थापितसर्पवत् ॥

अथ वा तिष्ठतु तावदुपादानसहकारिकारणभाव एव(२)भदन्तसिद्धान्ते दुरुपपादः, परोत्पत्तावव्याप्रियमाणमेव यदि कारणमुच्यते सर्वं सर्वस्य कारणं स्यात्,

न चालब्धात्मनस्तस्य व्यापारः परजन्मनि ।
लब्धात्मनस्तु व्यापारे स्थितिः सिद्धा क्षणान्तरे ॥

अथ ब्रूयादिदं प्रतीत्येदं प्रतीयते इतीदंप्रत्ययतामात्रमेव कार्यकारणभाव इति, तथाऽपि लब्धात्मनः क्षणस्य प्रतीतिरिति द्वितीयक्षणावस्थानमपरिहार्यमेव,

न चानन्तर्यमात्रेण कार्यकारणताग्रहः ।
अहेतुफलभावेऽपि तथाऽऽनन्तर्यदर्शनात् ॥
व्यापारस्तु परोत्पत्तौ नास्त्येव क्षणभङ्गिनः ।
न वर्तमानकालस्य न भूतस्य न भाविनः ॥

अथ मन्येथा—यथा तुलान्तयोर्नामोन्नामौ भवत एवं पूर्वोत्तरयोः क्षणयोर्ना-

---

(१) प्रतिबन्धस्मृतिः—व्याप्तिस्मृतिः ।

(२) भदन्तसिद्धान्ते—बौद्धसिद्धान्ते ।

शोत्पादावित्येवं पूर्वक्षणविनाशेनोत्तरक्षणनिर्वृत्तेरियतैव कार्यकारणभावमश्नुवीयाताम्–इति,

तदप्यमनोरमम्–न ह्ययमायुष्मतामस्त्यवधृतस्तुलान्तदृष्टान्तः—

> तत्रान्यदेव हेमादि नामोन्नामनिबन्धनम् ।
> तन्नामो न तु नामैव तेन वा स विधीयते ॥

इहापि न पूर्वेण क्षणेन नापि तद्विशेषेणोत्तरः क्षण उत्पद्यते, न च हेमस्थानीयमिहान्यदस्तीत्यनुत्पत्तिरेवावशिष्यते,

> सर्वथा परनिष्पत्तौ निर्व्यापारं न कारणम् ।
> सव्यापारस्य कर्तृत्वे क्षणिकत्वं तु दुर्घटम् ॥
> इत्थं च सत्त्वं व्यावृत्तं क्षणिकेभ्या विशेषतः ।
> तेनासाधारणत्वेन यायात्संशयहेतुताम् ॥

क्षणिकत्वहेतोर्विरुद्धत्वम्

अथ वा लब्धात्मनः पदार्थस्य परोत्पत्तौ व्याप्रियमाणत्वेन कारणत्वावधारणाद् द्वित्रिक्षणस्थायित्वमवश्यमनन्तरनीत्या भवेदिति प्रत्युत सत्त्वादक्षणिकत्वसिद्धेर्विरुद्धोऽयं हेतुः, अतश्चैवं नित्यानामेवार्थक्रियाकारित्वोपपत्तेः, समवाय्यसमवायिनिमित्तभेदेन त्रिविधा कारणसामग्री परस्परसंसर्गमागत्य यथासन्निधानं कार्यं प्रसूत इति कृतं क्रमयौगपद्यविकल्पैस्तावकैः यदैवाविकलसामग्री तदैव कार्योत्पत्तिः,

> अत एव च कार्याणां युगपन्न समुद्भवः ।
> न चापि कृत्वा करणं सामग्री हि न सर्वदा ॥
> प्राणिकर्मविपाकोऽपि सामग्र्यन्तर्गतो नवः ।
> सर्वत्र सुखदुःखादिहेतुस्तत्रोपपाद्यते ॥

न च समग्रव्यतिरेकाव्यतिरेकविकल्पोऽस्मत्पक्षे सामग्रीं बाधते समग्रधर्मत्वात्सामग्र्याः समग्रापेक्षया च सामग्र्येव तमबर्थातिशययोगात्कारणमिति(१) प्रमाणसामान्यलक्षणे निर्णीतम् ,

(१) ननु प्रमीयते येन तत्प्रमाणमिति करणसाधनोऽयं प्रमाणशब्दः । करणं च साधकतमं तमबर्थश्चातिशयः । स चापेक्षिकः साधकान्तरसम्भवे तदितरापेक्षयाऽतिशययोगात्किंचित्साधकतममुच्यते । सामग्र्याश्चैकत्वात् तदतिरिक्तसाधकान्तरानुपलम्भात् किमपेक्षमस्या अतिशयं ब्रवीषि, अत्रोच्यते–यत एव साधकतमं करणं करणसंनिधानश्च प्रमाणशब्दः तत एव सामग्र्याः प्रमाणत्वं युक्तम् । तद्व्यतिरेकेण कारकान्तरे क्वचिदपि तमबर्थसंस्पर्शानुपपत्तेः । फलोत्पादाविनाभाविस्वभावत्वमतिशयः, स च सामग्र्यन्तर्गतस्य न कस्यचिदेकस्य कारणस्य कथयितुं पार्यते सामग्र्यास्तु सोऽतिशयः सुवच इति ग्रन्थेनेति शेषः ।

समर्थत्वासमर्थत्वविकल्पेऽपि प्रसङ्गतः।
सामग्र्या एव सामर्थ्यं ततः कार्यस्य दर्शनात्।

तदन्तर्गतस्य तु कारकजातस्य शकटाद्यङ्गस्येव सामर्थ्यं यावत्तावदभ्युपगममेव तदपेक्षस्य सामग्र्याः साधकतमत्वस्य निर्वहणं न हि भवति कृष्णाच्छुक्ल इति, अविकल्पं तु सामग्र्या एव सामर्थ्यं यदनन्तरं कार्यनिष्पत्तिरिति कार्यनिष्पत्तिदर्शनादेवावगम्यते,

यदप्येकक्षणस्थायि कारकं स्यादित्युद्घोषितं परैः, तदप्यसत्, कार्यनिष्पत्तिपर्यन्तत्वादवस्थानस्य एकेन क्षणेन तेषामेककार्यनिष्पत्तेरघटमानत्वात्, कार्यसंपत्तेरूर्ध्वं तु सामग्री विप्लवते न समग्राणि तेषामेकैकशः क्वचित्कचिदुपलम्भाच्चक्रसूत्रदण्डादीनाम्, इत्थं स्थिराणामेव पदार्थानामर्थक्रियासामर्थ्यं समर्थितमिति न ततः क्षणभङ्गसिद्धिः,

एवं च सत्त्वनित्यत्वयोर्विरोधात्सत्त्वप्रतीत्यैव एकचन्द्रबुद्धिवत्तदितरनिराकरणमित्यादि यत्प्रलपितं तत्प्रतिक्षिप्तं भवति,

यदप्यभाणि नाशं प्रत्यनपेक्षत्वात्क्षणिकाः पदार्था इति, तदपि यत्किंचिद्दण्डादिव्यापारान्वयव्यतिरेकानुविधायिनस्तत्कार्यस्य घटाद्यभावस्य विस्तरतः प्रमाणचिन्ताऽवसरे प्रसाधितत्वात्, प्रध्वंसाभावश्च विनाश इत्युच्यते,

नश्वरानश्वरादिविकल्पास्तु न साधवः।
सामग्र्यधीनः प्रध्वंसो भावानामात्मलाभवत्॥

मुद्गरादिसामग्र्या घटस्य किं क्रियते? मृत्पिण्डदण्डसामग्र्या किमस्य क्रियते? आत्मलाभ इति चेदनयाऽप्यात्महानं करिष्यते,

ननु नश्वरत्वे तत्कारणमफलमनश्वरत्वे त्वशक्तमिति, उत्पत्तावपि तुल्योऽयं प्रलापः, भवनस्वभावश्चेद् घटः स्वत एव भवति किं दण्डादिसामग्र्या अभवनस्वभावस्तु कर्तुमशक्यः खरविषाणवदिति, कारकव्यापारकार्यत्वदर्शनादपर्यनुयोग एष इति चेद्विनाशेऽपि समः समाधिः, उत्पत्तिवद्विनाशस्यापि कारकान्वयव्यतिरेकानुविधायित्वम्,

तस्मादुत्पन्नमात्रस्य विनाशो नास्ति वस्तुनः।
आविनाशकसद्भावादवस्थानमिति स्थितम्॥

ननु सापेक्षाणां भावानां नावश्यंभाविता भवेदिति घटस्य विनाशहेतुर्नोपनिपतेदपि कदाचिदित्येवमसौ किं नित्य एव भवत्विति, अहो महान्प्रमाद उत्सन्नाः प्रजाः पतितो महान् वज्राशनिर्दुष्प्रतरोऽयं दोष उत्थितः यदिह घटो नित्यो भवेत्तदिह कालाग्निरुद्र इव त्रिभुवनमपि भस्मीकुर्यात्, अपि च रे मूढ! सावयवस्याश्रितस्य कार्यस्य च नूनमवयवविभागादाश्रयविनाशाद्वा यदा कदाचिद्भवितव्यमेव विनाशेनेति कस्तन्नित्यत्वशङ्काऽवसरः, तथा हि न रामाभिषेक-

कलशमद्य यावदनुवर्तमानमीश्वरवेश्मस्वपि पश्यति लोक इत्यवश्यंभावी तस्य विनाशे हेतुः, तस्मात्सहेतुको विनाश इति न स्वत एव नश्वरो भावः।

अपि च प्रत्यभिज्ञा स्वतेजोविभवविधूतबौद्धसिद्धान्तध्वान्तसिद्धनिर्भङ्गुरमेव भावनिवहमनिशमुपदर्शयन्ती दिनेशदीधितिदशशतविभागवती सर्वतो जाज्वलीतीति कस्तस्यां सत्यां क्षणभङ्गिनो भावानभिदध्यात्, यत् किंचन तस्य समभाषितं तत्सर्वमसमञ्जसम्,

यत्तावदिदं कल्पितं स एवायमिति किमेकं विज्ञानमुत द्वे इति, तत्रोच्यते सामानाधिकरण्येन नैकविषयावद्योतनप्रवणैकप्रतीतिसंवेदनात्केयं द्वित्वाशङ्का योऽयंसमः यःसमोऽयमित्येकत्वावमर्शिनी, स्वतस्तु याऽनेकप्रतीतिरनुभूयते घटोऽयं पटोयमिति तत्र निरन्तरोत्पन्नघटज्ञानपटस्मरणवद्भिन्नविषयं बुद्धिद्वयमिति, यत्तु किमेकप्रतीतिजन्मनि कारणमिति,

कार्यं चेदवगम्येत किं कारणपरीक्षया।
कार्यं चेन्नावगम्येत किं कारणपरीक्षया॥

न च कार्यमकारणं भवितुमर्हति कार्यत्वस्यानुपपत्तेरिति भवितव्यमेव तत्र कारणेन, अस्ति च संस्कारसहितमिन्द्रियमस्याः प्रतीतेः करणं पृथक्कार्यताऽपि तयोर्दर्शनादेव, अभ्युपगतमिदं तु दृष्टत्वाद् दुरपलपम्, क्वचित्तु केवलेन्द्रियव्यापारकार्यदर्शनान्न सर्वस्य तथाविधस्यैव तस्य कार्यकारित्वं सहकार्यपेक्षणेन कार्यान्तरजननात्।

प्रत्यभिज्ञायां भूतकालस्य विषयत्वम्!

यत्तूक्तं कीदृशोऽर्थः प्रत्यभिज्ञायामवभातीति, तत्रैते वादिनः शतकृत्वो दत्तोत्तरा अपि यत्पुनरस्माननुयुञ्जते तेन बलवदुद्विग्नाः स्मः, उक्तमत्र प्रमितयः प्रष्टव्या न तु वादिन इति, अतीतकालविशिष्टो वर्तमानकालावच्छिन्नश्चार्थ एतस्यामवभासते,

ननु पूर्वापरौ कालौ परस्परविरोधिनौ।
नैकत्र विशतस्तेन तद्भेदाद्वस्तु भिद्यते॥

नैतदेवम्, केयूरकिरीटकटककुण्डलादिभेदेऽपि देवदत्तस्याभेदात्, अवयव्यस्ति नास्तीति परीक्षणं वादान्तरगमनम्, अपवर्गाह्निके च विस्तरेणावयवी साधयिष्यत इत्यास्तामेतत्, कुण्डलादीनामविरोधादिति चेन्न, लाक्षणिकविरोधाभ्युपगमात्परस्परव्यवहारव्यवस्थितात्मानो हि सर्वे भावा इति वदद्भिर्भवद्भिरभ्युपेत एषां विरोधः।

ननु केयूरादीनां विरोधेऽपि तदवस्थानादेकदेवदत्तसम्बन्धित्वमभ्युपपद्येतापि भूतवर्त्तमानयोस्तु युगपदसन्निधानात्तद्विशिष्टता स्तम्भादेरुच्यते प्रतीयते च द्वौ कालौ न च सन्निहिताविति चित्रम्, किं भूतोऽपि काल इदानीमस्ति? नैवम्

नासावस्तीत्युच्यते अपि त्वासीदस्तीत्युच्यमानं वर्त्तमान एव न भूतः, हन्त तर्हि भूतो भूतत्वादेव नेदानीमस्तीति कथं प्रतिभासते, भूतत्वेनैवेति ब्रूमः, भूतः कालो भूततया गृह्यते वर्तमानो वर्तमानतयैवार्थस्तूभयानुगत एक एव तथा ग्रहणात्,

ननु भूतकालस्येदानीमभावात्तद्विषयं ज्ञानमनर्थजं स्यान्न धर्मिणस्तदवच्छिन्नस्य ज्ञानजनकस्य भावात्, भूतः कथमवच्छेदक इति चेत्तथा प्रतिभासात्, प्रतीतिमवमृषतु भवान्स एवायमिति यः पूर्वमासीत्स इदानीमप्यस्तीति सोऽयमतीतकालविशिष्टोऽर्थ एतस्यां बुद्धाववभासते,

नन्वसता भूतकालेन विशेषितमर्थं कथमिन्द्रियजप्रतीतिरालम्बनीकुर्यात्, उच्यते--

अन्त्यसंख्येयसंवित्तिकाले प्रागवलोकिताः।
यथा शतादिज्ञानानि जनयन्ति घटादयः॥
अतीतकालसंसर्गो भवन्नेव विशेषणम्।
स्तम्भादिप्रत्यभिज्ञायाः कारणत्वं प्रपत्स्यते॥

संख्येयाः घटादयः सन्त्यतीतकालो नास्ति इति चेत्कपित्थेषु भक्ष्यमाणेषु किं वक्ष्यति देवानांप्रियः, शतं कपित्थानां भक्षितवान्वाहीक इति प्रतीतिदर्शनात्, न च(१)नवनवतावनुपयुक्तेषु कपित्थेष्वत्रैव शततमे शतमिति भवति यथा तत्रातिक्रान्तान्यपि नवनवतिः कपित्थानि शतप्रतीतिहेतुतामुपयान्ति प्रतिभासोपारूढत्वादेवमतीतकालयोगोऽपि प्रतिभासमानः प्रत्यभिज्ञामाधास्यतीति,

विकल्पमात्रं शतप्रत्यय इति चेद् भो महात्मन् किं वा न विकल्पमात्रम्, किन्तु जीवन्त्यमी सविकल्पकप्रामाण्यवादिनः,

यश्च सामान्यसंसिद्धौ प्रकारः प्राक् प्रदर्शितः।
योज्यः स एव द्वित्वादिसंख्यासद्भावसिद्धये॥

इत्यलं कथाक्षेपेण।

नन्वतिक्रान्तग्राहि च प्रत्यभिज्ञाविज्ञानमिन्द्रियार्थसन्निकर्षजं चेति नः कौतुकमिदं, कियत्कौतुकमर्थस्तावदस्य पुरोऽवस्थितोऽस्त्येव जनकः स्तम्भादिः, नन्वस्ति स तु वर्तमानकाल एव, न केवलं, वर्तमानकालयोगिनाऽर्थेन तत्प्रत्ययजननात्तस्य वर्तमान इवातीतोऽपि कालोऽवच्छेदकतां प्रतिपद्यते स च तदवच्छिन्नोऽर्थ इदं ज्ञानमादधातीत्यर्थजमेतदिन्द्रियजमपि भवति तद्भावाभावानुविधानात्,

---

(१) नवेति। यदा नवतिः (नव) कपित्था भुक्ता एकोऽवशिष्ट इति अवशिष्टमेकमादाय शतमितिव्यवहारो भवितुं नार्हति इति अतीतानपि कपित्थानादाय शतमिति व्यवहारः तथा अतीतकालयोगोऽपि प्रत्यभिज्ञामाधास्यतीति भावः।

नन्वतीतेऽर्थे कथमिन्द्रियं प्रवर्त्तते? कस्यैष पर्यनुयोगः ? नेन्द्रियस्याचेतनत्वात् पुरुषस्त्वविस्फारिताच्चो नेदृशीं प्रतिपत्तिं लभते विस्फारिताच्चस्तु लभते इति सोऽपि नानुयोज्यः,

नन्वतीतग्राहित्वाद्वरमप्रामाण्यं कल्पयितुं युक्तमस्या बुद्धेरिन्द्रियस्यातीतेऽपि सामर्थ्यमदृष्टमिति, अप्रामाण्यं नाम बाधकात्प्रत्ययात्कल्प्यते न चासावस्ति प्रत्यभिज्ञायाम् अनुमानं तु तावकं प्रतिक्षिप्तम्,

ननु कारणदोषादवकल्पते एवाप्रामाण्यम्, आयुष्मन्! सोऽप्युच्यताम्, उक्त एवेन्द्रियस्यातीतविषयग्रहणे सामर्थ्यविरहः, वत्स! सम्यगुक्तवानसि नायमिन्द्रियस्य तिमिरादिरिव दोषः, अतीते काले स्वतन्त्रे तस्य सामर्थ्यं न तद्ग्राह्यवर्तमानवस्तुविशेषणीभूते, संस्कारसचिवस्य चास्य सामर्थ्यं न केवलस्येत्युक्तम्, तस्मादतिक्रान्तकालविशेषितपूर्ववर्त्तिस्तम्भादिपदार्थविषयमिन्द्रियादिसन्निकर्षोत्पन्नमेवेदं प्रत्यभिज्ञाज्ञानमिति सिद्धम्,

अथ वा पूर्वाभिज्ञानविशिष्टग्राह्यमाणमिष्यतां प्रत्यभिज्ञानं गन्धवत्कुन्दबुद्धिवद्, यथा हि लोचनगोचरेऽपि कुन्दकुसुमे तदविषयगन्धविशेषिते बाह्येन्द्रियद्वारकग्रहणमघटमानमिति मानसमेव सुरभि कुसुममिति ज्ञानम् एवं पूर्वज्ञानविशेषितस्य स्तम्भादेर्विशेषणमतीतक्षणविषय इति मानसी प्रत्यभिज्ञा पूर्वप्रवृत्तबाह्येन्द्रियोपजनितज्ञानविशिष्टबाह्यविषयग्राहिणि चान्तःकरणेऽभ्युपगम्यमाने सति नान्धाद्यभावप्रसङ्ग इति बहुशः कथितम्,

ननु कुन्दादेर्विशेषणं वर्त्तमानमस्ति सौरभम् इह त्वतीतं पूर्वविज्ञानमिति कथं विशेषणमत्र, किं तेन सता करिष्यसि शातादिबुद्धिष्वतिक्रान्तस्यापि कपित्थादेः कारणत्वदर्शनादिति तदेवमन्तःकरणजन्मनाऽपि प्रत्यभिज्ञानेन स्थैर्यमवस्थाप्यत एव भावानाम्,

क्षणभङ्गनिरासः ।

या तु मुण्डितकेशादिप्रत्यभिज्ञानतुल्यता ।
स्तम्भादिप्रत्यभिज्ञायाः कथ्यते सा(१)ऽप्यसङ्गता ॥

तत्रान्तराले मुण्डितशिरोदर्शनमेव बाधकमिह तु न किंचिदस्ति, अत एव शब्दे सदैव स्फुरन्त्या विनाशबुद्ध्या वैधुर्यमुपनीता प्रत्यभिज्ञा तु न तामवस्थापयितुं समर्थेत्युक्तम्, ज्वालादावपि तैलवर्त्तिक्षयानुमानबाधितत्वाद् भ्रान्ता प्रत्यभिज्ञा न तु तथा स्तम्भादावनुमानमपि बाधकमस्ति, सत्त्वानुमानं

---

(१) पूर्वं मुण्डितेषु पश्चादुत्पन्नेषु केशेषु त एवामी केशा इति प्रत्यभिज्ञा यथैकत्वस्य स्थिरत्वस्य वा न साधिका तद्वत्स्तम्भादिप्रत्यभिज्ञाऽपि इति तौल्यं खण्डयति—सापीति ।

तु निरस्तमेव, यद्यपि च नैष नियमः प्रत्यक्षानुमानयोर्विरोधे प्रत्यक्षं बलीय इति त्वरिततरपरिभ्रमितचक्रीभवदलातग्राहिणः प्रत्यक्षस्यानुमानबाधितत्वदर्शनादिति, तथा प्रकृतं क्षणिकत्वानुमानमन्यथासिद्धमनन्यथासिद्धं तु प्रत्यक्षमिति प्रत्यक्षमेव क्षणिकत्वानुमानस्य बाधकं, न चेतरेतराश्रयत्वमनुमानमिथ्यात्वनिबन्धनं प्रत्यभिज्ञाप्रत्यक्षप्रामाण्यानभ्युपगमात्, स्वहेतुबलवत्तयैव प्रत्यभिज्ञा प्रत्यक्षं न तस्येदं दैन्यं यदनुमानमिथ्यात्वे सति तत्प्रमाणीभविष्यतीति,

आस्तां वा प्रत्यभिज्ञानं य एष प्रथमक्षणः ।
स्तम्भादिबोधस्तेनापि बाध्यते क्षणभङ्गिता ॥

तुल्यसामग्र्यधीनत्वनिराकृतत्वात्साकारस्य निराकरिष्यमाणत्वादन्वयव्यतिरेकोपकृतमानसप्रत्यक्षनिश्चितजनकस्य चार्थस्यावभास्यत्वनिश्चयादुत्पन्नोऽर्थो ज्ञानं जनयति जातेन च ज्ञानेन गृह्यत इति बलाद् द्वित्रिक्षणावस्थायित्वमस्योपलभ्यत इति कुतः क्षणिकत्वम् ?

यदि लब्धस्वरूपोऽपि न नष्टः प्रथमे क्षणे ।
हेत्वन्तराद्विनाशोऽस्य न स्वरूपनिबन्धः ॥
विचित्रा च पदार्थानां प्रतीतिरिह दृश्यते ।
चिरन्तनमतिः काचित्काचित्तत्कालजातधीः ॥
सलिलाहरणव्यग्रकुम्भावगतिरन्यथा ।
तदैव कन्दुकाकृष्टकुम्भावगतिरन्यथा ॥
एतेन (१)रविगुप्तोऽपि परिम्लानमुखीकृतः ।
क्षणिकत्वक्षमादित्वसमुत्प्रेक्षणपण्डितः ॥

तथा हि वर्तमानवस्तुविग्रहग्राहि विज्ञानमनन्तरोक्तनयेन जनकार्थप्रतिभासनाद् द्वित्रिक्षणस्थायितामर्थस्य गमयतीत्युक्तम्, आद्यं च किंचिद्विज्ञानमनागतकालस्पर्शि भवति, यथाऽऽह भट्टः–'रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते' इति, उत्तरमपि प्रत्यभिज्ञानं प्रतीतकालावच्छिन्नमर्थमवद्योतयतीति दर्शितम्,

न चातीतानागतजन्मग्रहणमाशङ्कनीयमिति कारणसामर्थ्यनियमान्न ह्यतीतानागतजन्मग्रहणमशक्यक्रियमिति यावदपि दृश्यमानं ग्रहणं तदप्यपन्होतुं युक्तम्, न चैतावताऽतीतानागतकालावच्छिन्नवर्तमानवस्तुग्रहणमात्रेण सामान्यतो दृष्टेनादृष्टमप्यतीतानागतज्ञानं कल्प्यम्, यथादर्शनं हि वस्तूनि व्यवस्थाप्यन्ते न किंचिद् दृष्ट्वाऽन्यदपि कल्प्यते दृष्टमपि वा निन्हूयत इति,

---

(१) रविगुप्तो नाम कश्चित् क्षणिकत्वादी ।

प्रत्यक्षस्य स्थिरवस्तुग्राहकत्वम् ।

अपि च निमेषदृष्टेरत्रुटितसत्ताकस्तम्भादिपदार्थग्राहि प्रत्यक्षमुत्पद्यते तकथं–क्षणिकग्राहि कथ्यते,

यच्च तत्र विकल्पितमतीतानागतक्षणयोरसन्निहितत्वेन प्रत्यक्षग्राह्यताऽनुपपत्तेर्वर्त्तमानक्षणस्य चातिसूक्ष्मत्वात्तत्कालग्राहिणा प्रत्यक्षेण क्षणिकत्वं गृहीतं भवतीति, तदनुपपन्नम्, मा नाम भूदतीतानागतकालग्रहणं वर्तमान एव तत्रानिमेषदर्शनस्य कियान्काल इति चिन्त्यताम्, निमेषकृतस्यापि दर्शनविच्छेदस्यानवकाशाद्यावद्धि दर्शनं न विच्छिन्नं तावान्वर्तमानः काल इति तद्ग्रहणे स्थैर्यं गृहीतं भवति न क्षणिकत्वम्,

ननु तावानसौ कालः स क्षणसमुदायो भवति न क्षणः क्षणश्चैक एव वर्तमानो भवति न ततः पूर्वापरौ क्षणावतीतानागतौ भवतः तयोश्च न ग्रहणमित्युक्तम्, सिद्धे क्षणिकत्व एवं शक्यते वक्तुं न तु तत्साधनावसरे, कालो ह्येको नित्यो विभुरिति साधितोऽनुमानपरीक्षायाम, न तु क्षणसमुदायात्मा कालः कालस्य तु भेदाः क्रियोपजनविनाशाद्युपनिबन्धनाः कल्प्यन्त इत्यपि तत्रैव परीक्षितम, तदयमनिमेषदृष्टेर्दर्शनविच्छेदानुपग्रहात्तावानेकः स वर्त्तमान एव भवतु,

ननु कालो नाम न कश्चित्पारमार्थिकः पदार्थ एव परिदृश्यमानो वर्त्तमानादिव्यवहारहेतुः स च न चिरमनुभूयत इति क्षणिक उच्यते, भिक्षो ! अलमवान्तरगमनेन मा भूत्कालः पदार्थस्त्वनिमेषदृष्टिना दृष्ट्यविच्छेदादविच्छिन्नसत्ताक एव दृश्यत इति न क्षणिकग्राहि प्रत्यक्षम्,

ननु भवद्भिरपि न स्थिरं ज्ञानमिष्यते क्षीणे च ज्ञाने सोऽर्थो द्वितीयक्षणे केन गृह्यते ज्ञानान्तरेण तु गृह्यमाणः स एवेत्यत्र को निश्चयः, अनिमेषदृष्टेर्ज्ञानं न क्षीयत एवेत्येके,

अथ वा किं न एतेन न हि विषयप्रतिभासकाले ज्ञानमवभासत इत्यसकृदुक्तं, वक्ष्यते च तत्र तत्कीदृशमिति कुतो वयं विद्मः, अर्थस्त्वविच्छिन्नसत्ताक एव गृह्यते ज्ञानं तु वर्त्तमानकालमप्यतीतानागतकालग्राहि भवति स्मरणमिव (१)प्रातिभमिव भूतभविष्यद्वृष्ट्यनुमानमिव,

---

(१) प्रातिभम्–कन्यका ब्रवीति श्वो मे भ्राता आगन्तेति हृदयं मे कथयतीति ज्ञानम् । तथाच प्रशस्तपादभाष्यम् 'आम्नायविधातृणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेषु चात्ममनसोः संयोगाद्धर्मविशेषाच्च यत्प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्येत तदार्षमित्याचक्षते । तत्तु प्रस्तारेण देवर्षीणाम् कदाचिदेव लौकिकानाम् यथा कन्यका ब्रवीति श्वो मे भ्राता आगन्तेति हृदयं मे कथयतीति' इति ।

नन्विन्द्रियव्यापारो न क्षणान्तरस्थायीति तस्मिन्नसति कुतोऽस्य विततकालग्रहणम्, तदलं भवतु श्रान्तोऽसि मञ्जस्वैवं ब्रुवाणः निमेषकृतोऽपि विच्छेदोऽस्य नास्ति अथ च न स्थिर इन्द्रियव्यापार इति साहसिकतामात्रम्, सन्निकर्षश्चास्य विषयग्रहणे व्यापारः स च स्थिर एव तस्माद्विततकालस्य वस्तुनः प्रत्यक्षेण ग्रहणमिति स्थितम्, एवं च स्थिते न स्वरूपमात्रमेव भावानां विनाशकारणं कारणानां च नित्यत्वमेव दण्डादीनामिति सिद्धम्,

यत्पुनरभाणि दर्शनादर्शने एव सत्त्वासत्त्वे भावानामिति तदपि व्यामूढभाषितम्, दर्शनादर्शनाभ्यामेव भावाभावयोः (१)परिच्छेदः न पुनर्दर्शनादर्शने एव भावाभावावभावश्च विस्तरतः प्राक् साधितः स च सहेतुक इति न स्वत एव विशरारवो(२)भावाः, एवं तु निष्प्रमाणे पदार्थस्थैर्यपक्षे ज्ञानं तु जनकस्य नियतस्य वस्तुनो दर्शनम् दर्शनविषयीकृतस्य प्रवृत्तिः प्रवृत्तिविषयीकृतस्य प्राप्तिरिति व्यवहारो न स्यादर्थक्षणनानात्वात्, बाध्यबाधकभावश्च क्वचिज्ज्ञानानां दृष्टः स च न स्यात्पूर्वावगतरजतादिविषयभावग्राहिणो ज्ञानस्य (३)गृहीतमुद्गरदलितघटाभावज्ञानवद्बाधकत्वानुपपत्तेः, पूर्वदृष्टस्य स्मरणं स्मृतस्य कस्यचित्प्रत्यभिज्ञानं प्रत्यभिज्ञातस्य गृहादेरर्धकृतस्य समापनमित्यादयश्च व्यवहारा विप्रलुप्येरन्।

क्षणभङ्गभङ्गोपसंहारः।

अथ सन्तानमाश्रित्य क्रियते तत्समर्थनम्।
न तस्य भिन्नाभिन्नत्वविकल्पानुपपत्तितः॥
अभेदपक्षे क्षणवद्व्यवहारो न सिध्यति।
व्यतिरेके तु चिन्त्योऽसौ वास्तवोऽवास्तवोऽपि वा॥
अवास्तवत्वे पूर्वोक्तं कार्यं विघटते पुनः।
वास्तवत्वे स्थिरो वा स्यात्क्षणिको वेति चिन्त्यताम्॥
सन्तानिनिर्विशेषः स्यात्सन्तानः क्षणभङ्गुरः।
न सिध्येत्पुनरप्येष व्यवहारः पुरोदितः॥
अथापि नित्यं परमार्थसन्तं सन्ताननामानमुपैषि भावम्।
उत्तिष्ठ भिक्षो! फलितास्तवाशाः सोऽयं समाप्तः क्षणभङ्गवादः॥
तदेवं सति सन्तानच्छद्मनो विनिवारणात्।
लोकयात्रा स्थिरैरेव पदार्थैरुपपद्यताम्॥

---

(१) परिच्छेदः—निश्चयः। (२) विशरारवो—नश्वराः।

(३) पूर्वं गृहीतः पश्चाद् मुद्गरेण दलितो यो घटस्तदभावज्ञानस्य न पूर्वज्ञानबाधकत्वम्। पूर्वकालैकेति समासः।

एवमनन्तरनिगदितदूषणनिकुरुम्ब(१)विनिहतप्रसरम् ।
नाध्यक्षं क्षणिकत्वे न चानुमानप्रमाणं तत् ॥
क्षणभङ्गे निरस्ते च कार्यमाधारवद् ध्रुवम् ।
अतो ज्ञानादिकार्येण युक्तमाश्रयकल्पनम् ॥
सुखादेरपि कार्यस्य विज्ञानाद्व्यतिरिक्तता ।
प्रागुक्तेति तदप्यन्यद्भवत्यस्यानुमापकम् ॥
किं च नाङ्गीकरोषि त्वमात्मानं पारलौकिकम् ।
उपैषि परलोकं च किमिदं ते बकव्रतम् ॥
कर्म सन्तानिनाऽन्येन यत्कृतं चैत्यवन्दनम् ।
ततोऽस्य फलमन्येन भुज्यतेऽकृतकर्मणा ॥
न वा निर्वृतिरप्येति चैत्यवन्दनकर्मणा ।
ज्ञानक्षणेन नैकेन किंचित्कर्म समाप्यते ॥
कार्यकारणभावश्च यस्त्वदुक्तः स दूषितः ॥
कार्यकारणभावे हि न ह्यन्तत्वं निवर्तते ।
अनैकान्तिकता चास्य सन्तानान्तरबुद्धिभिः ।
उपादानत्वरूपोऽपि विशेषः प्राङ् निराकृतः ॥
कार्पासरागसंक्रान्तिदृष्टान्तो यश्च वर्णितः ।
सोऽप्ययुक्तः स्वरूपेण तत्र तस्यैव दर्शनात् ॥
य एव रागः कार्पासे बीजे समुपकल्पितः ।
स एव दृश्यते पुष्पे न तु तस्मात्फलान्तरम् ॥
एवं कर्मानुवृत्तिः स्यात्फलभोगस्तु दुर्घटः ।
कर्मानुवृत्तिरप्येषा न चैकस्यास्ति कस्य चित् ॥
कार्यकारणयोर्भेदात्कार्पासकुसुमादिवत् ।
अन्यत्रैव हि कर्म स्यादन्यत्रैव च तत्फलम् ॥
न च सन्तानभोगाय कश्चित्कर्मानुतिष्ठति ।
फलमस्मान्ममैव स्यादिति सर्वः प्रवर्तते ॥
सर्वथा शाक्यभिक्षूणां परलोको विसंष्ठुलः ।
न तत्प्रसाधने तेषां का चिद्गमनिका ऽस्ति वा ॥
गर्भादौ प्रथमं ज्ञानं विज्ञानान्तरपूर्वकम् ।
ज्ञानत्वादित्ययं हेतुरप्रयोजक इष्यते ॥
मूर्छाद्यनन्तरोद्भूतज्ञानैश्च व्यभिचार्य्ययम् ।
मूर्छितस्यापि विज्ञानमस्तीत्येतत्तु कौतुकम् ॥

(१) दूषणनिकुरुम्बः–दूषणसमूहः ।

न ह्यर्थावगतेरन्यद्रूपं ज्ञानस्य किं चन ।
मूर्छादिषु कुतस्तत्स्यात्कुतो वा कललादिषु ॥
कललादिदशायां वा यदि विज्ञानमिष्यते ।
मातापितृस्थयोरस्ति शुक्रशोणितयोरपि ॥
ततश्चैकत्र संताने चैतन्यद्वयमापतेत् ।
चेतनानां बहुत्वं वा दम्पत्योर्बहुपुत्रयोः ॥
न चैष नियमो लोके सदृशात्सदृशोद्भवः ।
वृश्चिकादेः समुत्पादो गोमयादपि दृश्यते ॥
शरीरान्तरसंचारचातुर्यं च धियां कथम् ।
ज्वालादिवन्न मूर्तत्वं न च व्यापकताऽऽत्मवत् ॥
आतिवाहिकदेहेन नीयन्ते चेद्भवान्तरम् ।
नन्वातिवाहिकेऽप्यासां कथं संचारसंभवः ॥
आस्तामिवैष वा जीवद्देहेऽपि पथि गच्छताम् ।
प्रदेशान्तरसंचारो ज्ञानानां भवतः कथम् ॥
न ह्येषां भूतधर्मत्वं न स्वतो गतिशक्तिता ।
न च जात्यादिवद् वृत्तिर्न च व्यापकताऽऽत्मवत् ॥
एवं यदैव निष्क्रान्ता विहारकुहराद्भवान् ।
तदा कष्टी भवद्देहो ज्ञानसंक्रान्तिसंभवात् ॥
तदयं संक्षेपार्थस्त्यक्तव्या वा निरस्य कुरुकुर्वीम् ।
सुरगुरुवत्परलोके(१) नित्या वाऽऽत्माऽभ्युपेतव्यः ॥

यदवस्य चमगगनोपमतां विकल्प्य नाशित्वमुक्तमथ वा विफलत्वमेव ।
तन्नैव साधु सुखदुःखदृशोपभोगयोगेऽपि नाशमधिगच्छति नायमात्मा
विकृतिश्च तस्य सुखदुःखजन्मना न हि तादृशो भवति लुप्यते यया ।
सहकारिकारणवशात्तु जायते तदमुष्य येन समुपैति भोक्तृताम् ॥
अथ वापजनव्ययस्वभावस्स्वदशाभेदसमन्वये हि पुंसः ।
फणिनः किल कुण्डलाद्यवस्थानुगतस्येव न भिन्नतेति के चित् ॥

अवस्था एवैताः प्रसभविलयातङ्कविधुराः
अवस्थाता त्वेकः स्फुरति निरपायस्थिरवपुः ।
असत्यस्मिन्पूर्वावगतविषयानुस्मृतिभुवां
न सिद्धिः कार्याणामिति निपुणमावेदितमिदम् ॥
ननु विमृशति भोगे कर्म नित्योऽपि नात्मा

(१) परलोक इति । तथाच धर्मसंग्रहे नागार्जुनः-संजीवः कालसूत्रः संघातो रौरवो महारवस्तपनः प्रतापनोऽवीचिश्चेति, अष्टावष्णनरकाः' इति । नास्तिकत्वं तु वेदनिन्दकत्वेन 'नास्तिको वेदनिन्दक' इतिमनूक्तेः ।

न हि नरकनिमग्नो मन्यते कश्चिदेवम् ।
किल यदहमकार्षं प्राग्भवे कर्म पापं
फलमुपनतमस्माद् भुज्यते तन्मयेति ॥

कार्योपभोगसमये किमनेन कृत्यं नास्य प्रवृत्तिरधुना न निवृत्तिरस्मात् ।
यस्तु प्रवृत्तिजननौपयिकोऽपमर्शः शास्त्रादसौ भवति शास्त्रविदामवश्यम् ॥

विमर्शोऽयं पश्चादपि भवति दृष्टे तु विपये
मया यूना यत्तत्किमपि सदसद्वा कृतमभून् ।
ततो वृद्धोऽद्याहं फलमनुभवामीति तदयं
पुमानस्ति स्थायी सुकृतफलभोगादिनिपुणः ॥

नास्त्यात्मा फलभोगमात्रमथ च स्वर्गाय चैत्यार्चनं
संस्काराः क्षणिका युगस्थितिभृतश्चैते विहाराः कृताः ।
सर्वं शून्यमिदं वसूनि गुरवे देहीति चादिश्यते
बौद्धानां चरितं किमन्यदियती दम्भस्य भूमिः परा ॥

चार्वाकमतेन पूर्वपक्षः ।

अत्र सुशिक्षिताश्चार्वाका आहुः—यावच्छरीरमवस्थितमेकं प्रमातृतत्त्वमनुसंधानादिव्यवहारसमर्थमस्तु नाम कस्तत्र कलहायते शरीरादूर्ध्वं तु तदस्तीति किमत्र प्रमाणम्, न च पूर्वशरीरमपहाय शरीरान्तरं संक्रामति प्रमाता, यदि ह्येवं भवेत्तदिह शरीरे शैशवदशानुभूतपदार्थस्मरणवदतीतजन्मानुभूतपदार्थस्मरणमपि तस्य भवेन्न हि तस्य नित्यत्वाविशेषे च शरीरभेदाविशेषे च स्मरणविशेषे कारणमुत्पश्यामो यदिह जन्मन्येवानुभूतं स्मरति नान्यजन्मानुभूतमिति, तस्मादूर्ध्वं देहान्नास्त्येव प्रमातेति नित्यात्मवादमूलपरलोककथाकुरुकुर्चीमपास्य यथासुखमास्यताम्, यथाऽऽह—

यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः ।
भस्मीभूतस्य शान्तस्य पुनरागमनं कुत इति ॥

चार्वाकमतनिरासः

अत्रोच्यते—न खलु निपुणमिव सुशिक्षितमायुष्मता चार्वाकाचार्यचातुर्यम्, यावच्छरीरमेकमनुयायि प्रमातृतत्त्वमस्तीति यदुक्तवानसि तन्न विस्मर्तुमर्हसि, न चास्तित्वाविनाभावी भावानां विनाशः स्वाभाविकः किन्तु हेत्वन्तरनिमित्तक इति सौगतैः सह कलहमतिमात्रमधुनैव कृत्वा समर्थितोऽयमर्थः, न च विनाशहेतुः प्रमातरि चिरमपि विचार्यमाणः कश्चित्कुतश्चिदवाप्यते, न चानुपलभ्यमानोऽप्यसौ कल्पयितुं पार्यते, न ह्यात्मा पटादिरिव सावयव उपलभ्यते यदवयवविभागादिना नङ्क्ष्यतीति गम्यते, उत्पत्तिर्नात्मनो दृष्टा यत-

स्तदविनाभाविनो निरवयवस्यापि कर्मादेरिव विनाशः प्रतीयेत, न चैष कस्य-चिदात्मा गुणो येनाश्रयविनाशाद्वा विरोधिगुणान्तरप्रादुर्भावाद्वा प्रध्वंसमासादयेत्, न चैवं शक्यते वक्तुं किं विनाशहेत्वनुमानेन प्रत्यक्ष एवास्य विनाशो दृश्यत इति, यतो न शरीरवदसौ दह्यमानः शकुनिभिरवलुप्यमानो वा कदाचिदुपलब्ध इति, तस्माद्विनाशादर्शनाद्विनाशहेत्वनुमानासंभवाच्च अस्ति चेदात्मा नित्य एवेत्यवधार्यताम्, तस्माद् भूतचैतन्यमेव चिरंतरचार्वकाचार्यवत्परलोकापलापपरितोषालम्बितयत्किञ्चनकारित्वसुलभसुखासिकासक्तहृदयैर्वरमाश्रितमाशरीरमवस्थिते तु प्रमातृतत्त्वे सति न फलन्त्येते परलोकापलापमनोरथाः, भूतचैतन्यपक्षोऽपि च पुरा पराकृत एव तस्मादस्ति नित्यः परलोके प्रमातेति, नित्यत्वे सति पूर्वदेहसंबन्धो भविष्यद्देहान्तरसंबन्धश्चास्य न दुरुपपादः, शरीरान्तरसंचारस्तस्य नास्तीति यदुक्तं तद्युक्तमेव व्यापिनः सर्वत्र विद्यमानस्यात्मनः कः संचारार्थः, व्यापित्व एव किं प्रमाणमिति चेत्सर्वत्र कार्योपलम्भः प्रमाणम्, यतो वाराणसीमपि गतस्य मे भवत्येव स्मरणेच्छाऽऽदिकार्ययोगः स चात्मैकप्रभवः आत्मनश्च शरीरस्येव न तत्र गमनममूर्तत्वान्न शरीरगुणवत्तदनाश्रितत्वान्न प्राणादिवदन्तःशरीरवर्त्तित्वाभावात्, अन्तःशरीरवृत्तित्वे हि द्वयी गतिरेकदेशवृत्तित्वं सर्वशरीरमापूर्य वा तत्र सर्वशरीरापूरकत्वे शरीरपरिमाणानुविधायित्वाद् बालशरीरयुवस्थविरशरीरवत्पूर्वनीत्या परिमाणान्यत्वेन तदन्यत्वात्पुनरपि प्रतिसन्धानादिकार्यवैधुर्यप्रसङ्गः, करिमशकशरीरयोगे च कर्मपरिणामोपनते तस्य संकोचविकासौ प्राप्नुतः तौ च नित्यस्य विरुध्येते, एकदेशवृत्तित्वे तु तदनधिष्ठितानामवयवानामनात्मकत्वान्मृतशरीरावयववदयथेष्टविनियोज्यता कष्टीभावः स्यात्, प्रदीपवदेतद्देशवृत्तेरप्यात्मनः सकलशरीराधिष्ठातृत्वमिति चेत्, वर्त्तिप्रदेशोपचिततेजःपिण्डवदेकत्र शरीरावयवे सविशेषचैतन्यसंवित्तिः स्यात्, अस्त्येव हृदयदेशे तदतिशय इति चेन्न, अनुपलम्भात्, दहनहिमकृपाणादिस्पर्शे हि न हृदयस्य प्रदेशान्तरस्य वा शरीरवेदनाविशेषं पश्यामः, तस्मान्न हृत्पुण्डरीके यावदवस्थानमात्मनः अत एवा'ङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यम' इति व्यासवचनमनेवंपरमवगन्तव्यम्, यदि तु मनोवदेकदेशवृत्तेरणुपरिमाणस्याशु संचरतः शरीराधिष्ठातृत्वमात्मनः कथ्यते, तथाऽपि सहसैव चिरप्रोषितगतागतदयितजनदर्शनोद्गतसकलशरीरव्यापिस्वेदरोमाञ्चादिदर्शनं विरुध्यते, न च द्वयोरण्वोरात्ममनसोः कर्तृकरणव्यवस्थाऽपि निर्वहतीति, तस्मान्नाणुरात्मा न च शरीरपरिमाण इति व्यापक एवावशिष्यते, तदेवं वाराणस्यामप्ययमात्मा विद्यत एवेति तत्र तत्र तत्कार्यदर्शनमवकल्पते नान्येन गमनादिप्रकारेणेति ।

ननु सर्वत्र सुखदुःखज्ञानादिकार्यदर्शनात्सर्वप्राणिनामेक एवात्मा भवेत्,

न सुखदुःखव्यवस्थादर्शनाद् बन्धमुक्तविभागोपपत्तेश्चात्मभेदस्य दर्शयिष्यमाणत्वात्, व्यापिनः कथं कर्तृत्वमिति चेन्, ज्ञानचिकीर्षाप्रयत्नसमवाय एवास्य कर्तृत्वं न व्यापारयोग इति निर्णीतमेतत्।

ननु व्यापिन्यात्मनि कथं शरीरबहिरणवपि(१) कार्यं न दृश्यते कर्मोपात्तशरीरेन्द्रियादिसहकारिसन्निधाननिबन्धनो हि तत्कार्योत्पादः स कथं बहिर्भवेद् इति।

तस्मादनन्तरोक्तेन प्रक्रमेणोपपाद्यते।

नित्यत्वाद्व्यापकत्वाच्च पारलौकित्वमात्मनः॥

सूत्रकारस्तु पारलौकिकत्वसिद्धये हेत्वन्तराणि प्रत्यपादयत्, सद्यो जातस्य बालस्य वदनविकासरोदनाद्यनुमितो हर्षशोकादियोगस्तावदस्ति, युवशरीरादौ रोदनादि शोकादिकारणकमवगतमिदमाननविकासादि हर्षहेतुकमेवं शिशोरपि तन्निबन्धनस्तदुत्पादः, तौ च हर्षशोकौ सुखदुःखसाधनाधिगमतदनुस्मरणान्यतरकारणौ भवितुमर्हतस्तथा दृष्टत्वात्, इह चास्य न सुखदुःखसाधनपदार्थानुभवः तदानीमस्तीति तदनुस्मरणमेव हर्षशोकहेतुर्भवेत, स्मरणमपि तदनुभवप्रभवमनुभवश्चेह जन्मनि सद्यो जातस्य न समस्तीति(२) जन्मान्तरानुभवसुखदुःखसाधनानुस्मरणनिमित्तक एवास्य हर्षशोकसमुत्पाद इति जन्मान्तरानुगमान्नित्य आत्मा,

नन्वभिनवजीवलोकावलोकाह्लादनिबन्धन एवास्य मुखविकासस्तथा योनिद्वारनिर्गमनोद्गतनिरर्गलक्लेशपीडितस्य तस्य रोदनमिति न जन्मान्तरानुभूतस्मरणं कल्पयितुं युक्तमतिप्रसङ्गात्,

मैवं, सुखदुःखहेतुमीदृशमननुभवतोऽप्यकस्मादेव हर्षशोकदर्शनात्।

ननु कमलमुकुलविकासादिवत्स्वाभाविकमेव शिशोर्मुखविकासादिकार्यं स्यात्, स्वाभाविकं नाम किमुच्यते किमहेतुकमविज्ञातहेतुकमनियतहेतुकं वा? न तावदहेतुकं कार्यं सम्भवति कार्यत्वहानिप्रसङ्गात्, नाप्यविज्ञातहेतुकं तद्भावयितुं युक्तं कार्यमुपलभ्यत इति तद्धेतुपरिज्ञाने यततां भवान् किमुदास्ते न चासौ ज्ञातुमशक्यः कार्यस्यैव तत्र ज्ञापकत्वात्, नाप्यनियतहेतुकं कार्यं किंचिदस्ति कार्योत्पादनियमेनैव हेतुनियमसिद्धेरत एव तत्कार्यमुपपादयितुकामास्तन्नियतमेव कारणमुपाददते लौकिकाः,

यत्राप्यनियतो हेतुर्वृश्चिके गोमयादिकः।
अभियुक्तास्तदत्रापि विशेषं न न मन्वते॥

तदेवं कारणनियमोऽपि कार्यविशेषदर्शनाद् दुरुपह्नव इति मुखविकासस्य हर्ष एव कारणमवगम्यते सहस्रकृत्वस्तथा दर्शनात्, अचेतनानां तु तामरसादी-

(१) अणवपि-किञ्चिदपीत्यर्थः। (२) समस्ति-सम्भवतीत्यर्थः।

नां(१) विकासकारणं तरणिकिरणनिकरपरिष्वङ्गाद्युपलब्धम् इति तदपि न स्वाभाविकम्,

तस्मान्मुखविकासस्य हर्षो हर्षस्य च स्मृतिः।
स्मृतेरनुभवो हेतुः स च जन्मान्तरे शिशोः॥

ननु शिशोर्जन्मान्तरानुभूतस्मरणे सर्वदा सर्वस्मरणप्रसङ्गः, न यावत्कार्यं कारणकल्पनान्न सर्वदा सर्वस्मरणं संवेद्यते न च तत्कल्पनायां कारणमुपलभ्यते न चैकदर्शनात्सर्वं कल्प्यं दृष्टमपि वा निह्नोतव्यमिति परीक्षकाणामुचित एव पन्था इत्यसकृदुक्तम्,

अपि च पयसस्तृप्तिहेतुत्वमनुस्मरन्बालकः स्तन्याभिलाषेण मातुः स्तनतटे दृष्टिं निदधाति न चाद्य तेन तस्य तत्साधनत्वमवगतमिति जन्मान्तरे सम्बन्धग्रहणमस्य वृत्तमिति मन्यामहे,

न चायस्कान्तदृष्टान्तसमाश्रयेण स्वाभाविकमेतद्बालकस्य कुचकलशनिमित्तोपसर्पणमिति वक्तुमुचितमनन्तरमेव निरस्तत्वात्,

ननु च गर्भशय्याशायिनोऽप्यपरितोषदर्शनात्तत्साधनोपादाने तदनुस्मरणमेव प्राप्नोति यदि कार्यमवगम्यते तत्रापि तत्कारणं कल्प्यतां को दोषः, तत्र तु जनयित्रीजठरपतितान्नपानपरिपाकसंक्रान्त्या तत्परिपोषमायुर्वेदविदो वदन्तीति कथं तत्र स्मरणादिकल्पना, कल्पनायां वा प्रथमं निषेकानन्तरमेव कललादिशुक्रशोणितविकारसम्भवात्तद्दशास्वपि स्मरणकल्पनाप्रसङ्गः, न तावत्कल्पनायामपि काचिदस्माकं क्षतिः अयं तु स्तन्याभिलाषेण कुचक्षीरकलशावलोकनोपसर्पणादरो दारकस्य(२) तदनुस्मरणकृत एवेति सर्वथा जन्मान्तरसम्बन्धानुमानान्नित्य आत्मेति, अतश्चैवं 'वीतरागजन्मादर्शनात्' (गो०३अ०१आ०२३सू०) रागादिवासनाभ्यासेन सुदृढप्ररूढेनानादिप्रबन्धप्रवृत्तेन परित्याज्यमानाः सरागा एव जन्तवो जायन्ते न खलु लोके कश्चन तादृशो दृश्यते प्राणी यो जातो वीतरागश्चेति स एष सरागो जायमानः पूर्वोपचितां रागादिवासनामनुसरतीति सिद्धो जन्मान्तरसम्बन्धः।

अदृष्टसाधनम्।

तथा च केचिज्जायन्ते लोभमात्रपरायणाः।
द्रव्यसंग्रहणैकाग्रमनसो मूषिकादयः॥
मनोभवमयाः केचित्सन्ति पारावतादयः।
कूजत्प्रियतमाचञ्चुचुम्बनासक्तचेतसः॥
केचित्क्रोधप्रधानाश्च भवन्ति भुजगादयः।

---

(१) तामरसादीनां–कमलानाम्। (२) दारकस्य–बालकस्य।

ज्वलद्विषानलज्वालाजालपल्लवितानना: ॥
जगतो यच्च वैचित्र्यं सुखदुःखादिभेदतः ।
कृषिसेवादिसाम्येऽपि विलक्षणफलोदयः ॥
अकस्मान्निधिलाभश्च विद्युत्पातश्च कस्य चित् ।
क चित्फलमयत्नेऽपि यत्नेऽप्यफलता क चित् ॥
तदेतद् दुर्घटं दृष्टात्कारणाद्व्यभिचारिणः ।
तेनादृष्टमुपेतव्यमस्य किं चन कारणम् ॥
अदृष्टो भूतधर्मस्तु जगद्वैचित्र्यकारणम् ।
यदि कश्चिदुपेयेत को दोषः कर्मकल्पने ॥
संज्ञामात्रे विवादश्च तथा सत्यावयोर्भवेत् ।
भूतवद्भूतधर्मस्य न चादृश्यत्वसम्भवः ॥
दृष्टश्च साध्वीसुतयोर्यमयोस्तुल्यजन्मनोः ।
विशेषो वीर्यविज्ञानसौभाग्यारोग्यसम्पदाम् ॥
स्वाभाविकत्वं कार्याणामधुनैव निराकृतम् ।
तस्मात्कर्मभ्य एवैष विचित्रजगदुद्भवः ॥
कर्मणां यदि वैचित्र्यं कर्मान्तरकृतं यदि ।
अनिष्टं तत्स्वतः सिद्धं जगत्येव तदिष्यताम् ॥
कर्मणां शास्त्रतो ज्ञाता विचित्रफलशक्तता ।
दृष्टार्थेषु च वाक्येषु दृष्टा प्रत्यक्षतोऽपि सा ॥
तस्माद् दृष्टस्य कार्यस्य युक्ता कारणकल्पना ।
कारणस्य त्वदृष्टत्वात्किं हेत्वन्तरचिन्तया ॥
हेत्वन्तरनिमित्तेऽपि कर्मवैचित्र्यकल्पने ।
संसारस्य त्वनादित्वान्नानवस्था भयावहा ॥
तथा च पुण्यः पुण्येन पापः पापेन कर्मणा ।
जायते जन्तुरित्येवं धर्मशास्त्रेषु पठ्यते ॥

तथा च गौतमः । पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति(१) ।

तस्मात्कुतर्कमूलेन दृष्टकार्योपघातिना ।
सर्वलोकविरुद्धेन चोद्येन (२)कृतमीदृशा ॥

---

(१) अत एव—'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा' इति (छा० ५-१०-७) 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन' (बृ० ३-२-१३) इति श्रुतिरपि ।

(२) कृतम्—व्यर्थम् ।

तस्मात्कल्प्यानि कर्माणि दृष्टकार्योपपत्तये ।
एवं च क्षणभङ्गित्वात्संस्कारद्वारिका स्थितिः ॥
स कर्मजन्यसंस्कारो धर्माधर्मगिरोच्यते ।

नित्यात्मसाधनम् ।

विना च नित्यमात्मानं क्व धर्माधर्मयोः स्थितिः ॥
नित्यस्तस्माद्भवति पुरुषः स्वप्रणीतानुगच्छ-
द्धर्माधर्मक्रमपरिणतानन्ततापोपभोगः ।
प्रामाण्यं च स्फुटमभिहितं पूर्वमेवागमानां-
तेभ्योऽप्यात्मा जननिधनातीततत्त्वः प्रसिद्धः ॥
[१]यद्विज्ञानघनादिवेदवचनं तत्पूर्वपक्षे स्थितं-
पौर्वापर्यविमर्शशून्यहृदयैः सोऽर्थो गृहीतस्तदा ।
मैत्रेय्या परिचोदितस्तु भगवान्यद्याज्ञवल्क्योऽब्रवी-
दात्मा नैव विनश्यतीति तदिदं सिद्धान्तसारं वचः ॥
तेनात्मनित्यत्वसमर्थनेन सुस्पष्टसिद्धः परलोकमार्गः ।
य एव देहान्तरसङ्गमोऽस्य तमेव तज्ज्ञाः परलोकमाहुः ॥
इति कवलने मांसपाकानां परस्वपरिग्रहे
कितवजनतागोष्ठ्यां वेश्यामुखाम्बुजचुम्बने ।
गतमतिरभूद् धूर्तो मत्वा भवान्तरनास्तितां
तदयमधुना तत्संसिद्धेरहो बत दूयते ॥
(२)तस्मान्नित्योऽयमात्मा न च कलुषफलस्तस्य नैसर्गिकोऽयं
रागद्वेषादियोगोऽपि तु सकलगुणापोढमेवास्य रूपम् ।

---

(१) बृहदारण्यके (४-अ ६ ब्रा०) याज्ञवल्क्यस्य द्वे भार्य्ये मैत्रेयी कात्यायनी च तत्र मैत्रेयी 'येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे विब्रूहि' इति पृष्टवती ततः 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वाऽरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः' इति एतन्मूलक एव देहात्मवादपक्षः स च पूर्वपक्षभूतः, सिद्धान्तस्तु सा होवाच मैत्रेय्यत्रैव माभगवान्मोहान्तमापीपदन्नवा अहमिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्य विनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा' इति । तदेवाह—यद्विज्ञानघनादीति ।

(२) तस्मादिति । आत्मा नित्यः तस्य कलुषफलः दुःखादिफलः रागद्वेषादियोगः नैसर्गिकः स्वाभाविको न किन्तु अस्य आत्मनः सकलगुणापोढं सकलगुणरहितमेव रूपमस्ति तेन अनादिप्रबन्धेन अनादिसंसारप्रवाहेण उपचितो जायमानः परिणमन् यः कर्मपाकः तेनोपचितं दुःखं त्यक्त्वा सर्वभयरहितं निःश्रेयसमाप्तुं यतेतेत्यर्थः ।

तेनानादिप्रबन्धोपचितपरिणमत्कर्मपाकोपनीतं
दुःखं संत्यज्य निःश्रेयसमखिलभयाऽतीतमाप्तुं यतेत ॥

इति श्रीजयन्तकृतौ न्यायमञ्जर्यां सप्तममाह्निकम् ॥

शरीरनिरूपणम् ।

आत्मानन्तरं विभागसूत्रे शरीरनिर्देशात्तदनुक्रमेण तत्स्वरूपनिरूपणार्थमाह—

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ (गौ० अ० १ आ० सू० ११)

शरीरस्य यल्लक्षणं येन च रूपेण भाव्यमानस्यापवर्गोपयोगिता तदुभयमपि प्रतिपाद्यते, तत्र शरीरत्वमेव तावत्प्रथमं शरीरस्य लक्षणं तेन हि समानासमानजातीयेभ्यस्तद् व्यवच्छिद्यते, तस्मिन्सत्यपि चेष्टेन्द्रियार्थाश्रयत्वं यदस्य लक्षणमुच्यते तत्तेन रूपेणात्मनो भोगायतनं शरीरमिति ज्ञापयितुम्, चेष्टेन्द्रियार्थाश्रयतया हि शरीरमात्मना भोगायतनं भवति मुमुक्षुणा च सुखदुःखोपभोगरहितात्मतत्त्वस्वभावनिःश्रेयसाधिगमविनिहितमनसा तथा भोगाधिष्ठानतया शरीरं भावयता तत्परिहरणे यत्नः कार्य इत्याचार्यश्चेष्टेन्द्रियार्थाश्रयत्वमस्य लक्षणमुक्तवान् ।

ननु चेष्टा क्रिया क्रियाश्रयत्वे च सत्यपि न वृक्षादीनां शरीरत्वमित्यतिव्यापकं लक्षणम्, नविशिष्टचेष्टाश्रयत्वस्य (१)विशिष्टप्रमेयलक्षणप्रक्रमतोऽवसीयमानत्वात्, हिताहितप्राप्तिपरिहारयोग्यव्यापाराधिकरणं शरीरमुच्यते न चेष्टामात्रस्याधिष्ठानम्, रथादिनाऽपि नातिव्याप्तिर्यथोक्तप्रक्रमवशा(२)देवान्येन प्रेरणायामसत्यामिति विशेषलाभात्, आत्मप्रयत्नातिरिक्तप्रेरकनिरपेक्षहिताहितोपादानपरित्यागोपाधिकचेष्टाविशेषाश्रयः शरीरमित्यर्थः, ननु पाषाणान्तर्गतमण्डूकादिशरीरेषु तदाश्रयत्वादर्शनादव्याप्तिः, न योग्यतायास्तत्रापि भावात्, सत्यामपि क्रियायोग्यतायां सर्वतो निर्विवरनिचितदृषत्कर्परोपरुद्धावकाशतया चलितुमसौ न प्रभवति भेको वराकः, तथा च स्फुटिते तस्मिन्नेवाश्मनि तत्क्षणमेवासौ चलन् दृश्यते इति निबिडपाशसंयतशरीरवत्तदानीं चेष्टाया अदर्शनेऽपि नाव्याप्तिः ।

मुमुक्षुशरीरमेव लक्ष्यतामित्येके—तेन न मण्डूकशरीरादिभिरव्याप्तिरलक्षणीयत्वात्तेषामिति, तदयुक्तं नियतस्य मुमुक्षूणां शरीरस्याभावात्, तादृशि च

---

(१) विशिष्टचेष्टाश्रयत्वस्य—हिताहितप्राप्तिपरिहारयोग्यव्यापाराधिकरणत्वरूपस्य ।

(२) यथोक्तप्रक्रमवशात्—प्रकरणवशात् अन्येन प्रेरणायामसत्यां हिताहितप्राप्तिपरिहारयोग्यव्यापाराधिकरणत्वं शरीरलक्षणं पर्यवसन्नमित्यर्थः ।

भेकादिशरीराणि नितरां निर्वेदकारीणि भवन्ति, मुमुक्षुरपि च कर्मविपाकमनेकप्रकारमाकलयन्मण्डूकीभावमात्मनोऽपि न शङ्कते प्रत्यासन्नापवर्गपुरप्रवेशं विपश्चित्तममपश्चिमजन्मानं मुमुक्षुं प्रति लक्षणाद्युपदेश एव कोपयुज्यते इत्यतः पूर्वोक्त एवाव्याप्तिपरिहारः श्रेयान् ।

भवत्वेवं चेष्टाश्रयत्वं शरीरलक्षणम् इन्द्रियाश्रयत्वं तु कथम् ? भौतिकानि हीन्द्रियाणि स्वावयवसमाश्रितानि घ्राणनयनस्पर्शनरसनानि, श्रोत्रमनसी तु नित्यद्रव्यत्वादनाश्रिते एवेति कथमिन्द्रियाश्रयता शरीरस्येति,

उच्यते नात्राधाराधेयभाव आश्रयार्थः किन्तु तदनुग्राह्यत्वात्तदाश्रितानीन्द्रियाण्युच्यन्ते, देशकालदशानुकूलपथ्यभोजनाभ्यङ्गव्यायाममर्दनाभ्युपचारोपचितशरीरस्य हि पुंसः पटुतराणि स्वविषयपुरन्ध्रिग्रहणे भवन्तीन्द्रियाणि दीर्घाध्वलङ्घनकदशनशुष्कजरत्सचन्द्रसेवनादिक्लिष्टशरीरस्य हि पुंसो मन्दशक्तीनि भवन्तीति तदनुग्राहकत्वादिन्द्रियाणामाश्रयः शरीरम् ।

अर्थानां तु रूपरसगन्धादीनां केषांचिदाश्रयः शरीरं भवत्येव तत्समवायिनां न तु तावता किंचिद्भोगायतनत्वोपयोगि रूपमभिहितं भवति । लक्षणमपि तदतिव्यापकं रूपरसादिसमवायस्य वृक्षादावपि भावात्तस्मात्तदर्थाश्रयत्वमीदृशमत्र विवक्षितं यदेते वरवनितादिशरीरवर्तिनः, (१)प्रविकचमुचुकुन्दकुन्दकन्दलकमलादिबाह्यविषयसमवायिनश्च रूपरसादयोऽर्था रमणीयतामादधाना रागवृद्धिहेतवो भवन्ति भोक्तुरात्मनः शरीरे सति न शरीररहितस्येत्यर्थानां भोगसाधनभावादाश्रयः शरीरमतः सुष्ठूक्तं चेष्टेन्द्रियार्थाश्रयः शरीरमिति, तदित्थं भोगायतनत्वेन बन्धहेतुत्वाद्धेयमित्यर्थः ।

शरीरपरीक्षा ।

तदिदानीमस्मदादिशरीरं किं पार्थिवमेव किं वा नानाभूतनिर्मितमिति परीक्ष्यते, ननु किमनया परीक्षया प्रयोजनम् ।

> निःश्रेयसोपयोगो हि यः शरीरस्य दर्शितः ।
> नानैकप्रकृतत्वे हि न स तस्य विशिष्यते ॥

मैवं वोचः—

> प्रतिपन्नस्वरूपस्य चिन्त्याकारोपयोगिता ।
> कार्यः कार्यार्थिनाऽप्यादौ यत्नस्तद्रूपनिर्णये ॥

तथा चेन्द्रियाणि भौतिकत्वाहङ्कारिकत्वविवेकेन परीक्षिष्यन्ते, अर्था अपि कति किंगुणा इति, बुद्धिरपि किं प्रधानस्य प्रथमो विकारो महच्छब्दवाच्य उतात्मन एव धर्मो ज्ञानाख्यः क्षणिक इत्येवं द्रष्टव्यम् ।

(१) प्रविकचमुचुकुन्द–विकसितपुष्पविशेषत्यर्थः ।

शरीरपरीक्षार्थं विप्रतिपत्तयः ।

तत्र पार्थिवमेवास्मदादिशरीरमिति केचित्, साधारणो हि धरणिधर्मो गन्धस्तस्मिन्नुपलभ्यते इति ।

पृथिव्युदककारणमित्यन्ये, क्लेदस्यापि तस्मिन्दर्शनादसति हि सलिलसंसर्गे न पार्थिवाः क्लेदमनुभवन्तीति ।

क्षितिजलज्वलनजनितमित्यपरे, गन्धक्लेदवदूष्मणोऽपि तत्रोपलम्भादिति, वसुमतीसलिलसितेतरसरणिसमीरणरचितमिति चान्ये, रचनाविशेषस्य पवनकार्यस्य तत्रावधारणादिति ।

अवनि(१)वनदहनपवनगगनविनिर्मितमिति चापरे, गन्धादिवदवकाशस्याप्याकाशकार्यस्य तत्र दर्शनात्सुषिरं हि शरीरमुपलभ्यते अवकाशे चाकाशैकदेशेऽप्यवच्छेदाभिप्रायेण श्रोत्रवद्वृत्त्या तत्कार्यत्वव्यपदेश इति ।

शरीरस्य पार्थिवत्वम् ।

तदत्र किं तत्त्वं पार्थिवमेवास्मदादिशरीरमिति विजातीयकार्यस्यावयविनोऽनुपपत्तेः, पार्थिवावयवसमवेतशरीरावयवग्राहिणश्चाभेदप्रत्ययस्य तृणपर्णपाषाणमूलकाद्यभेदप्रत्ययवदपवादासम्भवात्, न च वयमिह भूतान्तराणां कारणभावनिषेधं विद्मः केवलपार्थिवतया निर्विवादसिद्धेऽपि कुम्भाद्यावम्भःप्रभृतीनां कारणत्वानपायात्तद्व्यतिरेकेण घटादेर्घटयितुमशक्यत्वात्, किन्तु घट इव शरीरेऽपि समवायिकारणतां पृथिव्यवयवानामेवाचक्ष्महे तदाश्रितत्वस्यास्य प्रत्यक्षेण ग्रहात्सहकारिकारणत्वानुप्रविष्टभूतान्तरसम्बन्धनिबन्धनस्ततः सिद्धः क्लेदोष्मव्यूहावकाशसम्प्रत्ययस्तत्पथागमपठितेषु वरुणलोकादौ केवलजलादिजन्येषु सहकारित्वानुप्रविष्टपार्थिवावयवावष्टम्भवशेन स्थैर्याद्युपलम्भ इति, तस्मादस्मदादिशरीरं पार्थिवम् ।

वेदे च(२) तथैव व्यवहारो दृश्यते अग्नीषोमीयादिपशोः प्रलयकाले यजमानस्य वा प्रेतस्य[३] पात्रचयनकर्मणि 'सूर्यं चक्षुर्गमयतादि'त्याद्युपक्रम्य 'पृथिवी ते शरीरमि'ति पठ्यते, तच्च प्रकृतिगामित्ववचनं यद्यतः प्रकृतेरुत्थितं तत्तस्यामेवास्य लीयतामित्यर्थः । तत्र यथा तैजसं चक्षुरिति सूर्याख्ये तेजसि उद्गमनमुपदिष्टमेवं पृथिव्यां शरीरस्येति तस्मात्पृथिव्यन्वयवैरयमस्मदादिदेहो निबद्ध इति नात्र सतां विवादः ।

---

(१) अवनिः पृथ्वी, वनं–जलं, दहनः–अग्निः ।

(२) वेदे च–वेदेपीत्यर्थः । (३) प्रेतस्य—मृतस्य ।

इन्द्रियपरीक्षा ।

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ (गौ० १ अ० १ आ० १२ सू०)

अत्रेन्द्रियाणां विषयोपलब्धिकारणत्वं सामान्यलक्षणं प्रसिद्धमेव विभागोऽपि पञ्चबाह्येन्द्रियाणां त्वेष सूत्रित एव स चानन्तरमेव, तीर्थान्तरकथितकर्मेन्द्रियनिषेधात्साधयिष्यते ।

विशेषलक्षणानि तु पञ्चानां पञ्च समाख्यानिर्वचनसामर्थ्यात्प्रमाणवदवगन्तव्यानि । जिघ्रत्यनेनेति घ्राणं घ्रेयं गृह्णातीति गन्धोपलब्धावसाधारणं करणं घ्राणं, चक्षुः ईक्षणं लोचनं तदुच्यते, स्पृशत्यनेन स्पर्शनं स्पर्शं गृह्णातीति स्पर्शोपलब्धावसाधारणं कारणं स्पर्शनं, स्पर्शनमिति वक्तव्ये त्वग्ग्रहणमुपचारान्मञ्चाः क्रोशन्तीति तदधिष्ठानत्वं दर्शयितुम्—यथा त्रिपुटिकाधिष्ठानं घ्राणं जिह्वाधिष्ठानं रसनं गोलकाधिष्ठानं चक्षुः तथा सकलत्वगधिष्ठानं स्पर्शनं शिरःप्रभृत्यापादाङ्गुष्ठं स्पर्शोपलम्भात् , त्वगिति च न बाह्यमेव चर्म केवलमुच्यते अपि तु सकलशरीरव्यापि तुहिनकणशिशिरसलिलपानसमयेन्तर्हृदयेऽपि शीतस्पर्शोपलम्भादिति, स्वावयवसमवायित्वे चेन्द्रियाणां त्रिपुटिकाद्याश्रयत्वमाश्रयमात्रापेक्षयोच्यते न समवायित्वादिति, शृणोत्यनेनेति श्रोत्रं शब्दं गृह्णातीति शब्दोपलब्धावसाधारणं करणं श्रोत्रम् , तच्चाकाशैकदेशत्वादनाश्रितमपि कर्णशष्कुल्यधिष्ठानमुच्यते,

तदेवं विशेषणलक्षणानि पञ्च पञ्चानामुक्तानि, भवन्ति तानीमानीन्द्रियाणि स्वविषयग्रहणलक्षणान्यात्मनो भोगसाधनत्वात्संसारकारणानीति हेयतया भावयितव्यानि, तथा भाव्यमानानि निर्वेदोत्पादनादिद्वारेणापवर्गाय कल्पिष्यन्ते इति ।

भूतेभ्य इति किमर्थम् ? उक्तं हीन्द्रियाणां स्वविषयग्रहणं भूतप्रकृतित्वे सति निर्वहति नान्यथेति तत्तद्विनिश्चयार्थं यथाप्तोपदेशः शब्द इत्याप्तग्रहणम् । विषयोपलब्धिलक्षणत्वं हीन्द्रियाणां भूतप्रकृतित्वे सति निर्वहति नान्यथेति, तानि पुनरिन्द्रियकारणानि पृथिव्यप्तेजोवायुराकाशमिति भूतानि, भूतेभ्यः पञ्चभ्यो यथासङ्ख्यं घ्राणरसनचक्षुस्त्वक्श्रोत्राणि पञ्चेन्द्रियाणि भवन्ति भूतप्रकृतित्वमिति भूतस्वभावत्वं व्याख्यावसानम् (दिवादिभ्यो भूतेभ्यः सम्भवति तद्वनतो पञ्चस्वपि सम्भवति)(१) भूतकारणकत्वं त्वन्येषु चतुर्ष्वपि तथैव श्रोत्रे तु कथञ्चित्कर्णशष्कुल्यवच्छिन्ननभोभोगाभिप्रायेण व्यवहारतः समर्थनीयम्

(१) अयं पाठः कथञ्चिदपि न समन्वेतीति व्यर्थ एवेति बोध्यम् ।

एवं भौतिकानीन्द्रियाणि स्वं स्वं विषयमधिगन्तुमुत्सहन्त इति तल्लक्षणत्वमेषां सिध्यतीति अतो भूतेभ्य इत्युक्तम्।

साङ्ख्यमतेनेन्द्रियाणामाहङ्कारिकत्वम्।

तत्रैतत्परीक्षणीयं वर्त्तते किं भौतिकानामिन्द्रियाणां स्वविषयग्रहणकरणत्वमुतान्यथेति, एवं हि साङ्ख्याः सम्प्रवदन्ते आहङ्कारिकाणीन्द्रियाण्यर्थं साधयितुमर्हन्ति नान्यथा, तथा हि कारकं कारकत्वादेव प्राप्यकारि भवति भौतिकानि चेन्द्रियाणि कथं प्राप्यकारीणि दूरवर्तिनि विषये भवेयुः आहङ्कारिकाणां तु तेषां व्यापकत्वाद्विषयाकारपरिणामात्मिका वृत्तिर्वृत्तिमतो नान्या सती सम्भवत्येवेति सुवचं प्राप्यकारित्वम्, अपि च महदणुग्रहणमाहङ्कारिकत्वे तेषां कल्पते न भौतिकत्वे, भौतिकत्वे हि यत्परिमाणं ग्रहणं तत्परिमाणं ग्राह्यं गृह्णीयादस्ति च गोलकादधिकपरिमाणस्य पटपिठरादेर्ग्रहणं हीनपरिमाणस्य च वटधानादेरतोऽपि न भौतिकानीन्द्रियाणि, भौतिकानामपि दीपादीनां परं प्रकाशयतां स्वात्मप्रकाशकत्वमपि दृष्टम्, एवमिन्द्रियाण्यपि पटादिरूपं प्रकाशयन्ति स्वरूपमपि च प्रकाशयन्तीत्यतोऽपि न भौतिकानि।

भौतिकत्वेपीन्द्रियाणां प्राप्यकारित्वम्।

अत्राभिधीयते—यत्तावत्प्राप्यकारित्वं भौतिकत्वपक्षे नावकल्पते इति जल्पितवानसि तन्मन्ये त्वया गोलकमेव चक्षुरिति चेतसि गृहीतमन्यथा कथमित्थमकथयिष्यः, स चायमायुष्मतो महान् भ्रमः न खलु कृष्णसारं चक्षुस्तदधिकरणं तु तेजश्चक्षुस्तच्च वेगवद्द्रव्यत्वाद् दूरमपि प्रसरतीति कोऽस्य प्राप्यकारितायां प्रमादः।

ननु च गोलके चिकित्सादिप्रयोगाद्गोलकगुणदोषानुवर्तित्वाच्च विषयोपलब्धेर्गोलकमेव चक्षुः स्याद् अनुपलभ्यमानं च तेजः कथमिन्द्रियमुच्यते, कथं च तेजसा वेगवताऽपि सहसैव विस्फारिते चक्षुषि योजनशतसहस्रव्यवहितसितकरतरणितारकादि ग्रहीतुं शक्येत, कथं वा तदल्पकं वराकं नायनं तेजः समन्ततः प्रसरता सकलभुवनप्रथितप्रभावेन महीयसापि मिहिरमहसा न प्रतिहतगति भवेदभ्यर्थमिति भास्करदर्शनमित्थं न सम्पद्येत, तेजःपक्षे च काचाभ्रकपटबालस्फटिकान्तरितपदार्थोपलब्धिः कथं समर्थ्येत तत्प्रतिबद्धं हि तेजः कथं प्रतिष्ठेतेति तद्वरं शक्तिविशेषयुक्तं गोलकमेव साधो! चक्षुरभ्युपगच्छेति।

उच्यते—न खलु भवदनुशासनेन युक्तिविरुद्धपक्षमभ्युपगच्छामः प्राप्यकारि हि कारकं दृष्टं कृष्णसारपक्षे च कुतः प्राप्यकारित्वम्? शक्तिरपि कल्प्यमाना निराश्रया न परिकल्पनीयैवेति तदाश्रयचिन्तायां न गोलकमात्रमाश्रयोक्तेराश्रयो भवेत।

ननु च प्राप्यकारित्वमेव चिन्त्यं वर्तते तद्धि रसनस्पर्शनयोः केवलमवलोक्यते लोके चक्षुःश्रोत्रे तु दूरदेशव्यवस्थितविषयग्राहिणी कथं प्राप्यकारिणी स्याताम् घ्राणे तु त्रिपुटिकानिकटनिहितपदार्थगन्धमपि गृह्णाति दूरतोऽपि च प्रचलदनिलबलवेल्लितफुल्लमल्लिकादिसौरभमुपलभते त्रिपुटिकोपकण्ठढौकितेनापि द्रव्येण न तस्य सन्निकर्ष इति तदप्यप्राप्यकार्येव, तस्माच्छक्तिविशेषणमधिष्ठानमेव तत्तदिन्द्रियमिति गृह्यताम् उत्सृज्यतां प्राप्यकारित्वपक्षः चक्षुषि च चन्द्रार्कग्रहादिग्राहिणि नतरां प्राप्यकारित्वमित्युक्तमेव ।

अत्रोच्यते न प्राप्यकारित्वमुत्स्रष्टुं शक्नुमः कारकत्वमेव हि तथा सत्येषामुत्सृजेम, कारकं चाप्राप्यकारि चेति चित्रम्, अदृष्टमपि कारणमात्मनो व्यापकत्वात्तद्वृत्ति धर्मादिकं न प्राप्यकारि भवेत् किमुत दृष्टं चक्षुरादि कारकमिति, अप्राप्यकारित्वे च शक्तेरविशेषात्कुड्यादिव्यवहितमपि वस्तु चक्षुषा दृश्येत, तत्र कार्यानुपलम्भान्न शक्तिः कल्प्यते इति चेत्, किं शक्तिः कल्प्यतां किं तेज इति सम्प्रधारणायां(१) तेजसो द्रव्यत्वाद्व्यवधानाद्यनुगुणममूर्तायास्तु शक्तेर्व्यवधानमबाधकं भवेदिति तेज एवेन्द्रियं कल्पनीयं न शक्तिः, शक्तिमदधिष्ठानं वा, प्राप्यकारिता च श्रोत्रस्य तावद्देशसन्तानसदृशशब्दपरम्परारम्भणद्वारेण दर्शिता शब्दाधिकरणे, घ्राणस्यापि समीरणान्दोलितकुन्दलतादिप्रसृततत्परमाणुनिकराधिकरणगन्धग्रहणात्प्राप्यकारिता, न च परमाणूपसर्पणाद् द्रव्यपरिक्षयाद्याशङ्कनीयं भूयस्त्वात्परमाणूनाम्, अत एव(२) गन्धद्वारकतद्द्रव्यसम्पर्कदोषनिर्हरणाय प्रायश्चित्तमशुचिद्रव्यघ्राणे समामनन्ति, चक्षुषस्तेजःप्रसरणात्प्राप्यकारिता, अनुपलभ्यमानं तेज इति चेत्किं चन्द्रमसः परभाग उपलभ्यते पृथिव्याश्चाधोभागः, न खलु प्रत्यक्षैकशरणाः पदार्थाः अनुमानादिभिरेषामुपलम्भः सम्भवत्येव, उक्तं चानुमानं रूपोपलब्धिकार्येण तैजसमेव चक्षुरनुमीयते, तेजोद्रव्यं हि दीपादि रूपस्य प्रकाशकं दृष्टमिति ।

प्रत्यक्षेण तु नायनं तेजः किमिति नोपलभ्यते इति ? तदुच्यते विचित्रा हि द्रव्यगुणानामुद्भवाभिभवादिवशेन गतयो भवन्ति, तद्यथा सर्वतः प्रसरता धवलबहलेन शीतस्पर्शाश्रयेण द्रव्येण व्याप्तौ हेमन्तशिशिरौ ऋतू भवतः, निराधारस्य शीतस्पर्शगुणस्यानुपपत्तेः ।

अथ सत्यपि तत्र सलिलद्रव्ये तद्गुणस्य शीतस्पर्शस्यैवोपलब्धिर्न शुक्लरूप-

---

(१) सम्प्रधारणायां-विचारणायाम् ।

(२) अत एवेति । घ्राणेन गन्धग्रहणाय गन्धवद्द्रव्यस्य वायुनाऽऽनयनाङ्गीकारादशुचिद्रव्यस्पर्श इति तद्दोषनिर्हरणाय प्रायश्चित्तं धर्मशास्त्रविहितं सङ्गच्छत इति भावः ।

स्येति। तेजोद्रव्येण च निरर्गलं(१) विजृम्भमाणेन भूयसा ग्रीष्मो भवति तत्र सत्यपि तेजोद्रव्ये तद्गुणस्योष्णस्पर्शस्यैव ग्रहणं न भास्वररूपस्येति, भास्वरं च कार्तस्वरादौ तैजसद्रव्ये रूपमुपलभ्यते नोष्णस्पर्शः, उदकान्तर्गते च तेजसि ज्वलनतप्ते जले ज्वलनगुण उष्णस्पर्शोऽनुभूयते न भास्वरं रूपमिति, एवमिह नयनरश्मौ तैजसे द्रव्ये द्वावपि रूपस्पर्शौ नोपलभ्येते इति कमुपालभेमहि, उक्तं च—(२)दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः प्रमाणस्य तत्त्वविषयत्वादिति [गौ० ३-१-५३]। न च सर्वत्र नयनरश्मेरनुपलम्भः क्वचिद्धि वृषदंशप्रभृतीनां (३)नक्तञ्चराणां निशि निबिडतमतमःपङ्कपटलावलिप्ते वेश्मनि सञ्चरतां चाक्षुषं तेजो भास्वरं रूपं दूरमपि प्रसरदुपलभ्यत एव, अन्यत्र तु मध्यन्दिनोल्काप्रकाशवदग्रहणमस्मदादिनयनरश्मेः, अयं तु विशेषः उल्कारूपस्य दिवा दिवाकरकरविभवाभिभूतत्वादग्रहणं नयनरश्मिरूपस्य त्वनुद्भूतत्वादेवेति।

यत्तु काचाभ्रपटलस्फटिकान्तरितपदार्थोपलम्भनं तत्र काचादीनां केषांचिदतिस्वच्छत्वात्केषांचिच्च ससुषिरत्वाच्चाक्षुषतेजःप्रसरनिरोधकौशलं नास्तीति प्राप्यकारित्वं चक्षुषस्तावता भवति।

यत्तु कुतो नयनरश्मेरियती गतिर्गगनमाक्रम्य यन्नभस्तिमालिनं स्पृशति न प्रतिहन्यते च सावित्रेण वेगवता तेजसेति, उक्तमत्र दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिरिति, कार्यसत्तया हि तथाविधं कारणं कल्प्यते यद् दूरमपि प्रसरति प्रसरदपि परेण न च निरुध्यते, दृष्टश्चानिरोधो भर्जनकपालादौ तेजसः पच्यमानद्रव्यपाकसिद्धेः कलशे च निषिक्तानामपां बहिः शीतस्पर्शग्रहणादनिरोधः, एवं नयनरश्मेरपि भविष्यति, न तु गोलकस्यैव शक्तिकल्पना लघ्वीति वक्तव्यम्, प्राप्यकारित्वव्याघातादिति, अत एव सर्वेन्द्रियाणां प्राप्यकारित्वं पश्यद्भिः शास्त्रज्ञैरिन्द्रियार्थसन्निकर्षः षट्प्रकारो व्याख्यातः, प्राप्यकारिता च न गोलकस्योपपद्यते तदप्राप्तस्य पर्वतादेर्ग्रहणात्तत्प्राप्तस्य च प्रत्युताञ्जनशलाकादेरग्रहणादगोलकं चक्षुः,

> चिकित्सादिप्रयोगस्तु गोलके यः प्रवर्त्तते।
> सोऽयमाधारसंस्कार आधेयस्योपकारकः॥

(१) निरर्गलं-निष्प्रतिबन्धम्।

(२) दृष्टानुमितानामिति। दृष्टानामनुमितानां वा पदार्थानाम् 'एवं भवत' इति नियोगः 'एवं मा भवत' इति प्रतिषेधो वा नोपपद्यते तथाभूतविषयकं हि प्रमाणमित्यर्थः।

(३) वृषदंशो-विडालः।

अत एव गोलकगुणदोषानुवर्तित्वमपि विषयोपलब्धेर्घटमानमाधारद्वारकौ हि तदाधेयस्यैव तौ गुणदोषाविति, तस्मादप्राप्तविषयग्रहणानुपपत्तेर्गोलकचक्षुःपक्षो भिक्षुप्रेक्षितः(१) प्रेक्षावतां हृदयेषु न विश्राम्यतीति प्राप्यकारि तेज एव चक्षुरिति स्थितम्। इत्थं भौतिकेन्द्रियवादेऽपि प्राप्यकारित्वसिद्धेर्न कापिलकथितमाहङ्कारिकत्वमिन्द्रियाणामुपपद्यते।

इन्द्रियाणामाहङ्कारिकत्वखण्डनम्।

ननु पक्षद्वयेऽपि प्राप्यकारित्वोपपत्तेः कोऽयं भौतिकत्वं प्रत्यभिनिवेशातिशयो भवतामिति, उच्यते—एकप्रकृतित्वे हीन्द्रियाणामेकमेव सर्वविषयप्रकाशनकुशलमिन्द्रियं भवेत्सर्वाणि वा सर्वविषयग्राहीणि भवेयुः कारकस्याविशेषात्, कारणनियमाधीनो हि कार्यनियमः अहङ्काराख्यं च कारणं, सकलविषयप्रकाशनशक्तियुक्ते तस्मिन् कथमिन्द्रियान्तराणि विषयान्तरग्राहीणि ततो भवेयुः, भौतिकत्वे तु भूतानां भेदान्नियतगुणोत्कर्षयोगित्वान्नियतविषयग्राहीन्द्रियप्रकृतित्वं तथा च प्रदीपादितेजो रूपरसाद्यनेकविषयसन्निधानेऽपि रूपस्यैव प्रकाशीभवितुमर्हति एवमिन्द्रियान्तरेष्वपि वक्तव्यम्, तदेष विषयनियमः प्रकृतिनियमकारित इन्द्रियाणामिति भौतिकानीन्द्रियाणि।

यत्त्वेवं तैजसेन चक्षुषा कथं पार्थिवस्य रूपस्य ग्रहणं पृथिव्या एव वा, आप्येन च रसनेन पार्थिवस्य रसस्य, वायवीयेन स्पर्शनेन्द्रियेण च पृथिव्यादिस्पर्शस्य तदिदं प्रकृतिनियमेऽपि कथं विषयसाङ्कर्यमिति? नैष दोषो रूपादिविषयविषयोऽपि ह्येषां नियमो न तदाश्रयविषयः, तैजसं हि प्रदीपादिद्रव्यं रूपमेव प्रकाशयद्दृश्यते न तेजोवृत्त्येव रूपम्, आप्यमपि द्रव्यं रसमेव व्यनक्ति न तु सलिलस्थमेवेति, घ्राणे तु न कश्चिद्दोषः तद्ग्राह्यस्य तस्य पृथिव्येकवृत्तित्वादिति, द्रव्यस्यापि दर्शनस्पर्शनग्राह्यत्वमविरुद्धमित्थं भौतिकत्वेऽपीति, यदुक्तं महदणुग्रहणाच्चाभौतिकानीन्द्रियाणीति, तन्न, दूरप्रसारित्वस्य दर्शितत्वात् ततश्च विततत्वाद्विततग्राहि भवत्येव, विततत्वेनापि नाहङ्कारिकत्वम्।

यत्पुनरभ्यधायि भौतिकत्वे परगुणवत्स्वगुणस्यापि प्रकाशकमिन्द्रियं स्यादिति, तदयुक्तं सगुणस्येन्द्रियस्येन्द्रियभावात्, इन्द्रियेण हि सता तेन विषयः परिच्छिद्यते सगुणस्य चास्येन्द्रियत्वं स्वगुणरहितं तदिन्द्रियमेव न स्यादनि-

---

(१) भिक्षुप्रेक्षितः–बौद्धकल्पितः। तेषामयमाशयः चक्षुर्हि विषयसन्निकर्षरहितमेव ग्राहकम्, यदि प्राप्यप्रकाशकारि स्यात् तदा रसनादिवदधिष्ठानसम्बद्धं गृह्णीयात् न चैवं गोलकासम्बद्धग्रहणात्, किञ्च यदि चक्षुः प्राप्य गृह्णीयात्तर्हि स्वतोऽधिकपरिमाणं न गृह्णीयात्, एवञ्च प्राप्यकारित्वानुरोधेन गोलकातिरिक्तञ्चक्षुः परैरङ्गीक्रियते तदेव नास्तीति गोलकमेव चक्षुरिति।

न्द्रियं च कथं ग्राहकमत इन्द्रियगुणानाम् अन्तःपतितत्वान्न प्रमेयत्वम्, तस्माद्भौतिकानीन्द्रियाणि स्वं स्वं विषयमुपलभन्त इति सिद्धम्।

प्रयोगस्तु—पार्थिवं घ्राणं द्रव्यत्वे सति रूपादिमध्ये गन्धस्यैव व्यञ्जकत्वाद् गन्धयुक्तद्रव्यवत्, तत्र व्यञ्जकत्वमात्रमनैकान्तिकमिति गन्धस्यैव विशेष्यते, सोऽयमसिद्धो हेतुर्भवेद् गन्धत्वस्यापि घ्राणव्यञ्जकत्वादिति रूपादिमध्य इत्युक्तम्, तथाऽपि सन्निकर्षेण व्यभिचार इति तद्व्युदासाय द्रव्यत्वे सतीति विशेषणम्, एवं रसनादिष्वपि प्रयोगा रचनीयाः, श्रोत्रं त्वाकाशैकदेश इति शब्दाधिकरणे निर्णीतम्, गन्धादिविषयोपलब्धिनिबन्धनसुखदुःखोपभोगहेतुभूतधर्माधर्मोपनिबद्धानां चेन्द्रियाणामिन्द्रियत्वमिति तद्वशाद्यथा यथा नियतविषयग्रहणकारणता घटते तथा कल्प्यते इति सर्वमनवद्यम्।

एकेन्द्रियवादिमतम्।

आह भवन्तु भौतिकानीन्द्रियाणि पञ्चेति तु न युक्तमुक्तं त्वगेव ह्येकमिन्द्रियं भवितुमर्हति सर्वत्रानपायात्, करतलकपोलकण्ठादिवर्तिनापि त्वगिन्द्रियेण रूपोपलम्भप्रसङ्ग इति चेद्, नावयवविशेषशक्तिविशेषनियमात्, न हि पाणिना पादेन वोपस्थकार्यं कर्तुं शक्यते, अस्ति चावयवविशेषस्वभावविशेषवैचित्र्यम्,

तुषारकर्पूरापूर्णवारिण्युत्तरमानसे।
यथा च वृषणौ स्नातुः स्फुटतो न तथा स्फिचौ॥
क्लिन्नार्द्रतृणकाष्ठादिधूमेन कटुना यथा।
मूर्धाऽक्षिवेदनादेति न तथाऽवयवान्तरे॥

तस्मादवयवविशेषव्यवस्थितनानाशक्तिखचितं त्वगेवैकमिन्द्रियमिति।

एकेन्द्रियवादखण्डनम्।

उच्यते, कुतोऽयमपूर्व एव महाप्राज्ञो वादी सरलमतीनस्मान्वञ्चयितुमागतः योऽवयवविशेषं चाश्रयन्नप्येकमिन्द्रियं मन्यते शक्तिभेदादाश्रयभेदाच्च नानात्वमेवैतदिन्द्रियाणामित्यलं महात्मभिः सह कलहेन,

मनुष्यैः सह संवादो मादृशानां हि शोभते।
देवास्तु नररूपेण त इमे भान्ति वादिनः॥
ननु नानात्वपक्षेऽपि पञ्चत्वनियमः कथम्।
द्वे श्रोत्रे चक्षुषी द्वे, च कथं ते एकमिन्द्रियम्॥

आह च–सव्यदृष्टस्येतरेण(१) प्रत्यभिज्ञानाद् [गौ० ३।१।७] इति, चक्षु-

(१) सव्येति। सव्येन चक्षुषा दृष्टस्य इतरेण दक्षिणेन चक्षुषा प्रत्यभिज्ञानात्स्थिरात्मसिद्धिरित्यर्थः। एवञ्च चक्षुषो द्वित्वमिति भावः।

ष्ट्वजातेरेकत्वादिति चेत्तर्हीन्द्रियत्वजातेरेकत्वादेकमिन्द्रियं स्यात्, उच्यते चक्षुस्तावत्तेज इति निर्णीतम्, ततश्चैकमेव तदधिष्ठानमेकघ्राणवंशव्यवहितमनेकमिवोपलभ्यते, भिन्नं वा तद्भवतु तेजस्तत्कार्यैक्यादाश्रयभेदेऽप्येकमेव, श्रोत्रमपि कर्णच्छिद्रद्वयानुस्यूतमेकमेव नभोदेशप्रायं वेदितव्यं कार्यैकत्वस्यापि भावात्,

तेनाधिष्ठानभेदेऽपि कार्यैकत्वस्य दर्शनात्।
तत्सामान्यस्य चैकत्वादेकत्वं श्रोत्रचक्षुषोः॥

न चेन्द्रियजातेरैक्यादेकमिन्द्रियम्, कार्यस्योपलब्धिलक्षणस्य कारणस्य पृथिव्यादेर्विषयस्य गन्धादेरधिष्ठानस्य त्रिपुटकादेर्गतेश्च घ्राणत्वादेर्जातिशब्दवाच्यस्य योनेर्वा पृथिव्यादेः पञ्चविधत्वात्पञ्चेन्द्रियाणि कल्प्यन्ते, यथा परमाणुसामान्याविशेषेऽपि पृथिव्यादिचतुर्विधकार्यदर्शनाच्चतुर्विधाः परमाणवः कल्प्यन्त इति।

वागादीनामिन्द्रियत्वखण्डनम्।

ननु तथाऽपि न पञ्चेन्द्रियाणि बुद्धीन्द्रियवत्कर्मेन्द्रियाणामपि पञ्चानामुपसंख्येयत्वात्, तदुक्तं वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः [सां० का० २६]। तेषां च वचनादानविहरणोत्सर्गानन्दात्मकपञ्चविधकार्यसाधनादिन्द्रियत्वं तत्कार्यस्यानितरेतरसाध्यत्वादिति।

अत्राहुः अत्यल्पमिदमुच्यते पञ्च कर्मेन्द्रियाणीति, अन्यान्यपि खलु न सन्ति कर्मेन्द्रियाणि? तथा हि कण्ठोऽन्ननिगरणे स्तनकलशालिङ्गनादिना वक्षो भारवहनेन चांसद्वयमिन्द्रियमुच्यते न कथम्? तत्कार्यस्य शरीरावयवान्तरेऽपि दर्शनादिति चेत्किं नु भवानन्नपानं पाणिपादेन निगिरति पायुना वा? आदानमपि किमास्यादिना वा न कुर्वते तिर्यञ्चो मनुष्या अपि हि क्वचित्, असत्स्वपि भवत्कल्पितेषु कर्मेन्द्रियेषु तत्कार्यं यावत्तावदन्यथाऽपि दृश्यते न त्वेवं बुद्धीन्द्रियेषु,

भवत्युत्पाटिताक्षस्य न मनागपि रूपधीः।
ईषद्विहारादानादि दृष्टं यन्त्राङ्घ्रिपाणिषु॥

अपि च विहरणमपि न केवलं चरणयुगलकार्यम् अपि तु जानूरुजङ्घादिसहितपादसम्पाद्यमानमपि बाहुसहिताभ्यां पाणिभ्यामपि निर्वर्त्यते न केवलाभ्याम्, वागिन्द्रियं तु नाभेरूर्ध्वं सर्वमेव स्यादित्याहुः–'वायुर्नाभेरुत्थित उरसि विस्तीर्णः कण्ठे विवर्तितो मूर्धानमाहत्य परावृत्तो वक्त्रे चरन्विविधान् शब्दानभिव्यनक्ति' इति, अस्ति चेदृगनुभवो जल्पतां विशेषतस्त्वखण्डगेयं गायतामिति, एवं च कर्मेन्द्रियमयमेव विश्वमिति न च शरीरमिन्द्रियव्यतिरिक्तं किंचिद्भवेत्। अथ शरीरावयवेष्वेव भिन्नकार्यकारिषु कर्मेन्द्रियव्यवहारस्तर्हि कण्ठादिभिरतिप्रसङ्ग इत्युक्तम्, उपस्थेन्द्रियं च कथमेकं गण्यते तेनानन्दवन्मूत्रोत्सर्गस्यापि साध-

नात्, वागिन्द्रियं तु सुतरामहृदयङ्गमं संयोगविभागनिर्वर्त्यो हि बाह्यः शब्द उपलभ्यते तद्भेदाश्च विद्यन्ते यादृशो भेरीदण्डसंयोगजः शब्दो न तादृशः कूर्मीकोणसंयोगजः, एवं विचित्रस्थानकरणसंयोगाद्विचित्रो वर्णात्मकः शब्द उदेतीति न वागिन्द्रियं नाम किं चित्, लोकश्च वाक्शब्देन वर्णात्मकं शब्दमेव व्यपदिशति शब्दश्चेन्द्रियविषयो नेन्द्रियम्, तस्मादनेकविधसुखदुःखोपभोगाक्षेपक्षमकर्मपरिणामनिर्मितमेतच्छरीरं तैस्तैरवयवैस्तं तं कर्मफलोपभोगमात्मनः सम्पादयतीत्यलमेवंविधेन्द्रियजल्पनाऽऽर्जवेन।

अन्तःकरणत्रैविध्यखण्डनम्।

अन्तः करणस्यापि, (१)त्रैविध्यमनुपपन्नमेकेन मनसैव पर्याप्तेर्बुद्धिस्तु उपलब्धिस्वभावत्वात्करणकार्या न तु करणम्, अहङ्कारोऽपि ज्ञानविषय एव न करणम्, एतच्च सविस्तरं बुद्धिलक्षणे वक्ष्यामः, तस्मान्न त्रयोदशविधं(२)। करणमिति सिद्धम्।

न्यूनाधिकत्वशमनादत इन्द्रियाणि
पञ्चैव बाह्यविषयाधिगमक्षमाणि।
अन्तःसुखादिविषयग्रहणोपयोगि
षष्ठं मनस्तु कथयिष्यति सूत्रकारः॥

तानि

पुंसो भवाब्धिपतितस्य विवेकरत्न-
मानन्ददायि न हरन्ति तथा विधेयम्॥

अर्थस्वरूपनिरूपणम्।

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः।

[गौ० १।१।१३]

तदर्था इत्यत एवापकृष्य वा प्रक्रमाद्वा अर्था इति लक्ष्यपदं दर्शयितव्यम्, तदर्थ इति लक्षणम, तदिति प्रकृतेन्द्रियपरामर्शः, सामान्यलक्षणं तु पुनस्तदर्था इत्येव योजनीयम्, तदिति घ्राणादीनां विशेषसंख्यानिर्दिष्टानामवमर्शः, एवं च घ्राणस्य विषयो गन्धः रसनस्य विषयो रसः इत्यादि विशेषलक्षणमुक्तं भवति,

---

(१) त्रैविध्यम्—सांख्या हि मनोऽहङ्कारचित्तमिति भेदेनान्तःकरणं त्रिविधमित्याहुः।

(२) त्रयोदशविधमिति। पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि त्रिविधमन्तःकरणमिति सङ्कलनया त्रयोदश करणानि।

गन्धत्वादीनां तु घ्राणादिग्राह्यत्वादतिव्याप्तिरिति पृथिव्यादिगुणा इति विशेषणोपादानम्, ते चामी गन्धादय इन्द्रियार्था भोग्याः सन्तः सक्तिहेतवः संसारद्राघिमाणमावहन्तीति हेयतया भावयितव्याः।

नन्वेवं गन्धादिगुणाधिकरणस्यावयविनः प्रथमस्य रागहेतोरसंग्रहः स्यात्, वक्ष्यति च 'तन्निमित्तं त्ववयव्यभिमान' [गो० अ० ४ आ०२ सू० ३] इति, संख्यापरिमाणादिगुणान्तराणामपि रागहेतुत्वमस्त्येव, यथा बर्हिकलापानुकारिपरिमृदितकुसुमदलपटलशबलविलासिनीकेशपाशवृत्ति रूपं हरति हृदयं यूनाम् तथा तद्गता बहुत्वसंख्याऽपि, उत्तप्तकनकशिलानिभनितम्बबिम्बरूपवत्तत्परिमाणमपि हरति च सरभसम्, अवयवसंयोगविभागाद्यपि तथा कन्दुकादिक्रीडासु किसलयितविसरसविलासविसरमधरपरिभ्रमणादि कन्दुकान्तम्, तथान्त्यजजात्यादिपरिहारेण स्वानुरूपजातियोगित्वमपीत्यादि सर्वं द्रव्यगुणकर्मादि सक्तिकारणमनुक्तं स्यात्।

तत्र केचित्पृथिव्यादिगुणा इति द्वन्द्वसमासं व्याचक्षते पृथिव्यादीनि च गुणाश्चेति, पृथिव्यादिपदेन गुणाधिकरणमवयवि द्रव्यमुक्तमाश्रितत्वविशेषणत्वाभ्यां सर्वे गुणा इति, गुणग्रहणेन च संख्यापरिमाणादिवत्कर्मसामान्याद्यपि सर्वमुक्तमतो नासंग्रह इति।

तदिदमनुपपन्नं गन्धादिग्रहणस्य हि तदानीमानर्थक्यं गुणाश्चेत्यनेनैव गतार्थत्वात्, विशेषख्यापनार्थं तदुपादानमिति चेत्तर्हि किं द्वन्द्वसमासवर्णनेन अयमेवास्तु समाधिः।

यद्यपि द्रव्यकर्मसामान्यानाम् अन्येषां च संख्यापरिमाणादिगुणानामस्त्येव सक्तिहेतुता, तथापि प्राधान्येन गन्धादीनामेव सा, दृश्यते हि रूपादिनिरपेक्षस्य द्रव्यस्य संख्यादेः सामान्यस्य वा न सक्तिहेतुत्वं समस्तीति रूपादय एव मुख्यं रागकारणं तत्र झगिति बुद्धेः प्रसरकरणादुक्तं च—

तथापि नितरां रागवृद्ध्यै रूपादयो नृणाम्।
त एव कविभिर्गीताः पञ्चेषोः पञ्च सायकाः॥

तस्मात्पृथिव्यादीनां गुणा इति षष्ठीसमास एव श्रेयान्, गुणव्यतिरिक्तश्च गुणी पूर्वमेव समर्थितो यमहमद्राक्षं तं स्पृशामीति प्रत्ययप्रामाण्यात्।

पृथिव्यादिगुणा इति यदुक्तं तदिदानीं विभज्य वर्ण्यते कस्य कति गुणा इति, तत्र—

गन्धादयो नियोक्तव्याश्चत्वारः पृथिवीगुणाः।
अप्तेजोमरुतामेकं पूर्वपूर्वमपोह्य तु॥

गन्धवर्जं रसरूपस्पर्शा अपां, रसवर्जं रूपस्पर्शौ तेजसः, रूपवर्जं स्पर्शाख्यः वायोरिति आकाशस्य तु गुणः शब्दः।

ननु नायं गुणविनियोगः साधीयान्पृथिव्याश्चतुर्गुणत्वे पार्थिवेन घ्राणेन्द्रियेण चतुर्णामपि तद्गुणानां ग्रहणं स्यात्, एवमुत्तरेष्वपि वक्तव्यं तस्मादेकैकगुणत्वमेव भूतानामुच्यताम्, नैतदेवं गुणाः स्वेच्छया विप्रलभ्यन्ते, यथोपलभ्यन्ते तथा व्यवस्थाप्यन्ते, प्रतीतिप्रमाणका वयम्, तत्र पार्थिवे द्रव्ये चतुर्णामपि गुणानामुपलम्भः कथमेकगुणां पृथिवीं ब्रूमः, रूपैकगुणे च तेजसि पृथिव्युदकयोर्वायुवदरूपत्वादप्रत्यक्षत्वं स्यात्, तस्मात्त्रीणि रूपवन्ति द्रव्याणि।

यद्येवं सर्वेषां सर्वत्रोपलम्भात्सर्वाणि सर्वगुणानि भवन्तु भूतानि, पटपटायते पृथिवी छलछलायन्ते आपः धकधकायते तेजः कथकथायते वायुरिति सर्वेषां गुणः शब्दः स्यात्, उच्यते-न सर्वे गुणाः सर्वत्रोपलभ्यन्ते निर्गन्धानामपां सर्वत्र दर्शनात्, क्लिन्नरूपादौ तु पार्थिवावयवनिष्क्रान्त्या गन्धः पयस्युपलभ्यते। एवं सुवर्णादौ तैजसे द्रव्ये संयुक्तसमवायाद्रसाद्युपलब्धिः, शब्दस्तु सर्वकालमाकाशवृत्तिरेव प्रतीयते, पृथिव्याद्यवयवसंयोगविभागप्रभवस्त्वसाविति तदाश्रितत्वभ्रममावहति न त्वाकाशादिना तस्य ग्रहणमिति आकाशं तत एव शब्द इत्येतच्च प्राङ् निर्णीतं गुणत्वम्।

यच्च पृथिव्याश्चतुर्गुणत्वे तद्गुणानां चतुर्णामपि पार्थिवघ्राणेन्द्रियग्राह्यत्वं स्यादिति, तत्र गुणोत्कर्षस्य नियामकत्वात्, सातिशयगन्धगुणाधिकरणे विजातीयद्रव्यावयवसंस्पर्शलेशरहितैः केवलपृथिव्यवयवैरदृष्टसहकारिभिर्घटितं घ्राणेन्द्रियमिति गन्धस्यैव ग्राहकम्, एतदेव च भूयस्त्वमाचक्षते यथाऽऽह कणव्रतः-[वै० ८।२५] 'भूयस्त्वाद्गन्धवत्त्वाच्च पृथिवी गन्धज्ञानप्रकृतिः', इहाप्यु(१)क्तम्-'तद्व्यवस्थानं तु भूयस्त्वादिति [गो० ३।१।७१]' दृश्यन्ते च केवलपृथिव्यवयवोपादानेष्वपि पदार्थेषु व्यवस्थितकार्यनियमाः शक्तयो यथा—

पार्थिवत्वाविशेषेऽपि विषं मरणकारणम्।
अगदद्रव्यमन्यत्तु जीविताय प्रकल्पते॥

तस्मादपर्यनुयोगोऽयं 'पार्थिवेन घ्राणेन गन्धवत्तद्रसादयोऽपि कथं न गृह्यन्ते' इति, सातिशयप्रकृतियोगेऽपि च न स्वगुणग्रहणनैपुणमिन्द्रियाणामितीन्द्रियचिन्तायां निर्णीतम्, श्रोत्रेणाकाशगुणस्य शब्दस्य ग्रहणमिति परिशेषानुमानप्रमाणकोऽयमर्थः शब्दपरीक्षायामेव परीक्षित इत्यलमतिप्रसङ्गेन।

इति निपुणधियामसम्मता सकलगुणैकगुणत्वकल्पना।
तदयमकलुषोऽभ्युपेयतां गुणविनियोगविधिर्यथोदितः॥

(१) इहापि—न्यायदर्शनेऽपि। तद्व्यवस्थानमिति। भूयस्त्वाज्जलाद्यविशिष्टपृथिव्यारब्धत्वात् तद्व्यवस्थानं घ्राणादीन्द्रियत्वव्यवस्थितिः।

तेऽमी हेयाः कृतकमधुरं रूपमादर्शयन्त-
स्तित्क्ताहाराः परिणतिविपत्कारिणो हीन्द्रियार्थाः ।
त्यक्ताश्चैते व्यपगतमहामोहपङ्केन पुंसा
तीर्णश्चायं भवजलनिधिः क्लेशकल्लोलरौद्रः ॥

बुद्धिलक्षणम् ।

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् । १ । १ । १५ ॥

ननु पर्यायोच्चारणमेतन्न बुद्धेर्लक्षणमभिधीयते । न, पर्यायप्रयोगस्यैव लक्षणत्वमत्वात्, लक्षणं हि तदुच्यते येन समानेतरजातीयेभ्यो लक्ष्यं व्यवच्छिद्यते, व्यवच्छिद्यते च बुद्धिर्बुद्ध्यादिपर्यायवाच्यतयैव तेभ्य इति नाभिधानमालामात्रमिदम् ।

ननु सामयिकत्वाच्छब्दार्थप्रत्ययस्य समयस्य च पुरुषेच्छानिर्वर्त्यत्वात्कथमिदं व्यवस्थितं लक्षणं स्यात् । मैवम् सर्वजनीनस्य समयस्य विप्लावयितुमशक्यत्वात्तद्वदिष्टस्य तद्वाच्यस्य लक्षणत्वात् ।

प्रकारान्तरेण लक्षणमस्याः किमिति नोक्तमिति चेत् । शिंशिपाचोद्य(१)मिदं तस्मिन्नप्युक्तेऽनुयुञ्जीत भवानित्थं किमिति नोक्तमिति, अस्ति च प्रयोजनं पर्यायद्वारकलक्षणोपवर्णनस्य यत्साङ्ख्यानां व्यामोहनिरसनम्, एवं हि सांख्याः सङ्गिरन्ते–'बुद्धिरन्या ज्ञानमन्यदुपलब्धिरन्ये'ति तद्भ्रमापनयनायैवमुच्यते-- 'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम' एक एवार्थ इत्यर्थः, इत्थं च स्वरूपतो निर्ज्ञाता बुद्धिर्भोगस्वभावात्तत्साधनत्वाच्च संसारहेतुरिति हेयत्वेन भाव्यते ।

सांख्यमतोपपादानम् ।

सुखादिबुद्धिर्भोगः तत्साधनबुद्धिस्तु भोगसाधनमिति कथं पारमर्षाः प्रवदन्ति 'बुद्धिरन्योपलब्धिरन्ये'ति, नित्यां हि बुद्धिं ते मन्यते, तत्किमात्मैवैतैः बुद्धिरिति गृहीतः ? नाचेतनाया भोग्यायाः प्रकृतेः प्रथमा विकृतिर्महच्छब्दवाच्या बुद्धिः पुरुषस्तु चेतनो भोक्ताऽन्य एव, ताविमौ प्रकृतिपुरुषौ विवेकेनापश्यतां संसारः प्रकृतिपुरुषविवेकज्ञानान्मोक्षः । का पुनः प्रकृतिर्नाम ? सत्त्वरजस्तमसां त्रयाणां गुणानां साम्यावस्था प्रकृतिः, प्रधानमव्यक्तं च तदुच्यते यत्साम्यावस्थागतं गुणत्रयमिति ।

ननु तत्सत्त्वे किं प्रमाणम् ? अनुमानमित्याह, तथा हि–चराचरमिदं विश्वं सुखदुःखमोहाविनाभूतमुपलभ्यते न हि ब्रह्मादौ स्तम्बपर्यन्ते जगति तथाभूतं किमपि भूतमुपलभ्यते यत्सुखदुःखमोहैरविकृतम्, तत्र सुखस्वभावं सत्त्वं दुःखस्वभावं रजः मोहस्वभावं तमः, सर्वत्र प्रीत्यप्रीतिविषादादिदर्शनात्प्रकाशप्रवृत्तिनियमापगमाच्च सर्वं त्रिगुणात्मकम्, जगत्कार्यं च यत्परस्परान्वितरूपं

---

(१) कुत्सिताशङ्केत्यर्थः ।

तदेकरूपात्कारणादुत्पद्यमानं दृश्यते, मृदन्वितानि हि घटशरावोदञ्चनप्रभृतीनि कार्याण्येकस्मान्मृदात्मनः कारणादुद्भवन्ति, तदिदं विश्वं सुखदुःखमोहान्वितमिति तदात्मककारणकार्यं भवितुमर्हति, यत्सुखदुःखमोहात्मकं कारणं सा सत्त्वरजस्तमोरूपा प्रकृतिः, एवमन्वयपुरःसराः परिमाणादिहेतवोऽपि वक्तव्याः, इयत्तया वा चतुरश्रतादिना वा परिमाणेन तद्वतां कार्याणामेकप्रकृतित्वदर्शनात्, विषयवृत्तयश्चैते गुणाः कार्येषु दृश्यन्ते च–कचित्सत्त्वमधिकमूने रजस्तमसी कचिद्रजः प्रकृष्टमल्पे सत्त्वतमसी कचित्तमः प्रवृद्धं तुच्छे सत्त्वरजसी इति, तदेषां वैषम्यभेदोपदर्शितविश्वरूपकार्याणां कचित्साम्यावस्थया भाव्यं सा प्रकृतिरुच्यते, सेयमचेतना भोग्या प्रकृतिः तस्यास्तु भोक्ता चेतनः पुरुषः । पुरुष इदानीं किमनुमानकः? उक्तमेव–भोग्येन भोक्तुरनुमानं, न ह्यचेतनस्य भोग्यस्य भोक्तारमन्तरेण भोग्यतोपपद्यते द्रष्टा च सेति भोक्ता कल्प्यते, स च चितिशक्तिस्वभावक एव सर्वप्रकारकर्तृत्वादिव्यवहारनिवहबहिष्कृतस्वरूपः, द्रष्टृत्वमेव पुरुषस्य स्वरूपमाहुः, न यथा भवन्तः एकमात्मानमध्यवसायादिधर्मयागिनं मन्यन्ते तथाऽसौ भवितुमर्हत्यध्यवसायादेर्बुद्धिधर्मत्वात् ।

कर्त्तुं शक्नोति पुरुषस्तृणस्यापि न कुब्जताम् ।
अन्योपनीतमथ तु स पश्यत्येव केवलम् ॥

प्रकृतिरेवैनं भोगापवर्गाभ्यां संयुनक्ति, न च निर्विकारा सती भोगसम्पादनसमर्थाऽसौ भवतीति महदादिविकृतीः प्रतिपद्यते, पङ्ग्वन्धन्यायेन प्रकृतिपुरुषौ संयुज्येते–प्रकृतिरचेतना दृश्या भोग्या द्रष्टारं भोक्तारं पुरुषमपेक्षते, पुरुषोऽपि द्रष्टा भोक्ता दृश्यं भोग्यमपेक्षते इत्येवं तयोः पङ्ग्वन्धवत्संयोगो भवति दर्शनशक्त्या पङ्गोर्गमनशक्त्या चान्धस्यैकत्र मेलनात्कार्यसिद्धिरेवं प्रकृतिपुरुषसंयोगात्सर्गः प्रवर्तते, तदुक्तम्—

पुरुषस्य दर्शनार्थः कैवल्यार्थस्तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ [सां० का० २१]

यच्चेत्थं प्रधानान्महत्तत्त्वमुत्पद्यते सा बुद्धिरध्यवसायात्मिका धर्मज्ञानवैराग्यैश्वर्यतद्विपर्ययरूपवृत्तियोगिनी महतत्त्वमेवोच्यते, बुद्धेरहङ्कार उदेति स चाभिमानस्वभावः, अहङ्कारात् प्राणादीनि पञ्च बुद्धीन्द्रियाणि वागादीनि पञ्च कर्मेन्द्रियाणि सङ्कल्पकमेकादशं मनः गन्धादितन्मात्राणि च पञ्चेति षोडशको गणः प्रभवति, ततो गन्धादितन्मात्रपञ्चकात्पञ्च पृथिव्यादीनि महाभूतानि जायन्त इति, आह च—

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥ [सां० का० २२]

तानीमानि पञ्च पञ्चविंशतितत्त्वानि सञ्चक्षते, प्रधानं प्रकृतिरेव न विकृ-

तिः, महदहङ्कारतन्मात्राणि सप्त पूर्वापेक्षया विकृतयः उत्तरोत्तरकार्यापेक्षया प्रकृतयः, एकादशेन्द्रियाणि पञ्च भूतानि विकृतय एव, अप्रकृतिविकृतिरूपस्तु शुद्धः पुरुष इति, तदाह—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ [सां० का० ३]

एवं महदादिविकारवती प्रकृतिरात्मनो भोगं साधयति, कश्चास्य भोगः ? बुद्धिवृत्त्यनुपातित्वं—विषयाकारपरिणतेन्द्रियवृत्त्यनुरक्तां बुद्धिवृत्तिं ज्ञानात्मिकां पुरुषः पश्यति, दर्शनेऽपि न तस्य किंचिच्चान्यत्वं किन्तु तदेव दर्शनं यत्तत्र प्रतिबिम्बनमिति, इत्थं तयोर्बुद्धिपुंसोः संयोगे सति बुद्धिधर्मश्चेतयितृलक्षणो बुद्धावसन्नपि सन्निव लक्ष्यते, तदाह—

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः ॥ [सां० का० २०]

अपवर्गाय कथमात्मनः प्रकृतिरवकल्पते ? स्वरूपं प्रकाशयतीत्याचक्षते, अनवधृतप्रकृतिस्वरूपः पुमान्प्रकृतिकृतमखिलमात्मकृतमिति मन्यमानस्तदुपार्जितं भुङ्क्ते, यदा तु पृथग्भूतामेनां मन्यते तदा भवत्वियमायासहेतुरेव ममेति बुद्धयमानस्तत्कृतमनुपभुञ्जानः स्वरूपनिष्ठ एवावतिष्ठते, प्रकृतिरपि भवतु दृष्टाऽहमनेन पृथङ् मामेष मन्यते इति न तदभिमुखीभवितुमुत्सहते, तदाह—

प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति ।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ [सां० का० ६१]

परस्परं च भ्रमरसयोः प्रकृतिपुरुषयोर्व्यापकत्वात्सत्यपि संयोगे सर्गो न प्रवर्तत एवेत्याह—

दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमत्येका ।
सति संयोगे ऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ [सां० का० ६६]

अपरिम्लानकुतूहलो हि पुमान्वञ्चयितुं शक्यते न दृष्टं तत्त्वमिति मत्वा, सत्यामपि योग्यतायां निवर्तते प्रकृतिर्नटीव रङ्गभूमौ प्रदर्शितनिखिलनिजनृत्तवृत्तान्तनैपुणा तत इत्याह—'रङ्गस्य दर्शयित्वा निवर्तते प्रकृतिः' तदेवं प्रकृतिरेव संसारे प्रवर्तते प्रकृतिरेव मोक्षमनुभवतीत्याह—

तस्मान्न बध्यतेऽद्धा नापि मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाऽऽश्रया प्रकृतिः ॥ [सां० का० ६२]

किमर्थं पुनरसावेव विशेष्यते प्रकृतिरिति ? किं क्रियते स्वभाव एवैष दैवहतिकायास्तस्याः—

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ [सां० का० ६०]

अचेतनत्वादस्याः कथमेवंकारित्वमिति चेदुक्तमत्र—

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ॥
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ [सां.का. ५७]

ननूत्पन्नतत्त्वज्ञाने भोगानुकूलमहदादिकार्यारम्भपराङ्मुखत्वात्तस्याश्चैकत्वादेकस्मिंस्तत्त्वविदि मुक्ते सति सर्वे मुक्ताः स्युः । नैष दोषः, तत्त्वविदमेव पुमांसं प्रति तस्या औदासीन्यात्, अन्यसाधारणत्वेन तत्कार्यानपायात, तथा च पतञ्जलिः-[पा.२।२२] 'कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्'(१) नन्वेवं यदैव तत्त्वज्ञानमुत्पन्नं तदैव प्रकृत्युपार्जितकर्मफलोपभोगपरिहानितः पुंसः शरीरपातः स्यान्नेत्याह-'तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः, ततः संसारविरतौ सत्याम्—

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥ [सां. का.] इति ।

अहो नु खलु कपिलकविकथारसाक्षिप्तहृदयैरतिबहु प्रसक्तानुप्रसक्त्या लिखितमस्माभिस्तदियं प्रधानप्रकृतिः प्रथमा महच्छब्दवाच्या सा बुद्धिस्तत्त्वविदं प्रति नष्टाऽप्यन्यसाधारणत्वादनष्टैवेति नित्या, नित्यत्वाच्च प्रत्यभिज्ञानुसन्धानादिव्यवहारप्रबन्धनिर्वाहणक्षमा बुद्धिः, ज्ञानं तु तस्य वृत्तिः, उपलब्धिस्तु पुंसो वृत्तिमद्बुद्धिदर्शनमिति नैषां पर्यायशब्दत्वमिति ।

सांख्यमतनिराकरणम्

अत्र प्रतिविधीयते—आत्मन्येव नित्ये व्यापिनि बोद्धरि ज्ञातर्यवसातरि धर्माधर्मादियोगिनि प्रत्यभिज्ञानादिकार्याणां कर्तरि सेयं बुद्धिरज्ञा सांख्यैः कल्पिता, चेतनत्वं ज्ञानादियोगिन्या अपि यत्त्वस्या नाभ्युपगतं सोऽयमतीव तपस्विनां भ्रमः, य एव बुध्यते जानात्यध्यवस्यति स एव पश्यति चेतयते च, न खल्वत्र वस्तुरूपभेदं पश्यामः, तत्र बुद्धिर्बुध्यते जानात्यध्यवस्यति पुरुषस्तु पश्यति चेतयते चेति वञ्चनायैवमुच्यते मुग्धतया वा ।

यच्चेदमुच्यते-'बुद्ध्याध्यवसितमथ पुरुषः पश्यती'ति, तद्व्याख्येयं किमिदं तस्य द्रष्टृत्वमिति ? प्रतिबिम्बनमिति चेत्किं स्वच्छे पुंसि वृत्तिमती बुद्धिः संक्रामत्युत वृत्तिमत्यां बुद्धौ प्रमातेति । तत्र चितिशक्तिरपरिणामिन्यप्रतिसंक्रमेति न बुद्धौ पुरुषस्य संक्रमणं, बुद्धौ तु पुंसि संक्रान्तायामपि पुंसः किं वृत्तं

---

(१) अत्र भाष्यम् 'कृतार्थमेकं पुरुषं प्रति दृश्यं नष्टमपि नाशं प्राप्तमपि अनष्टं तत् अन्यपुरुषसाधारणत्वात्' इति । 'कृतार्थमिति' बुद्ध्या कृतः समर्पितोऽर्थो यस्येति कृतार्थमेकं कञ्चिन्मुक्तपुरुषं प्रति गुणादिकं नष्टं प्रयोजनकरणात् राज्ञो राज्यबद्धमपि सामान्यतो न नष्टं तस्मिन्कृतार्थे अन्यपुरुषे च तस्य साधारणत्वादित्यर्थ, इति योगवार्तिकम् ।

येन द्रष्टा, संबन्धः द्रष्टृत्वं स्वभाव एवास्येति चेत्किं बुद्धिप्रतिबिम्बनेन, विशिष्टविषयावच्छेद इति चेत्ततः पूर्वमनालम्बनं द्रष्टृत्वमघटमानमिति न नैसर्गिकं द्रष्टृरूपं पुंसः स्यात्, दर्शनशक्तिः स्वाभाविकीति चेन्न, तस्य भेदाभेदाभ्यां निरूपयितुमशक्यत्वात्, प्रतिबिम्बपक्षे च परस्परानुरागस्य तुल्यत्वादवियोगाच्च कथमिदं निर्धार्यताममी पुंधर्मा इति, न हि तयोः पार्थगर्थ्येन कदाचित्स्वरूपावधारणं वृत्तम्, अनवधारितकार्यभेदत्वाच्च नानात्वमपि तयोर्दुर्वचम्, चेतनाचेतनत्वाद्भोक्तृभोग्यत्वाच्च विस्पष्टं तयोर्नानात्वमिति चेन्न, ज्ञानादियोगित्वं च बुद्धेरचेतनत्वं चेति चित्रम् ।

अपि च कल्पयित्वा भेदधर्मं बुद्धिधर्माः पुंसि पुंधर्माश्च बुद्धावारोपणीया इति किं भेदेन, भेदे च बुद्धेर्ज्ञानादियोगित्वे च चेतनत्वापत्तेरेकत्र कार्यकारणसंघाते चेतनद्वयमनिष्टं प्रसज्यते, नित्यमन्तःकरणमन्तरेण पुंस उपलब्धिर्न भवेदिति बुद्धेः कल्पना चेत्, अस्त्येव नित्यमन्तःकरणं मनः, तेन करणेन कर्तुरात्मनो विषयोपलब्धिक्रिया निर्वर्त्यते सैव च बुद्धिरित्याख्यायते न त्वन्या नित्या बुद्धिरस्तीति, किञ्च कस्य कृते परिदृश्यमानमात्मनो ज्ञानादिक्रियाकर्तृत्वमुत्सृज्य बुद्धेरदृश्यमानमुपेयते, को ऽत्राशयः ।

ननु पुरुषस्य स्वातन्त्र्यात्मककर्तृत्वे सति स्वकृतकर्मफलोपभोगानन्त्यादनिर्मोक्षः स्यात्, न हि कर्मणां परिक्षयो जन्मकोटिशतैरपि शक्यक्रियो, यदा तु कर्तारमुदासीनं प्रकृतिर्बध्नाति तदा सैव ज्ञाता सती मोचयतीति न दूरं मोक्षवर्त्म भविष्यति । अहो बत निखिलमेव मौर्ख्यं सांख्यहृदयेष्वेव प्रतिष्ठितमिति कथमन्यो जन इदानीं मूर्खो भविष्यति, अचेतने हि निरङ्कुशे प्रधाने बन्धरि सुतरामनिर्मोक्षः स्यात्, तत्त्वविदमपि पुमांसं न बध्नाति प्रकृतिरिति कोऽस्या नियन्ता पङ्ग्वन्धन्यायेन संयोगस्य तदापि तुल्यत्वात्, निवृत्तकुतूहलः पुमानिति चेत्, प्रकृतिरनिर्मुक्तकौतुकाऽभिनववधूरिव स्थितैव ।

अपि च रे मूढ ! पूर्वमेव तपस्विना पुंसा किं कृतं यदसौ बद्धोऽभूत्, द्रष्टृत्वं तु तस्य रूपं तदविनाभूतं कैवल्यदशायामपि तन्न नश्यत्येवेति तदाऽपि तद्बन्धनाय कथं न प्रवर्तते निर्मर्यादा प्रकृतिः, दृष्टाऽस्मीति विरमतीति चेत्, मैवम्, न ह्यसावेकपत्नीव्रतदुर्ग्रहगृहीता, निःसंख्यपुरुषोपभोगसौभाग्या पण्यवनितेव नासौ नियमेन व्यवहर्तुमर्हतीत्यास्तामेतत् ।

यच्च 'सत्त्वरजस्तमोभिस्त्रिभिर्गुणैस्समावस्थतया प्रधानशब्दव्यपदेशभाग्भिः महन्नाम्ना बुद्धिरुत्पद्यते' इत्यादि प्रक्रियाजालमालपितं तन्महान्धपरम्परान्यायप्रवृत्तगुरुपाठक्रमोपनतमेव न प्रमाणमूलम्, कार्याद्धि कारणमल्पपरिमाणमुपलभ्यते न तु विपर्ययः स्वावयवाश्रितस्य घटादेस्तथा दर्शनात्तदवयवानां तदपेक्षयाऽल्पत्वादन्यस्यास्यादो(?) महापरिमाणत्वमप्रयोजकम् ।

अपि च बुद्धिर्नाम विषयोपलम्भः अहंकारोऽप्यहंप्रत्ययरूपोऽभिमानो बुद्धिविशेष एव तेन बाह्यानीन्द्रियाणि जन्यन्ते गन्धादयश्च गुणाः गुणैश्च पृथिव्यादीनि भूतानीति महाव्यामोहः, इदं च चित्रं–विषयजन्या हि सुखादयः प्रसिद्धास्ते च सुखादिजन्या विषयाः संवृत्ता इति, नवेयं विश्वामित्रस्येव सांख्यमुनेः सृष्टिः, न च प्रधानास्तित्वमपि प्रमाणवदन्वयादिहेतूनामसाधनत्वात्, चेतनानां हि संभवेदपि सुखदुःखमोहान्वितत्वमचेतनानि भूतानि सुखदुःखमोहवन्तीति सुभाषितम्, घटे पटे शकटे च सुख दुःखमोहाः सन्तीति कः प्रतिपद्यते, प्रकाशप्रवृत्तिनियमा अपि चेतनेष्वेव दृश्यन्ते नाचेतनेष्वित्यसिद्धत्वाद्धेतोर्न प्रधानसिद्धिः ।

अपि च सत्कार्यवादमूल एष तपस्विनां विभ्रमः सर्वं सर्वत्रास्तीति ततोऽन्वयसिद्धिं बुद्ध्यमानास्ते प्रधानसिद्धावध्यवसिताः, सत्कार्यवादश्च विचार्यमाणो न समस्त्येवेति कुतस्त्या हेतुसिद्धिः ।

सत्कार्यवादनिरूपणम्

ननु सत्कार्यवादे कार्यकारणभावो भवति भावानां नान्यथा, तथा हि चतुष्टयी गतिरिह स्याद् घटादिकार्यं मृत्पिण्डादिना कारणेन क्रियमाणमपि क्रियते सद्वाऽसद्वा सदसद्वाऽनुभयं वेति, तत्रासतः करणे खरविषाणादेः करणं स्यादसत्त्वे हि घटस्य खरविषाणस्य च को विशेषः, घटस्यापि च प्राक् प्रध्वंसाभावदशयोरसत्त्वाविशेषात्प्रागभावदशायामिव प्रध्वंसावस्थायामपि करणं भवेत्, असत्करणे नियतोपादानग्रहणं न प्राप्नोति, तैलार्थी हि तिलसर्षपानुपादत्ते न सिकताः असत्त्वे च तैलस्य को विशेषः सर्षपाणां सिकताभ्यः, असति कार्ये निरालम्बनः कारकव्यापारो भवेन्न ह्यसौ मृत्पिण्डादिविषयो भवितुमर्हति कार्यं चासत्, अपि चाविद्यमाने कारणव्यतिरिक्ते च कार्ये जन्ये कारणस्य मृत्पिण्डादेर्घटादिकार्यं जनितवतः किमिति न स्वरूपमुपलभ्यते ।

अथ स्वविनाशेन कारणं कार्यस्य जनकमिष्यते तदियमभावाद्भावोत्पत्तिर्भवेत्तस्यां च कुतोऽयं नियमो यदनन्तरवृत्त एव मृत्पिण्डाभावः कुम्भमभिनिर्वर्तयति न चिरातिक्रान्त इत्यतश्च परुन्मृत्पिण्डे नष्टे एव स कुम्भोत्पादः स्याद् ।

अथ स्वाव्यतिरिक्तमेव कारणेन कार्यं जन्यते ? तर्हि कारणस्य सत्त्वात्तदव्यतिरिक्तं वक्तुं युक्तं सदसतोर्विप्रतिषेधेनैकत्र समावेशायोगात्, रूपभेदादविरोध इति चेन्न, कार्यस्य विचार्यमाणस्यैकत्वात्, ततश्च तेनैव स्वेन कार्येण रूपेणासच्चेन्नासच्चेदसच्च न सदिति, पररूपेण त्वसत्त्वं समस्तभावानामस्त्येव, अनुभयात्मकं तु नाम वस्तु नास्त्येवेति, तत्पारिशेष्यात्सदेव कार्यम्, किमिति च

नोपलभ्यते इति ? अनुमानेनापि यदुपलब्धं तत्किमनुपलब्धं भवति, प्रत्यक्षेण तु तदानीमनुपलम्भोऽनभिव्यक्तत्वादभिव्यक्तिसम्पादन एव च कारकप्रयत्नसाफल्यं, कार्यं तु सदेवेति ।

सत्कार्यवादखण्डनम्

अत्राभिधीयते, केन रूपेण तदानीं कार्यं सदिति मन्यते?यदि कारकव्यापाराभिनिर्वर्त्येन सलिलाहरणाद्यर्थक्रियासमर्थेन पृथुबुध्नोदराकारतारूपेण चक्रमूर्धनि घटोऽस्ति तदाऽभिव्यक्तेनापि रूपेण सत्त्वादत्यन्ताय कारकव्यापारवैफल्यमित्थमपि च कारकप्रवृत्तौ तद्व्यापारानुपरमप्रसङ्गः, किं हि तदोपलभ्य कारकाणि निवर्तेरन्कार्यस्य प्रागप्युपलब्धत्वात् ।

अथ मृत्पिण्डरूपेण तदानीं घटोऽस्तीति कथ्यते, तत्र न ह्यसौ तदानीं घटोऽस्ति मृत्पिण्ड एवासावदो न स्वरूपमुत्तरकालमपि निवर्तते घटस्तु ततो निवर्तते, यद्येवं यदैवासौ निवर्तते तदैवास्ति न ततः पूर्वमिति ।

अथ पूर्वं शक्त्यात्मना तस्यास्तित्वमिदानीमभिव्यक्त्यात्मना क्रियते इति, तदप्यनुपपन्नमभिव्यक्तिरपि तत्स्वरूपाद्भिन्ना ऽभिन्ना वा सत्यसती वेति विकल्प्यमाना न पूर्वोक्तं दोषमतिवर्तते ।

का चेयमभिव्यक्तिः ? किं कार्यात्मनाऽवस्थानमथ संस्थानविशेष उत प्रतीतिरिति, यदि कार्यात्मनाऽवस्थानं, तत्पूर्वं नाभूत्तदधुना भूतमित्यसत्कार्यम्, पूर्वमपि वा यदि तदासीत्तदा पुनः कारकवैफल्यम् , संस्थानमप्यवयवसन्निवेशविशेषः सन्नेव, ते अवयवास्तु सन्तीति कस्यात्र विवादः, न खलु परमाणवोऽस्माभिर्नाङ्गीकृताः, प्रतीतिस्तु घटस्य चक्षुरादिकारकसामग्र्यधीनत्वमृत्पिण्डदण्डचक्रादिकारकचक्रसाध्येति सा चक्रमूर्धनि घटस्य नास्त्येवेत्यसन् घटः ।

दर्शनादर्शनाधीने सदसत्त्वे हि वस्तुनः ।
दृश्यस्यादर्शनात्तेन चक्रे कुम्भस्य नास्तिता ॥

चक्रमूर्धवत्प्रध्वंसदशायामनुपलम्भाद् घटनास्तित्वमेवेत्यतश्च 'नासतो विद्यते भावो नाभावो विद्यते सत' इत्यप्रमाणकं पूर्वापरान्तयोर्भावस्वरूपादर्शनात् , शक्त्यात्मना ऽपि यदस्तित्वमस्योच्यते, तत्रापि चिन्त्यम्–केयं शक्तिर्नामेति ? यदि घटस्वरूपाद्भिन्नासौ, तर्हि पररूपेण घटोऽस्तीति स्वरूपेणैव घटास्तित्वमुक्तं भवेत्तच्च प्रत्यक्षविरोधान्निरस्तम्, असत्करणपक्षे च यच्चोदितं 'शशविषाणाद्यपि क्रियेते'ति, तन्न, वचनव्यक्त्यपरिज्ञानात्, यदसत्तत्क्रियते इति नेयं वचनव्यक्तिरपि तु यत्क्रियते तदसदिति ।

स्वरूपसहकार्यादिहेतवो यद्विधायिनः ।
दृश्यन्ते जन्यते तद्धि न व्योमकुसुमादिकम् ॥

प्रागभावदशायां च हेतुव्यापारदर्शनम् ।
न तु प्रध्वंसवेलायामतः कमनुयुञ्ज्महे ॥
उपादानं तु सर्वस्य यन्न सर्वत्र दृश्यते ।
तन्न कार्यस्य सद्भावादपि त्वेवं निरीक्षणात् ॥
अद्यत्वे व्यवहारो ऽपि नैवापूर्वः प्रवर्त्यते ।
यथोपलब्धं वृद्धेभ्यस्स तथैवानुगम्यते ॥
तैलार्थी सिकताः कश्चिदाददानो न दृश्यते ।
अदृष्ट्वा चाद्य नान्यो ऽपि तदर्थी तासु धावति ॥
अन्वयव्यतिरेकौ च गृह्येते व्यवहारतः ।
अनादिश्चैष संसार इति कस्यानुयोज्यता ॥

अथ वा शक्तिनियमादेवोपादाननियम उपपत्स्यते,

शक्तिस्त्वनित्या सूक्ष्मा च नेह का चिदुपेयते ।
तदभ्युपगमे नित्यं कार्योत्पादप्रसक्तितः ॥

किन्तु योग्यतावच्छिन्नस्वरूपसहकारिसन्निधानमेव शक्तिः, सैवेयं द्विविधा शक्तिरुच्यते अवस्थिता ऽऽगन्तुका च, सत्त्वाद्यवच्छिन्नं स्वरूपम् अवस्थिता शक्तिः, आगन्तुका तु दण्डचक्रादिसंयोगरूपा, शक्तिद्वयकृता च कार्यनिष्पत्तिरसकृद् दृष्टेति तदर्थिभिस्तु तदुपादानम्, योग्यता ऽपि नार्थान्तरं किञ्चित्किन्तु वस्तुविशेष एवेत्येवं सद्विनियमादुपादाननियमसिद्धेर्न सत्कार्यम्। न च शक्तिरेव कार्यमिति वक्तव्यम्, कार्यस्वरूपस्य ततः पृथग्भूतस्य प्रतीत्या व्यवस्थापनात्, शक्तेश्च कार्यत्वे कार्यादेव कार्योत्पादोऽङ्गीकृतः स्यात्, न च घटाद् घट उत्पत्तुमर्हति। शक्तेश्च कार्यमुत्पद्यते इत्यभ्युपगतमतो ऽन्यत्कार्यमन्या च शक्तिरनुवाद्यवाचकयोर्व्यङ्ग्यव्यञ्जकयोश्च दीपघटयोरुभयाश्रिता शक्तिर्दृष्टेति कार्यकारणयोरपि सा कथमनुभयाधिष्ठाना भवितुमर्हति, सति च द्वितीये कार्याख्ये तदाश्रये कथमियमुभयाश्रिता स्यादिति, नैतदेवं यथादर्शनं शक्तेरभ्युपगमात्तत्रैकत्र दृष्टरूपमन्यत्रापि मृग्यते, वाच्यवाचकयोर्व्यङ्ग्यव्यञ्जकयोश्च द्वयोः पृथक्त्वेन दर्शनादुभयाश्रिता शक्तिरङ्गीकृतेति हेतुद्वयस्यानुपलम्भात्केवलकारणवृत्तिरेव शक्तिस्तत्कृतश्चोपादाननियमविचारो युक्तः।

उत्पत्तौ खलु सिद्धायामुपादानं विचार्यते ।
सतस्तु सैव नास्तीति किमुपादानचिन्तया ॥

सत्कार्यवादे च सुतरामुपादाननियमो दुर्घटः, सर्वस्य सर्वत्र भावात्सिकतातिलसरस्तीरकेदारव्युप्तबीजजनिताङ्कुरादिकार्यक्रमोत्पाद्यमानतिलस्वरूपपर्यालोचनया तिलेष्विव सिकतास्वपि तैलसम्भवात्, सर्वस्य सर्वत्र चास्तित्वे नियतपदार्थप्रतिष्ठितहानोपादानादिव्यवहारः सकल एव विप्लवेत, अपि च प्रायश्चि-

त्तमेष तपस्वी तप्तकृच्छ्रमतिकष्टं कथं चरिष्यतीति महन्! गतोऽसि कारुण्यम्, अन्नं च तावदश्नात्यन्ते च वर्चोऽस्तीति विड्भक्षणात्प्रायश्चित्तीयत एवायमित्यलं सत्कार्यवादप्रमादेन।

यत्पुनरत्राभाणि—कारणानुपमर्देन कार्यानुत्पादादभावाद्भावोत्पत्तिर्भवेत्तत्र चानन्तरवृत्त्युत्पत्तिनियमो न स्यात्–इति, तदप्ययुक्तम्, मूर्तानां समानदेशत्वविरोधात्कार्यकारणयोरेकदेशत्वं नेष्यते नैतावता भावोत्पत्तिरभावाद्भवितुमर्हति, कारणपदेन तदुपादानदर्शनादत एवानन्तर्यनियमो ऽप्युपपन्नः, न च कार्यकारणयोरभेदात्सत्कार्यमिति वक्तव्यम्, तयोः प्रत्यक्षसिद्धभिन्नस्वरूपत्वात्।

यत्तु निरालम्बना कारकप्रवृत्तिरिति चोदितं परिहृतं तद्भाष्यकारेण(१) 'बुद्धिसिद्धं तु तदसत् (गौ० ३।१।५०।११) इति' वृद्धव्यवहारतः कार्यकारणभावमवगम्यामुष्मात्कारणादिदमीदृशं कार्यमुत्पद्यत इति बुद्धौ निर्धार्य कारकाणि कर्ता नियुङ्क्ते इति न निर्विषयः कारकव्यापारः, तदेवं सत्कार्यवादस्य निष्प्रमाणकत्वात्तन्मूलान्वयादिहेतुसिद्ध्यभावान्न प्रधानास्तित्वसिद्धिस्तदभावाच्च न तद्विकृतिर्नित्या बुद्धिरपि तु ज्ञानोपलब्धिरूपैवेति सम्यक्सूत्रितं 'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमि'ति, इतश्चानित्या बुद्धिः जानामि ज्ञास्याम्यज्ञासिषमित्युपजननापायधर्मतया पाकादिवत्कालत्रयेऽपि प्रकाशमानत्वाज् ज्ञातृव्यतिरिक्तायाश्च बुद्धेरप्रतिभासनात्, अयं तु विशेषः–पाकादिक्रियाणामोदनादिफलावच्छेदद्वारकं कालवैतत्यमपि भवति, उपलब्धेस्तु वस्तुस्वरूपप्रकाशनमात्रपरिसमाप्तप्रयोजनायाः कालवैतत्यं नास्त्येवात एवानित्यत्वेऽप्युत्पन्नापवर्गिणीमेव बुद्धिमाचक्षते शब्दवन्न घटादिवत्कालान्तरस्थायिनीमिति, सा चेयं बुद्धिरात्मान्तःकरणशब्ददीपेन्द्रियार्थाद्यनेककारककलापकार्यापि सती न बाह्ये न बाह्यकर्त्रणि समवैति, न बाह्यकरणे चक्षुरादौ नान्तःकरणे मनसि किन्तु कर्तर्येव, कर्ताऽपि च नित्यो विभुरात्मा न भूतसङ्घातस्वभावः कार्यस्तस्या आश्रय इत्यात्मपरीक्षायां निर्णीतं गुणत्वमपि च तस्यास्तत्रैव दर्शितम्।

नन्वेवं तर्हि न बुद्धेरनित्यत्वं विनाशकारणाभावाद्, द्विविधो हि गुणानां विनाशहेतुराश्रयविनाशो विरोधिगुणप्रादुर्भावो वा, नेहाश्रयविनाशो नित्यत्वादात्मनो, न च विरोधिनमस्याः कंचिद् गुणमुपलभामहे। न, शब्दवदाशुविनाशित्वात्, नित्याकाशगुणो ऽपि शब्दः शब्दान्तरमारभ्य यथा विनश्यति तथा बुद्धिर्बुद्ध्यन्तरमारभ्य विनश्यतीति तथा दर्शनात्कल्प्यते, यावांश्च कश्चन विनाशद-

---

(१) बुद्धिसिद्धमिति। तत्कार्यम्, असत्—प्रागभावप्रतियोगि, बुद्धिसिद्धम्—बुद्ध्या विषयीकृतम्, तथाहि इह तन्तुषु पटो भविष्यतीति ज्ञात्वा कुविन्दः प्रवर्तते न तु पटोऽस्तीति ज्ञात्वा तथासति सिद्धत्वेन ज्ञाते इच्छाभावात् प्रवृत्त्यनुपपत्तेरित्यर्थः।

र्शनभेदोपलम्भादिः शब्दस्यानित्यतायां न्याय उक्तः स सर्वोपि बुद्ध्यां प्रयोजनीयः, अत एव न बुद्धीनामेकप्रमातृवृत्तीनां यौगपद्यं विद्यते शब्दानामिवैकवक्तृप्रयुक्तानाम्, विनश्यदविनश्यद्दशयोस्तु बुद्ध्योराशुविनाशत्वेऽपि यौगपद्यमनुभवादुपेयत इत्यलमतिविस्तरेण, बुद्धेरनित्यतायां च प्रायेण सर्ववादिनामविवादः, अन्यथा कथमाह जैमिनिः 'सत्सम्प्रयोगे(१) पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमि'ति ।

अचिररुचिवत्तस्माद् बुद्धिर्निसर्गविनश्वरी
भवति जनकः स्वात्मा तस्याः स एव तदाश्रयः ।
भवमनुभवैस्तापैः पापा तमेव युनक्ति सा(२)
व्यसनजननीमेतामस्मात्त्यजेत् परमार्थवित् ॥

मनसो लक्षणम् ।

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ [गो० १।१।१६।]

मनसो यदेव सत्त्वे प्रमाणं तद्गम्यत्वमेवास्य लक्षणं समानेतरजातीयव्यवच्छेदकारित्वात् ।

ननु मनस इन्द्रियत्वात्तद्वर्ग एव पठनं युक्तं किमर्थोऽयं पृथङ् निर्देशः, न, धर्मभेदात्, भौतिकानीन्द्रियाणि नियतविषयाणि, सगुणानां(३) चैषामिन्द्रियभावो, मनस्तु न भौतिकं न नियतविषयं न चास्य सगुणस्येन्द्रियभाव इति, तच्च न भौतिकमकार्यत्वादत एव न तद्गुणयोगि न च नियतविषयं सर्वविषयत्वं त्वस्य सकलबाह्येन्द्रियाणामधिष्ठानत्वात्तदधिगम्यसुखादित्रिविषयग्राहित्वाच्च, बाह्येन्द्रियाणि हि मनोऽधिष्ठितानि स्वविषये प्रवर्त्तितुमुत्सहन्ते चक्षुरादीनि नान्यथा, कस्मादेवमिति चेद्युगपज्ज्ञानानुपपत्तेः, उत्तरकालं च बाह्येन्द्रियव्यापारविरहेऽपि तदर्थावमर्षात्(४) ।

(१) सदिति । सता विद्यमानेन वस्तुना इन्द्रियाणां सम्प्रयोगे सम्बन्धे सति यद् बुद्धिजन्म तत्प्रत्यक्षमित्यर्थः ।

(२) सा बुद्धिरेव भवमनुभवैः भवतापैश्चास्मानं युनक्ति अतो व्यसनजननीं बुद्धिं परमार्थवित्त्यजेदित्यर्थः ।

(३) सगुणानामिति । विशेषगुणवतामित्यर्थः । तेन सङ्ख्यादिगुणस्य मनसि सत्त्वेऽपि न क्षतिः ।

(४) तदर्थावमर्षात्—तदर्थस्मरणात् । न च तदानीं स्मरणं बाह्येन्द्रियजन्यं भवितुमर्हति बाह्येन्द्रियाणां विरमात्, नान्यकरणकमतः स्मरणान्यथानुपपत्त्या मनः कल्प्यते इति भावः ।

अस्त्वेकेन्द्रियगम्येषु कचिज्जातिगुणादिषु ।
विज्ञानयौगपद्यं यन्मनसस्तत्र साधनम् ॥

तत्र विषयादिदोषेण दूरत्वादिना जात्यादेर्युगपद् ग्रहीतुमशक्यत्वात् , यत्तु नानेन्द्रियग्राह्येषु युगपत्सन्निहितेष्वपि गन्धरसरूपादिषु विषयेषु तद्ग्रहणेषु च स्वकार्यानुमितसन्निधानेषु सत्स्वपि यदसंनिधानात् तेषु करणेषु युगपदुपलब्धयो न भवन्ति ततो ऽवसीयते नूनं कारणान्तरधर्मेषु करणेषु युगपदुपलब्धयो न भवन्ति (परीक्ष्यते) तच्च मन इत्याख्यायते ।

ननु च—

सुगन्धि शीतलां दीर्घामश्नन्तः पूपशष्कुलीम् ।
कपिलब्राह्मणास्सन्ति युगपत्पञ्चबुद्धयः ॥

अपि च अयं खल्वध्यापको ऽधीते व्रजति कमण्डलुं धारयति पन्थानं पश्यति शृणोत्यरण्यजान् शब्दान् बिभ्यद्व्यालिङ्गानि बुभुत्सत इति क्रमाग्रहणाद्युगपदेता बुद्धयोऽस्य भवन्तीति, नाशूत्पत्तेः सूच्यग्रभिद्यमानकोकनददलकदम्बकवदतिसूक्ष्मत्वात्कालस्य क्रमस्तत्र न विभाव्यते भवितव्यं तु तेनेति, यदि कारणान्तरनिरपेक्षचक्षुरादिकरणसाध्या एव रूपादिविषयोपलब्धयस्तदुत्तरकालमुपहतकरणानामपि कथं स्मरणादिरूपस्तदवमर्शः, अतो नूनं नयनादिवत्करणान्तरं तद्ग्राहि विद्यते ।

अव्यापकं च तत् , व्यापित्वे हि बुद्धीनां यौगपद्यं न निवर्त्तेत, अपि चायं व्यवहार उक्तेऽपि कचिद्वचसि कश्चिदाह--नाहमेतदश्रौषमन्यत्र मे मनोऽभूत्-इति, तस्मान्न व्यापकं मनः ।

प्रतिशरीरमेकं च तत् , अनेकत्वे पुनरपि ज्ञानयौगपद्यानपायात् ।
क्रियावच्च तन्निष्क्रियेणेन्द्रियाणामधिष्ठातुमशक्यत्वात् ।

मूर्तं च तत् अमूर्तस्य क्रियानुपपत्तेः, मूर्तत्वे सति नित्यं च निरवयवत्वादनाश्रितत्वाच्च, मूर्तत्वं त्वनित्यतायामप्रयोजकमिति वक्ष्यामः ।

निरवयवं च तत् अवयवकल्पनायां प्रमाणाभावात् ।

वेगवच्च तत् आशुसंचारादाशुसञ्चारमन्तरेणोपलब्धिदैर्घ्यस्य दृष्टस्यानुपपत्तेः ।

इन्द्रियसंयोगि च तद् द्रव्यत्वाद्, द्रव्यं च तद् वेगादिगुणयोगात्क्रियावच्चेतनाश्रितत्वाच्च ।

अचेतनं च तत् करणत्वादितरेषां ह्येकत्र शरीरे चेतनद्वयसमावेशाद्व्यवहारः स्यादिति, तस्मादेवंरूपं मनः ।

सांख्योक्तं तु तस्य रूपमयुक्तमिति तत्प्रक्रियानिषेधादेव व्याख्यातम् ।

अन्यान्यपि स्मृत्यनुमानागमसंशयप्रतिभास्वप्नोहज्ञानानि अनन्तरसुखदुःखेच्छाद्वेषादिविषयग्राहीणि च ज्ञानानि मनसो लिङ्गानि सन्त्येव, तेषां बाह्ये-

न्द्रियव्यापारसाध्यत्वासम्भवात्करणरहितायाश्च क्रियाभिनिर्वृत्तेरदर्शनादिति, स्मृतिस्तावन्मनोजन्यैवानुमानागमज्ञानं तु परोक्षार्थविषयत्वान्मानसं, संशयो ऽपि मानसः कश्चिद्दृश्यते, प्रतिभा सा मानसी दर्शितैव-'श्वो मे भ्राता ऽऽगन्ते' ति, स्वप्नज्ञानमवरतेन्द्रियग्रामस्य भवत्कथं न मानसम् , तर्को ऽपि संशयवत्क चिद्विषये मानसो भवत्येव, सुखादीनां तु ज्ञप्तिवदुत्पत्तिरपि मनोनिबन्धेनैव, कार्याणामात्मगुणानामुत्पत्तौ प्रत्यासन्नकारणान्तरसम्भवेऽप्यात्ममनःसंयोग स्यावधृतसामर्थ्यस्यासमवायिकारणत्वादतश्च विषयानुभवजन्ये ऽपि सुखादौ मनस्संयोगः कारणम् , सुखादीनां च बोधस्वरूपत्वं संवेद्यत्वं च निरस्तम् , अ तस्तदुपलब्धौ मनस एव कारणता ।

तदिदं मनः पूर्वकृतशुभाशुभकर्मसंस्कारवताऽऽत्मना तद्वशादेव शरीरदेशे संयोगं प्रतिपद्यते तत्रैव च जीवनव्यवहारः, विपच्यमानकर्माशयसहित आत्म मनःसंयोगो जीवनमिति हि वदन्ति, संयुक्तमात्मना मनस्तेषु तेषूपपत्तिस्थानेषु नानाविधभोगसाधनतया संसारकारणं भवति, नित्यत्वादात्ममनसोस्संयोग इति न हि प्रथमो नाम कश्चित्कालः समस्ति आदिसर्गस्यापि पूर्वसर्गसापेक्षत्वात् ईश्वरोपि कर्मापेक्ष एव विचित्रस्य जगतः स्रष्टेति निर्णीतमेतदिति कृतं विस्तरेण

विदधत्सुखादिभोगं वहच्च तरलेन्द्रियाश्वसारथिताम् ।
बन्धनिमित्तं मन इति मनस्विना यत्नतो हेयम् ॥

प्रवृत्तिलक्षणम् ।

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः [गौ० १।१।१७]

वागिति वर्णात्मकशब्दकारणसंयोगाद्युच्यते नेन्द्रियमिति व्याख्यातम् , बुद्धिरिति मन इहोच्यते नोपलब्धिः, शरीरं प्रसिद्धं तेषामारम्भो व्यापारस्सैवा रम्भ इति सर्वथा तदीयक्रिया प्रवृत्तिरित्युच्यते ।

प्रवृत्तिभेदाः ।

सा च द्विविधा पुण्या पापिका च, तत्र पापिका वाचा चतुर्विधा, मनसा त्रिवि धा, शरीरेण त्रिविधैवेति दशविधा, वाचा प्रवृत्तिः तत्रानृतपरुषसूचनासम्बद्धव चनरूपा चतुर्विधा, परद्रोहपरद्रव्याभिलाषानास्तिक्यानुध्यानरूपा त्रिविधा मन सः प्रवृत्तिः, हिंसास्तेयप्रतिषिद्धाचरणरूपा त्रिविधा शरीरेण प्रवृत्तिः, मैथुनकर णमेवंप्रकारसुखाद्युपलक्षणं सेयं दशविधा प्रवृत्तिरनवरतमभिज्वलतो निरतिश यदुःखवेदनादायिनो नरकानलस्येन्धनम् , पुण्या ऽपि सत्यप्रियहितवचनस्वाध्या याध्ययनरूपा चतुर्विधा वाचा प्रवृत्तिर्जपयज्ञे हि स्वाध्यायपाठ उपांशुना ऽन्तः। संकल्पेन वा, अस्पृहानुकम्पापरलोकश्रद्धात्मिका त्रिविधा मनसा प्रवृत्तिः, दान-

परित्राणपरिचरणरूपा त्रिविधा शरीरेण प्रवृत्तिरितीयमपि दशविधैव, एषा च स्वर्गसदनद्वारसोपानकल्पा, सेयमुभयतो विंशतिभेदाः प्रवृत्तिः संक्षेपतो द्विधैव विधिनिषेधात्मकतदवगमोपायभेदात् ।

विधिनिषेधकारण एव हि सदसत्कर्मावगमः, तत्र विहितानुष्ठानं स्वर्गाय निषिद्धाचरणं नरकायेत्येवं सुखदुःखोपभोगस्थानशरीरेन्द्रियाद्यनभिसम्बन्धनिबन्धनमेषा प्रवृत्तिर्भवन्ती संसारस्य परमं कारणं भवति, यो ह्ययं देवमनुष्यतिर्यग्भूमिषु शरीरसर्गो यश्च प्रतिविषयं बुद्धिसर्गो यश्चात्मना सह मनसः संसर्गः स सर्वः प्रवृत्तेरेव परिणामविभवः, प्रवृत्तेश्च सर्वस्याः क्रियात्वात्क्षणिकत्वेऽपि तदुपहितो धर्माधर्मशब्दवाच्य आत्मसंस्कारः कर्मफलोपभोगपर्यन्तस्थितिरस्त्येव, न च फलमदत्त्वा धर्माधर्मौ क्षीयेते अन्त्यसुखदुःखसंविद्विरोधिनौ हि धर्माधर्मावुदाहरन्ति, न च जगति तथाविधं किमपि कार्यमस्ति वस्तु यन्न धर्माधर्माभ्यामाक्षिप्तसम्भवमिति तदुच्छेदे मुमुक्षुणा यत्न आस्थेयः ।

इति वितनुतः पुण्यापुण्यप्रवृत्तिसमुद्भवौ
निगमवदिमौ धर्माधर्मौ रुचं भवबन्धने ।
यदि निरवधेर्दुःखस्यान्तं चिकीर्षसि सर्वथा
परिहर मनोवाक्कायानां प्रवृत्तिमनर्गलाम् ॥

दोषलक्षणम् ।

प्रवर्तनालक्षणा दोषाः ॥ (गौ० १।१।१८)

प्रवर्तना प्रवृत्तिः सा लक्षणमेषामिति प्रवर्तनालक्षणा दोषाः, दोषप्रयुक्तो हि पुरुषः पुण्ये कर्मणि पापे वा प्रवर्तते ।

ननु च प्रत्यात्मवेदनीयदोषाणां स्वरूपमपरोक्षमेतत्किमेतेषां लक्षणतो रूपं निरूप्यते, सत्यं, प्रत्यात्मवेदनीयत्वेऽपि यदेषां प्रवर्तनालक्षणत्वमुपदिश्यते तदनेन रूपेण संसारकारणत्वज्ञापनार्थं,धर्माधर्मविहितो हि शरीरादि दुःखाधिष्ठानसम्बन्धः, तद्बीजस्य च कर्मणः कारणं दोषाः कर्मणि पुमांसं प्रवर्तयन्तीति प्रवर्तनालक्षणा इत्युक्ताः, परसन्तानवर्तिनां दोषाणामप्रत्यक्षत्वात्तत्प्रतीतये प्रवर्तनालक्षणत्वकथनमिति त्वपव्याख्यानमल्पप्रयोजनत्वादिति ।

दोषभेदाः ।

तेषां दोषाणां त्रयो राशयो भवन्ति रागो द्वेषो मोह इति, तत्रानुकूलेष्वर्थेष्वभिलाषलक्षणो रागः प्रतिकूलेष्वसहनलक्षणो द्वेषः वस्तुपरमार्थापरिच्छेदलक्षणो मिथ्याध्यवसायो मोहः ।

ननु चेर्ष्यासूयालोभमानमदमत्सरादिदोषान्तरसम्भवात्कथं त्रय एव दोषाः, न ईर्ष्यादीनां यथानिर्दिष्टेष्वेवान्तर्भावात्, कामो मत्सरः स्पृहा तृष्णा लोभ इति

पञ्चप्रकारो रागपक्षः, स्त्रीसंभोगेच्छा कामः, यदन्यस्मै निवेद्यमानमपि वस्तु धनवन्न क्षीयते तदपरित्यागेच्छा मत्सरः, अनात्मीयवस्त्वादित्सा स्पृहा, पुनर्भवप्रतिसन्धानहेतुभूतेच्छा तृष्णा, निषिद्धद्रव्यग्रहणेच्छा लोभ इत्यभिलाषप्रकारभेदाद्रागपक्ष एवायम्, द्वेषपक्षोऽपि पञ्चविधः, क्रोधेर्ष्यासूयाद्रोहोऽमर्ष इति, अक्षिभ्रूभ्रमादिविकारहेतुः प्रज्वलनात्मकः क्रोधः, साधारणेऽपि वस्तुनि परस्य दर्शनाद्यसहनमीर्ष्या, परगुणेष्वक्षमाऽसूया, परापकारो द्रोहः, अदर्शितमुखादिविकारः परं प्रति मन्युरमर्ष इत्यसहनप्रकारभेदादेव द्वेषपक्षः, मोहपक्षस्तु चतुर्विधो मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति, अतस्मिंस्तदिति ज्ञानं मिथ्याज्ञानम्, किं स्विदिति विमर्शो विचिकित्सा, असद्गुणाध्यारोपेण स्वोत्कर्षबुद्धिर्मानः, कियदेतदित्यवज्ञया कर्तव्याकरणं प्रमादः, स एव मद इत्याख्यायते, सोऽयं तत्त्वापरिज्ञानप्रकारभेदान्मोहपक्षः, एवं त्रय एवैते दोषाः, शोकहर्षौ तु सुखदुःखे उच्येते न दोषान्तरम्, तेषां तु मोहः पापतमः इतरयोस्तु तदधीनात्मलाभत्वात्, मूढस्य हि रागद्वेषौ भवतो मिथ्यासङ्कल्पादुत्पद्यमानयोरनुभवात्कुसङ्कल्पश्च मिथ्याज्ञानप्रवृत्तिरेव, मिथ्याज्ञानस्यैव भगवतः सर्वमिदं विलसितं योऽयमनेकप्रकारः संसारदुःखभारः, यद्येवं न तर्हि मोहस्य दोषत्वं दोषकारणत्वादिति न लक्षणानपायात्, सत्यपि दोषान्तरहेतुत्वे स्वयमपि पुरुषप्रवृत्तिप्रयोजकत्वलक्षणयोगाद्रागवद् दोषत्वं न मोहो विजहाति ।

दोषशमनोपायः ।

त इमे दोषाः संसारहेतव इति यत्नतः शमनीयाः, कथं पुनरमी शमयितुं शक्याः? उक्तमत्र नाकस्मिकाः न नित्याः नाज्ञातशमनोपाया न चाशक्यप्रतिक्रिया इति, विस्तरतश्चैतदपवर्गाह्निके परीक्षिष्यते, मिथ्याज्ञाननिमित्ताः खल्वेते दोषास्तस्मिन्सम्यग्ज्ञानप्रभावनिहते हेतोरभावान्न भवन्त्येवेति ।

नन्वेवं प्रसवविनाशकारणयोरेकत्वादेक एव दोषो भवेदिति त्रित्वं नोपपद्यते, न, अनुभवसिद्धभेदत्वात्, अनुभूयते हि रागद्वेषमोहानामितरेतरविभक्तं स्वरूपम्, कारणैकत्वं तु न प्रयोजकमेकस्मादेव ज्वलनसंयोगादुत्पद्यमानानां विनश्यतां च पार्थिवपदार्थवृत्तीनां गन्धरसरूपस्पर्शानां नानात्वदर्शनात्, अतः सूक्तं दोषाणां त्रैराश्यमिति ।

संसारकाराभवनप्रवेशमार्गास्त एते त्रय एव दोषाः ।
एषां प्रहाणोद्यममादधानो न जन्ममृत्यू पुनरभ्युपैति ॥

प्रेत्यभावलक्षणम् ।

पुनरुत्पत्तिः प्रेत्यभावः (गौ० १।१।१९)

कस्येयं पुनरुत्पत्तिरुच्यते आत्मनः शरीरस्य वा, तत्रात्मनो नित्यत्वादुत्प-

त्तिरेव नास्ति का कथा पुनःशब्दार्थस्य, शरीरस्य तूत्पत्तिरस्ति न तु पौनःपुन्येन, न हि मृतं शरीरं तदेव पुनरुत्पद्यते, तस्मात्पुनरुत्पत्तिः प्रेत्यभाव इत्यवाचकं सूत्रम्, उच्यते, पुनःशब्दार्थस्य यत्नत उपदिष्टस्य परिहर्तुमशक्यत्वादात्मनश्च स्थायित्वेन क्रियाभ्यावृत्तिसम्भवात्तस्यैव पुनः पुनरुत्पत्तिं ब्रूमः, उत्पत्तिवन्मरणमपि, सोऽयमात्मन एव मृत्वा पुनर्जन्म प्रेत्यभाव इति ।

ननु जन्ममरणे उभे अपि नित्यत्वादात्मनो न संस्त इत्युक्तम्, सत्यं शरीरादिसंयोगवियोगयोस्तु तथाऽभिधानान्न दोषः, मरणमात्मनो भोगायतनदेहेन्द्रियादिवियोग उच्यते जन्म तु तत्सम्बन्धः, ते च ते विपच्यमानकर्माशयानुसारेण देहेन्द्रियादित्यागोपादाने एव मरणजन्मनी क्रियाभ्यावृत्त्या भवन्ती प्रेत्यभाव इत्युच्यते, स एव च संसारः, तदित्थमनुध्यायतः कस्य सचेतसो निर्वेदो नोदीयात्, तदुक्तम्--

जराावियोगमरणव्याधयस्तावदासताम् ।
जन्मैव किं न धीरस्य भूयो भूयस्त्रपाकरम् ॥

अथ यैरुत्पद्यमानैर्देहेन्द्रियादिभिरात्मनः सम्बन्धस्तेषां कथमुत्पत्तिरित्युक्तं सूत्रकृता, व्यक्ताद्व्यक्तानामुत्पत्तिः प्रत्यक्षप्रामाण्यादिति, (गौ० ४।१।११) व्यक्तादिति कपिलाभ्युपगतत्रिगुणात्मकाव्यक्तरूपकारणनिषेधेन परमाणूनां शरीरादौ कार्ये कारणत्वमाह ।

परमाणुसाधनम् ।

तथा हि पार्थिवमाप्यं तैजसं वायवीयमिति चतुर्विधं कार्यं स्वावयवाश्रितमुपलभ्यते, तत्र यथा घटः सावयवः कपालेष्वाश्रित एवं कपालान्यपि सावयवत्वात्तदवयवेषु तदवयवा अपि तदवयवान्तरेष्वित्येवं तावद्यावत्परमाणवो निरवयवा इति, यत्र यावतः कार्यजातस्य स्वावयवाश्रितस्य प्रत्यक्षेण ग्रहणं तत्र तदेव प्रमाणम्, तदपि हि कार्यं स्वावयवत्वात्परिदृश्यमानकार्यवत्, निरवयवे तु तस्य परमाणुत्वमेव परमाणुषु च सावयवत्वस्य च हेतोरसिद्धत्वान्नावयवान्तरकल्पना, तेषां हि सावयवत्वे तदवयवाः परमाणवोऽनुमीयन्ते लोष्टस्य प्रविभज्यमानस्य भागास्तद्भागानां च भागान्तराणीत्येवं तावद्यावदशक्यभङ्गत्वमदर्शनविषयत्वं च भवति, यद्यत्तयोः परमवयवविभागो न सम्भवति ते परमाणव उच्यन्ते तेष्वपि हि विभज्यमानेषु तदवयवाः परमाणवो भवेयुर्न ते तदेवमुत्पत्तिविनाशक्रमस्येदृशो दर्शनात्सन्ति परमाणवः ।

अत्र हि त्रयी गतिरस्य घटादेः कार्यस्य निरवयवत्वमेव वा ऽवयवानन्त्यं वा परमाण्वन्तता वा, तत्र निरवयवत्वमनुपपन्नमवयवानां पटे तन्तूनां घटे च कपालानां प्रत्यक्षमुपलम्भात्, अनन्तावयवयोगित्वमपि न युक्तं मेरुसर्ष-

पयोरनन्तावयवयोगित्वाविशेषेण तुल्यपरिमाणत्वप्रसङ्गात्, तस्मात्परमाणवन्ततैव युक्तिमती ।

ईश्वरसाधनम् ।

त इमे परिमाणवश्चेतनेच्छाप्रेरणमन्तरेण विशिष्टक्रमकमितरेतरसंघटनमलभमानाः कार्यसिद्धये न पर्याप्नुयुरचेतनत्वादिति चेतन एषामधिष्ठाता सकलभुवननिर्माणमतिरीश्वरोऽभ्युपगतस्तत्सिद्धये च सकलकुतर्कतिमिरतिरस्कारपूर्वकं पूर्वमेव निरवद्यमनुमानमुपपादितम्, ईश्वरोऽपि नानेकात्मवृत्तिविपाकोन्मुखधर्माधर्मसंस्कारवैचित्र्यमननुरुध्यमानो विचित्रस्य जगतो जन्म निर्मातुमर्हतीत्येतदपि दर्शितम् ।

द्व्यणुकादिक्रमेण कार्यारम्भनिरूपणम् ।

न च सकृदेव सतो निर्वर्त्यमानकार्यपरिमाणानुगुणसंख्याः परमाणव एकत्र संयोज्य कार्यमारभन्ते किन्तु द्व्यणुकादिक्रमेण, सकृदारम्भे हि कुम्भे भज्यमाने कपालशर्कराकणचूर्णादिक्रममपहाय प्रथममेव परमाणवन्तता भवेत्सर्वसंयोगस्य सर्वविभागेन सहसैव विनाशादतश्च कर्परादिक्रमदर्शनं विरुध्येत अविनष्टेऽपि घटादौ तन्त्वाद्यवयवाश्रितत्वस्य ग्रहीतुमशक्यत्वात्, परमाणूनां घटस्य च मध्ये कार्यान्तरानारम्भादिति, तस्माद् द्व्यणुकादिप्रक्रमेण परमाणवः कार्यमारभन्ते ।

ननु द्वावेव परमाणू प्रथमं संघटेते इत्यत्र का युक्तिरुच्यते, बहुत्वसंख्याया महत्त्वपरिमाणकारणत्वदर्शनात्त्रिषु परमाणुषु प्रथमं मिलत्सु तत्कार्यं बहुत्वसंख्यया महत्त्वारम्भात्तत्प्रत्यक्षं प्रसज्येत, न च तत्प्रत्यक्षमतिसूक्ष्मत्वादतो द्वाभ्यां परमाणुभ्यां द्व्यणुकमादावुत्पद्यते, तच्च परमाणुवदप्रत्यक्षमेव महत्त्वानुत्पादात्, द्व्यणुकद्वयेन तु कार्यारम्भ इष्यमाणे तदविशेषप्रसङ्गाद् द्व्यणुक इव तत्रापि महत्त्वोत्पत्तौ कारणाभावात्, अतस्त्रिभिर्द्व्यणुकैस्त्र्यणुकमारभ्यते, तत्र च बहुत्वसंख्यया महत्त्वमारप्स्यते प्रत्यक्षं च तद्भविष्यति, ततः परं तु क्रमसामान्ये प्रमाणमस्ति लोष्टादिभक्तेः सावयवखण्डावयवनिदर्शनम्, क्रमविशेषे तु प्रमाणं नास्तीत्थमारम्भ इति, यत्र वा दर्शनमस्ति तत्र तदस्तु, क्रमविशेषप्रमाणमारभ्यारम्भकत्वं तु नेष्यते मूर्तानां समानदेशत्वविरोधात्, न हि परमाणवः प्रथमं कार्यमारभ्य तदनु त एवोत्तरोत्तरकालं कार्याण्यारभन्ते किन्तु यत्परमाणुनिर्वृत्तं कार्यं द्व्यणुकं तत्कार्यान्तरस्यारम्भकं तदप्यन्यस्य कार्यस्येत्येवं तावद्यावत्परिपूर्णावयविनिष्पत्तिः, इत्थं च तन्तुभिः पटः क्रियते न तन्त्ववयवैरंशुभिरितरथा ह्युत्तरोत्तरकार्यारम्भेऽपि पूर्वपूर्वकारणानपायान्मूर्तानामेकदेशत्वं स्याद् न च तद् दृश्यते इति यथोक्त एव क्रमः श्रेयान्, तदेवमनेकात्मसमवेतधर्माधर्मसं-

स्कारपरिपाकानुरूपप्रसरदीश्वरेच्छाप्रेर्यमाणपरमाणुक्रियानुपूर्वीनिर्वर्त्यमानद्व्यणुकादिकार्यक्रमेण शरीराद्यवयविनिर्वृत्तिरिति स्थितम्।

एतद्विपरीतानि तु मतान्तराणि प्रमाणविरुद्धानि, तथा हि नित्यमेव शरीरादि अनुत्पत्तिधर्मकमिति प्रत्यक्षविरुद्धम्, पृथिव्यादेरप्यवयवसन्निवेशविशिष्टतया कार्यत्वादितीश्वरसिद्धौ निर्णीतम्, आकस्मिकत्वमपि शरीरादेः कार्यस्य न युक्तम्, कारणनियमोपलम्भादनिमित्तायाश्च भावोत्पत्तेरनुत्पत्तेः, अभावादपि भावोत्पत्तिस्तादृगेवेति, गुणात्मकप्रधानविकारमहदहंकारादिकारणकत्वमपि कार्यस्य पृथिव्यादेः प्रागेव प्रपञ्चतः प्रतिषिद्धम्, अनारब्धावयविरूपकार्याः परमाणव एवैते सञ्चयविशिष्टाः सन्तो लोकयात्रां वहन्तीत्येतदपि न समीचीनं सञ्चयस्य भेदाभेदविकल्पाभ्यामनुपपद्यमानत्वात्परमाणूनां चातिसौक्ष्म्यादप्रत्यक्षत्वात्, पौद्गलिककार्यपक्षेऽपि पर्यायान्तरेण परमाणूनां कथनमप्रमाणकत्वं वा, (अप्रामाणिकम् (?)) शब्दविवर्तत्वं तदनुगमाग्रहणादनुपपन्नम्, परमात्मोपादानत्वमपि न सम्भवति तस्यैव निष्प्रमाणकत्वात्, न च न कदाचिदनीदृशं जगदिति पादप्रसारिकामात्रं कर्तुमुचितं सर्गप्रबन्धप्रलयप्रबन्धस्य समर्थितत्वादिति।

अतश्च पक्षान्तरदुर्बलत्वाद्यथोदितः सिध्यति भूतवर्गः।
तं यस्तु पश्यन्नपि निह्नुवीत तस्मै नमः पण्डितशेखराय॥
अनादौ संसारे स्थितमिदमहो मूढमनसां
जनित्वा जन्तूनां मरणमथ मृत्वाऽपि जननम्।
इयं सा दुःखानां सरणिरिति सञ्चिन्त्य कृतिना
विधातव्यं चेतो जननमरणोच्छेदिनि पदे॥

फललक्षणम्।

प्रवृत्तिदोषजनितोऽर्थः फलम्॥ (गौ० १।१।२०)

प्रवृत्तिर्दोषाश्च व्याख्याताः, तज्जनितोऽर्थः फलमित्युच्यते, अर्थग्रहणं गौणमुख्यभेदप्रदर्शनार्थम्, सुखदुःखे मुख्यं फलं तत्साधनं तु शरीरेन्द्रियविषयादि गौणम्, सर्वं हीदं प्रवृत्तिदोषाक्षिप्तं फलमित्युक्तम्, तदिदमनादिना प्रबन्धेन प्रवर्तमानं फलं पुनरुपयुज्यते पुनस्त्यज्यत इति महतः खेदस्य हेतुरिति भाव्यमानं निर्वेदवैराग्यादिमार्गणापवर्गोपयोगितां प्रतिपद्यते।

आत्तमात्तं विजहतस्त्यक्तं त्यक्तं च गृह्णतः।
पुंसः फलपटीयन्त्रमहो कष्टः परिश्रमः॥

तत्पुनः फलं कर्मणा किं सद्य एव सम्पद्यते कालान्तरेण वा? उच्यते—द्विविधं कर्म विहितं निषिद्धं च, तत्र विधिफलानां कालनियमो नास्ति, क्रियाफलं

दोग्धि पचतीति समनन्तरमुत्पद्यमानं दृश्यते, विधिफलानां तु नैष नियम इति शब्दपरीक्षायां चित्राक्षेपपरिहारावसरे निरूपितमेतत् , विधिफलमपि च किंचन चोदनावचनपर्यालोचनया सद्य इति निश्चीयते वृष्टिरिव कारीर्याः, किञ्चिदैहिकफलमपि कर्म वस्तुबलात्कालान्तरापेक्षं भवति पुत्रेष्ट्यादि, न हि सहसैव निधिलाभवत्पुत्रलाभः सम्भवति गर्भसम्भवहेतुभूतभार्यापरीरम्भादिक्रमापेक्षत्वात् , ज्योतिष्टोमादि तु स्वर्गफलं कर्मफलस्वरूपमहिम्नैव पारलौकिकफलमवतिष्ठते स्वर्गो हि निरतिशया प्रीतिस्तदन्यथानुपपत्तिपरिकल्पितः कनकगिरिशिखरादिर्वा देशः उभयथाऽपि नैतद्देहोपभोग्यतां प्रतिपद्यते, अनियतफलं तु चित्रादि कैश्चिदुक्तं तच्च युक्तमयुक्तं वेति तत्रैव परीक्षितम , निषिद्धस्य तु कर्मणः सर्वस्यैव प्रायेण परलोक एव फलं, परदाराभिमर्षणादौ हि क्रियाफलं सुरतसुखादि सद्यः फलं, निषेधविधिफलं तु नरकपतनं पारलौकिकं स्वर्गवन्नरकस्यापि निरतिशयदुःखात्मनस्तदन्यथाऽनुपपत्तिकल्पितदेश(स्वभाव)स्य वा एतच्छरीरानुपभोगयोग्यत्वात् , तीव्रसंयोगनिर्वृत्तकर्म विहितमितरद्वा प्रत्यासन्नविपाकमिहैव भवति नन्दीश्वरनहुषयोरिवेत्यागमविदः, चौरब्रह्मघ्नादयश्च के चित्प्रत्यासन्नप्रत्यवायाः प्रायेण दृश्यन्ते एवेत्येवमपि विचित्रः कर्मणां विपाकः ।

यदपि चोच्यते—कर्मकाले फलं नास्ति फलकाले कर्म नास्ति कालान्तरे च फलस्यान्यत्प्रत्यक्षं कारणमुपलभ्यते सेवादिकम्–इति, तदपि पूर्वं परिहृतम् , कर्मणां विनाशेऽपि तज्जनितस्यात्मसंस्कारस्य धर्माधर्मशब्दवाच्यस्य भावात् , दृष्टस्य च सेवादेः कारणस्य व्यभिचाराददृष्टकल्पनाया अवश्यं भावित्वात् । 'धर्मादेरात्मनि फलसमवायात्फलस्य च पुत्रपश्वादेरन्यसमवेतत्वाद्भिन्नाधिकरणत्वं कर्मफलयोरि'त्यपि न चोद्यम , मुख्यस्य सुखदुःखात्मनः फलस्य भिन्नाश्रयत्वानुपपत्तेः, सुखदुःखे ह्यात्मनि वर्तेते धर्माधर्मौ च तत्स्थावेवेति ।

दुष्टेनैव सुखस्य कारणमतस्तद्धेतुरागेण किं
दुःखस्यापि न तन्निबन्धनमिति द्वेषस्तदर्थेषु कः ।
तस्मात्कर्मनिमित्तकं फलमिति ध्यायन्न कुर्यात्कृती
सङ्गं कर्मणि येन दुस्तरमसौ संसारमापद्यते ॥

दुःखलक्षणम् ।

बाधनालक्षणं दुःखम् ॥ (गौ० १।१।२१)

बाधना पीडनं सन्तापनं सा लक्षणमस्येति बाधनालक्षणं दुःखम , तत्र मुख्ये दुःखे लक्ष्ये लक्षणशब्दो यथाश्रुत एव बाधनयैव हि दुःखस्वरूपं लक्ष्यते बाधयति पीडयतीति, गौणे तु दुःखे शरीरादौ लक्ष्ये बाधनानुषक्तमिति व्याख्येयम् ।

ननु च पूर्वसूत्राख्यातेन फलग्रहणेनैव दुःखस्योपदिष्टत्वात्किमर्थं पुनरुपदेशः? सुखप्रत्याख्यानार्थ इति चेन्न, पूर्वापरविरोधात्सकलप्राणभृदनुभवसाक्षिकत्वेन च सुखस्य प्रत्याख्यातुमशक्यत्वात्, तत्प्रत्याख्याने च विवक्षिते किमर्थं प्रमेयसूत्रे फलोपादानम्, फले खलु सुखदुःखे इति व्याख्यातं ततश्च सुखप्रत्याख्याने दुःखमेवावशिष्यते तच्चानेन दुःखशब्देनैव निर्दिष्टमिति किं फलग्रहणेन। उच्यते—न सुखलेशस्य संसारे जन्तुभिरन्तरान्तराऽनुभूयमानस्य प्रत्याख्यानाय दुःखग्रहणं सर्वत्र तथात्वभावनोपदेशार्थं सन्नपि सुखलवो दुःखमेवेति भावयितव्यः तत्साधनमपि सर्वं दुःखमेवेति मन्तव्यम्।

न तद्व्यवसितं पुंसां तत्कर्म न तद्वचः।
न तद्भोग्यं समस्तीह यन्न दुःखाय जायते॥

तदित्थं दुःखमुत्कृष्टं तिरश्चां, मध्यमं मनुष्याणां, हीनं देवानां, हीनतरं वीतरागाणामित्यागमविदः, वीतरागाणां दुःखतानवं युक्तितोऽप्यवगम्यते दुःखस्य रागनिबन्धनत्वात्।

तत्त्वतश्चिन्त्यमानं हि सर्वं दुःखं विवेकिनः।
विषसम्पृक्तमधुवत्सर्वं दुःखीभवत्यदः॥
सुखाधिगमलोभेन यतमानो हि पूरुषः।
सहस्रशाखमाप्नोति दुःखमेव तदर्जने॥
एवं सर्वमिदं दुःखमिति भावयतोऽनिशम्।
सर्वोपपत्तिस्थानेषु निर्वेदोऽस्य प्रवर्त्तते॥
निर्विण्णस्य च वैराग्यं विरक्तस्य च देहिनः।
क्लेशकर्मप्रहाणादिद्वारो निःश्रेयसोदयः॥

नन्वेवं तर्हि फलग्रहणं न कर्तव्यं दुःखपदेनैव गतार्थत्वादित्युक्तम्, मैवं तस्यान्यप्रयोजनत्वात्, प्रवृत्तिदोषजनितत्वेन हि फलमनुचिन्तितवतस्तत्कारणयोरनुकूलप्रतिकूलयोरस्य रागद्वेषौ मा भूताम्, अभ्यावृत्त्या च ससाधनस्य फलस्य हानोपादानस्रोतसोह्यमानस्तत्रात्यन्ताय निर्विद्यतामिति फलग्रहणम्, तदेवमन्यथा फलस्य निःश्रेयसोपयोगित्वमन्यथा तु फलत्वे सत्यपि दुःखस्येति।

दीर्घस्य दुःखस्य निमित्तभूतं सुखं च दुःखात्मकमेव सर्वम्।
मुमुक्षुणा हेयतया विचिन्त्यं देहादिदुःखान्तमिदं प्रमेयम्॥
इति निपुणमतिर्यो दुःखमेवेति सर्वं
परिहरति शरीरे क्लेशकर्मादिजातम्।
अजमजरमतत्त्वं चिन्तयन्नात्मतत्त्वं
गतभयमपवर्गं शाश्वतं सोऽभ्युपैति॥

इति श्रीभट्टजयन्तस्य कृतौ श्रीन्यायमञ्जर्यामष्टममाह्निकम्॥

तार्किकाभिमतापवर्गनिरूपणम् ।

एवं शरीरादौ दुःखपर्यन्ते हेये प्रमेये निर्णीते यदर्थमेतदुपदेशो यत्परमुपादेयं प्रमेयं यदर्थः शास्त्रारम्भस्तमपवर्गं लक्षयितुमाह—

तदत्यन्तविमोक्षोऽपवर्गः ॥ (गो० १।१।२२)

तदिति प्रक्रान्तस्य दुःखस्यावमर्शः, न च मुख्यमेव दुःखं बाधनास्वभावमवमृश्यते किन्तु तत्साधनं तदनुषक्तं च सर्वमेव, तेन दुःखेन वियोगोऽपवर्गः, अस्ति प्रलयवेलायामात्मनो दुःखवियोगः स त्वपवर्गो न भवति सर्गसमये पुनरक्षीणकर्माशयानुरूपशरीरादिसम्बन्धे सति दुःखसम्भवादतस्तद्व्यावृत्त्यर्थमत्यन्तग्रहणम्, आत्यन्तिकी दुःखव्यावृत्तिरपवर्गो न सावधिका, द्विविधदुःखावमर्शिना सर्वनाम्ना सर्वेषामात्मगुणानां दुःखवदवमर्शादत्यन्तग्रहणेन च सर्वात्मना तद्वियोगाभिधानान्नवानामात्मगुणानां बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां निर्मूलोच्छेदोऽपवर्ग इत्युक्तं भवति ।

यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः ।
तावदात्यन्तिकी दुःखव्यावृत्तिर्नावकल्पते ॥
धर्माधर्मनिमित्तो हि सम्भवः सुखदुःखयोः ।
मूलभूतौ च तावेव स्तम्भौ संसारसद्मनः ॥
तदुच्छेदे तु तत्कार्यशरीराद्यनुपप्लवात् ।
नात्मनः सुखदुःखे स्त इत्यसौ मुक्त उच्यते ॥
इच्छाद्वेषप्रयत्नादि भोगायतनबन्धनम् ।
उच्छिन्नभोगायतनो नात्मा तैरपि युज्यते ॥
प्राणस्य क्षुत्पिपासे द्वे लोभमोहौ च चेतसः ।
शीतातपौ शरीरस्य षडूर्मिरहितः शिवः ॥

तदेवं नवानामात्मगुणानां निर्मूलोच्छेदोऽपवर्ग इति यदुच्यते तदेवेदमुक्तं भवति तदत्यन्तवियोगोऽपवर्ग इति ।

ननु तस्यामवस्थायां कीदृगात्माऽवशिष्यते ।
स्वरूपैकप्रतिष्ठानः परित्यक्तोऽखिलैर्गुणैः ॥
ऊर्मिषट्कातिगं रूपं तदस्याहुर्मनीषिणः ।
संसारबन्धनाधीनदुःखक्लेशाद्यदूषितम् ॥

वेदान्त्यभिमतापवर्गस्वरूपनिरूपणम् ।

तत्र वेदान्तवादिन आहुः—नायमीदृशो मोक्षः प्रेक्षावतां प्रयत्नभूमिर्भवितुम-

इति, को हि नाम शिलाशकलकल्प(१)मपगतसकलसुखसंवेदनसम्पदमात्मानमुपपादयितुं यतेत, सोपाधिसावधिकपरिमितानन्दनिःष्यन्दात्स्वर्गादप्यधिकमनवधिकनिरतिशयनैसर्गिकानन्दसुन्दरमपरिम्लानतत्सम्वेदनसामर्थ्यं चतुर्थं पुरुषार्थमाचक्षते विचक्षणाः, यदि तु जडः पाषाणनिर्विशेष एव तस्यामवस्थायामात्मा भवेत्तत्कृतमपवर्गेण संसार एव वरमवस्था(नं ?) यत्र तावदन्तरान्तराऽपि दुःखकलुषितमपि स्वल्पमपिः सुखमुपभुज्यते, चिन्त्यतां तावदिदं किमल्पसुखानुभवो भद्रक उत सर्वसुखोच्छेद एव, तस्मान्नित्यसुखमात्मनो महत्त्ववदस्तीत्यागमप्रामाण्यादुपगम्यताम् , तच्च संसारदशायामविद्यावरणवशेन नानुभूयते तत्त्वज्ञानाभ्यासभावनाभिभूतनिरन्तराविद्यावरणस्त्वात्मा तस्यामवस्थायां तदनुभवतीति।

वेदान्त्यभिमतमोक्षस्वरूपखण्डनम् ।

तदिदमनुपपन्नम् , आत्मनो नित्यसुखसत्तायां प्रमाणाभावात् , प्रत्यक्षं तावदस्मदादीनामन्येषां वा केषां चिदस्मिन्नर्थे न प्रभवतीति केयं कथा, अनुमानमपि न सम्भवति लिङ्गलेशानवलोकनादिति ।

ननूक्तमेवानुमानमपवर्गाय यः प्रेक्षावतां प्रयत्नः सुखसिद्धये हि बुद्धिमन्तो यतन्ते नाश्मकल्पमात्मानं कर्तुमिति तदयमिष्टाधिगमार्थो मुमुक्षोः प्रयत्नः प्रेक्षापूर्वकारिप्रयत्नत्वात् कृष्यादिप्रयत्नवदिति ।

नानिष्टोपरमार्थत्वादनिष्टस्यापि शान्तये ।
सन्तः प्रयतमाना हि दृश्यन्ते व्याधिखेदिताः ॥

अतिदुर्वहश्चायं ससारदुःखभार इति तदुपशमाय व्यवस्यन्तः सन्तो न निष्प्रयोजनप्रयत्ना भवन्तीत्यनैकान्तिको हेतुः ।

अथागमादवगम्यते विभुत्वेनेव नित्येन सुखेनाविनाकृत आत्मेति, तथा च पठ्यते विज्ञानमानन्दं ब्रह्मेति, स्यादेतदेवं यद्येतदेव केवलमागमवचनमश्रोष्यत वचनान्तरमपि तु श्रूयते 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत' इति ।

ननु भवत्पठितमागमवचनमन्यथाऽपि व्याख्यातुं शक्यते सशरीरस्येति प्रक्रमात्सांसारिके सुखदुःखे अनुकूलेतरविषयोपलम्भसम्भवे तदानीमशरीरमात्मानं न स्पृशत इत्यर्थः, हन्त तर्हि वदधीतमपि वेदवचनमानन्दं ब्रह्मेति संसारदुःखपरिहारक्रमे प्रकरणादेव तद्दुःखापायविषयं व्याख्यास्यते न

(१) शिलाशकलकल्पम्—शिलाखण्डादीषदूनं, शिलाखण्डसदृशं निःस्सुखं निर्दुःखं चेति यावत् ।

खलु व्याख्यानस्य भगवतः काचिदभूमिरस्ति दृष्टाश्च दुःखोपशमे सुखशब्दप्रयोगाः ।

चिरज्वरशिरोऽर्त्यादिव्याधिदुःखेन खेदिताः ।
सुखिनो वयमद्येति तदपाये (१)प्रयुञ्जते ॥

यदि चानन्दमिति वचनान्नित्यं सुखमात्मन इष्यते, तर्हि ब्रह्मेति वचनाद् व्यापकत्वमिव विज्ञानमिति वचनाज् ज्ञानमपि नित्यमस्याभ्युपगन्तव्यमतश्च सुखवज् ज्ञानस्यापि नित्यत्वात्संसारेऽपि नित्यसुखोपलब्धिः स्यात्ततश्च धर्माधर्मफलाभ्यां सुखदुःखाभ्यामस्य नित्यस्य सुखस्य साहचर्यमनुभूयेत ।

अपि च—

सुखवज् ज्ञानवच्चास्य कामं देहेन्द्रियाद्यपि ।
नित्यं प्रकल्प्यतामित्थं मोक्षो रम्यतरो भवेत् ॥

अथ कार्यं सुखज्ञानं हेतुरस्य चिन्तनीयो यत उत्पद्यते इति वाच्यम्, योगसमाधिज इति चेत्तस्य कार्यत्वात्स्वकार्यसुखसंवेदनावसानत्वान्न शाश्वतिकत्वं स्यात्, अप्रक्षयश्च धर्मस्य निरनुमानको न हि योगसमाधिजो धर्मो न क्षीयते इत्यत्र किंचिदनुमानमस्ति, विपर्यये तु प्रसिद्धमेवानुमानं सर्वस्य कृतकस्यानित्यत्वदर्शनादिति, क्षीणे त्वधर्मे तत्कार्यज्ञानाभावात्सदपि सुखमनुपलभ्यमानमसतो न विशिष्यते, स्वप्रकाशं तत्सुखमिति चेत्संसारेऽपि तदुपलब्धिप्रसङ्गः, शरीरादिसम्बन्धः प्रतिबन्धहेतुरिति चेन्न, शरीरादीनामुपभोगार्थत्वाद्भोगप्रतिबन्धं विदधतीति न साध्वी कल्पना, अविद्यावरणात्संसारे स्वप्रकाशसुखानुपलम्भ इति चेन्न, प्रकाशस्य तुच्छेनावरीतुमशक्यत्वात्, नहि प्रकाशरूपं पारमार्थिकमात्मनः सुखं तद्विपरीततुच्छस्वभावेयमविरलगवलमलीमसं बलाहकव्यूहपिहितरविबिम्बं तदपि न रजनीसदृशं दिनमिति सहसा मोहमहिमा,

मेघा अपि रवेरन्ये स्वरूपेण च वास्तवाः ।
तत्त्वान्यत्वाद्यचिन्त्या तु नाविद्यावरणक्षमा ॥

तस्मान्न नित्यानन्दत्वमात्मनः सुवचनम् ।

अपि च मोक्षे नित्यसुखस्वभावे तद्रागेण प्रयतमानो मुमुक्षुर्न मोक्षमधिगच्छेत्, न हि रागिणां मोक्षोऽस्तीति मोक्षविदः, दुःखनिवृत्त्यात्मकेऽपि मोक्षे दुःखद्वेषात्प्रयतमानस्य समानो दोष इति चेन्न, मुमुक्षोर्द्वेषाभावात् । रागद्वेषौ हि संसारकारणमिति च जानाति मुमुक्षुः द्वेष्टि च दुःखमिति कथमिदं सङ्गच्छते । सुखेऽप्यस्य रागो नास्त्येवेति चेन्न, स्वर्गनिर्विशेषेऽपवर्गे स्वर्गवद्रागस्य सम्भाव्यमानत्वात्, दुःखेन तु निर्विण्णस्य मुमुक्षोर्वैराग्यं जा-

(१) तदपाये—दुःखापाये ।

यते न दुःखविषयो द्वेषः विरक्तस्य चास्य मोक्षं प्रति यत्नो भवति न दुःखं द्विषत इति समानो न्यायः ।

यत्तूक्तं—निरानन्दो मोक्षः प्रेक्षावतां प्रयत्नविषयो न भवती-ति, तदपि न साम्प्रतम्, प्रयोजनानुसारेण प्रमाणव्यवस्थाऽनुपपत्तेः, न हि प्रयोजनानुवर्ति प्रमाणं भवितुमर्हति, यदि निरानन्दो मोक्षः प्रेक्षावतां न रुचितः कामं मा भून्न त्वप्रमाणकमानन्दं तत्र कल्पयितुं शक्नुमः, न च सर्वात्मना साधूनामनभिमत एव तथाविधो मोक्षः, न च तदवाप्तये न प्रयतन्ते, ते ह्येवं विवेचयन्ति दुःखसंस्पर्शो शाश्वतिकसुखसम्भोगासम्भवाद् दुःखस्य चावश्यहातव्यत्वाद्विवेकहानस्य चाशक्यत्वाद्विषमधुनी इहैकत्र पात्रे पतिते उभे अपि सुखदुःखे त्यज्येतामिति, अतश्च संसारान्मोक्षः श्रेयान्यत्रायमियानतिदुःखप्रबन्धोऽवलुप्यते वरमियतः कादाचित्की सुखकणिका त्यक्ता न तस्याः कृते दुःखभार इयानूढ इति, तस्मान्न सुखोपभोगात्मको मोक्ष इति ।

सुखसत्तासमर्थनम् ।

अन्यस्त्वाह—तिष्ठतु तावन्मोक्षः संसारे ऽपि न सुखं नाम किं चिदस्तीति सर्व एवायं दुःखाभावमात्रे सुखव्यवहारः, तथा हि—

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि
क्षुधार्तः सञ्छालीन्कवलयति सम्पाकवलितान् ।
प्रदीप्ते रागाग्नौ घननिविडमाश्लिष्यति वधूं
प्रतीकारे व्याधेः सुखमिति विपर्यस्यति जनः ।। (-इति ?)

उच्यते—तदिदमतीव कृतकवैराग्यप्रकटनकौरुकुचीकूर्चकौशलमानन्दात्मनः प्रतिप्राणिसंवेद्यस्य निह्नोतुमशक्यत्वादनिवृत्तेऽपि दुःखे क्वचित्सुखसम्वेदनान्न दुःखाभावः सुखं निरभिलाषस्याप्यतर्कितोपनतसुखसाधनविषयसम्पर्के सति सुखसम्वेदनदर्शनादभिलाषात्मकदुःखाभावः सुखमित्यपि न मनोज्ञम्, यस्तु दुःखाभावे क्वचित्सुखमित्यपि व्यपदेशः प्रशान्तरोगाणामिव पूर्वदर्शितः स भाक्त इति न तावता स्वसम्वेदनसाक्षिकसुखापह्नवः कर्तुमुचितः, मोक्षे तु नित्यसुखमसंभवत्प्रमाणं नाभ्युपगम्यते ।

अपिच मोक्षे सुखमस्ति न वेति विचार एष न प्रामाणिकजनोचितः, स्वरूपेण व्यवस्थानमात्मनो मोक्ष इति मोक्षविदः, तत्रात्मस्वरूपमेव कीदृगिति चिन्त्यं न पृथक् मोक्षस्वरूपम्, आत्मनश्च सुखदुःखबुद्ध्यादय आगन्तुका गुणा न महत्त्ववत्सांसिद्धिका इति निर्णीतमेतदात्मलक्षणे सुखादिकार्येण चात्मनो ऽनुमानादिति, अत एव कपिलकथितचितिशक्तिस्वभावत्वमपि न युक्तमात्मनः ।

सचेतनश्चिता योगात्तदभावादचेतनः ।
चितिर्नामार्थविज्ञानं कादाचित्कं तु तस्य तत् ॥
नार्थसंवेदनादन्यच्चैतन्यं नाम विद्यते ।
तच्च सामग्र्यधीनत्वात्कथं मोक्षे भविष्यति ॥
जाग्रतः स्वप्नवृत्तेर्वा सुषुप्तस्यापि वाऽऽत्मनः ।
ज्ञानमुत्पद्यतेऽन्या तु चतुर्थी नास्ति तद्दशा ॥
जाग्रद्दशायां स्वप्ने च बुद्धेः प्रत्यात्मवेद्यता ।
सुखं सुप्तोऽहमद्येति पश्चात्प्रत्यवमर्शनात् ॥
तदा त्वचेत्यमानाऽपि सुषुप्ते धीः प्रकल्प्यते ।
तुर्यावस्था तु संवित्तिशून्यस्य स्थितिरात्मनः ॥
तुर्यावस्थातिगं रूपं यदाहुः केचिदात्मनः ।
प्रमाणागोचरत्वेन कल्पनामात्रमेव तत् ॥
संवित्प्रसवसामर्थ्यं सामग्रीसन्निधानतः ।
यदि नामात्मनोऽस्त्यस्य तावता न चिदात्मता ॥

यदि तु दर्शनशक्तियोग्यतामात्रमेव पुंसश्चैतन्यमुच्यते तर्हि तथाविधस्य तस्य कैवल्यस्यास्माकीनमोक्षसदृक्षत्वमेव योग्यतामात्रसंभवेऽपि दृश्येन्द्रियसंयोगादेस्सामग्र्या वैकल्यावस्थायामात्मनो द्रष्टृत्वासंभवाद् दर्शनशून्यस्य चान्यस्य चैतन्यस्य निरस्तत्वादिति ।

निर्वाणादिपदाख्येयमपवर्गं तु सौगताः ।
सन्तत्युच्छेदमिच्छन्ति(१)स्वच्छां वा ज्ञानसन्ततिम्(२) ॥

एतद् द्वितयमप्युक्तं पूर्वमेव तद् ध्वस्तं च, ज्ञानसन्ततिर्नित्यश्चात्मा समर्थितः ।

सन्तत्युच्छेदपक्षस्तु नैयायिकमतादपि ।
शोच्यो यत्राश्मकल्पोऽपि न कश्चिदवशिष्यते ॥
अर्हत्पक्षेऽपि यद्रूपमन्यसापेक्षमात्मनः ।
न केवलस्य तद्रूपमित्यस्मन्मततुल्यता ॥
विकारित्वं तु जीवानामत्यन्तमसमञ्जसम् ।
शब्दपुद्गलवच्चैतत्प्रत्याख्येयमसम्भवात् ॥
तस्मान्न वेदान्तविदो विदन्ति मोक्षं न सांख्या न च सौगताद्याः ।
इत्यक्षपादाभिहितोऽपवर्गः श्रेयांस्तदत्यन्तविमोक्ष एव ॥

(१) सन्तत्युच्छेदं—ज्ञानसन्तत्युच्छेदं निर्वाणपदाख्येयमपवर्गं योगाचाराः ।

(२) स्वच्छां ज्ञानसन्ततिं निर्वाणपदाख्येयमपवर्गं माध्यमिकाः । तदुक्तं षड्दर्शनसमुच्चये—मन्यन्ते बत मध्यमाः कृतधियः स्वच्छां परं संविदमिति ।

THE KUPPUSWAMY SASTRI RESEARCH INSTITUTE, MYLAPORE, MADRAS-4

मोक्षोपायनिरूपणम् ।

आह भवत्वयमीदृगपवर्गः स तु कथमधिगम्यते इत्युच्यताम्? उक्तमेव भगवता सूत्रकारेण ।

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादिति(१) (गौ० अ० ५ आ १ सू २)।

दुःखोच्छेदस्तावदपवर्ग इति कथितम्, कार्यत्वाच्च दुःखस्य कारणोच्छेदात्तदुच्छेदः, कारणं चास्य जन्म जन्मनि हि सति दुःखं भवति, जायते इति जन्म देहेन्द्रियादिसंबन्ध आत्मनः, तदपि जन्मकारणोच्छेदादेवोच्छेद्यमतस्तत्कारणं प्रवृत्तिरुच्छेद्या, तस्या अपि उच्छेदो हेतूच्छेदादिति तद्धेतवो दोषा उच्छेद्याः, तेषां तु निमित्तं मिथ्याज्ञानं तस्मिन्नुच्छिन्ने दोषा उच्छिन्ना भवन्तीति मिथ्याज्ञानमुच्छेतव्यम्, तदुच्छित्तये च तत्त्वज्ञानमुपायः, प्रसिद्धो ह्ययमर्थः समर्थितश्च पूर्वं विस्तरत'स्तत्त्वज्ञानं मिथ्याज्ञानस्य बाधकमि'ति, तस्मान्मिथ्याज्ञानदोषप्रवृत्तिजन्मदुःखनिवृत्तिक्रमेणापवर्ग इति ।

यद्यपि च मिथ्याज्ञानमपि जन्मकार्यमशरीरस्यात्मनो मिथ्याज्ञानानुपपत्तेः, इतरेतरकार्यकारणभावेन बीजाङ्कुरवदनादिप्रबन्धप्रवृत्तेन प्रवर्तमाना मिथ्याज्ञानादयो भावाः संसार इत्युच्यते, तथा ऽपि तत्कारणोच्छेदचिन्तायां कुतः प्रभृति च्छेद उपक्रम्यतामिति विचार्यमाणे विशेषनियमाभावाद्यतः कुतश्चिदिति प्राप्ते मिथ्याज्ञानस्य प्रतिकूलमुच्छेदकारणं तत्त्वज्ञानमुपलब्धमिति विशेषे प्रमाणभावात्तदुच्छेद एवोपक्रम्यते, अत एव मिथ्याज्ञानमूलः संसार उच्यते तस्मिन्नुच्छिन्ने तदुच्छेदसम्भवान्न ततःप्रभृति संसारः प्रवृत्त(रप्रवृत्तिः?)इति निपुणमतिभिरपि निर्धारयितुं शक्यमनादित्वात्तस्येति, तदेवं तत्त्वज्ञानान्मिथ्याज्ञानापाये तत्कार्यदोषापायः दोषापाये प्रवृत्त्यपायः प्रवृत्त्यपाये जन्मापायः जन्मापाये दुःखापायः स एवापवर्ग इति, तदिदमुक्त'मुत्तरोत्तरापाये तदनन्तराभावादिति' ।

मोक्षासम्भवपूर्वपक्षः ।

आह विदितो ऽयं सूत्रार्थः किन्त्वघटमानमनोरथविडम्बनामात्रमिदमलीकश्रद्दधानताप्रकटनं वा, दुरधिगमस्तु सङ्कटो मोक्षमार्गः ।

साध्यस्त्रिवर्ग एवैष धर्मकामार्थलक्षणः ।
चतुर्थः पुरुषार्थस्तु कथास्वेव विराजते ॥
यदा प्रियवियोगादि भवत्युद्वेगकारणम् ।
तदा मोक्षकथाः कामं क्रियन्तां शोकशान्तये ॥

---

(१) तदन्तराभावादपवर्ग इति सूत्रपाठान्तरम् ।

न तूपमसमये तदधिगमसमर्थामुपलभामहे सरणिमृणक्लेशप्रवृत्त्यनुबन्धस्य दुस्तरत्वात्, ऋणानुबन्धस्तावत् 'जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति' इदं हि वेदे पठ्यते, तत्र प्रथममृषीणामनृणः स्यामिति ब्रह्मचर्यमाचरति, ततः पितॄणामनृणः स्यामिति कृतदारसङ्ग्रहः प्रजोत्पादनाय व्यवहरति, तदनु गृहस्थ एव दर्शपूर्णमासादिषु सहस्रसंवत्सरपर्यन्तेषु (१)कर्मस्वधिकृतः क्रतूननुतिष्ठतीति देवानामनृणः स्यामिति को ऽस्य मोक्षव्यवसायावसरः ।

ननु च 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्' इति मन्वादिस्मरणादस्त्येव तदवसरः । न श्रुतिवाक्यविरोधात्, एवं हि श्रूयते 'जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपौर्णमासौ च जरया ह वा एष एतस्मान्मुच्यते मृत्युना वेति' न च कर्मप्रयोगाशक्त्या कर्मभ्यो विरन्तुं लभ्यते, स्वयमशक्तस्य बाह्यशक्त्युपदेशात्–'अन्तेवासी जुहुयाद् ब्रह्मणा हि स परिक्रीतः क्षीरहोता जुहुयाद् घृतेन हि स परिक्रीतः' अशक्तस्य च मोक्षोपायानुष्ठाने ऽप्यस्य कथं शक्तिः । क्लेशानुबन्धादपि अपवर्गाभावः

ये हि रागादयो दोषा आत्मनश्चिरसंभृताः ।
कस्तान्वञ्चयितुं शक्तः पुनरावृत्तिधर्मकान् ॥
कामं चिरं विजित्यापि क्रोधं वा लोभमेव वा ।
पुनर्गच्छन्वशं तेषां लोकः प्रायेण दृश्यते ॥

तथा हि—चिरमपि तपसि नियमितमतिरवजितविषमशरविकृतिरपि तनु(२)पवनापनीतवसनकामिनीस्तनजघनदर्शनादेव वशं विश्वामित्रः कुसुमधन्वनो गत इति श्रूयते किल ह्याख्यायिकया, अद्यत्वे ऽप्येवं शतशो दृश्यन्ते इति दुरुच्छेद्या दोषाः, 'वीतरागजन्मादर्शनादि'ति च विचारितमात्मपरीक्षायामवियुक्त एव दोषैर्जन्तुर्जायते इति, दोषविवृद्धिहेतवश्च रूपादयो विषयास्ते कथमिव स्वकर्मण्युदासते ।

ताम्बूलं कुसुमसुगन्धयस्समीरास्सौधेषु प्रतिफलिताः शशाङ्कभासः ।
वाचश्च प्रणयनवामृतद्रवार्द्रा दूतीनां दधति न कस्य रागवृद्धिम् ॥

अपि च—

मुग्धस्मितसुधाधौतमधुरालापशालिना ।
मुखेन पद्मलाक्षीणां कस्य नाक्षिप्यते मनः ॥

इत्येवं निदानानुपशमादपि स्थित एव क्लेशानुबन्धः । प्रवृत्त्यनुबन्धः खल्वपि—

---

(१) संवत्सरशब्दोऽत्र दिनवाची 'नाहः संवत्सतोऽह्नः सु गौणी संवत्सराभिधा। तस्माद्विश्वसृजां सत्रं सहस्रदिनमिष्यते' इति न्यायमालादर्शनात् । (२) तनुः-मन्दः ।

रागादिप्रेर्यमाणो हि कर्माण्यारभते नरः।
दीर्घदीर्घाः प्रतायन्ते यैर्धर्माधर्मवासनाः॥
स प्रवृत्त्यनुबन्धश्च हेतुरन्यस्य जन्मनः।
एकमेवेदृशं कर्म कर्तुमापतति क्व चित्॥
जन्मायुतशतेनापि यत्फलं भुज्यते न वा॥
क्लेशकर्मानुबन्धोत्थजन्मदुःखादिशृङ्खला।
पुनरावर्तमानैषा केनोपायेन भज्यताम्॥
विना फलोपभोगेन न हि नाशोऽस्ति कर्मणाम्।
तेषां ज्ञानाग्निना दाह इति श्रद्धाविजृम्भितम्॥
कार्यकारणभावो हि शास्त्रादेवावधारितः।
कर्मणां च फलानां च स कथं वा निवर्तताम्॥
न चास्य ज्ञानसापेक्षं कर्मेष्टं बन्धकारणम्।
येनात्मज्ञानयुक्तानां तदुदासीत तं (१)प्रति॥

अज्ञाननैरपेक्ष्येण कर्मणां स्वभाव एवैष यत्फलाविनाभावित्वमिति।

तस्मादित्थमृणक्लेशप्रवृत्त्यभ्यनुबन्धतः।
न मोक्षसिद्धिरस्तीति तदर्थो विफलः श्रमः॥
अशक्ये ऽर्थे वृथा ऽऽयासं परित्यज्य मनस्विभिः।
मोक्षचर्चाः परित्यज्य स्वे गृहे सुखमास्यताम्॥

मोक्षोपायानुष्ठानसम्भवः।

अत्राभिधीयते—यत्तावदुक्तमृणानुबन्धादिति, तदयुक्तम्, विधिपक्ष-श्रवणादौपचारिकमृणशब्दं जायमानशब्दं च प्रयुज्य कर्मस्तुतिरियं क्रियते-'जायमानो ह वै ब्राह्मण इति' न तद्व्यतिरिक्तपुरुषार्थविषयप्रयत्नप्रतिषेधो विधीयते, तथा हि ऋणशब्दो ऽयं विषयान्तरे मुख्यार्थः प्रसिद्धो यत्रोत्तमर्णः सलाभममुतः प्रतिग्रहीष्यामीति धनमधमर्णाय प्रयच्छत्यधमर्णोऽपि सलाभमस्मै प्रदास्यामीति मत्वा गृह्णाति, सोऽयमृणशब्दस्य मुख्यो विषय इह नास्त्येव, जायमानो ऽपि मुख्य उत्पद्यमानो ऽपि मातुः कुक्षिकुहरान्निस्सरन्नभिधीयते न चासौ बालकः कर्मभिरभिसम्बध्यते, तस्माद् ब्रह्मचर्यमपत्योत्पादनमध्वरप्रयोग इति त्रयमिदमवश्यकर्तव्यमिति कर्मस्तुतिरियमौपचारिकपदप्रयोगाद्गम्यते, न चैतावता मोक्षव्यवसायावसरविरह इति परिशङ्कनीयमाश्रमान्तरस्य तदौप-यिकस्य दर्शनात्।

ननु मरणावधिदर्शपूर्णमासकर्मोपदेशात्कथमाश्रमान्तरग्रहणम्?, न जरामर्य-

---

(१) तं—बन्धम्।

वादस्याप्यपरित्यागप्रतिपादनाय कर्मप्रसंशार्थत्वात्, 'ये चत्वारः पथयो देवयाना' इत्यादयो हि चतुर्थाश्रमशंसिनो भूयांसः सन्ति मन्त्रार्थवादाः, मन्त्रादिस्मृतिवचनानि चतुर्थाश्रमोपदेशीनि चतुर्थाश्रमोचितश्रौताचारादीतिकर्तव्यतावितानविधानपराणि च प्रबन्धेनैव दृश्यन्ते ।

एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः ।
वने वसेत्तु नियतो भैक्षभुग्विजितेन्द्रियः ॥ (मनु अ० ६ श्लो० १)

इत्युपक्रम्य चतुर्थाश्रमोचितमोक्षोपायानुष्ठानोपदेशाय षष्ठोऽध्यायः समस्त एव मनुना ऽनुक्रान्तः, जाबालश्रुतौ च विधायकेनैव ब्राह्मणवाक्येन प्रतिपदमाश्रमचतुष्टयमुपदिष्टम्—'ब्रह्मचारी भूत्वा गृही भवेद् गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेदि'ति, अग्निसमारोपणविधानोपदेशश्च प्रत्यक्षश्रुतः कथमपन्हूयेत–'आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद् गृहादि'ति, अपि च उपनिषदामध्ययनमसति मोक्षोपयोगसमर्थे चतुर्थाश्रमे निरर्थकमेव प्राप्नोति, क्रियाकाण्डानुष्ठाननिष्ठत्वे हि वेदस्य ज्ञानकाण्डोपदेशः किम्प्रयोजनः स्यात्, तदेवं वर्णवदाश्रमाणामपि चतुर्णां प्रत्यक्षोपदेशसिद्धत्वाच्चतुर्थाश्रमिणां च मोक्षाधिगमोपायतत्वज्ञानभावनाभ्यासावसरसम्भवात्सो ऽयं जरामर्यवादः प्रशंसामात्रपर एवावतिष्ठते, 'जरया ह वा एष एतस्मान्मुच्यते मृत्युना वे'ति च वचनाज्जरसा कर्मत्यागानुज्ञानात्स एव चतुर्थाश्रमावसर इति गम्यते, तदुक्तम्—

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं तदा ऽरण्यं समाश्रयेत् ॥ (मनु अ० ६ श्लो० २)

इतरथा हि मृत्युनैव च तस्मान्मुच्यते इत्यवक्ष्यत न त्वेवमब्रवीत्, तस्माद्वार्धकदशोचितं चतुर्थमाश्रममनुमन्यते, तिष्ठतु वा वार्धकदशा यतो ऽपि परिपक्वकषायस्याश्रमचतुष्टयक्रममनपेक्ष्यैव मोक्षाधिकार आख्यातः यथोक्तं 'ब्रह्मचर्यादेव प्रव्रजेदि'ति, अत एव द्विविधो ब्रह्मचारी भवत्युपकुर्वाणो नैष्ठिकश्च, तत्रोपकुर्वाणको यो ब्रह्मचर्यमनुभूय गृहस्थाश्रममनुभवति स चापरिपक्वकषायोऽनुपशान्तगार्हस्थ्यरागः, तमेव प्रतीदमुच्यते–'अनधीत्य द्विजो वेदाननुत्पाद्य च सन्ततिम् । अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः । (मनु० अ० ६ श्लो० ३७) इति, यस्तु परिपक्वकषायः स नैष्ठिक एव ब्रह्मचारी भवति न गृहस्थाश्रमं प्रतिपद्यते, गृहस्थो ऽपि परिपक्वकषायो वानप्रस्थाश्रममुल्लङ्घ्य यतित्वे ऽधिक्रियते यथोक्तम्, 'गृहाद्वनाद्वा प्रव्रजेदि'ति ।

केचित्तु कर्मफलाभिसन्धिरहितस्य कर्तव्यमिति कर्म कुर्वतः क्षीणरागस्यात्मविदो गृहस्थस्यापि (मोक्षः?), यो ऽतिथिप्रियः श्राद्धकृद्वेदविद्याविद् गृहस्थो ऽपि विमुच्यते इति, तस्मादृणानुबन्धादपवर्गाभाव इत्ययुक्तम् ।

यत्तु क्लेशानुबन्धादिति तदप्यनध्यवसायमात्रम्, प्रतिपक्षभावनादिना

क्लेशोपशमस्य सुशकत्वात् । यद्येषां नित्यो हेतुर्भवेत्कार्यो वा, यद्यसौ न ज्ञायेत ज्ञातोऽपि वाऽनुष्ठातुमसौ न शक्येत तदा क एवैनमुच्छिन्द्यात्, किन्तु—

नाकस्मिका न नित्यास्ते न नित्याज्ञातहेतुकाः ।
नाज्ञातशमनोपाया न चाशक्यप्रतिक्रियाः ॥

न हि दोषाणामात्मस्वरूपवन्नित्यत्वमुपजननापायधर्मकत्वेन ग्रहणात्, मिथ्याज्ञानं च प्रसवकारणमेषामवधृतमिति नाकस्मिकत्वमविनाशिहेतुकत्वमज्ञातहेतुकत्वं वा। मिथ्याज्ञानस्य च सम्यग्ज्ञानं प्रतिपक्षः प्रतिपक्षभावनाभ्यासेन च समूलमुन्मूलयितुं शक्यन्ते दोषा इति नाज्ञातप्रतीकारत्वं तेषाम्, उक्तं च केन चित्—

सर्वेषां सविपक्षत्वान्निर्ह्रासातिशयाश्रिताः ।
सात्मीभावात्तदभ्यासाद्धीयेरन्नामुना क चित् ॥ इति ।

वैराग्यार्थं विषयेषु दोषभावना ।

विषयदोषादर्शनेन हि तेषु सक्तिलक्षणो रागः शाम्यति यदा ह्येवं चिन्तयति विवेकी—

असौ तरलताराक्षी पीनोत्तुङ्गघनस्तनी ।
विलुप्यमाना कान्तारे विहगैरद्य दृश्यते ॥
विभाति बहिरेवास्याः पद्मगन्धनिभं वपुः ।
अन्तर्मज्जास्थिविण्मूत्रमेदःक्रिमिकुलाकुलम् ॥
अस्थीनि पित्तमुच्चाराः क्लिन्नान्यन्त्राणि शोणितम् ।
इति चर्मपिनद्धं सत्कामिनीति विधीयते ॥
मेदोग्रन्थी स्तनौ नाम तौ स्वर्णकलशौ कथम् ।
विष्ठादृतौ नितम्बे च को ऽयं हेमशिलाभ्रमः ॥
मूत्रासृग्द्वारमशुचि च्छिद्रं क्लेदि जुगुप्सितम् ।
तदेव हि रतिस्थानमहो पुंसां विडम्बना ॥
प्रीतिर्यथा निजास्योत्थं लिहतः शोणितं शुनः ।
शुष्के ऽस्थनि तथा पुंसः स्वधातुस्पन्दिनः स्त्रियाम् ॥
व्यात्तानना विवृत्ताक्षी विवर्णा श्वासघुर्घुरा ।
कथमद्य न रागाय म्रियमाणा तपस्विनी ॥
अहो व्रणे वराको ऽयमकाले तृषितः फणी ।
प्रसारितमुखो ऽप्यास्ते शोणितं पातुमागतः ॥
किमनेनापराद्धं नः स्वभावो वस्तुनः स्वयम् ।
स्पृश्यमानो दहत्यग्निरिति को ऽस्मै प्रकुप्यति ॥

नानुकूलः प्रिये हेतुः प्रतिकूलो न विप्रिये ।
स्वकर्मफलमश्नामि कः सुहृत्कश्च मे रिपुः ॥

एवमहर्दिवं चिन्तयतां नितान्तं मनःसमचित्तता सर्वत्र समुद्भवतीति विलीयन्ते दोषग्रन्थयः ।

अत एवोपदिश्यन्ते मोक्षशास्त्रेष्वनेकशः ।
तस्य तस्योपघाताय तास्ताः प्रत्यूहभावनाः ॥

ननु च प्रतिपक्षभावने ऽपि न सर्वात्मना दोषपक्षः क्षयमुपयाति निम्बाद्युपयोगे इव क्रियमाणे कफधातुरिति, नतदेवं तत्र निम्बोपयोगवत्तदनुकूलस्यातपादेरुपयोगदर्शनात् ।

अपि च—

धर्मिलोपभयात्तत्र नेष्टः सर्वात्मना क्षयः ।
कफाधिक्यं तु हन्तव्यं धातुसाम्यस्य सिद्धये ॥
इह सर्वात्मनोच्छेद्याः क्लेशाः संसारकारिणः ।
छेदश्चैकान्ततस्तेषां प्रतिपक्षोपसेवनात् ॥

न च प्रतिपक्षभावनाभ्यासमेकमस्त्रमपास्य तदुपशमे निमित्तान्तरं किमपि क्रमते, न हि विषयाभिलाषस्तदुपभोगेन विरंस्यति, यथा ऽऽह—

न जातु: कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥

(मनु० अ० २श्लो ९३)

अन्यत्राप्युक्तम्—'मोक्षाभ्यासमनु विवर्धन्ते कौशलानि चेन्द्रियाणामि'ति, पाराशर्यो ऽपि—

तृष्णाखनिरगाधेयं दुष्पूरा केन पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते ॥ इति ।

तस्मात्प्रतिपक्षभावनैव भगवती भीमकान्तिरन्तः करणकान्तारे निरन्तरमभिज्वलन्ती दावदहनदीधितिरिव दहति दोषविटपकानिति, तदेवं दोषानुबन्धविध्वंसोपायसम्भवान्न तत्कृतो मोक्षमार्गरोधो ऽभिधातव्यः, अत एव केचन चेतनस्य प्रकृत्या निर्मलत्वान्मलानामागन्तुकत्वान्मलनिबर्हणहेतोश्च यथोक्तस्य सम्भवात्तदावरणापाये सति स्वतः सकलपदार्थदर्शनसामर्थ्यस्वभावचित्तत्त्वावस्थानात्सर्वज्ञत्वसिद्धिमदूरवर्तिनीमेव मन्यन्ते ।

यदप्युच्यते—'क्लेशशून्यत्वमात्मनो न कदा चिदपि दृष्टमनुबन्धवृत्तित्वात् क्लेशानामि'ति, तदप्यसत्यम् , सुषुप्तावस्थायामस्पृष्टस्य दोषैरात्मनः प्रत्यहमुपलम्भात् , जाग्रतो ऽपि का चन तादृशी दशा दृश्यत एव यस्यामेवात्मस्वरूप एवात्मा निर्मलो ऽवतिष्ठते यथोक्तम्'—अहरहर्ब्रह्मलोकं यान्तीति' तदलमनेन

दोषानुबन्धकथानुबन्धेन ।

यदपि प्रवृत्त्यनुबन्धादिति , तदपि सूत्रकृता समाहितम् , न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्येति (गो० अ० ४ आ० १ सू० ६४) । दोषेषु बन्धहेतुषु विगलितेषु प्रवृत्तिरपि न देहेन्द्रियादिजन्मने प्रभवतीति ।

ननु दोषक्षयात्मा भूदुत्तरः कर्मसंग्रहः ।
कथं फलमदत्वा तु प्राक्तनं कर्म शाम्यति ॥

अत्र केचिदाहुः–ददत्येव कर्माणि फलं दत्त्वा शाम्यन्ति तथापि न बन्धहेतवो भवन्ति, यतः शमसन्तोषादिजनितं योगिनः सुखमुपपाद्य धर्मो विनङ्क्ष्यति अधर्मश्च शीतातपक्लेशादिद्वारकं दुःखं दत्त्वेति ।

नन्वमुष्मात्कर्मण इदं फलं भवतीति कर्मफलानां कार्यकारणभावनियमात्कथमियता कर्मफलोपभोगो भवेदित्यन्यथा तदुपभोगमपरे वर्णयन्ति, योगी हि योगर्द्धिसिद्ध्या विहितनिखिलनिजधर्माधर्मकर्मा निर्माय तदुपभोगयोग्यानि तेषु तेषूपपत्तिस्थानेषु तानि तानि सेन्द्रियाणि शरीराणि रण्डान्तःकरणानि च मुक्तैरात्मभिरुपेक्षितानि गृहीत्वा सकलकर्मफलमनुभवति प्राप्तैश्वर्य इतीत्थमुपभोगेन कर्मणां क्षयः ।

अन्ये त्वाचक्षते–किमनेन भोगायासेन अदत्तफलान्येव कर्माणि योगिनो नङ्क्ष्यन्ति तत्त्वज्ञानस्यैव भगवतः इयान् प्रभावो यदस्मिन्नुत्पन्ने चिरसञ्चितान्यपि कर्माणि सहसैव प्रलयमुपयान्ति भोगादपि तेषां प्रक्षयः शास्त्रप्रामाण्यादेवावगतः तथा तत्प्रामाण्यादेव तत्त्वज्ञानादपि तत्प्रक्षयं प्रतिपत्स्यामहे, तथा चाह—

यथैधांसि समिद्धो ऽग्निर्भस्मसात्कुरुते ऽर्जुन! ।
ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ॥ इति ।

(भ० गी० अ० ४ श्लो० ३७)

न चेदं श्रद्धामात्रं वेदविदामग्रण्या व्यासमुनिनैव समभिधानादवेदार्थं हि नासावभिदधीतेति ।

तदन्ये न मन्यन्ते, न सर्वात्मना कर्मणां दाहः किन्तु स्वरूपेण सतामपि सहकारिवैकल्यात्स्वकार्यकरणोदासीनता तेषां भवति भृष्टानामिव बीजानामङ्कुरकरणकौशलहानिः, यतः सामग्री कार्यस्य जनिका न केवलं कारकमतो न कर्माण्येव केवलानि फलोपभोगयोग्यशरीरेन्द्रियादिजन्मनिमित्ततामुपयान्ति किन्तु मिथ्याज्ञानेन दोषैश्च सहितानि, तदुक्तम्—'अविद्यातृष्णे धर्माधर्मौ च जन्मकारणमिति' तत्त्वविदश्च तत्त्ववित्त्वादेव नाविद्या मिथ्याज्ञानात्मिका भवति, दोषाणां तु प्रशमे दर्शित एव क्रमः, तदभावे भवन्तावपि धर्माधर्मौ न बन्धाय कल्पेते न हि स्वकार्यमङ्कुरादि कुसूलवर्तीनि बीजानि जन-

यितुमुत्सहन्ते, भृष्टबीजानामपि स्वरूपशक्तिरपि तानवं गता, तद्वत्कर्मणां स्वरूपशक्तिशैथिल्यं मा नाम भूत्तथापि कुसूलवर्तिबीजवत्सहकारिवैधुर्यात्कार्यानारम्भ इति, तदिदमुक्तम् 'न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्येति', (गो० अ० ४ आ० १ सू० ६४) ।

ननु स्वरूपसत्तायां धर्माधर्मयोः कथमिदमुक्तं-'नवानामात्मगुणानां निर्मूलोच्छेदो ऽपवर्ग' इति, नैष दोषः-मनसंयोगवदकिञ्चित्करयोरवस्थानमप्युच्छेदान्न विशिष्यते, उक्तस्यात्मनो विभुत्वादपरिहार्यो मनसंयोगः, न च तदानीमसौ सन्नपि सुखदुःखज्ञानादिजन्मनि व्याप्रियते, एवं धर्माधर्मौ सन्तावपि फलमाक्षिपन्तौ किं करिष्यत इति फलत उच्छिन्नावेव भवतः, तस्मान्नवानात्मगुणानामुच्छेदोऽपवर्ग इत्यविरुद्धम्, एवं प्रवृत्त्यनुबन्धस्यापि बन्धहेतोरभावान्न दुर्गमो ऽपवर्गः ।

ज्ञानकर्मसमुच्चयवादः ।

अपरे पुनराहुः-कर्मफलानां शास्त्रतः कार्यकारणभावनियमावगतेः शमसन्तोषशीतातपादिद्वारकसुखदुःखमात्रोपपादनेन कर्मपरिक्षयानुपपत्तेः योगर्द्ध्या च दीर्घकालावधिसुखदुःखोपभोगस्य सकृदेव सम्पादयितुमशक्यत्वाज्ज्ञानाग्निना च दाहे तत्कर्मोपदेशिवैदिकवचनसार्थानर्थक्यप्रसङ्गात् अदत्तफलस्य कर्मणो ऽनुपरमात् अवस्थानपक्षे चिरमप्युषित्वा कुसूलावस्थितबीजवत्कालान्तरेणापि तत्फलाक्षेपप्रसङ्गादवश्यं स्वफलोपभोगद्वारक एव कर्मक्षयो वाच्यः, न चानिर्मोक्ष आशङ्कनीयश्चिरादपि तत्सिद्धिसम्भवात्, तथा च मुमुक्षुर्नित्यनैमित्तिकं कर्मावश्यमनुतिष्ठेदननुतिष्ठन्प्रत्यवेयादिति तत्कुतोऽस्य बन्धः स्यात्, काम्यं निषिद्धं च कर्म स्वर्गनरककारि विस्पष्टमेव बन्धसाधनमिति तत्परिहरेदेवेत्येवं तावदुत्तरो ऽस्य न कर्मसञ्चयः प्रवर्तते, तदाह—

नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया ।
मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।। इति ।

प्राक्तनस्य तु कर्मसञ्चयस्य भोगादेव क्षयः, आत्मविदश्च मुमुक्षोरयमनुष्ठानक्रमो भवति नेतरस्येति स एवेत्थमपवर्ज्यतेति, आह च—

आत्मज्ञे चैतदस्तीति तज्ज्ञानमुपयुज्यते ।
तत्र ज्ञातात्मतत्त्वानां भोगात्पूर्वक्रियाक्षये ।।
उत्तरप्रचयासत्त्वाद्देहो नोत्पद्यते पुनः ।

ननु नित्यकर्मानुष्ठानपक्षे नास्त्येव मोक्षः, यान्येव हि नित्यानि दर्शपौर्णमासादिकर्माणि 'यावज्जीवं दर्शपौर्णमासाभ्यां यजेत'इत्यादिचोदनोपदिष्टानि तान्येव फलवन्ति श्रूयन्ते इति काम्यान्यपि भवितुमर्हन्ति, 'दर्शपौर्णमासाभ्यां

स्वर्गकामो यजेत, अग्निहोत्रं जुहुयात्स्वर्गकाम' इति। न फलाभिसन्धानपूर्वकत्वेनाप्रयोगात् , यथा ऽऽह—

प्रार्थ्यमानं फलं ज्ञातं नानिच्छोस्तद्भविष्यति।

इति संयोगप्रवृत्तौ विशेषः, प्रयोगे ऽपि विशेषः काम्यं कर्म सर्वाङ्गोपसंहारेण प्रयुज्यमानं फलसाधनमिति, यथा शक्तिस्त(था त)त्तथा प्रयोक्तव्यमिति नित्यस्य कर्मणो ऽकरणात्प्रत्यवाय इति यथाशक्त्यपि तत्प्रयोक्तव्यमनुष्ठाता तु सर्वाण्यङ्गानि यद्यसावुपसंहर्तुं न शक्नुयान्मा प्रवर्त्तिष्ट न त्वप्रवर्तमानः प्रत्यवेयादिति, एवं तदेव दर्शपौर्णमासादिकर्म 'यावज्जीवमि'ति चोदनयोपदिष्टं नित्यं सत्तत्फलानभिसन्धानात्प्रयुक्तं न बन्धाय कल्पते, क्व सा स्वर्गसाधनशक्तिरस्य गतेति चेद्, न वयं कर्मणां शक्तिमशक्तिं वा प्रत्यक्षतः पश्यामः शास्त्रैकशरणास्तु श्रोत्रिया वयं चोदनैव धर्मे प्रमाणमिति नः कुलव्रतमेतत् , सा च चोदनैकत्र कामिनमधिकारिणमाश्रित्य प्रवृत्ता तदधिकारश्च फलनिर्वृत्तेर्विना न स्यादिति फलपर्यन्ततां प्रतिपद्यते, अन्यत्र तु यावत्पदोपबद्धजीवनपदार्थावच्छिन्नाधिकारिलाभेन प्रवर्तमाना न फलाय भवत्यक्रियमाणे तु शास्त्रार्थे प्रत्यवायाय प्रभवत्यधिकृतेन सता शास्त्रार्थस्त्यक्त इति, काम्ये त्वनुत्पन्नकामोऽधिकृत एव न भवति इति नाधिकृतेन सता विधिस्त्यक्त इति न प्रत्यवैतीति , उपक्रम्य त्वन्तराले त्यक्तुं न लभ्यत एव वीतायां फलेच्छायामप्राप्ते वा फले तत्कर्मसमापनमवश्यकर्त्तव्यमेव तदित्यलं शास्त्रान्तरगर्भेण भूयसा कथाविस्तरेण, सर्वथा सुष्ठूक्तं नित्यनैमित्तिके कुर्यादिति, न खलु सुलभो ऽयं पुरुषार्थः किं न श्रुतमिदमायुष्मता व्यासवचनम्—

अनेकजन्मसंसिद्धस्ततो याति परां गतिम् (भग० अ० ६ श्लो० ४५) इति।

ज्ञानाग्निदाहवचनं (१)तु ज्ञानप्रशंसार्थमेव, सोऽयं ज्ञानकर्मसमुच्चयान्मोक्ष उच्यते।

ज्ञानकर्मसमुच्चयवादनिरासः।

अत्राभिधीयते—न खलु फलोपभोगद्वारकः कर्मणां परिक्षयो जन्मशतैरपि शक्यक्रियः, उक्तं हि—

एकमेवेदृशं कर्म कर्त्तुमापतति क्वचित्।
जन्मायुतशतेनापि यत्फलं भुज्यते न वा॥
देहैस्तत्कर्मभोगार्थैः कर्मान्यत्र करिष्यते।
कर्मसाधनमित्येषा दुराशैव तपस्विनाम्॥

---

(१) ज्ञानाग्निदाहवचनं—ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन !, इत्येवंरूपम्।

तदीदृशमेनं मोक्षपथमुपदिशद्भिर्याज्ञिकैर्मोक्षोपेक्षणमनक्षरमुपदिष्टं भवतीति, तस्मात्पूर्वोक्तनीत्यैव कर्मणां बन्धहेतुत्वमपाकरणीयम् ।

ननु पक्षचतुष्टये ऽपि दोष उक्तः ? न चतुर्थपक्षस्य निरवद्यत्वात्सहकारिवैकल्यात्कुसूलावस्थितबीजवत्कर्मणामनारम्भकत्वे सति न कश्चिद्दोषः, एष एव च तेषां दाहो यत्कार्यानारम्भकत्वम् ।

नन्वविनष्टस्वरूपाणि कुसूलबीजवदेव कदा चिदारप्स्यन्ते कार्यं तस्माद्वरमुच्छिद्यन्तामेव ? किमिदानीं नित्यमात्मानमप्युच्छेत्तुं यतामहे, स हि पुरा भोक्ताऽभूदिति मुक्तो ऽपि पुनर्भोक्तृतां प्रतिपद्येतेति वरमुच्छिद्यतामेव । सामग्र्यभावात्कथं भोक्ततां गच्छेदिति चेत्कर्माण्यपि सहकार्यभावात्कथं कार्यमारभेरन् , न च कर्मणां बन्धकरणे रागादयो न सहकारिण इति वक्तुं शक्यं वीतरागस्य जन्मादर्शनादित्यसकृदुक्तत्वात् , तस्मादयमेव सूत्रकारोपदिष्टः पन्थाः पेशलो—'न प्रवृत्तिः प्रतिसंधानाय हीनक्लेशस्ये'ति ।

यच्चेदमुच्यते—'ज्ञानकर्मसमुच्चयान्मोक्ष' इति, तत्रेदं वक्तव्यम्—कर्मणां कीदृशो मोक्षं प्रत्यङ्गभावः ? न हि कर्मसाध्यो मोक्षः स्वर्गादिवदनित्यत्वप्रसङ्गात् , अपि चात्मैव स्वरूपावस्थितो मोक्ष इत्युच्यते, न चात्मस्वरूपं कर्मसाध्यमनादिनिधनत्वेन सिद्धत्वात् ।

ननु नित्यकर्माननुष्ठाने प्रत्यवेयादिति तद्द्वारकबन्धपरिहारोपायत्वात्कर्मापि मोक्षाङ्गं स्यात् , न संन्यासविधानस्य प्रत्यक्षोपदेशादित्युक्तत्वात् , अपरिपक्वकषायाणां शनैः शनैस्तत्परिपाकौपयिकत्वेन कर्मानुष्ठानं पारम्पर्येणापवर्गोपाय इति तु बाढमभ्युपगम्यते, यथा ऽऽह मनुः—'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुरि'ति (अ० २ श्लो० २८) । अध्यात्मविदश्च ज्ञानकाण्डौपयिकमेव क्रियाकाण्डमन्यन् , साक्षात्तु कर्मसाध्ये ऽपवर्गे स्वर्गवदपायित्वप्रसङ्गात्कृतकस्य सर्वस्यानित्यत्वात्तत्त्वज्ञानमेव मोक्षोपाय इत्युक्तम् ।

यदपि यमनियमादिषु साध्यभूतं तदपि तदङ्गतां गच्छन्न वार्यते, तत्कार्यत्वे ऽपि यावद्गुणप्रध्वंसाभावस्वभावत्वान्मोक्षस्य न क्षयित्वं स्वर्गवदन्यस्तु न मोक्ष इत्युक्तम् ।

तत्पूर्वोक्तप्रक्रमेणापवर्गप्राप्तेस्तत्त्वज्ञानमेवाभ्युपायः ।
कर्म त्वङ्गं तत्र शौचादि किंचित्किंचित्तत्स्यादात्मसंस्कारपूर्वम् ॥

आत्मतत्त्वज्ञाननिरूपणाय विप्रतिपत्तिप्रदर्शनम् ।

आह—'तत्त्वज्ञानमिदानीं चिन्त्यतां, किंविषयं तदपवर्गाय कल्पते कुतो वा तस्य निःश्रेयससाधनत्वमवगतमि'ति ।

नन्वात्मज्ञानमपवर्गहेतुरिति बहुशः कथितमेवैतदिति को ऽयं प्रश्नः, न विप्रतिपत्तेः, विप्रवदन्ते ह्यत्र वादिनः एक एवायमविद्यापरिकल्पितजीवात्मविभागः परमात्मा तत्त्वज्ञानादविद्यापाये मोक्ष इति ब्रह्मवादिनः, शब्दाद्वैतनिश्चयादिति वैयाकरणाः, विज्ञानाद्वैतदर्शनादिति शाक्यभिक्षवः, प्रकृतिपुरुषविवेकविज्ञानादिति पारमर्षाः, ईश्वरप्राणिधानादिति चान्ये, तदेवं कस्मै तत्त्वज्ञानाय स्पृहयन्तु मुमुक्षव इति वाच्यम् ।

स्वमतेनात्मतत्त्वज्ञाननिरूपणम् ।

उच्यते, भिन्नास्तावदात्मान इति गृह्यतामात्मज्ञानमेव च निश्रेयसाङ्गमिति, यत्तु कुतस्तस्य निःश्रेयससाधनत्वमवगतमिति, अक्षपादवचनादिति ब्रूमः, अक्षपादस्तावदिदमुपदिष्टवान् आत्मज्ञानान्निःश्रेयसाधिगम इति, न च निष्प्रमाणकमर्थमेष ऋषिरुपदिशति इति भवितव्यमत्र प्रमाणेन, तत्तु वैदिकविधिवाक्य- 'मात्मा ज्ञातव्य' इति, स एष तावन्निरधिकारो विधिरधिकाररहितस्य च विधेः प्रयोगयोग्यत्वाभावादधिकारान्वेषणमुपक्रमणीयम् , परप्रकरणपरिपठनविरहाच्च नास्य सम्पदादिविधिवत्प्रधानाधिकारनिवेशित्वमतो विश्वजिदधिकरणन्यायेन स्वर्गकाममधिकारिणमिह यावदुपात्तमध्यवस्यामस्तावदेव च 'न पुनरावर्त्तते' इत्यर्थवादसमर्पितेयमपुनरावृत्तिरेव हृदयपथमवतरति रात्रिसत्र इव प्रतिष्ठेति तामेवास्य फलत्वेन प्रतिपद्यामहे ।

सा चेयं साध्यमानापि रूपादेव हि शाश्वती ।
चकास्त्यपुनरावृत्तिर्न स्वर्गवदपायिनी ॥

ननु दृष्टप्रयोजनालाभे सत्यदृष्टप्रयोजनपरिकल्पनावसरः, इह च दृष्टमेव प्रयोजनमात्मज्ञानस्य कर्मप्रवृत्तिहेतुत्वमुपलभ्यते, नित्येनात्मना विना भूतेष्वेव चेतनेषु श्मशानावधिषु बहुवित्तव्यायाससाध्यानि को नाम ज्योतिष्टोमादिकर्माण्यनुतिष्ठेदिति नित्य आत्मा परलोकी ज्ञातव्यः, एवं हि निर्विशङ्कः कर्मसु प्रवर्ततेति, तदिदमनुपपन्नम् , अन्यत एव सिद्धत्वात्प्रत्यभिज्ञाप्रत्यक्षप्रत्ययेन जैमिनीयैरनुमानमहिम्ना च नैयायिकादिभिरात्मा नित्य इति निश्चित एव किमत्र विधिः करिष्यतीति, कर्त्तव्यताकलापोपदेशश्च तदानीमत्यन्तनिष्प्रयोजनः स्यात् , अमी च तथ्या नामातिमहान्तो वेदग्रन्था इयत्येव पर्यवसिता इति तदिदमुपनतं सेयं महतो वंशस्तम्बाल्लट्वा निष्क्रष्यते इति, तस्मादर्थवादसमर्पितमपुनरावृत्तिरूपमेव फलमात्मज्ञानविधिरवलम्बत इत्येवं केचित् ।

सूक्ष्मतरदर्शिनस्त्वाहुः-इयमपि महती दुर्गतिर्यदर्थवादमुखप्रेक्षित्वमस्योक्त-

माधिकारविधेर्विश्वजिति (१)रात्रिसत्रे (२)वा किमन्यत्क्रियतां न हि विधिस्वरूपपर्यालोचनातः कश्चिदधिकारी लभ्यते इति बलात्स्वर्गकामादिः कल्प्यते वा अर्थवादसमर्पितो वा ऽवलम्ब्यते, यत्र तु विधिस्वरूपमहिम्नैव तदुपलम्भः तत्र किं कल्पनया किमर्थवादवदनावलोकनदैन्येन वा, इह च स्वाध्यायो ऽध्येतव्य इति वदग्नीनादधीतेतिवद्वा कृत्येन द्वितीयया वेप्सिततमनिर्देशात्तन्निष्ठत्वमेवावतिष्ठते। तत्र यथा ऽग्न्यर्थतया ऽऽधानविधिरवगम्यमानो ऽग्नीनामनेकविधिपुरुषार्थौपयिककर्मकलापोपयोगात्तदर्जनेनैव कृतार्थत्वमुपगत इति न फलान्तरमपेक्षते यथा वा स्वाध्यायो ऽध्येतव्य इत्यक्षरग्रहणार्थत्वादस्य विधेरक्षरग्रहणस्य च फलवत्कर्मावबोधद्वारेण परमपुरुषार्थोपायत्वावधारणान्न तदतिरिक्तघृतमधुकुल्यादिफलान्तरापेक्षित्वं न चाध्ययनविध्यङ्गत्वं स्वमहिम्नैवेप्सिततमसंस्कारद्वारकाधिकारलाभात्, एवमिहाप्यपहतपाप्माद्यात्मस्वरूपपरिज्ञानमेव तस्य परपुरुषार्थतामवबोधयन्नास्य विधेरन्यप्रयोजनतामापादयति, कश्चित्किल संस्कारविधिः संस्क्रियमाणप्रयोजनापेक्षया परमुखप्रेक्षी भवति व्रीहीन्प्रोक्षतीतिवत्, कश्चित्तु संस्क्रियमाणप्रयोजनमलभमानस्तदीप्सिततमत्वानिर्वाहणात्संस्कारविधित्वमेव जहाति सक्तून् जुहोतीतिवत्, यथोक्तम्—

भूतभाव्युपयोगं हि द्रव्यसंस्कारमिष्यते ।
सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित् ॥ इति ।

संस्कार्यमनर्घमिव रत्नमपर्युषितमिवामृतमनस्तमिव चन्द्रबिम्बमपरिम्लानमिव शतपत्रमस्ति कस्तर्हि प्रकरणपाठापेक्षायामर्थवादमुखप्रेक्षणे फलकल्पनायां वा ऽभिलापः, अत एव न कामश्रुतप्रयुक्तत्वमाधानस्य न चाचार्यकर-

---

(१) विश्वजितीति । अयमाशयः—विश्वजिद्यागे प्रवृत्त्यर्थमिष्टसाधनताज्ञानमवश्यमपेक्षणीयमिष्टसाधनताज्ञानस्य प्रवृत्तिं प्रति कारणत्वात्, तच्च इष्टं किमिति नियामकं नास्ति, विश्वजिता यजेतेति श्रुतौ फलविशेषानिर्देशादिति, किंचित्फलं स्वेच्छया कल्पनीयमिति पूर्वपक्षे, स विश्वजिद्यागफलं स्वर्गः स्यात् सर्वपुंसामिष्टत्वादिति, स स्वर्गः स्यात्सर्वान् प्रत्यविशिष्टत्वात् (अ० ४ पा० ३ सू०० १९) इति सूत्रेण जैमिनिना सिद्धान्तितम् ।

(२) रात्रिसत्र इति । रात्रिसत्रवाच्यानां ज्योतिर्गौरित्यादिवाक्योत्पन्नकर्मणां फलजिज्ञासायाम् विश्वजिन्न्यायेनोत्पन्नाश्रुतस्वर्गादिफलकल्पने गौरवात् 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' इतिअर्थवादश्रुता 'प्रतिष्ठैव फलमि'ति सिद्धान्तः तथा च न्यायमाला—

स्वर्गाय वा प्रतिष्ठायै रात्रिसत्रमिहादिमः ।
पूर्ववत्स्यात्प्रतिष्ठा च श्रुता तेनाऽश्रुताद्वरम् ॥

णविधिप्रयुक्तत्वमध्ययनस्येति, तस्मात्स्वाध्यायाध्ययनाग्न्याधानविधिसमानयोगक्षेमत्वादात्मज्ञानविधेस्तत एवात्मज्ञानमपवर्गार्थमवगम्यते, तथाविधस्वरूप आत्मैव परोपजनितधर्मरहितो ऽपवर्ग इत्युच्यते यतः तदिदमित्थमात्मज्ञानमेव निःश्रेयससाधनमनन्यलभ्यमिति तमेवोपदिष्टवानाचार्योऽक्षपादः । यत्तु विज्ञानसत्तात्मशब्दाद्यद्वैतदर्शनं तन्मिथ्याज्ञानमेवेति न निःश्रेयससाधनम् ।

ब्रह्मवादिमतेन मोक्षोपायनिरूपणम् ।

ननु कथमद्वैतदर्शनं मिथ्या कथ्यते तत्प्रत्युत द्वैतदर्शनमविद्या मायापि मिथ्याज्ञानमिति युक्तम्, तथा हि प्रत्यक्षमेव तावन्निपुणं निरूपयतु भवान्, तत्र हि यदन्यानपेक्षतया झगिति पदार्थस्वरूपमवभासते तत्पारमार्थिकमितरत्काल्पनिकमिति गम्यते, सद्रूपमेव च तत्राभिन्नमन्यनिरपेक्षमवभाति भेदस्त्वन्यापेक्षयेति नाक्षणविज्ञानविषयतामुपयाति, तत्र यथा मृद्रूपतातः प्रवृत्तिं यावत्कुम्भावस्थेत्यस्मिन्नन्तराले आविर्भवतां च घटकपालशकलशर्कराकणादीनां रूपमपरमार्थसदेव व्यवहारपदवीमवतरति परमार्थतस्तु मृत्तिकैव, यथा ऽऽहुः मृत्तिकेत्येव सत्यमिति, एवं तदपि मृत्तिकारूपं सत्तापेक्षया न परमार्थं सदिति सत्तैव सर्वत्र परमार्था तदेव सल्लक्षणं ब्रह्मेत्याहुः, आगमश्च 'एकमेवाद्वितीयमि'त्यादिरभेदमेव दर्शयति 'नेह नानाऽस्ति किञ्चन मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यती'ति च, वेदस्य च सिद्धे ऽप्यर्थे प्रामाण्यमुपवर्णितमेव भवद्भिः, न च प्रत्यक्षविरुद्धत्वमभेदशंसिनो वक्तुं शक्यमागमस्य न ह्यन्यनिषेधे प्रत्यक्षं प्रभवति स्वरूपमात्रग्रहणपरिसमाप्तव्यापारत्वात्, पररूपमन्तरेण च भेदस्य दुरुपपादत्वाद्भेदे कुण्ठमेव प्रत्यक्षमिति कथमभेदग्राहिणमागमं विरुन्ध्यात्तदुक्तम्--

आहुर्विधातृ प्रत्यक्षं न निषेध्यं विपश्चितः ।
नैकत्व आगमस्तेन प्रत्यक्षेण विरुध्यते ॥

नन्वेकमेव ब्रह्म न द्वितीयं किचिदस्ति तर्हि तद् ब्रह्म नित्यशुद्धबुद्धस्वभावत्वान्मुक्तमेवास्ते केन तद्बद्धमिति किमर्थो ऽयं मुमुक्षूणां प्रयत्नः कुतस्त्यो वा ऽयं विधिर्न जगदवभासकः ? अविद्योच्छेदार्थे मुमुक्षुप्रयत्न इति ब्रूमः, ततस्त्य एवायं विचित्रजगदवभासः ।

केयमविद्या नाम, ब्रह्मणो व्यतिरिक्ता चेद् नाद्वैतम् अव्यतिरेके तु ब्रह्मैव सा, ततो नान्येत्येपेति कथमुच्छेद्यते ? मैवं, न वस्तुनीदृशि तार्किकचोद्यानि क्रमन्ते, अविद्या त्वियमवस्तुरूपा माया मिथ्यावभासस्वभावा ऽभिधीयते, तत्त्वाग्रहणमविद्या, अग्रहणं च नाम कथं वस्तुधर्मं विकल्प्यते ।

ननु तत्त्वाग्रहणरूपापि कस्येयमविद्या। न हि ब्रह्मणो नित्यप्रबुद्धस्वभावत्वादविद्या भवति, अन्यस्तु नास्त्येव तदाश्रयो, न च निरधिकरणमेव मिथ्याज्ञानं भवितुमर्हति ?

उच्यते--'जीवात्मनामविद्या न ब्रह्मणः ।

ननु के ते जीवात्मानस्ते ऽपि ब्रह्मणो ऽन्यानन्यतया चिन्त्या एव ? आः क्षुद्रतार्किक सर्वत्रानभिज्ञो ऽसि, ब्रह्मैव जीवात्मानो न ततो ऽन्ये, न हि दहनपिण्डाद्भेदेनापि भान्तः स्फुलिङ्गा अग्निस्वरूपा न भवन्ति, तत्किं ब्रह्मण एवाविद्या ? न च ब्रह्मणो ऽविद्या, यथा चैकमेव घटाद्यावरणोपहितभेदतया भिन्नमिव विभाति नभः पटाकाशं घटाकाशमिति तदावरणवशादेव च रजोधूमादिकलुषितमपि भवति तदावरणविरतौ तु गलितकालुष्यमले तत्रैव परमे व्योम्नि लीयते, तथैव चात्मानो ऽप्यविद्यापरिकल्पितभेदास्तत्कृतमनेकप्रकारकालुष्यमनुभवन्ति तदुपरमे च परब्रह्मणि लीयन्ते इति च ।

नन्वेवमप्यविद्यापरिकल्पित एष ब्रह्म जीवात्मविभागः, सा च जीवात्मनामविद्येत्युच्यते तदेतदितरेतराश्रयमापद्यते अविद्याकल्पनायां सत्यां जीवात्मानो जीवात्मसु च सत्स्वविद्येति ? भवत्वितरेतराश्रयत्वम्, अविद्याप्रपञ्च एवायमशेषः, कस्यैष दोषः यदि चानादित्वमस्य परिहारो बीजाङ्कुरवद्भविष्यति, भवद्भिरपि चायमनादिरेव संसारो ऽभ्युपगतः अविद्यैव च संसार इत्युच्यते ।

नन्वनादेरविद्यायाः कथमुच्छेदः ? किमनादेरुच्छेदो न भवति भूमे रूपस्य, भवद्भिर्वा कथमनादिस्संसार उच्छेद्यते, ननूपाये सत्यनादिरप्युच्छेद्यते अद्वैतवादिनां तु कस्तदुच्छेदोपायः ? अविद्यैवेति ब्रूमः, श्रवणमननध्यानादिरप्यविद्यैव सा त्वभ्यस्यमाना सत्यविद्यान्तरमुत्पादयति स्वयमप्युत्सीदति यथा पयः पयो जरयति स्वयं च जीर्यति विषं विषान्तरं शमयति स्वयं च शाम्यति यथा वा द्रव्यान्तररजःक्षिप्तं रजःकलुषितेऽम्भसि तच्चात्मानं संहृत्य स्वच्छमम्बु करोति तदेवमियमविद्यैवाविद्यान्तरमाच्छिन्दन्ती विद्योपायतां प्रतिपद्यते,

ननु स्वरूपेणासत्यैवेयमविद्या कथं सत्यकार्यं कुर्यात्, उच्यते—

असत्यादपि सत्यार्थसम्पत्तिरुपपत्स्यते ।
मायासर्पादयो दृष्टाः सत्यप्रभयहेतवः ॥

रेखागकारादयश्चासत्याः सत्यार्थप्रतीत्युपाया दृश्यन्ते, स्वरूपेण सत्यास्ते इति चेत्किं तेन क्रियते, गकारादित्वेन हि ते प्रतिपादकास्तच्चैषामसत्यमिति ।

ननु ब्रह्मणो नित्यशुद्धत्वाज्जीवानां च ततो ऽन्यत्वात्कथं तेष्वविद्यावकाशं लभेत ? परिहृतमेतद् घटाकाशदृष्टान्तोपवर्णनेनैव, अपि च यथा विशुद्धमपि वदनबिम्बमम्बुमणिकृपाणदर्पणाद्युपाधिवशेन श्यामदीर्घस्थूलादिरूपमपारमार्थिकमेव दर्शयति तथा ब्रह्मणस्तदभावे ऽपि जीवेषु तदवकाश इति ।

ननु परमात्मनो नित्यत्वाज्जीवानामप्यन्योन्यमप्यनन्यत्वमित्येकस्मिन्बद्धे मुक्ते वा सर्वे बद्धाः मुक्ता वा स्युः ? अयि कुतर्ककलुषितमते ! कथं बोध्यमानो

ऽपि न बुध्यसे, घटाकाशे ऽपि घटभङ्गादरमाकाशप्रतिष्ठे जाते पटाकाशो ऽपि तथा भवति, एकस्यापि जीवात्मन उपाधिभेदात्सुखदुःखानुभवभेदो दृश्यते पादे मे वेदना शिरसि मे सुखं न वेदनेति तीव्रतरतरणितापोपनतातनुक्लमस्य च यत्रैव शरीरावयवे शिशिरहरिचन्दनपङ्कस्थासकमुपरचयति परिम्लानस्तत्रैव तद्दुःखोपरमानुभवो नेतरत्रेत्येवमेकस्मिन्नपि परमात्मनि कल्पनामात्रप्रतिष्ठेष्वपि जीवात्मसु बद्धमुक्तव्यवस्था सिध्यतीत्येकात्मवाद एवायमागमानुगुण उपयुक्तो नानन्त्यमात्मनाम् ।

ब्रह्मदर्शनमेवातो निःश्रेयसनिबन्धनम् ।
भेददर्शनमूढानां संसारविरतिः कुतः ॥ इति ।

ब्रह्मवादिमतखण्डनम् ।

अत्राभिधीयते, कपटनाटकरहस्यप्रक्रियाकूर्चोपरचने तदनुगुणदृष्टान्तपरम्परोपपादने च किमुच्यते परं कौशलं भवताम् , प्रमाणवृत्तनिरूपणे तु तपस्विन एव भवन्तः, तथा हि भेदस्य प्रमाणबाधितत्वात्किमयमभेदाभ्युपगमो भवतामुत स्विदभेदस्यैव प्रमाणसिद्धत्वादिति, द्वयमपि नास्ति, प्रत्यक्षादीनि हि सर्वाण्येव भेदप्रतिष्ठानि प्रमाणानि, यत्तावद्भेदस्य परापेक्षत्वान्मृत्पिण्डात्प्रभृति घटकर्परचूर्णपर्यन्तकार्यपरम्परापरिच्छेदे तदनुगतमृद्रूपताग्रहणे च सति मृदस्तदभिन्नरूपत्वमवतार्यते नान्यथा, भिन्नवश्चाचक्षते चाक्षुषं व्यावृत्तस्वलक्षणग्राहि नाभेदविषयमभेदस्य परापेक्षत्वादिति, अयमस्मादन्य इतीयं परापेक्षा प्रतीतिरिति चेदयमस्मिन्ननुस्यूत इतीयमपि परापेक्षैव, तदत्र भवांश्च भिक्षुश्च द्वावपि दुर्ग्रहोपहतौ भेदाभेदग्रहणनिपुणमक्षजमिति परीक्षितमेतद्विस्तरतः सामान्यचिन्तायाम् , अङ्गुलिचतुष्टयं हि प्रतिभासमानमितरेतरविभक्तरूपमप्यनुगतरूपमपि प्रकाशते इत्युक्तम् ।

व्यावृत्तिरनुवृत्तिर्वा परापेक्षास्तु वस्तुषु ।
असङ्कीर्णस्वभावा हि भावा भान्त्यक्षबुद्धिषु ॥

यदप्युक्तम्--'आहुर्विधातृ प्रत्यक्षमि'ति तदप्यसाधु, विधातृ इति को ऽर्थः, इदमपि वस्तु स्वरूपं गृह्णाति नान्यरूपं निषेधति, प्रत्यक्षमिति चेन्मैवम् अन्यरूपनिषेधमन्तरेण तत्स्वरूपपरिच्छेदस्याप्यसम्पत्तेः, पीतादिव्यवच्छिन्नं हि नीलं नीलमिति गृहीतं भवति नेतरथा, तथा चाह—'तत्परिच्छिन्नं त्वन्यद्वयवच्छिनत्ती'ति, भाववदभावमपि ग्रहीतुं प्रभवति प्रत्यक्षमिति च साधितमस्माभिरेवैतत् , तस्मादितरेतरविविक्तपदार्थस्वरूपग्राहित्वान्नाभेदविषयं प्रत्यक्षम्, शब्दानुमानयोस्तु सम्बन्धग्रहणाधीनस्वविषयव्यापारयोर्भेदमन्तरेण स्वरूपमेव नावकल्पते इति तावुभावपि भेदविषयावेव, विशेषविषयत्वाभावे ऽपि लिङ्गसामा-

न्यस्य तदितरविलक्षणस्य परिच्छेदादि, वाग्रूपस्य तु परस्परोपरक्तपदार्थपुञ्जस्वभाव: इतरपदार्थविशेषितान्यतमपदार्थरूपो वा वाक्यार्थो विषय इति पूर्वमेव निरूपितमतः सर्वथा न भेदस्य प्रमाणान्तराधितत्वम्, नाप्यभेदग्राहि किञ्चन प्रमाणमस्ति यथोक्तेनैव न्यायेन, यस्त्वागमः पठितः —'एकमेवाद्वितीयं नेह नानास्ति किञ्चने'त्यादि, तस्यार्थवादत्वात्र यथाश्रुत एवार्थो ग्रहीतव्यः ।

ननु सिद्धे ऽप्यर्थे वेदस्य प्रामाण्यमभ्युपगतमेव भवद्भिः, बाढमभ्युपगतं किन्तु धूम एवाग्नेर्दिवा ददृशे नार्चिरित्येवमादीनां प्रत्यक्षादिविरुद्धार्थाभिधायिनामर्थवादानां मुख्यां वृत्तिमपहाय गौण्यापि वृत्त्या व्याख्यानमाश्रितम्, एवमिदमपि वचनमितरप्रमाणविरुद्धमर्थमभिदधदन्यथा व्याख्यायते, ये तु प्रमाणान्तरविरुद्धार्थानुवादिनो न भवन्त्यर्थवादास्तेषामस्तु स्वरूपे प्रामाण्यं 'वायुर्वै क्षेपिष्ठा देवते'त्येवमादीनाम्, तस्मात्सुखदुःखाद्यवस्थाभेदे ऽपि नावस्थातुरात्मनो भेदो देहेन्द्रियादिनानात्वे वा न तस्य नानात्वमित्येवं यथा कथं चिदयमर्थवादो योजनीयः, अभेदोपदेशी तु तत्परः शब्दो विधिरूप इह नास्त्येवमागमबलादपि नाद्वैतसिद्धिः ।

यत्पुनरविद्यादिभेदचोद्यमाशङ्क्याशङ्क्य परिहृतं तत्राशङ्का साधीयसी समाधानं तु न पेशलम्, तत्त्वान्यत्वाभ्यामनिर्वचनीयेयमविद्येति कोऽर्थः ?

अनादिना प्रबन्धेन प्रवृत्ताऽऽवरणक्षमा ।
यत्रोच्छेद्याऽप्यविद्येयमसती कथ्यते कथम् ॥

अस्तित्वे क एनामुच्छिन्द्यादिति चेत्, कातरसन्त्रासोऽयं सतामेव हि वृक्षादीनामुच्छेदो दृश्यते नासतां शशविषाणादीनाम्, तदियमुच्छेद्यत्वादविद्या नित्या मा भूत्सती तु भवत्येव ।

नित्यं न शक्यमुच्छेत्तुं सदनित्यं तु शक्यते ।
असत्त्वमन्यदन्या च पदार्थानामनित्यता ॥

न च तत्त्वाग्रहणमात्रमविद्या, संशयविपर्ययावप्यविद्यैव तौ च भावस्वभावत्वात्कथमसन्तौ भवेताम्, ग्रहणप्रागभावो ऽपि नासन्निति शक्यते वक्तुमभावस्याप्यस्तित्वसमर्थनादिति सर्वथा नासत्यविद्या ।

असत्त्वे च निषिद्धेऽस्यास्सत्त्वमेव बलाद्भवेत् ।
सदसद्व्यतिरिक्तो हि राशिरत्यन्तदुर्लभः ॥

सत्त्वे च द्वितीयाया अविद्याया भावान्नाद्वैतम् ।

यत्तु—ब्रह्मणः सततप्रबुद्धत्वादविद्याश्रयता नेति जीवानामविद्यास्पदत्वमभिहितमविद्योपरमे ब्रह्मणि परमे त एव घटाकाशवल्लीयन्ते—इति ।

तदपि न चतुरस्रम्, आकाशावच्छेदहेतोर्घटमानत्वादविद्यायास्त्वसत्त्वात्तत्कृतः परमात्मनो ऽवच्छेद इति विषमो दृष्टान्तः, अवच्छेदकत्वाभावाच्च जीव-

विभागकल्पनापि निरवकाशैव। यच्चेतरेतराश्रयत्वं परिहर्तुमनादित्वमाश्रितमविद्यायास्तत्र बीजाङ्कुरवद्देहान्तरोपगतसंसारवच्च तस्याः सत्यत्वमेव स्यात्, अनादिप्रबन्धप्रवृत्तत्वे चास्याः प्रतिकूलहेत्वन्तरोपनिपातकृतमपाकरणमुचितम्, एकात्मवादिनां तु तदतिदुर्घटमित्यनिर्मोक्ष एव स्याद्, यथाह भट्टः--

स्वाभाविकीमविद्यां च नोच्छेत्तुं कश्चिदर्हति।
विलक्षणोपपाते हि नश्येत्स्वाभाविकं क्वचित्॥
न त्वेकात्माभ्युपायीनां हेतुरस्ति विलक्षणः॥ इति।

यत्पुनरविद्यैव विद्योपाय इत्यत्र दृष्टान्तपरम्परोद्घाटनं कृतम्, तदपि क्लेशाय नार्थसिद्धये, सर्वत्रोपायस्य स्वरूपेण सत्त्वादसतः खपुष्पादेरुपायत्वाभावात्, रेखागकारादीनां तु वर्णरूपतया सत्त्वं यद्यपि नास्ति तथापि स्वरूपतो विद्यत एव।

ननु गकारो ऽयमिति गृह्यमाणः स रेखासन्निवेशो ऽर्थप्रत्यायको भवति न चासौ तेन रूपेणास्ति,

नैवम्, स्वरूपेणासतोऽर्थस्य रूपान्तरेणापि गृह्यमाणस्य कूटकार्षापणादेरिव व्यवहारहेतुता दृश्यते च युक्ता च, वस्तु स्वरूपत एव नास्ति तस्य स्वात्मना परात्मना वा व्यवहाराङ्गता समस्ति, रेखासन्निवेशश्च स्वरूपेण सन्निति वर्णात्मत्वेना सन्नपि तत्कार्याय पर्याप्नुयान्न त्वयमविद्यायां न्यायः स्वरूपासत्त्वात्तस्याः, सर्पादौ तु सर्पादिस्वरूपवत्तज्ज्ञानस्यापि तत्कार्यत्वमवगतमत एव शङ्काविषस्यापि स्वशास्त्रेषु चिकित्सामुपदिशन्ति, एवं नवगुहाकुहरादेष निःसृतः केसरी सरोषमित एवाभिवर्तत इत्यसत्येऽप्युक्ते यद्भीरूणां भयपलायनादि शूराणां च सोत्साहमायुधोद्यमनादि सत्यं कार्यमुपलभ्यते तत्र सिंहज्ञानस्य तत्कार्यत्वात्तस्य च स्वरूपसत्त्वान्नासत एवोपायत्वम्, एतेन प्रतिबिम्बदृष्टान्तो ऽपि प्रत्याख्यातः, खड्गादेर्मुखादिकालुष्यकल्पनाकारणस्य तत्र सद्भावादिह तदसद्भावादिति।

यदपि बद्धमुक्तव्यवस्थासिद्धये पादवेदनाद्युदाहृतम्, तदप्येवमपाकृतमवच्छेदकस्य पादादेस्तत्र तात्त्विकत्वात् इह तु भेदकल्पनाबीजमद्वैतवादिनो दुर्घटमिति बहुशः प्रदर्शितम्।

तदेवमत्र वस्तुसंक्षेपः--अविद्यायामसत्यां सर्व एवायं यथोदाहृतो व्यवहारप्रकारस्तत्कृत इति नावतिष्ठते सत्यां तु तस्यां नाद्वैतमिति, अत एवाह सूत्रकारः 'संख्यैकान्तासिद्धिः प्रमाणोपपत्त्यनुपपत्तिभ्याम्' (गौ० अ० ४ आ० १ सू० ४१) इति, यदि तावदद्वैतसिद्धौ प्रमाणमस्ति तर्हि तदेव द्वितीयमिति नाद्वैतम् अथ नास्ति प्रमाणं तथापि न तरामद्वैतमप्रामाणिकायाः सिद्धेरभावादिति।

मन्त्रार्थवादोत्थविकल्पमूलमद्वैतवादं परिहृत्य तस्मात् ।
उपेयतामेष पदार्थभेदः प्रत्यक्षलिङ्गागमगम्यमानः ॥

शब्दाद्वैतवादिवैयाकरणमतखण्डनम् ।

एतेन शब्दाद्वैतवादोऽपि प्रत्युक्तः ।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ।

(वाक्य० का० १ श्लो० १)

उच्यते–तत्रानादिनिधनपदनिवेदिता पूर्वापरान्तरहिता वस्तुसत्ता नित्यत्वं ब्रह्मपदप्रतिपादितं च व्यापित्वमित्युभयमपि शब्दस्य प्रागेव निरस्तम्, निरवयवश्च स्फोटात्मा शब्दः प्रतिक्षिप्त एव, यत्तु नित्यं वा किंचिदुच्यते तच्छब्दतत्त्वमित्यत्र का युक्तिः, आह शब्दोपग्राह्यतया च शब्दतत्त्वम्. तथा हि सर्वः प्रत्यय उपजायमानो नानुल्लिखितशब्दक उपजायते तदुल्लेखविरहिणोऽनासादितप्रकाशस्वभावस्य प्रत्ययस्यानुत्पन्ननिर्विशेषत्वात्, इदमीदृशमित्यादिपरामर्शमुषितवपुषि वेदने वेदनात्मकत्वं न भवेत्, येऽपि वृद्धव्यवहारोपयोगिवैधुर्यानवाप्तशब्दार्थसम्बन्धविशेषव्युत्पत्तयो बालदारकप्रायाः प्रमातारस्तेपि नूनं यत्तत्सत्किमित्यादि शब्दजातमनुल्लिखन्तो न प्रतियन्ति किमपि प्रमेयमतः शब्दोन्मेषप्रभावप्राप्तप्रकाशस्वभावत्वात्सर्वप्रत्ययानाम् ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते ॥ इति ।

(वाक्य० ब्र० १२ श्लोक ११४)

एवमनभ्युपगमे तु सम्विदः प्रकाशशून्यतया ऽनधिगतविषयः सर्व एवान्धमूकप्रायो लोकः स्यात् । आह च—

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ इति ॥

(वा० ब्र० श्लोक १२५)

अतः क्रमेण तावदेवं बोध्यसे शब्दाख्यविशेषणानुवेधविशेषानुभवात्सर्वं निर्विकल्पकमिन्द्रियजमविकल्पकं वा ज्ञानं शब्दविशिष्टमर्थमवद्योतयति गौः शुक्लो गच्छतीति जातिगुणक्रियावच्छिन्नविषयावभासिनि प्रत्यये शब्दविशिष्ट एवार्थः प्रस्फुरतीति बुद्ध्यस्व, एवं चेद्बोद्धुमवतीर्णोऽसि शब्दाख्यविशेषणानुरक्तस्य तस्य विशेष्यस्य स्वरूपं पृष्टः शब्देनैव दर्शयसि शब्दापरित्यागलब्धप्रकाशस्वरूपयैव वा ऽनुभूत्यानुभवसीति सोऽपि विशेष्यः शब्दरूप एवेति जानीहि, तदेवं शब्द एवार्थोपारूढः प्रतिभातीति व्यवतिष्ठते, इत्थमियन्तमध्वानं चेत्पा-

प्तोऽसि तदधुना यदुपारूढः शब्दः प्रकाशते तस्य पृथक् प्रदर्शयितुमनुभवितुं चाशक्यत्वाच्छब्द एव तथा प्रतिभातीति शब्दविवर्त एवायमर्थो नान्यः कश्चिदिति प्रतिपत्तुमर्हसि, यथा चायमिन्द्रियजेषु प्रतिभासेषु प्रक्रमस्तथा शाब्देष्वपि प्रत्ययेषु शब्दविशिष्टो वार्थः प्रतिभाति शब्दो वार्थारूढः, शब्द एवार्थरूपेण विवर्तत इति गृह्यताम्, अतश्च शब्दब्रह्मेदमेकमविद्योपाधिदर्शितविचित्रभेदमविद्योपरमे यथावस्थितरूपं प्रकाशत इति युक्तम्।

तत्राभिधीयते—न खलु प्रकारत्रयमपीदमुपपद्यते। पदपदार्थसम्बन्धव्युत्पत्तिविरहिणामनवाप्तशब्दयोजनावैरूप्यसारूप्यमात्रप्रतिशुद्धवस्तुग्रहणप्रवणेन्द्रियजप्रत्ययदर्शनात्, वृद्धव्यवहारपरिचयाधिगतशब्दार्थसम्बन्धसंस्थाधियामपि शब्दस्मरणसंस्कारप्रबोधहेतुभूतप्रथमोद्भूतविशुद्धवस्त्ववभासस्यापरिहार्यत्वात्, यत्र हि वस्तुनि निविशमानः शब्दः शब्दविद्व्यवहारेषु यो ऽवधृतस्तद्दर्शने तत्संस्कारप्रबोधात्स्मृतिपथमेति नान्यथेति, सामान्यशब्देष्वपि यत्तत्सत्किमित्यादिषु विशेषशब्देष्विव सैव वार्त्ता तेषामपि व्युत्पत्त्युपयोगविरहे विविधवनविहारिविहङ्गकूजितादिवार्थप्रतीतिहेतुत्वानुपपत्तेः, सविकल्पकदशायामपि न वाचकविशिष्टं वाच्यं मेचकगुणखचितमिव कुवलयमवलोकयति इति विस्तरतः प्रत्यक्षलक्षणे परीक्षितमेतत्। आह च—

न शब्दाभेदरूपेण बुद्धिरर्थेषु जायते।
प्राक् शब्दाद्यादृशी बुद्धिः शब्दादपि हि तादृशी॥ इति।

(श्लोक० वा० प्र० १७२)

संज्ञित्वमात्रमधिकमधुना ध्वनिसन्निधाने बुद्धिमधिरोहति न तद्विशिष्टोऽर्थः, तस्य हि श्रोत्रेण नेत्रेणोभाभ्यां न केवलेन मनसा वा ग्रहणमुपपद्यते ऽतिप्रसङ्गात्।

शब्दाध्यासवादखण्डनम्।

शब्दो ह्यनेकधर्मके धर्मिण्येकतरधर्मावधारणाभ्युपायो भवति न तत्रात्मानमारोपयति न हि दीपेन्द्रियप्रभृतयः प्रतीत्युपायास्तदुपेये रूपादावात्मानमारोपयन्त्यत एव तदुपायस्वभ्रमकृतस्तदभेदवादो ऽपि न युक्तः।

न ह्युपायादभिन्नत्वं तदुपेयस्य युज्यते।
रूपस्य न ह्यभिन्नत्वं दीपाद्वा चक्षुषो ऽपि वा॥

अपि च-यदि शब्दादभिन्नो ऽर्थः प्रतिभात्येव को ऽध्यासार्थः? अध्यासभ्रमस्तु वैयाकरणानामेकाकारनिर्देशदोषनिर्मितो यथा गौरित्येष हि निर्देशो वाच्यतद्बुद्धिवाचिनाम्, कस्त्वया दृष्टो ऽर्थ इति पृष्टो गौरिति, कीदृशं ते ज्ञानमुत्पन्नं गौरिति, कीदृशं शब्दं प्रयुक्तवानसि गौरिति, तत एषा भ्रान्तिः, वस्तुतस्तु विविक्ता एवैते शब्दज्ञानार्थाः, तदुक्तम्—

गवि सास्नादिमद्रूपा गादिरूपाऽभिधायके ।
निराकारोभयज्ञाने संवित्तिः परमार्थतः ॥ इति ।

(श्लोक० प्र० सू० श्लोक० ११८५)

एवमिन्द्रियजेष्विव शाब्देष्वपि प्रत्ययेषु न शब्दः स्वरूपमध्यस्यतीति युक्तम्, यदि च शब्दः स्वरूपेणार्थं प्रतिपादयति तदाऽक्षशब्दस्यैक्याद् देवनविभीतकरथाक्षेषु तुल्या प्रतीतिः स्यान्न चाक्षशब्दा भिन्ना इति वक्तव्यं रूपप्रत्यभिज्ञाऽनपायात्तदुच्चारणे चार्थत्रय्यां संशयदर्शनात्, भवतिशब्दयोश्च सुप्तिङन्तयोस्तुल्यरूपत्वादध्यासपक्षे तुल्यार्थप्रतीतिहेतुत्वं प्राप्नोति, तथा च सिद्धसाध्यबुद्धिः संवेद्यमानाऽपि निन्हूयेत, एवमगादित्यश्व इत्यजापय इत्यादावपि द्रष्टव्यम् ।

शब्दस्य सिद्धरूपत्वात्तदध्यासेनार्थबुद्धाविष्यमाणायां 'यजेत दद्याज्जुहुयादि'त्यादौ न क्वचित्साध्यबुद्धिर्भवेत्सिद्धाध्यासेन साध्यबुद्धेरननुरूपत्वात्, जातिगुणक्रियाशब्दाश्च 'गौः शुक्लो गच्छती'त्यादयः केन कारणेन नियतमध्यासमनुरुन्धत इति नावगच्छामः, शब्दस्यार्थानपेक्षनिसर्गशुद्धवैश्वरूप्यकल्पनाबीजाभावात्, प्रतिनियतशब्दवृत्तेश्च कस्यचिल्लक्षणस्याऽनुपलक्षणात्, वृक्षपक्षशब्दयोश्च घटपटशब्दयोरिव स्वरूपभेदाविशेषादर्थानपेक्षित्वाच्च विशेषणविशेष्यभावसामानाधिकरण्ये शब्दाध्यासवादिनो न भवेताम्, न ह्येकत्र वस्तुनि वाच्ये क्वचिदनयोः शब्दयोर्वृत्तिः ।

एतेन नीलोत्पलमपि प्रत्याख्यातम्, तत्रैतत्स्यात्—न नीलगुणविशेषितमुत्पलं नाम किंचिदस्ति विशेष्यम् अपि तु तन्निरस्तावयवार्थमश्वकर्णादिवदर्थान्तरमेवेदं व्युत्पत्तिप्रकारमात्रं तु विशेषणविशेष्यभाववर्णनमिति, तदेतदसमीचीनम्—अनुभूयमानावयवार्थप्रतीतिनिह्नवनिमित्तानुपलम्भात्, अश्वकर्णादौ हि युक्तमर्थान्तरत्वं तत्र हि नाश्वार्थो न कर्णार्थः, निरवयवाक्यार्थवादश्च प्रागेव विस्तरेण निरस्त इत्यलं पुनरुक्तालापेन ।

अथ शब्दाद्वयाभ्यासनिबन्धनमेव सामानाधिकरण्यं वृक्षः वृक्ष इत्युच्यते, तदपि न चारु, वृक्षस्तरुरिति पर्याययोरपि तत्सम्भवे सति सामानाधिकरण्यप्रसङ्गात् ।

अपि च पर्यायेषु 'हस्तः करः पाणिरि'त्यादिषु शब्दरूपभेदाध्यासपक्षेऽर्थबुद्धिभेदः प्राप्नोति न चासावस्तीति नाध्यासः ।

किंच सम्बन्धग्रहणनिरपेक्षोऽपि शब्दः स्वसामर्थ्यमनुरुध्यमानः स्वाध्यासेन बुद्धिं विदध्यात् तदपेक्षायां कस्य केन संबन्ध इति न बुध्यामहे, शब्दादर्थस्य पृथग्व्यवस्थितात्मनस्तन्मते दुर्लभत्वात्, शब्दव्यतिरिक्तार्थोपगमे वा किमनेन शब्दाध्याससमर्थनाडम्बरेण विरम्यतामतो मृगतृष्णानुसरणरणरणकात् ।

अपि चाध्यासः क्व चित्सादृश्याद्भवति शुक्ताविव रजतस्य क्व चिदनुरागाद्भवति लाक्षाया इव स्फटिके शब्दार्थयोर्मूर्त्तामूर्त्ततयातिदूरभिन्नस्वरूपयोः सादृश्यं तावदनुपपन्नम् , अनुरागो ऽपि तत एव दुर्घटः पृथग्देशत्वाद्भिन्नेन्द्रियग्राह्यत्वाच्च ।

प्रतिबिम्बवर्णनमपि न सुन्दरम्, दूरदेशत्वेन शब्दार्थयोः प्राप्तेरभावादप्राप्तयोश्च प्रतिबिम्बोदये द्वारकोद्याननिवासिवासुदेवसुन्दरीवदनतामरसानि सागरतरङ्गपवनपरिचयचलद्दलकलतिकालाञ्छितानि स्वच्छेषु ज्योत्स्नावदातद्युतिषु तुषारगिरिगह्वरगततुहिनशिलाकर्पूरदर्पणेषु प्रतिबिम्बतानि दृश्येरन् ।

अथ सर्वगतत्वेन शब्दानामर्थदेशे प्राप्तिरभिधीयते, तर्हि सकलशब्दसार्थसाधारण्यादत्यन्तमध्याससांकर्यमनवधार्यमाणविशेषनियमकारणमापद्यत इत्यलमतिप्रसङ्गेन, सर्वथा न सम्बद्धः शब्दाध्यासवादः ।

शब्दविवर्तवादखण्डनम् ।

विवर्तवादोपि न समञ्जसः, तथा हि विवर्ते क्षीरमिव दधिरूपेण परिणामित्वेन विकारितया वा क्षीरादेरिवानित्यप्रसङ्गात्, तथाभात्रे ऽपि च नाद्वैतसिद्धिर्दध्न इव क्षीरविकारस्य शब्दविकारस्यार्थस्य ततो ऽन्यत्वात्, अन्यत्वाच्च बाधकारणकालुष्याद्युपप्लवविरहितकिसलयप्रतीतिसमर्पितभेदत्वात् । अथार्थप्रतिभासमसत्यमपीन्द्रजालवदुपदर्शयति शब्द इत्ययं विवर्तार्थः, सो ऽपि न युक्तः, बाह्यस्य वस्तुनः पदाभिधेयस्य जातिव्यक्त्यादेर्वाक्यवाच्यस्यापि भावनादेः पूर्वप्रसाधितत्वात, अवयव्यादेश्चादूर एवाग्रे समर्थितत्वात्, न चेन्द्रजालमायादिवदयथार्थतायामिह किमपि कारणमुत्पश्यामः ।

अथार्थरूपेण शब्दः शुक्तिरिव रजताकारतया ऽवभासतइतीयं विवर्तवाचोयुक्तिः इयमपि न साधीयसी, शुक्तिका हि रजतवत्प्रकाशत इति शक्यं वक्तुं शुक्तेराकारसारूप्येण तथा ऽवभाससम्भवात्, इह तु शब्दार्थयोरत्यन्तविसदृशवपुषोराकारसमारोपकारणानवधारणात्कथमितररूपणेतरस्यावभासः, शुक्तिकारजतादिप्रतीतिषु च बाधकवशात्तथात्वमवगतमिह तु धर्म(म)जहत्सत्यामसत्यां वा ऽर्थबुद्धिमादधाति शब्द इत्ययं विवर्तार्थः, एषो ऽपि सम्प्रत्येव प्रतिक्षिप्तः शब्दानुवेधविरहिणीनां प्राचुर्येण प्रतिपत्तीनां प्रदर्शितत्वात् , न चान्यः कश्चिद्विपश्चिच्चेतसि विपरिवर्तते विवर्तप्रकार इत्यवाचकमुच्यते विवर्तते ऽर्थभावेनेति ।

अथ शब्दब्रह्मैव सृजति जगन्तीत्ययं विवर्तप्रकार उच्यते, सो ऽपि न सम्यग् अचेतनत्वेन शब्दस्येश्वरस्येव स्रष्टृत्वानुपपत्तेः, न च परमाणुवदस्य कारणत्वम् , अवयवसमवायित्वेन पृथिव्यादेः कार्यस्य ग्रहणात् ।

अथ 'विज्ञानमानन्दं ब्रह्मे'त्यागमवचनमनुसरता विभुत्वमिव चेतनत्वमपि शब्दब्रह्मणो वर्ण्यते, तर्हीश्वरस्यैव शब्दब्रह्मेति नाम कृतं स्यात्, यदप्युच्यते--

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ इति ।

तदपि ब्रह्मसुभिन्नमत्यन्तमलौकिकमेकतरस्य ब्रह्मणः काल्पनिकत्वादकाल्पनिकत्वे वा कथमद्वैतवादः, तस्मात्कृतमनेन शब्दब्रह्मणा स्वस्ति परस्मै ब्रह्मणे भूयात्, अविद्यामायाविनिर्मितविविधप्रथनकल्पश्च सत्ताद्वैतदूषणावसर एव निवारित इति शब्दाद्वैतमपि तद्वदसमञ्जसमसिद्धम् ।

एतेन परमात्मोपादानत्वमपि प्रत्युक्तम्, परमात्मनो निसर्गनिर्मलस्यैवम्प्रायकलुषविकारकारणत्वानुपपत्तेः, असत्यमेव विकारजातमविद्यातः परमात्मनि विभातीत्येतदपि दूषितमतः सर्वथा नाद्वैतपक्षः कश्चिदनवद्यः ।

अथ सर्वप्राणिनामेक एवात्मा नाना नात्मान इतीदृशमद्वैतमुच्यते, तदप्यप्रमाणकमेकस्मिन् सुखिनि न सर्वे सुखिनः एकस्मिन्दुःखिते वा न सर्वे दुःखिता इति व्यवस्थादर्शनात्, आत्मपरव्यवहारस्य च सर्वजनप्रतीतिसिद्धस्य दुरपह्नवत्वात्, अन्यदृष्टे च सुखसाधने वस्तुनि स्मरणानुसन्धानपूर्वकेच्छाद्वेषादिकार्यजातस्यान्यत्रानुपलम्भात्, एकस्मिंश्च वीतरागे मोक्षमासादितवति संसारिणामन्येषामानन्त्यदर्शनात्, अहम्प्रत्ययस्य प्रत्यगात्मवृत्तेः परत्रासम्भवात्, जगद्वैचित्र्यस्य च पुरुषभेदनियतधर्माधर्मनिबन्धनस्यान्यथाऽनुपपत्तेः, आत्मभेदस्य विस्पष्टसिद्धत्वात्, तप्तलोहस्फुलिङ्गकघटाकाशपादवेदनादिदृष्टान्तकदम्बस्य च निषेधः कृत एवेति एकात्मवादोऽपि न युक्तिमानित्यलं विस्तरेण।

शब्दस्यायं विवर्तः कथमखिलमिति प्रस्फुरत्तद्विविक्त-
स्वाकारोऽर्थप्रपञ्चः कथमिव विकृतिर्ब्रह्मणो वेदृशी स्यात् ।
तस्मान्नानात्मतत्त्वे परिचितसदसत्कर्मपाकानुसार-
प्रादुर्भूतेश्वरेच्छावशविचलदणुप्रोद्भवो भूतसर्गः ॥

विज्ञानाद्वैतमतम् ।

एवं स्थितेषु सर्वेषु तूष्णीमद्वैतवादिषु ।
विज्ञानाद्वैतवादी तु पुनः प्रत्यवतिष्ठते ॥

सत्यमनुपजनमनपायमेकमपरिमितमद्वयं ब्रह्म न युक्तिमदिति युक्त एव तदनभ्युपगमः, विज्ञानमेव तु क्षणिकमुपजनापायधर्मकमनादिसन्तानप्रबन्धप्रवृत्तमिदं तथा तथाऽवभातीति न ततोऽद्वितीयमर्थरूपं नाम किंचिदस्तीति पश्यामः ।

ननु प्रत्यक्षादिना प्रमाणेन परस्परविसदृशपदार्थरूपसंवेदनस्य दर्शितत्वा-

*कथं विज्ञानस्यायमवभासः, अर्थाभावे तत्स्वरूपानुपपत्तेः, ग्राह्यग्रहणं हि विज्ञानं नाम भवति नाग्रहणमिति ।

उच्यते, इदं तावत्परीक्ष्यतां यदेतत्प्रत्यक्षविज्ञानं नीलमिदं पीतमिदमुत्पद्यते तत्र किमेक आकारः प्रकाशते उत द्वितीयमिति, यदि द्वितीयमवभाति अयमर्थो नीलमिदं तज्ज्ञानमिति तत्किमत्र विचार्यते जितं भवद्भिर्जितस्य यदापद्यते तदस्मासु विधीयताम् ,

अथैक एवमाकारः प्रथते तर्ह्यस्ति विचारावसरः, कस्यायमाकारः किमर्थस्य किं ज्ञानस्येति, स चैवं विचार्यमाण आकारो यद्यर्थस्येति स्थास्यति तद्भवन्तो जेष्यन्ति ज्ञानाकारपक्षे तु वयं जेष्याम इति, किं तावदत्र युक्तम , ज्ञानस्यायमाकार इति, कुतः ? कल्पना भवति ह्यल्पीयसीति, अर्थाकारपक्षे ह्यर्थस्य ज्डात्मनः प्रकाशायोगात्तस्य ग्राह्यत्वमन्यथा न स्यादिति ग्राहकान्तरपरिकल्पनावश्यम्भाविनीति कल्पनाद्वैगुण्यम ।

अथार्थ एव ग्राह्यात्मा यः स एव ग्राहक इति कथ्यते, स तर्हि प्रकाश एवेति संज्ञायामेष विवादः स्यात् , बाह्यान्तरकृतो विशेष इति चेत् , अहो विशेषज्ञो देवानांप्रियः, ग्राहकाद्विच्छिन्नता हि ग्राह्यस्य बाह्यता, न शरीरापेक्षिणी बाह्यता भवति, यदा च ग्राह्यादर्थाद्व्यतिरिक्त एव ग्राहक इष्यते, तदाऽस्य ततोऽविच्छिन्नतेत्यबाह्यत्वाज्ज्ञानमेव तदिति कथं न नाम्नि विवादः, उभयसिद्धत्वाज्ज्ञानस्य तस्यायमाकारो भवितुमर्हति ज्ञाने हि न केचन विवदन्ते अतस्तस्यैवायमाकार इति युक्तमनेककल्पनातो ह्येकार्थकल्पना ज्यायसीति, अतश्च ज्ञानस्यायमाकारः।

ज्ञानं हि प्रकाशकमप्रकाशस्यार्थस्य भवद्भिरभ्युपगम्यते ततश्चार्थात्प्रथमतरस्य ग्रहणेन भवितव्यमगृहीतस्य दीपादेः प्रकाशस्य प्रकाशकत्वादर्शनात्, उत्पन्नेष्वपि च घटादिष्वर्थेषु प्रकाशवैकल्याद्वा प्रतिबन्धवैधुर्याद्वा भवत्यग्रहणं ज्ञानस्य, उत्पन्नस्य सतो न कश्चिद्ग्रहणे प्रतिबन्धको, न च प्रकाशान्तरापेक्षणं स्वत एव दीपवत्प्रकाशस्वभावात् , अतो यदैव तस्योत्पादस्तदैव ग्रहणमवश्यं भवेत्, न चेत्कालान्तरेऽपि न स्यात्, किं हि तस्य कालान्तरे भविष्यति किं वा तदा नाभूद्येन तत्कालान्तरे ग्रहीष्यते तदा च न गृह्यते इति, ज्ञानान्तरेण कालान्तरे तद् ग्रहीष्यते इति चेत् , तदपि केन ग्रहीष्यते, अन्येनेति चेत्, तदप्यन्येनेति कोऽवधिः, श्रम इति चेत्कामं श्रान्तो विरंस्यति भवानर्थं तु न गृहीतवानेव, प्रकाशाग्रहणे तत्प्रकाश्यपरिच्छेदायोगादित्येवं न कदाचिदर्थग्रहणं स्यात् , तस्मादर्थग्रहणवादिनाऽपि पूर्वं ज्ञानग्रहणमवश्याश्रयणीयम् , यथोक्तम्–'अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यती'ति ।

अतश्चैतदेवं ज्ञानपृष्ठेन चोत्तरकालमवमर्शदर्शनात् , ज्ञातो मयाऽयमर्थ इति हि प्रत्यवमृशन्तः प्रमातारः प्रथमं ज्ञानग्रहणमनुमोदन्ते, न ह्यगृहीतवि-

शेषणा विशेष्यबुद्धिर्भवति, तस्मादपि पूर्वज्ञानग्रहणमिति सिद्धम्, ज्ञानं च ग्राह्यमाणमाकाररहितं ग्रहीतुमशक्यमिति बलात्साकारमेव तद् ग्रहीतव्यम्, साकारे च ज्ञाने गृहीते सति द्वितीयकारणाभावात्कुतो ज्ञानातिरिक्तो बाह्योऽर्थः अतश्च साकारं ज्ञानमाकारवत्तामन्तरेणास्य प्रतिकर्मव्यवस्थानुपपत्तेः, कल्पयित्वाऽपि बाह्यमर्थमवश्यमाकारवत्ता विज्ञानस्य विषयनियमसिद्धये वक्तव्या नीलज्ञानं हीदमनेकसन्निधाने समुपजायमानं कथमखिलतदितरपदार्थपरिहारेण केवलनीलानुलग्नतामवलम्बेत बोधस्वभावतायाः सर्वान् प्रत्यविशिष्टत्वात्, प्रवृत्तिरपि प्रेक्षापूर्वकारिणां कथं तदेकविषयैव स्यात्, न च नीलजनितत्वेनार्थत एष तदधिगतिनियम इति कथयितुमुचितमालोकलोचनादिकारकान्तरजनितत्वस्यापि भावे तद्विषयत्वप्रसङ्गादतो नीलाकारतैव नीलविषयत्वव्यवस्थाहेतुर्न निमित्तान्तरम्, आह च—

तत्रानुभवमात्रेण ज्ञानस्य सदृशात्मनः ।
भाव्यन्तेनात्मना येन प्रतिकर्म विभज्यते ॥

तत एवाकारग्रहणमेवातिशयमाश्रित्य तमबर्थसमर्थने सति साधकतमं ज्ञानमेव प्रमाणं भविष्यत्यपरथा कारकातिशयदर्शनाभावे तत्तत्साधकतमत्वस्य दुरुपपादत्वात्, साकारज्ञानसाक्षी च लौकिकोऽपि दृश्यते व्यवहारः, एवं च वक्तारो भवन्ति लौकिकाः 'नीलोऽर्थोऽयं यतोऽत्र तदाकारं ज्ञानमुत्पन्नमिति' तेन प्रतिकर्मनियमान्यथाऽनुपपत्तेरवश्यं साकारमेव ज्ञानम् ।

इत्थं सत्यपि बाह्यार्थे ज्ञानस्याकारकल्पना ।
भवेदेवेति तत्रैव सन्तोष्य स्थीयतां वरम् ॥

ये तु ज्ञानस्य स्वतः स्वच्छस्वभावत्वेन नीलपीताद्यवभासः परोपाधिरेव भवितुमर्हति स्फटिकस्येव लाक्षादिना ऽरुणिमाद्यनुवेधः, अतः पृथगननुभूयमानोऽपि बाह्योऽर्थः साकारज्ञानावभासाऽन्यथाऽनुपपत्त्याऽनुमीयते, यथोक्तं— 'बाह्यसिद्धिः स्याद् व्यतिरेकत' इति ।

तदिदमनुपपन्नम्, अन्वयानुपलब्धेः ।

अर्थे ज्ञानं हि साकारं निराकारं तदत्यये ।
नित्यानुमेयबाह्यार्थवादी ज्ञानं क्व दृष्टवान् ॥

लाक्षास्फटिकादौ तु तथा युक्तं तदनुरक्तस्फटिकावलोकनाद्, इह पुनः—

अर्थेन रज्यमानं हि निराकारं निसर्गतः ।
ज्ञानं न खलु पश्यामो लाक्षया स्फटिकं यथा ॥

आकारद्वयप्रतीतिर्हि नास्तीत्युक्तमभ्युपगमे वा दुरुत्तरमनवस्थादूषणम्, अर्थाकारश्च प्रत्यक्षस्तत्कृतश्च ज्ञानाकारः प्रत्यक्ष इत्युच्यमानेऽर्थाकारस्तावत्साकारेण ज्ञानेन गृहीतः स इदानीं ज्ञानाकारोऽपि ग्राह्यत्वात्साकारज्ञानान्तरग्राह्य एव स्यादित्यनिष्टम् ।

अथ स्वप्रकाशं तत्साकारं ज्ञानमिष्यते तेन ज्ञानान्तरापेक्षणान्नानवस्थेति, तर्हि स्वप्रकाशसाकारज्ञानव्यतिरिक्तार्थाकारानवभासात्तदेवास्तु कुतो द्वितीय इदानीमर्थाकारः, न चान्यथाऽनुपपत्त्यापि तत्कल्पना युक्तिमती, न हि राजशासनमिदमर्थेनाकारवता भवितव्यमिति, ज्ञानमेव नीलाद्याकारं यदि भवेत्को दोषः स्यादिति, नीलाद्याकारयोगादर्थस्स इति चेत्संज्ञायां विवाद इत्युक्तम्, द्वितीयस्याभावात्, स्वच्छत्वाज्ज्ञानस्य कालुष्यमन्यकृतमिति चेदविद्यावासनाकृतं तद् भविष्यति, स्वतःस्वच्छमपि ज्ञानमनाद्यविद्यावासनाविभवेन तत्तदनेकाकारकालुष्यरूषितवपुरिव प्रकाशते, ज्ञानवासनाभेदसंतानयोश्च बीजाङ्कुरवदनादित्वान्नास्य पर्यनुयोगस्यावसरः 'कुतो वासना प्रवृत्ता' इति, तस्मादनादिवासनावैचित्र्यरचितज्ञानवैचित्र्योपपत्तेः कृतमनुमेयेनापि बाह्येनार्थेनेति ज्ञानस्यैवायमाकार इति सिद्धम्, अतश्च ज्ञानमर्थरहितमपि गन्धर्वनगरमायादिषु विस्पष्टमुपलभ्यते इत्यन्वयव्यतिरेकाभ्यामपि ज्ञानाकारत्वमवगच्छामः, यदि च ज्ञानादर्थः पृथगवस्थितात्मा भवेज्ज्ञानान्तरेणाप्यसावुपलभ्येत न चैवमस्ति, तस्मादभेद एव ज्ञानार्थयोः, तथा ऽऽह—'सहोपलम्भनियमादभेदो नीलतद्धियोः' इति, न च ज्ञानार्थसंसर्गधर्म आकारो भवितुमर्हति यदि हि पृथगर्थमनाकारं पृथक् च ज्ञानमनाकारमुपलभ्य संसृष्टयोर्ज्ञानार्थयोराकारवत्तामुपलभेमहि तत इममाकारं संसर्गधर्मं प्रतिपद्येमहि, न त्वयमस्ति क्रमः अर्थरहितत्वे ऽपि च स्मरणस्वप्नादिज्ञानानामाकारवत्त्वमस्तीत्युक्तम्, अतः कथं संसर्गधर्म आकारः।

अपि च नक्षत्रं तारका तिष्य इति कथमेकस्मिन्नर्थे परस्परविरुद्धलिङ्गसमावेशः, परिव्राजककामुककौलेयकानां च कथमेक एव वनितारूपो ऽर्थः कुणप इति कामिनीति भक्ष्य इति च प्रतिभासत्रितयविषयतामनुभवेत्, दारा इति कथमेकैव स्त्रीव्यक्तिः पुंवचनबहुवचनविषयतां यायात्, षण्णगरीति च कथं बहूनामन्यलिङ्गानामेकता स्त्रीलिङ्गता च भवेत्, ह्रस्वदीर्घयोश्च कथं परस्परापेक्षग्रहणयोरर्थेनैकतर आकारः पारमार्थिकः स्यात्, ज्ञानानां तु भिन्नत्वाद्विचित्रवासनाभेदसहकारिरूपानुविधानेन जायमानानां न कश्चिदपि विरोधः, तस्माज्ज्ञानमेवेदं सर्वत्र तथा तथा प्रतिभाति न तद्व्यतिरिक्तो ऽर्थो नाम कश्चिदिति ज्ञान एव चैकत्रायं प्रमाणप्रमेयप्रमितिव्यवहारः परिसमाप्यते, तस्य हि विषयाकारता प्रमेयं ग्राहकाकारता प्रमाणं स्वसंवित्तिश्च फलमिति, यथोक्तम्—

यदाभासं प्रमेयं तत्प्रमाणफलते पुनः।
ग्राहकाकारसंवित्त्योस्त्रयं नातः पृथक् कृतम्॥ इति॥

तदिदमनाद्यविद्यावासनाविलासविपर्यासिततत्त्वदर्शनतया ज्ञानमेव ग्राह्यग्राहकसंवित्तिभेदवदिव लक्ष्यते, अविद्याविरतौ तु स्वच्छमेव तत्सम्पद्यते न

किञ्चिद्वेति, तदुक्तम्—

नान्यो ऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवो ऽपरः ।
ग्राह्यग्राहकवैधुर्यात्स्वयमेव प्रकाशते ॥
अविभागो ऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥
इत्यर्थरूपरहितं संविन्मात्रं किलेदमिति पश्यन् ।
परिहृत्य दुःखसंसृतिमभयं निर्वाणमाप्नोति ॥

विज्ञानवादिमतखण्डनम् ।

अत्राभिधीयते, न खल्वेक एव बोधात्मा ग्राह्यग्राहकोभयस्वभावो भवितुमर्हति ग्राह्यग्राहकरूपयोरितरेतरविसदृशत्वेनैकत्र समावेशानुपपत्तेः, तथा हि नीलज्ञानं पीतज्ञानं शुक्लज्ञानमिति नीलपीताद्युपजनापायेऽप्यनुवर्तमानबोधरूपता नीलादिविलक्षणान्वयव्यतिरेकाभ्यामवधार्यते ।

अपि च ज्ञानमहंकारास्पदमानन्दादिस्वभावं स्वकर्मणि च सव्यापारमिव भवद्भिरभ्युपगतमर्थस्तु नैवमात्मक इति कथमनयोरभेदः, यद्यपि ज्ञानमिदमयमर्थ इत्येवमाकारद्वयप्रतिभासो नास्ति तथा ऽप्ययमेको ऽप्याकारः प्रतिभासमानः प्रकाश एव प्रतिभाति न प्रकाशकः, इदं नीलमिति ग्राहकाद्विच्छिन्न एव ग्राह्याकारोऽवभासते न त्वहं नीलमिति तदैक्येनावभासो ऽस्ति ,

अपि च प्रकाश्यस्य नीलादेः प्रकाशकबोधाधीनं युक्तं नाम ग्रहणं बोधस्य तु तद्ग्राहकस्य तदा किं कृतं ग्रहणमिति चिन्त्यम् , न बोधान्तरनिबन्धनमनवस्थाप्रसङ्गात् , नापि स्वप्रकाशं ज्ञानमहं नीलमित्यप्रतिभासात् ।

ननु नैव ग्राह्यग्राहकयोरन्यत्वमिति यो ऽयं ग्राह्यावभास इति भवता ऽभ्युपगतस्स एव ग्राहकावभासः , ग्राहकादन्यो हि ग्राह्यो जडात्मा भवेत् , ग्राहकस्तु प्रकाशस्वभावो ग्राहकत्वादेव द्वयप्रतिभासश्च नास्तीत्युक्तम् , ततोऽन्यतरस्य प्रकाशने जडप्रकाशयोः कतरस्यावभासितुं युक्तमिति चिन्तायां बलात्प्रकाश एव प्रकाशते न जडः , निराकारश्च न प्रकाशः प्रकाशत इति तस्मिन्साकारे प्रकाशमाने चतो जडात्मा तदतिरिक्तो ऽर्थः स्यात् ।

तदिदमपेशलम् , उपायेनोपेयनिह्नवस्याशक्यकरणीयत्वात् , रूपस्य हि प्रकाशकं चक्षुर्न चक्षुरेव प्रकाशतामित्युक्त्वा रूपमपह्नोतुं शक्यते, तदिदमर्थस्य मूर्तिद्रवत्वकाठिन्यादिधर्मविशेषितात्मनस्तद्विपरीतस्वच्छस्वभावं ज्ञानं प्रकाशकं स्वभावत्वात् , चक्षुर्जन्यो हि प्रकाशो नाम ज्ञानमुच्यते नचागृहीतः प्रकाशः प्रकाश्यं प्रकाशयतीति, चक्षुर्जन्यः प्रकाशो ज्ञानमुच्यते स तु प्रकाशो रूपादिविषयप्रकाशो न प्रकाशप्रकाशः , न हि चक्षुषः प्रकाशः प्रकाश्यते ऽपि तु रूपं प्रकाश्यते , तत्र यद्भूमित्युच्यते स विषयो ग्राह्यः यत्तत्प्रकाशते इत्युच्यते स प्र-

काशो ज्ञानं ग्राहकं तदुत्पत्तिमात्रेण च रूपं प्रकाशितं भवतीति न प्रकाशो ग्रह-णमपेक्षते,

ननूक्तमत्र नानुपलब्धायां बुद्धावर्थः प्रकाशते ऽ'प्रत्यक्षोपलम्भस्य नार्थ-दृष्टिः प्रसिध्यती'ति, तदयुक्तम्, अप्रत्यक्षोपलम्भस्य च प्रत्युतार्थदृष्टिः सि-द्ध्यति, उपलम्भोत्पाद एवार्थदृष्टिर्न पुनरुपलम्भदृष्टिः।

ननूपलब्धेरग्रहणे तदुत्पाद उत्पन्नोपलम्भस्याप्यर्थः प्रत्यक्षः स्यादिति सर्वसर्व-ज्ञत्वप्रसङ्गः, तदिदमतिसुभाषितम्, अर्थप्रकाशात्मैव खलूपलम्भः स कथमनुत्प-न्नादुत्पन्नेन विशेष्यते, तस्मादर्थप्रत्यक्षीकरणात्मकत्वाज्ज्ञानस्य उत्पाद एवार्थ-प्रत्यक्षता न तद्ग्रहणमित्यगृहीतमेव ज्ञानमर्थप्रकाशकमिति युक्तम्।

यत्त्वरूपत्वाज्ज्ञानस्य पूर्वं ग्रहणमुच्यते, तच्चक्षुरादिभिरनैकान्तिकमित्युक्तम्।

गृहीतं यदि च ज्ञानं भवेदर्थप्रकाशकम्।
धूमवद्दीपवच्चेति वक्तव्यं यदि धूमवत्॥
भवेदर्थानुमेयत्वं यत्त्वयैव च दूषितम्।
आकारद्वयसंवित्तिविरहान्न च दीपवत्॥
घटं दीपं च पश्यामीत्यस्ति द्वितयवेदनम्।
न तु ज्ञानेन विज्ञेयं जानामीति द्वयग्रहः॥

यदपि प्रकाशत्वाज्ज्ञानस्य दीपवत्पूर्वग्रहणमुक्तम्, तदपि व्याख्येयम्, प्र-काशत्वादिति को ऽर्थः? प्रकाशयतीति प्रकाशत्वमिति, तच्चक्षुरादिभिरनैकान्ति-कमुक्तमेव, अथ प्रकाशनं प्रकाशः, तर्हि प्रकाशत्वादित्यसिद्धो हेतुः, न ह्यर्थग्रह-णकाले बुद्धेः प्रकाशनमस्ति, अथ प्रकाशशब्दो बोधपर्याय एव प्रकाशत्वाद् बो-धरूपत्वादित्यर्थः, तदा साधनविकलो दृष्टान्तः प्रदीपस्य बोधरूपत्वाभावात्, अतश्च स्वसंवेदनपक्षो न युक्तियुक्तः स्वप्रकाशस्य कस्य चिदप्यदृष्टत्वात्,

ननु ज्ञानशब्ददीपास्त्रयः प्रकाशाः स्वपरप्रकाशा इत्याहुः, तदयुक्तं शब्द-दीपयोः स्वग्रहणेऽर्थप्रकाशने च सामग्र्यन्तरसव्यपेक्षत्वात्, शब्दोऽर्थप्रकाश-ने समयग्रहणमपेक्षते, स्वप्रकाशने च श्रोत्रादि, दीपो ऽपि चक्षुराद्यपेक्ष एव गृह्य-ते ग्राहयति चार्थम्, इयांस्तु विशेषो—घटादिग्रहणे आलोकसापेक्षं चक्षुः प्रवर्तते आलोकग्रहणे तु निरपेक्षमिति नैतावता दीपस्य स्वप्रकाशता स्यात्, इत्थं च मार्जारादिनक्तंचरचक्षुरपेक्षया सर्व एव घटादयः स्वप्रकाशाः स्युः, ज्ञानस्य तु परप्रकाशत्वमेव दृश्यते न स्वप्रकाशत्वमर्थप्रकाशकाले तदप्रकाशस्य दर्शितत्वात्।

मुधैव तस्माद्गणितास्त एते त्रयः प्रकाशाः स्वपरप्रकाशाः, आत्मप्रत्यक्ष-वादिनां त्ववस्थाभेदेन ग्राह्यग्राहकांशयोर्भेदो विद्यते एवेति सर्वथा न स्वप्रकाशं विज्ञानम्।

यदप्यभिहितमुत्पद्यमानमेव ज्ञानमनपेक्षत्वादप्रतिबन्धत्वाच्च तदैव गृ-

ह्यते नवा कदा चिदिति, तन्न साम्प्रतम् , तदानीं तद्ग्रहणसामग्र्यभावात् ,

न चाविबन्धमात्रेण प्रतीतिरवगम्यते ।
उपायविरहेणापि तदा ज्ञानस्य न ग्रहः ॥

न च जैमिनीया इव वयं ज्ञानं नित्यपरोक्षमाचक्ष्महे ज्ञातो मयाऽयमर्थ इति कालान्तरे तद्विशिष्टार्थग्रहणदर्शनात् ।

शुक्लः पट इति ज्ञाने यथासौ भाति तद्गुणः ।
तथा ज्ञातो ऽर्थ इत्यत्र भात्यर्थो धीविशेषणः ॥
न विशेष्ये च संवित्तिरगृहीतविशेषणा ।
नानुसायधियं वेत्थं प्रतीयेत भ्रमाग्रहात् ॥

न च नित्यपरोक्षा बुद्धिरनुमातुमपि शक्यते इति च विचारितमेव, तदलमनया कथया किमिति शाक्यमुत्सृज्य श्रोत्रियमिदानीमभियुञ्ज्महे ।

अतश्च यदुक्तं ज्ञानपृष्ठावमर्शदर्शनाज्ज्ञानग्रहणपूर्वकमर्थग्रहणमिति तन्न सार्वत्रिकमपि तु क्व चिदेव ज्ञाननिष्ठार्थसंवेदनात्तथा ऽभ्युपगम्यते, तस्मादर्थग्रहणात्पूर्वं ज्ञानस्यानवभासान्निराकारत्वावसायविरहाच्च ज्ञानस्यैवायमाकार इति कदाशाप्रलपितमेतदरुणाम्बराणाम् ।

यत्पुनरभ्यधायि 'ज्ञानाकारपक्षे कल्पना ऽल्पीयसी'ति, तत्र यथोक्तनीत्या प्रत्यक्षगम्ये बाह्ये ग्राह्येऽर्थाकारे कल्पनोक्तिः कीदृशी ? कीदृशं वा तदल्पत्वं महत्त्वमित्युभयसिद्धमपि यदवादि ज्ञानस्य, तत्र यदि प्रमाणायत्ता वस्तुस्थितिः अर्थो ऽप्युभयसिद्ध एव, इच्छाद्वेषनिबन्धनायां तु वस्तुस्थितौ ज्ञानमपि कथमुभयसिद्धं स्यादिति यत्किंचिदेतत् ।

यत्पुनरिदमभिहितमभ्युपगम्यापि बाह्यमर्थमप्रत्याख्येयः प्रतिकर्मव्यवस्थासिद्धये ज्ञानस्याकारयोग इति, तदपि न साम्प्रतम् , प्रतिकर्मव्यवस्थायाः प्रकारान्तरेणाप्युपपत्तेः ।

यदप्यनेकसन्निधाने नीलज्ञानमुत्पद्यते यद्यपि बोधरूपत्वमशेषसाधारणं तथा ऽपि नीलेनैव कर्मकारकेण तदुपजनितमिति नीलनिष्ठमेवावतिष्ठते, चक्षुरादिना ऽपि तज्जनितमिति चेत्सत्यं जनितं न तु कर्मभूतेन तदुत्पाद्यते इति तदेकविषयमेव भवति, कुत एष नियम इति चेद्वस्तुस्वभावत एव, आकारपक्षे ऽपि समानो ऽयं पर्यनुयोगः ।

यदुच्यते किमिति नीलमेव कर्म कारकं किमिति वा कर्मविषयमेव ज्ञानमिति, तत्र वस्तुस्वभावैरुत्तरं वाच्यम् , आकारमपि च ज्ञानमुपाददानमर्थस्यैव कथमुपाददीत न कारकान्तरस्येत्यत्रापि वस्तुस्वभाव एव शरणमिति, अर्थस्य च ज्ञानजनकत्वमन्वयव्यतिरेकाभ्यामवगम्यते ।

यदा हि देवदत्तार्थी कश्चिद् व्रजति तद्गृहम् ।
तत्रासन्निहितं चैनं गत्वाऽपि न स पश्यति ॥
क्षणान्तरे स आयान्तं देवदत्तं निरीक्षते ।
तत्र तत्सदसत्त्वेन तथात्वं वेत्ति तद्धियः ॥

अनागते देवदत्ते न देवदत्तज्ञानमुदपादि तस्मिन्नागते तदुत्पन्नमिति तद्भावभावित्वात्तज्जन्यं तदवसीयते, इत्थं च तज्जन्यत्वेन तत्र नियमसिद्धेरलमाकारकल्पनया, एतेन पुरुषप्रवृत्तिरपि नियतविषया व्याख्याता, साधकतमत्वं तु सामग्र्याः प्रमाणसामान्यलक्षणे निर्णीतमेव ।

यस्तु लौकिकव्यपदेश उदाहृतः, सोऽपि व्यभिचरति नीलोऽयं यतस्तद्विषयं ज्ञानमुत्पन्नमित्यपि न तद् व्यपदिशन्ति लौकिकाः, तस्मा'दर्थे सत्यपि साकारं ज्ञानमेषितव्यम्' इति यदुक्तं तदनुपपन्नम् ।

यदप्यवर्णि सहोपलम्भनियमादभेदो नीलतद्धियोरिति, तदपि बालभाषितमिव नः प्रतिभाति अभेदे सहार्थानुपपत्तेः, अर्थैकोपलम्भनियमादिति हेत्वर्थो विवक्षितः, तदयमसिद्धो हेतुर्नीलादिग्राह्यग्रहणसमये तद्ग्राहकानुपलम्भात्, ग्राहकाकारानुवेधरहिततद्विच्छिन्नो बाह्यग्राह्यमात्रप्रतिभास एवायं नीलमिदमित्यादि दर्शितः, क्वचिच्च ग्राह्याकारानुपश्लिष्टकेवलग्राहकावमर्शनमपि दृश्यते न स्मरामि मया कोऽपि गृहीतोऽर्थस्तदेति हीति, तदेवमितरेतरविभक्तज्ञानार्थाकारसंवेदनात्कथमेकोपलम्भनियमादभेदो नीलतद्धियोरित्युच्यते, नीलतद्धियोरिति च वदता भवताऽप्येष भेद एव निर्दिश्यते, परमतानुवादमात्रमेतदिति चेन्नाभेदे पृथङ् निर्देशस्याप्यघटमानत्वात् , तस्मादपि न ज्ञानस्यायमाकारः ।

यदप्युक्तम् 'असत्यपि बाह्येऽर्थे स्वप्नगन्धर्वनगरमायादिषु ज्ञानस्याकारवत्ता दृश्यते इति तस्यैवायमाकारो युक्त' इति, तदपि दुराशामात्रं–सर्वत्र ज्ञानाद्विच्छिन्नस्य ग्राह्याकारस्य प्रतिभासनात् , तथा हि–भ्रमज्ञानेषु चतुष्टयी गतिरात्मख्यातिरसत्ख्यातिरख्यातिर्विपरीतख्यातिर्वा, तत्र रजतमिदमिति सामानाधिकरण्येनैकार्थप्रतिभासात्तन्मते च संवित्तेरपरोक्षत्वाद्रजताधिगमाभिधानेन तदर्थिनस्तत्र प्रवृत्तेर्बाधकप्रत्ययस्य तथाविधबोधनिषेधपरत्वेन प्रादुर्भावान्न तावदख्यातिरिति प्रागेव प्रसाधितमेतत्

असत्ख्यातिनिरासः ।

असत्ख्यातिरपि नास्ति एकान्तासतः खपुष्पादेः प्रतिभासायोगात् , देशकालव्यवहितानुभूतपूर्वपदार्थविषय एव भ्रान्तोऽपि प्रत्ययः प्राणभृतां भवति न त्वत्यन्तासदर्थविषयः , तथा हि द्विविधा भ्रान्तिर्बाह्येन्द्रियजा मानसी च, तत्र बाह्येन्द्रियजे भ्रमज्ञाने विषयदोषादिन्द्रियदोषाद्वा समुत्पद्यमाने न क

चिन्निरालम्बनता दृश्यते भास्वररूपसादृश्येन हि विषयदोषेण शुक्तिकारजतमिति परिस्फुरति, मरुस्थलपतितोत्फलितं सावित्रं तेजस्तरलतरङ्गसारूप्येण पय इति चकास्ति, इन्द्रियदोषादपि पित्तोपहतरसनस्य तिक्ततया शर्कराऽवभासते, तिमिरसीमन्तितनयनवृत्तेश्चन्द्रमण्डलमेकमपि द्विधा प्रतिभाति तिमिरकणनिकरविवरविरचितप्रसृताश्च नयनरश्मयः सूर्यांशुसंवलिताः सन्तः सूक्ष्मतया केशकूर्चकाकाराः प्रतिभान्तीति ।

अन्तःकरणदोषेण विभ्रमो यस्तु जायते ।
असत्यपि महेलादौ पुष्पेषु मुषितात्मनाम् ॥
सो ऽपि कश्चिद्विषयदोषाद्धि भवति कुत्र चित् ।
कोमलानिलकल्लोलवेल्लिते बालपल्लवे ॥
अनपेक्षिततत्तुल्यपदार्थस्यैव या पुनः ।
मानसी मन्मथोन्मादमहिम्ना मानिनीमतिः ॥

तस्यामपि रोगादिवासनाबलोपप्लवमानसंवृत्त्याद्युपस्थापितदेशकालव्यवहितोपलब्धपूर्वपुरन्ध्रिरूपः समुल्लेखो न त्वेकान्तासतः खरविषाणादेरिव, प्रतिभानिद्रादिमनोदोषजन्मनि स्वप्ने ऽपि दृष्टपूर्वस्यैव तस्याकारस्योल्लेखः ।

ज्वलज्ज्वलगलद्वह्निद्रवदद्र्यादिदर्शने ।
रूपमन्यस्थमन्यत्र वेत्ति न त्वसदेव तत् ॥
तदेवं भ्रान्तबोधेषु नास्त्यत्यन्तासतां प्रथा ।
देशकालान्यथात्वं तु केवलं भाति वस्तुनः ॥

ननु तत्रासतो ऽर्थस्य प्रतिभासे देशान्तरादिषु सत्त्वं क्वोपयुज्यते देशान्तरे हि सन्नसन्वा ? तत्र तावन्नास्त्येव सोर्थः, न च द्वयोरसत्त्वयोः कश्चिद्विशेषः देशकालावपि किं सन्तावसन्तौ वा प्रतिभासेते इति विकल्पनायां तथा तयोरपि तुल्यो दोषः ।

नैवम् भवतो ऽप्यसत्ख्यातिवादिनः किं सर्वत्रैव तदर्थासत्त्वं सम्मतमुत तद्देश एव, तत्रासन्निधानमात्रेण तावत्क इव तव स्वार्थः, सर्वत्रासतस्त्ववभासे कुतस्त्य एष नियमो यदसत्त्वाविशेषे ऽपि रजतादि संप्रति न खरविषाणादीति, अयं च द्वयोरसत्त्वयोर्विशेषः देशान्तरादिषु सतो ऽर्थस्य स्मरणाद्युपारोहेण प्रतिभासमानता दृश्यते न त्वेकान्तासत इति, एवं देशकालयोरपि सदसद्विकल्पचोद्यं परिहर्तव्यम्, अतश्च किं चिदपि नात्यन्तासदर्थग्राहि ज्ञानमस्तीति किं दृष्टान्तबलेन सर्वत्रार्थशून्यता कल्प्येत तस्मान्नासत्ख्यातिः ।

आत्मख्यातिनिरासः ।

आत्मख्यातेस्तु निराकरणाय सो ऽयमियान्कलिर्वर्तते, तत्र च बहुशः कथितं ग्राहकाद्विच्छिन्नमेव ग्राह्यमवभासते नीलमिदमिति न तु तदभेदेन नील-

महमिति, भ्रान्तिज्ञानेषु तदर्थसन्निधानाद् भ्रान्तत्वमस्तु नात्मतत्त्वग्रहणमिति यच्चोद्यते, तदन्तर्ज्ञेयरूपं हि बहिर्वदवभासते इति सेयं विपरीतख्यातिरेवाङ्गीकृता स्यात्, तद्वरमेव तपस्विनो साधीयसी।

अथ कथ्यते ग्राहकात्सत्यं विच्छिन्नं ग्राह्यं तत्त्वज्ञानरूपमेवेति, तत्र विच्छिन्नमिति प्रियमात्रेदितं ज्ञानत्वे तु तस्य का युक्तिः, न च ज्ञानयोर्युगपदुत्पन्नयोर्वा क्रमभाविनोर्वा ग्राह्यग्राहकभाव उपपद्यते यौगपद्ये सव्येतरगोविषाणवद् ग्राह्यग्राहकनियमाभावात्, क्रमपक्षे ऽपि पूर्वमुत्तरस्य ग्राहकात्तदुत्पत्तिस्तद्ग्रहणकालप्रतीक्षणात् क्षणिकतां जह्यात्, उत्तरमपि यदि पूर्वस्य ग्राहकं तथा ऽपि सैव वार्ता, तावत्कालस्थितिमन्तरेण तद्ग्राह्यताऽनुपपत्तेः, न च ज्ञानत्वं नाम सामान्यं ग्राह्यग्राहकयोरनुगतं गोत्वमिव शाबलेयादौ भाति, अतो विच्छिन्नश्चेद् ग्राहकाद्ग्राह्यः सो ऽन्य एव भवेदिति न ज्ञानस्यायमाकारः,

यत्तु संसर्गधर्म आकारो न भवति इति भाषितं, तद्युक्तमेव,—

न कुण्डदधिवत्कश्चित्संसर्गो ऽस्त्यर्थबोधयोः।
तत्कृताकारवत्ता वा प्रागनाकारयोस्तयोः॥

तदेवं शाक्योक्तयुक्तिकौशलदौर्बल्यात्सर्वत्र विच्छेदप्रतिभासात्स्वच्छात्मनश्च ज्ञानस्य स्वतो विचित्रत्वानुपपत्तेः अर्थस्यैवायमाकार इति सिद्धम्।

यत्त्वाकारपक्षे चोदितमेकत्रार्थे नक्षत्रं तारका तिष्य इति परस्परविरुद्धाकारसमावेशो न युक्त इति, तत्रोच्यते—अनुपपन्नमिति नः क्व संप्रत्ययो यत्र प्रमाणेनावगतं विरुद्धमपि तद् बुद्ध्यामहे यदेकत्र निविशमानं न पश्यामः, तदिह यद्यबाधितेन ज्ञानेन विस्पष्टमाकारत्रयमेकत्र गृह्यते तत्कथमनुपपन्नं स्याद्विरुद्धमिति।

अथैकं सम्यक्प्रमाणपरिनिश्चितरूपमितरत्काल्पनिकमिति प्रतीयतेत देवमस्तु को दोषः, दृष्टश्च चित्रादावनेकबलसमावेशः, न चैकत्र विरोधमविरोधं वा दृष्ट्वा सर्वत्र तत्कल्पनमुचितमबाधितावगतिनिबन्धना हि वस्तुस्थितयो भवन्ति न कल्पनानिर्मिताः।

अपि वा वस्तुताद्रूप्यसदसत्तानपेक्षया।
शब्दप्रयोगसाधुत्वमन्वाख्यायेत केवलम्॥

दारा इति नैकस्याः स्त्रीव्यक्तेः पुंस्त्वं बहुत्वं वा विद्यते शब्दस्त्वेष तत्र प्रयुज्यमानः साधुर्भवति।

नार्थासंस्पर्शिता चास्य तावतां व्यवतिष्ठते।
असौ तदात्मकं वस्तु तथा शक्नोति भाषितम्॥
परिव्राट्प्रभृतीनां च कुणपादिप्रतीतयः।
अर्थस्यानेकशक्तित्वाभावद्दन्त्यर्थशून्यताम्॥

किं न भक्षयितुं शक्या नारी कौलेयकेन(१) सा।
किं वा न शमयत्येषा कामिनो मदनज्वरम्॥
शवाद्वा केन रूपेण सा विशिष्येत योगिनः।
धीत्रयं तु न सर्वेषामभावात्सहकारिणः॥

प्रतिप्राणिनियतानेकविधवासनासहकारिसापेक्षो हि तस्य ज्ञानस्यात्मलाभ इति न सर्वेषां सर्वसारूप्येण ज्ञानम्।

यद्येवं वासनाभेद एव विविधप्रतिभोद्भवहेतुर्भवति किमर्थकल्पनया, अयि साधो किमद्यापि न परिहरसि सुचिरं गुणितां कल्पनावाचोयुक्तिं न ह्यर्थः कल्प्यतेऽपि तु प्रतिभासते एव, बहुरूपस्य तु तस्यैकतमरूपपरिच्छेदनियमे किमपि वासनादि कारणं कचित्कल्प्यते कस्तावताऽर्थनिह्नवस्यावकाशः।

यच्चेत्थं—वासनाभेद एव ज्ञानवैचित्र्यकारणमितरेतरकार्यकारणभावप्रबन्धश्च बीजाङ्कुरवदनादिर्ज्ञानवासनयोः—इति, तदप्यघटमानम, केयं वासना नाम? ज्ञानादव्यतिरिक्ता चेत्सा ऽपि स्वच्छरूपत्वान्न ज्ञानकालुष्यकारणं भवेत्, ज्ञानव्यतिरिक्ता चेद्वासना तद्वैचित्र्यहेतुश्च सोऽर्थ एव पर्यायान्तरेणोक्तः स्यात्।

अपि च वासना विषयानुभवसमाहितः संस्कार इति लोके प्रसिद्धिः, संस्कारश्च यदनुभवघटितः तत्रैव कचिदवसरे स्मरणमनुभवति न पुनरसदेव वैचित्र्यमिदमीदृशमावहति।

किञ्च भिक्षुपक्षे क्षणिकत्वेन ज्ञानानां ग्राह्यग्राहकभाव इव वास्यवासकभावोऽपि निराकर्त्तव्यः, स्थायिनो हि भावास्तिलादयः स्थायिभिरेव चम्पकादिभिर्वास्यन्ते न तूत्पन्न सपद्येव नश्यद्भिः ज्ञानैस्तादृश्येव ज्ञानानीति।

निरन्वयविनाशाच्च न तदंशो ऽनुवर्तते।
यतः कथंचिद्वास्येत पूर्वेण ज्ञानमुत्तरम्॥

अपि चैकत्र देवदत्तसन्ताने वासना यतः सहस्राणि ज्ञानवैचित्र्यकारीणि भवेयुः, न हि गोवासनातो हस्तिज्ञानमुदेति।

अनन्तत्वे ऽपि खल्वासामारम्भे नियमः कुतः।
असमञ्जसकारित्वे व्यवहारस्य विप्लवः॥
धूमज्ञानसमुत्पादे धूमवासनया कृते।
कं तदा न जलज्ञानं जनयेज्जलवासना॥

वासनाश्च स्वसदृशवासनासन्तानारम्भहेतव एव भवेयुः न पुनरनुभवज्ञानमाधातुमुत्सहेयुः, सदृशात्सदृशोत्पत्तिरिति हि भवतां दर्शनम्।

अपि च न निराधारा वासना आसते न च भवत्पक्षे तदाधारः कश्चन सम्भवति भङ्गुरत्वेन ज्ञानस्य तदाश्रयत्वानुपपत्तेः, एकज्ञानाश्रितत्वे सर्वासां

(१) कौलेयकेन—शुना।

वासनानां तद्विनाशे नाशः स्यात्, प्रतिवासनमाश्रयभेदे तदानन्त्यमनियमश्च शतशाखः, न चालयविज्ञानं नाम किंचिदस्ति, सत्यपि तस्मिन्नशेषवासनासहस्रसमाश्रये तत्क्षणिकत्वात्सकृदेव तथाविधवासनाकुमूलज्ञानविनाशः स्यात्, पुनरुत्पादे तथाविधमेव तज्ज्ञानमुत्पद्यते न तु गवाश्वादिक्रमनियमो भवेदिति सर्वथा सङ्कटो ऽयं पन्थाः, तस्मान्मृगतृष्णैषा तपस्विनां वासनात एव लोकयात्रासिद्धेः किं बाह्येनार्थेनेति।

कृतमतिवाचालतया चिरमपि निपुणैर्निरूप्यमाणो ऽतः।
अर्थस्यैव न बुद्धेः सिध्यति नीलादिराकारः॥
एकश्च बोधः प्रमितिप्रमाणप्रमेयरूपाणि कथं बिभर्ति।
भिन्नप्रमाणात्फलमभ्यधायि प्रत्यक्षचिन्तावसरे पुरस्तात्॥

बाह्यार्थशून्यत्वनिरासः।

ये तु ब्रुवते–तिष्ठतु तावत्प्रमाणमात्रं प्रमेयमेव विकल्पयन्तो न बाह्यमर्थं कंचन निरपवादं प्रतिपद्यामहे, तथा हि–न तावदयमवयवी घटादिरवकल्पते अवयवव्यतिरेकेणावयविनो ऽनुपलम्भात्, यो हि यस्माद्व्यतिरिक्तः स तदधिष्ठितदेशव्यतिरिक्तदेशाधिष्ठान उपलभ्यते घटादिव पटो, न चैवमवयवेभ्यः पृथग्देशो दृश्यते, न चावयवानुपलब्धाववयवीति कथमेतेभ्यो भिद्यते, अवयवग्रहणानुपपत्तेश्च,–न हि सर्वे तदवयवाः शक्यन्ते ग्रहीतुमर्वाग्भागवर्तिन एव गृह्येरन्न मध्यपरभागगता इति, (यदा?) बुद्ध्या विविनक्ति एष तन्तुरेष तन्तुरिति तदा प्राच्यादञ्चलात्प्रभृति प्रतीचीनमञ्चलं यावद्विविञ्चन्नसौ तन्तुसन्ततिमेव केवलामुपलभते न ततोऽतिरिक्तपटावयविनम्, वृत्त्यनुपपत्तेश्च,–नैकत्रावयवे कार्त्स्न्येनावयवी वर्तते, तेष्वपि कथं वर्तते अन्यैरेकदेशैस्तेष्वपि अन्यैरिति नास्त्यन्यः, असम्बद्धस्त्वेकदेशैरवयवेष्वस्तीति कथं तद्द्वारकैरपि सम्बध्येत, तस्मादुभयथापि नास्य वृत्तिरवयवेष्वस्तीति, धारणाकर्षणादि त्वनारब्धकार्ये काष्ठमूलककार्पासादावपि दृश्यते इत्यनैकान्तिकम्, एकाकारा तु प्रतीतिर्विकल्पमात्रम् एकदेशावस्थानादिनिमित्तमाश्रित्य करितुरगपदातिष्विव सेनेति धवखदिरपलाशादिष्विव वनमिति सञ्चितेष्ववयवेष्वेव घट इत्यादिप्रतीतिर्भविष्यतीत्येवमवयव्यवयवावयवपर्यालोचनयाऽणुसञ्चयमात्रमेवावशिष्यते नान्यत्, सञ्चयोऽपि च व्यतिरिक्ताव्यतिरिक्ततया चिन्त्यमानो नास्त्येवेत्यणव एवावशिष्यन्ते, परमाणवोऽपि 'षट्केन युगपद्योगात्परमाणोष्षडंशता'त्येवं विकल्प्यमाना विप्लवन्त एव, न च तैरतिसूक्ष्मैरेष व्यवहारोऽभिनिर्वर्त्यत इति, तस्माद् बाह्यस्य प्रमेयस्यैव निरूप्यमाणस्यानुपपत्तेर्विज्ञानमात्रमेवेदमित्यभ्युपगमनीयम्–(इति?)।

तेप्येवं वदन्तः प्राक्तनेभ्योऽपि भिक्षुभ्यः कृपणतरा इव लक्ष्यन्ते, अपूर्व एष तर्कमार्गो यत्र प्रतीतिमुत्सृज्य तर्जनीविस्फोटनेन वस्तुव्यवस्थाः क्रियन्ते ।

दृढेन चेत्प्रमाणेन बाधादिरहितात्मना ।
गृहीत एवावयवी किमेभिर्बालवल्गितैः ॥
अथ नास्ति प्रमाणेन केनचित्तदुपग्रहः ।
एतदेवोच्यतां वृत्तिविकल्पैः किं प्रयोजनम् ॥

न च शक्नुमः पदे पदे वयमेभिरभिनवमल्पमपि किंचिदपश्यद्भिस्तदेव पुनः पुनः प्रकुर्वद्भिः शाक्यनर्तकैः सह कलहमतिमात्रं कर्त्तुम्, अविकल्पं प्रत्यक्षं प्रमाणमिति साधितम्, निर्विकल्पकेनापि शब्दोल्लेखमात्ररहितमविकल्पकग्राह्यमेव वस्तु गृह्यते इति दर्शितम्, एकाकारविषयव्यतिरेकेण च तद्बुद्धेरेककार्यत्वैकदेशव्यवस्थानाद्यन्यथासिद्धिनिबन्धनमपि न किंचिद्वक्तुं शक्यते इत्युपवर्णितम्, क्वचिद्वा पृतनादौ बाधकोपनिपातादेवावगतिमिथ्यात्वान्न सर्वत्र मिथ्यात्वकल्पना युक्तेत्यप्युक्तम्, किं वा तदस्ति यत्सामान्यसमर्थनावसरे न कथितम्, तस्मात्तयैव नीत्याऽवयव्यपि सिद्ध एव तद्ग्राहिणः प्रत्यक्षस्य निरपवादत्वात् ।

यत्तु देशभेदेनाग्रहणात्तदग्रहे तद्बुद्ध्यभावादिति, तत्रावयवाश्रितत्वमेव निमित्तं नासत्त्वम् ।

देशभेदेन हि ज्ञानं तत्त्वे तस्य कथं भवेत् ।
न हि कश्चित्स्वतन्त्रोऽसावपि त्ववयवाश्रितः ॥
यावतां ग्रहणे चास्मिन् बुद्धिर्भवति तावताम् ।
अपेक्षतेऽसौ ग्रहणं न सर्वेषामिति स्थितिः ॥
विविच्यमानेष्वंशेषु युक्तस्तदनुपग्रहः ।
तदावयविनाशो हि बुद्धौ विपरिवर्तते ॥

अवयवविभागो ह्यवयविनो विभागहेतुस्तस्मिन् बुद्ध्या समुल्लिख्यमानेऽवयवविनाशोऽपि नानुल्लिखितो भवेदिति कथमवयवी तदानीं गम्यते ।

वृत्तिश्चावयवेष्वस्य व्यासज्यैवेति गम्यते ।
न प्रत्यवयवं तस्य समाप्तिर्व्यक्तिजातिवत् ॥
व्यासज्य वर्तमानोऽपि न खल्ववयवान्तरैः ।
वर्तते तदसंवित्तेः किन्तु वर्तत एव सः ॥

तथा चाहुः—'वर्तत एव भूमः अनाश्रितस्यानुपलम्भात्' ।

वृत्तिरेवम्विधाऽन्यत्र क्व दृष्टेति यदुच्यते ।
प्रत्यक्षदृष्ट एवार्थे दृष्टान्तान्वेषणेन किम् ॥

बाह्यार्थसाधनम् ।

तस्मात्प्रत्यक्षत एवावयववृत्तेरवयविन उपलब्धेर्न तद्वृत्तौ विकल्पानामवसरः, स्रक्सूत्रादिवृत्तिरपि तथा दर्शनादभ्युपगता, तदियमवयविवृत्तिरपीदृशी दृश्यमाना किमिति निह्नूयते, न चावयविग्राहिणः प्रत्यक्षस्य कश्चिदपवादः समस्ति ।

अदुष्टकरणोद्भूतमनाविर्भूतबाधकम् ।
असन्दिग्धं च विज्ञानं कथं मिथ्येति कथ्यते ॥

न च सेनावनवदवयविग्रहणमभिधातुमुचितम् अबाधितत्वात्सेनादौ च बाधकसम्भवात्, अपि च गजवाजिपदातिपीलुपलाशशिंशुपादिदर्शनस्य तत्र घटमानत्वात्तत्समवाये सेनावनादिप्रतीतिरुत्पद्येतापि इह तु किं समुदायविषयः पटप्रत्यय इति चिन्त्यम्, तन्तुसमुदायालम्बन इति चेत्, तन्तुप्रत्यय इदानीं किमालम्बनः, सोऽपि स्वावयवालम्बन इत्येवमवयवावयवनिरूपणे परमाणवः पत्त्यश्वशमीशिंशपादिस्थानीया वक्तव्यास्तेषां च तद्वद्ग्रहणमनुपपन्नमतीन्द्रियत्वादिति न तदालम्बनोऽवयविप्रत्ययः, तस्मादवयवी प्रत्यक्षग्राह्योऽस्तीति सिद्धम् । परमाणवो ऽपि कार्यानुमानपरिनिश्चितनित्यनिरवयवस्वरूपाः सन्तीति पूर्वमेव समर्थितम्, अतो न षट्कयोगादिना सावयवत्वमेषामुपपादयितुं पार्यते, मूर्तत्वमप्यनित्यतायामप्रयोजकमिति दर्शयिष्यतेऽतः प्रमेयपर्यालोचनवर्त्मनाऽपि शून्यवादसमर्थनं न सुशकम्, प्रमेयविचारोऽपि निष्प्रमाणवृत्तमेव निरूप्यते, ततश्च प्रमाणचर्चातो बिभ्यद्भिः पलाय्य या प्रमेयकथावीथी तथागतैरवलम्बिता तस्यामपि सैव भीषणमुखी प्रमाणचर्चैवोपनता ।

सर्वतो विपदां मार्गमादेशयितुमुद्यते ।
विधौ विधुरतां याते प्रपलाय्य क गम्यते ॥
तस्मात्प्रमाणतोऽशक्ये शक्ये वा वस्तुनिर्णये ।
एवम्प्रायमयुक्तं यत्कुशकाशावलम्बनम् ॥
तेन निष्फलमुत्सृज्य शून्यवादबकव्रतम् ।
बाह्येनवार्थजातेन व्यवहारो विधीयताम् ॥

अथास्थाशैथिल्यजननाय सर्वं शून्यं क्षणिकं सर्वं निरात्मकमित्युपदिश्यते, तर्हि किमनेन मृषोद्येन, सत्यप्यात्मनि सत्स्वपि स्थिरेषु पदार्थेषु विषयदोषदर्शनद्वारेण भवत्येव विवेकवतां वैराग्यमिति तदुपजननाय शून्यवादादिवर्णनं वक्रः पन्थाः, प्रत्युत प्राज्ञो मुमुक्षुः क्षणिकनैरात्म्यशून्यवादिवचनं युक्तिबाधितमवबुध्यमानो वञ्चनामयमिव तदुपदेशमाशङ्कते ।

स एष बुद्धिशून्यानां शून्यवादपरिग्रहः ।
प्रतारणपराणां वा न तु तत्त्वार्थदर्शिनाम् ॥
तस्मात्परीक्ष्यमाणोऽयं शब्दाद्यद्वैतपक्षवत् ।
विज्ञानाद्वैतपक्षोऽपि गन्धर्वनगरायते ॥

अपवर्गनिरूपणोपसंहारः ।

तदेवमद्वैतदृशा न दृश्यते जनस्य निःश्रेयससम्पदागमः ।
अतो यथोक्तात्मसतत्त्वचिन्तया कृती व्यवस्येदपवर्गसिद्धये ॥
सांख्यैर्यस्त्वपवर्गसाधनविधावुक्तः प्रकृत्यात्मनो—
रन्यत्वाधिगमोऽभ्युपाय इति स प्रागेव निर्वासितः ।
अज्ञा शक्तिमती विकारबहुला बध्नात्यकिंचित्करं
भूयो न प्रकृतिः पुमांसमिति वा कस्तां नियन्तुं क्षमः ॥
पुंसा न किंचिदपि बन्धनिदानभूत-
मत्यल्पमात्रमपि कर्म कृतं कदाचित् ।
मथ्नाति तं प्रकृतिरेव निरङ्कुशैषा
मत्ता करेणुरिव पद्मवनानि भूयः ॥
कचनिलुञ्चनदिक्पटधारणप्रथितपराक्रमणक्रमपूर्वकम् ।
क्षपणकास्त्वपवर्गमुशन्त्यमी अतितरां परमार्थ वदन्तु ते ॥
लोम्नां नित्यमसम्भवात् खलतया मोक्षं क्षणात्प्राप्नुयु-
स्संसारोपरमो दिगम्बरतया सद्यस्तिरश्चां भवेत् ।
मुक्ताः स्युर्गिरिशृङ्गयायिन इमे शश्वत्तदारोहणा-
ज्जन्तूनामपवर्गवर्त्म निकटं केनेदृशं दर्शितम् ॥
तस्मादात्मज्ञानं सन्तो मोक्षप्राप्तौ हेतुं प्राहुः ।
तीर्थे तीर्थे तच्चाचार्यैस्तैस्तैरुक्तं संज्ञाभेदैः ॥
यदपीह केचिदविकल्पमीश्वरप्रणिधानमाहुरपवर्गसाधनम् ।
इदमात्मदर्शनमवादि तैरपि प्रथितो हि पुरुषविशेष ईश्वरः ॥
दृष्टा बाह्यान्तराणां गतिरियमियती नापवर्गस्य मार्ग
स्प्रष्टुं द्रष्टुं समर्थास्त इति चिरमिह श्वभ्र एव भ्रमन्ति ।
नेदीयानेष तस्माद्भवमरुपतितैरक्षपादोपदिष्टः
पन्थाः क्षेमाय मोक्षाधिगमसमुचितः क्षिप्रमालम्बनीयः ॥

इति प्रमेयप्रकरणम् ।

इति भट्टजयन्तकृतौ न्यायमञ्जर्यां नवममाह्निकम् ।

संशयलक्षणम्

संशयादेः पदार्थगणस्य प्रमाणप्रमेयपदसंगृहीतस्यापि न्यायप्रवृत्तिप्रयोजनतया पृथग्व्युत्पादनीयत्वस्य प्रागेव समर्थितत्वात्प्रथमसूत्रे च प्रमेयानन्तरं संशयोद्देशादुद्देशानुक्रमेण तस्य लक्षणं प्रतिपादयितुमाह—

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ (गौ० अ० १ आ १ सू० २३)

ननु संशयस्य समानधर्मोपपत्त्यादिकारणभेदेन पञ्चविधत्वात्सामान्यलक्षणं विभागो विशेषलक्षणानि च वक्तव्यानि, तत्र सामान्यलक्षणे विभागे च सूत्रद्वयं विशेषलक्षणार्थं च पञ्चानां तत्प्रभेदानां सूत्रपञ्चकमित्येवं सप्त सूत्राणि प्रणेतुं युक्तानि एकं चेदं सूत्रं श्रूयते तत्कथमेतद्भविष्यति ?

उच्यते, सत्यमाह भवान् किन्त्वेकमेवेदं सूत्रमावृत्तिन्यायमाश्रित्य सप्तधा कल्पयिष्यते ।

आचार्यव्याख्यानम् ।

तत्राचार्यास्तावदेवमाचक्षते । समानधर्मोपपत्तेरुपलब्ध्यनुपलब्धिव्यवस्थातो विशेषापेक्षो विमर्शः संशयः इतीयत्सूत्रं सामान्यलक्षणप्रतिपादकम् , समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इयदस्य विशेषलक्षणप्रतिपादकमिति,

नन्वेतदेव सूत्रं सामान्यलक्षणार्थमियदेव चेदमन्यूनानतिरिक्तं विशेषलक्षणार्थमिति कथमेतत् ? उच्यते, विशेषस्मरणकारणभूतसाधारणधर्मग्रहणाद्विशेषाग्रहणाद्विशेषस्मृतेश्च संशयो भवतीति प्रत्यात्मवेदनीयं तावदेतत् , तत्र विशेषापेक्ष इत्यनेन पदेन विशेषस्मरणमुपदिष्टमुपलब्ध्यनुपलब्ध्यव्यवस्थापदेन च विशेषाग्रहणमितीयता च द्वयोरपि समानविशेषसामान्यलक्षणयोः (संग्रहः ?) समानशब्दस्त्वाक्षिप्तसामान्यवचनः सत्सामान्यवचनमाह अनुगतसामान्यवचनस्तु विशेषलक्षणमिति,

कथं पुनरयमेवाक्षिप्तसामान्यवचनः कथं वाऽनुगतसामान्यवचन इति ? उच्यते, संशयोत्पत्त्यैव सोमानधर्ममात्रमाक्षिप्यते यद्गृह्यमाणं विशेषस्मरणबीजसंस्कारोद्बोधनिमित्ततां प्रतिपद्यते तद्व्यतिरेकेण संशयानुत्पादात् । तथा हि—विरुद्धविशेषावमर्शस्वभावस्तावत्संशयः, न च विरुद्धविशेषाणां पुरोऽवस्थिते धर्मिणि सन्निहितानामवमर्शनं विरुद्धतयैवैकत्र सन्निधानाभावादतः स्मृत्युपारूढानामवमर्शनं स्मृतिश्च नाकस्मादुद्भवतीति यत्सहचरितानां तेषां विशेषाणां पूर्वं पर्यायेण ग्रहणं वृत्तं तद्दर्शनसंस्कारप्रबोधद्वारेण स्मरणकारणमवश्यमेवाश्रयणीयम् , तच्चानुगतं वा भवतु व्यावृत्तं वि-

प्रतिपत्त्यात्मकं वा आन्तरमुपलब्ध्यनुपलब्ध्यव्यवस्थारूपं वेत्येवमादिप्रसामान्यवाचिनि समानशब्दे पञ्चसाधारणरूपावगमात्सामान्यलक्षणार्थता, यदा त्वनुगतमेव धर्ममारोहपरिणाहादिस्वभावमाचष्टे समानशब्दस्तदा विशेषलक्षणार्थ इति ।

तत्र चेत्थं सूत्रयोजना—समानो धर्मः परिणाहादिः तस्य गुणत्वेन प्रतिद्रव्यमन्यत्वे ऽपि तुल्यरूपावगतिविषयीकृतत्वात्समानत्वमुच्यते, तस्योपलब्धिरुपपत्तिः, अथापि सत्तोपपत्तिशब्देनोच्यते साऽप्युपलब्ध्यधीनस्थितिरेव भवतीति सर्वथा समानधर्मोपलब्धेः संशय इत्युक्तं भवति ।

ननु समानधर्मोऽर्थान्तरं धर्मिणो न चाऽर्थान्तरे दृष्टेऽन्यत्र संशयो भवितुमर्हति, नार्थान्तरविशेषत्वात्, अर्थान्तरविशेषस्तु धर्म्येवोच्यते ऽर्थान्तरेण परिणाहादिना विशेष्यत इति तस्मिन्नेव साधारणधर्माध्यासितवपुषि धर्मिणि नयनपथवर्तिनि तद्गतविशेषावमर्शात्मा तत्रैव संशयो जायते योऽयमूर्ध्वत्वविशिष्टधर्मो दृश्यते स स्थाणुर्वा स्यात्पुरुषो वेति नार्थान्तरत्वदूषणम्, तथाऽपि वक्रकोटरकरचरणादिविशेषदर्शिनो न दृष्टः संशय इति कारणान्तरमुच्यते,-उपलब्ध्यनुपलब्ध्यव्यवस्थात इति, अनेन (कथं?) विशेषाग्रहणमुच्यते, इत्थमुच्यते-इदन्तयाऽनिदन्तया वा तत्रोपलब्धिर्न व्यवतिष्ठते अनुपलब्धिर्वेति, विशेषग्रहणे सति तद्व्यवस्थानं सम्भवति, स्थाणुरयं न पुरुष इति वक्रकोटरादिविशेषग्रहणे, शिरःपाण्यादिपरिच्छेदे तु पुरुषोऽयं न स्थाणुरिति, एवमनेन पदेन विशेषाग्रहणमुक्तम्, तथाऽपि प्रेक्षारूढस्य साधारणधर्मदर्शिनो विशेषाननुपलभमानस्यापि न दृष्टः संशय इति कारणान्तरमुच्यते-विशेषापेक्ष इति, विशेषस्मृत्यपेक्ष इत्यर्थः।

ननु विशेषापेक्ष इति श्रूयते न विशेषस्मृत्यपेक्ष इति, सत्यमश्रूयमाणमपि तत्स्मरणं संशयप्रस्तावादवगम्यते, स्मर्यमाणत्वेन हि विशेषाणां संशयोत्पत्तावपेक्षा नानुभूयमानतया ऽनुभूयमानेषु हि तेषु संशयच्छेदो भवति न संशयः, अपेक्षाशब्दार्थनिरूपणादेव वा स्मृतिर्लभ्यते विशेषाणामपेक्षा आकाङ्क्षा ते चानुपलभ्यमानाः पूर्वानुभूताश्चाकाङ्क्ष्यन्ते इतीयं सा तेषां स्मृतिः, संप्रत्युपलभ्यमानेष्वेकान्ताननुभूतेषु वा तेष्वाकाङ्क्षानुपपत्तेः ।

ननु समानधर्मोपपत्तेर्विशेषस्मृतेश्चेति कारणद्वयमेवास्तु किं विशेषाग्रहणेन, अपि च—

> विशेषस्मरणादेव नन्वाक्षिप्तस्तदग्रहः ।
> ग्रहणं स्मरणं चैव भवेतां युगपत्कथम् ॥

किन्तु नातिदूरगतायां निजप्रमदायामनुरागवतः कामिनः समानधर्मदर्शने तद्गतविशेषादर्शने तदनुस्मरणे च सत्यपि न भवत्येव संशयोऽतः संशयोत्पत्त्यव्यभिचारे देशकालव्यवहितविशेषाग्रहणसिद्धये पदान्तरमुपादीयते देशा-

न्तरे कालान्तरे वा चिरदृष्टानां विशेषाणामिदानीमग्रहणं संशयकारणं न वि-शेषाग्रहणमात्रम्, एवममुना पदत्रयेण संशयलक्षणमिदमुक्तम् ॥

ननु च 'संभूय कारकैः कार्यमारभ्यते' इति न्यायात्समानधर्मोपलब्धिवि-शेषानुपलब्धितत्स्मृतिलक्षणकारणत्रयजन्ये संशये ज्ञानयौगपद्यमापद्यते, क्रमभा-वित्वे हि बुद्धीनां नैककार्योत्पत्तौ युगपद्व्यापारः समस्ति, विशेषाश्च बहवोऽपि सम्भवन्तीति तत्स्मरणान्यपि युगपद्भूयांसि भवेयुः।

नैतदेवम्, समानधर्मग्रहणानन्तरं पूर्वोपजातविविधविशेषानुभवपरम्परोप-चितपीवरसंस्कारजमेव तद्विषयं स्मरणं भविष्यति यथा वर्णानामर्थप्रतीतौ व-र्णितम्, उपलब्ध्यनुपलब्ध्यव्यवस्थापदसूचिता च विशेषानुपलब्धिरेव न सा ज्ञानात्मिका किन्तु ज्ञानाऽनुत्पाद इति तत्तृतीयं कारणमपि भवन्न ज्ञानात्मकम्, ज्ञानात्मके कारणे समानधर्मग्रहणं विशेषस्मरणं च, तयोः प्रथमं समानधर्मग्र-हणं विनश्यदवस्थं द्वितीयमविनश्यदवस्थं संशयमुपजनयतः, ईदृशोश्च ज्ञानयो-र्यौगपद्यमविरुद्धमिति शास्त्रे स्थितम्, एवं समानधर्मग्रहणाद्विशेषाग्रहणाद्विशेष-स्मृतेश्च संशय इति पदत्रयेण संशयलक्षणमनवद्यमुच्यते इति।

सूत्रस्य व्याख्यान्तरम्।

तदेतदाचार्यव्याख्यानमरोचयन्तः परेऽपरथा व्याचक्षते-सामान्यलक्षणं तावद्विमर्शपदेनैव प्रतिपाद्यते, न हि पर्यायोच्चारणमात्रमिदं विमर्शः संशय इति किन्तु संशय इति लक्ष्यपदं विमर्श इति लक्षणप्रवणपदम्, प्रमाणपदवच्च निर्व-चनसव्यपेक्षमेतत्पदं लक्षणप्रतिपादनक्षमं भवति, विरुद्धार्थावमर्शो विमर्शः स्थाणुर्वा पुरुषो वेति, इयता च सजातीयसंशयपञ्चकानुगतं विजातीयेभ्यः प्रमा-णादिभ्यो व्यवच्छिन्नं सामान्यलक्षणमुक्तं भवति, संशयोत्पादककारणपरि-गणनं पुनरिन्द्रियार्थसन्निकर्षोत्पन्नग्रहणवदिहापि नोपयुज्यते कारणान्तराणाम-प्यात्ममनःसन्निकर्षादीनामपरिहार्यत्वात्-(इति?)। अत्राप्यसाधारणकारणनिर्देश-श्चिकीर्षितस्तेनापि कोऽर्थः? सामान्यलक्षणस्य प्रतिपिपादयिषितत्वात्तस्य च वि-मर्शपदादेव सिद्धत्वात्, उपलब्ध्यनुपलब्ध्यव्यवस्थापदप्रतिपाद्यमानविशेषाग्रहण वर्णनं चातीव क्लिष्टमिति पुनश्च विशेषलक्षणप्रसङ्गे यथाश्रुतमेव तद् व्याख्ये-यमित्यतिभारः, एवं विमर्शपदेन विजातीयव्यवच्छेदकारिणि सामान्यलक्षणे वर्णिते समानधर्मोपपत्तेरित्येकमेव पदं सजातीयसंशयान्तरव्यवच्छेदकारि विशेषलक्षणक्षमं भवतीति तत्रापि पदत्रययोजनं नोपयुज्यते इति, अत्र व्या-ख्यानद्वयेऽपि कतरत्साध्विति तद्विदः प्रमाणम्।

अनेकधर्मोपपत्तेरित्यत्रापि त्रिपदपरिग्रहेणैव लक्षणमाचार्या वर्णयन्ति अनेकधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इत्यसाधारणधर्म-ग्रहणाद्विशेषाग्रहणाद्विशेषस्मृतेश्च संशय इत्यर्थः, एकैकपदोपादानफलं च

पूर्ववदत्रापि दर्शयितव्यम् , न चेन्द्रियमनःसंयोगादिकारणान्तरपरिगणनचोदनं युक्तम् , तेषां सर्वबुद्धिजन्मसु तुल्यत्वादिहासाधारणसंशयज्ञानकारणोपदेशप्रस्तावादिति ।

अन्ये तु सामान्यलक्षणसमुत्पादिते विजातीयव्यवच्छेदे केवलसजातीयव्यवच्छित्त्रलक्षणप्रतिपादननिपुणमनेकधर्मोपपत्तिरूपमेव पूर्ववद्वर्णयांचक्रुः ।

"नन्वनेकधर्मशब्देन कथमसाधारणो धर्म उच्यते" समानजातीयमसमानजातीयमनेकं तस्मात्परावृत्तो धर्मोऽनेकधर्म इति, यद्वा किमनया क्लिष्टकल्पनया, अस्त्ययमेकशब्दः समानपर्यायस्तत्र स्पष्ट एव नञ्समासेनासमानधर्मोऽनेकधर्मः साधारणधर्म उच्यत एवेति ।

"भवत्वेवमसाधारणधर्मस्य तु कथं संशयकारणत्वमिति चिन्त्यम्, विरुद्धविशेषानुस्मरणकारणकं हि संशयमाहुः, विशेषाणां च स्मरणहेतोः संस्कारस्य तद्बोधकं भवति येन सहैते पूर्वपर्यायेणोपलब्धाः, असाधारणधर्मस्य त्वसाधारणधर्मत्वादेव न केनचित्सह पूर्वं दर्शनमभवद्भावे त्वसाधारणधर्मतैव हीयेतेत्यतः कथमसौ तत्स्मृतिहेतुः, व्यावृत्ततयैव तु स्मृतिहेतुत्वेऽस्य त्रैलोक्यस्मरणनिमित्तता प्रसज्येत ततोऽपि व्यावृत्तत्वादि"ति ।

नैष दोषः, प्रकारान्तरेणास्य स्मृतिहेतुत्वात् , इह हि केषुचित्केषुचिदसाधारणधर्मा धर्मान्तरसहचरिता भवन्ति, तद्यथा पृथ्वीत्वगन्धवत्त्वादयो धर्माः पृथिव्यामसाधारणास्सन्तः स्नेहवत्त्वादिधर्माश्च तथैवाप्सु द्रव्यत्वसहचारिणो दृष्टाः, रूपादिषु रूपत्वादिधर्मा गुणत्वसहचारिणः, उत्क्षेपणादिषु उत्क्षेपणत्वादिधर्माः कर्मत्वसहचारिणः , एवं प्रकृतेऽपि धर्मिणि कस्मिंश्चित्कश्चिदसाधारणो धर्म उपलभ्यमानः केनापि साधारणधर्मान्तरेण सहचरितो भवेदिति विशेषानुस्मृतिद्वारेण संशयसाधनम् ।

"नन्वेवं तर्हि व्यावृत्तत्त्वादेव समानधर्मादेव संशयो नानेकधर्मादि"ति, मैवम् , अनेकधर्म एवासौ तेन वर्त्मना विशेषान्स्मारयन्संशयजन्मने कल्पते , सति हि तस्मिन्किमालम्बनं व्यावृत्तत्वं स्यादित्यलमतिसूक्ष्मेक्षिकया ।

तस्योदाहरणं भाष्यकारेण दर्शितं शब्दे विभागजत्वम् , यथा हि पृथिव्यादौ पृथिवीत्वादिः व्यावृत्तो धर्मो द्रव्यत्वाद्यनुगतधर्मसहचारी दृष्ट एवं शब्दे विभागजत्वं धर्मः केन द्रव्यत्वादीनामन्यतमेन धर्मेण सहचरितः स्यादिति संशयः ।

"ननु विभागजत्वमसाधारणं न भवत्येव शब्दधर्मो विभागेऽपि भावात् , तथा च प्रयोगः--गुणः शब्दो विभागजत्वाद्विभागजविभागवद्" इति ।

तत्र केचिदाहुः, सत्यमस्ति विभागेऽपि विभागजत्वं, शब्दे तु विशेषो विवक्षितः, द्विविधो हि विभागजो विभागः--कारणविभागपूर्वकः कारणाकारणविभागपूर्वकश्च, कारणं समवायिकारणमत्राभिप्रेतम् , कारणविभागपूर्वकस्ता-

वत्त्वन्तुविभागात्तन्त्वाकाशविभागः, कारणाकारणविभागपूर्वकस्त्वङ्गुल्याकाशविभागाद्धस्ताकाशविभागो हस्ताकाशविभागादपि शरीराकाशविभाग इति, शब्दस्तु नियमेनैव कारणविभागपूर्वकविभागप्रभवः वंशदलविभागाद्दलाकाशविभागो दलाकाशविभागाच्च समवायिकारणाच्छब्दो निष्पद्यते इत्यनेन विशेषेणास्येदृशविभागजत्वस्यासाधारणत्वं शब्दधर्मस्योच्यते इति ।

प्रासङ्गिकं विभागजविभागखण्डनम् ।

अन्ये तु विभागजं विभागममृष्यमाणा यथाश्रुतस्यैव शब्दे विभागजत्वस्यासाधारणधर्मतामाचक्षते ।

"ननु किमिति विभागजं ते विभागं न मृष्यन्ति ? अस्ति ह्ययं तत्सिद्धौ न्यायः-यदा ह्यवयवे कर्मोत्पन्नमवयवान्तराद्विभागं करोति, न तदाकाशादिदेशाद्यदा त्वाकाशादिदेशान्न तदाऽवयवान्तरादिति स्थितिः, किंकृता पुनरियं स्थितिरिति चेत्, उच्यते-या ह्यवयवक्रिया नभोविभागकारिणी नासौ द्रव्यारम्भकसंयोगप्रतिपक्षभूतं विभागमारभमाणा दृश्यते दिनकरकिरणपरामर्शोपजनितकमलदलविकासकारिक्रियावत्, तदेव कथमिति चेत्, कमलस्य मुकुलविकासदशयोः प्रत्यभिज्ञायमानत्वेनाविनाशनिश्चयात्, इयन्तु पाट्यमानवंशदलक्रिया द्रव्यारम्भकसंयोगप्रतिद्वन्द्विभूतविभागारम्भिकोपलभ्यते इति नासौ नभसो विभागमारभेतेत्यत एषा स्थितिरस्तीति विभागजविभागकल्पना क्रियते, संयोगान्तं कर्मेति(च?) तावत्स्थितम्, अन्यथा हि तस्य कालान्तरस्थायित्वं नित्यद्रव्यसमवेतस्य च नित्यत्वं स्यात्, तस्मात्कर्मणोऽचिरजीवित्वात्तद्विनाशकेन संयोगेन भवितव्यम्, उत्तरश्च संयोगः पूर्वसंयोगोपरमे सति जायते नान्यथा, न च विभागव्यतिरिक्तः कश्चन संयोगस्य हन्ता समस्ति,

कर्म तूत्तरसंयोगजन्मनिर्ज्ञातकौशलम् ।
न हि प्राक्तनसंयोगविनाशाय प्रकल्पते ॥

तस्माद्विभागेनैव संयोगनाशकारिणा भाव्यम्, स च यदधिकरणो विभागस्तदधिकरणमेव संयोगमुपशमयति न त्वङ्गुलिविभागः कुण्डबदरसंयोगोपमर्दाय प्रभवतीत्यतो न वंशदलवृत्तिर्विभागो दलाकाशसंयोगमपहन्तुमलमिति नूनं दलाकाशसंयोगेन भवितव्यम्, तदिदानीं तस्योत्पत्तिकारणचिन्तायां क्रियाया वंशदलविभागमात्रोपजनने चरितार्थत्वात्तं निर्माय विभागान्तरनिर्माणे विरम्य व्यापारासंवेदनादवश्यं वंशदलविभाग एव प्रत्यासन्नतया दलाकाशविभागारम्भकोऽभ्युपगमनीयः, एवमनभ्युगमे कर्मनित्यत्वप्रसङ्गादि"ति ।

अत्र वदन्ति-न कर्मनित्यत्वमनभ्युपगम्यमानेऽपि विभागजे विभागे भविष्यत्युत्तरसंयोगस्य कर्मविनाशहेतोरस्तित्वात् । "पूर्वसंयोगानुपरमे कथं तदुत्पाद" इति चेद्, बाढमुपरत एव पूर्वसंयोगः, "कस्तस्योपरमहेतुरि"ति चेत्,

कर्म ह्युत्तरसंयोगनिमित्तं यदुपेयते ।
तदेव पूर्वसंयोगध्वंसकारि भविष्यति ॥
न च यज्जनने शक्तमशक्तं तद्विनाशने ।
हेतुर्दहनसंयोगः पाकजोत्पादनाशयोः ॥

यथा च विभागेऽधिकरणनियमो यदाधारो विभागस्तदाधारमेव संयोगं निरुणद्धि तथा कर्मण्यपि नियमः कर्मापि स्वाश्रयस्य यदन्यदिक्सम्बन्धनिबन्धनं तत्तद्विरुद्धदिग्वृत्तेः संयोगस्योपमर्दकमिति नातिप्रसङ्गः, एवं कर्माविष्टस्योत्तर-संयोगदर्शनमदूषणं दिगन्तसंयोगस्य तेनोपमर्दनात्, अपि च यदेव कर्म वंश-दलविभागकारि कथ्यते तदेव दलाकाशविभागकारि भविष्यति को दोषः ।

"ननु व्योमविभागकारिकर्म न द्रव्यारम्भकसंयोगप्रत्यनीकभूतविभागार-म्भकमम्भोरुहपल्लवकर्मवदि"त्युक्तम्, सत्युमुक्तम्, अयुक्तं तु शतपत्रपत्रकर्मणो ऽपि द्रव्यारम्भकसंयोगप्रतिकूलविभागारम्भकत्वात्तच्च कुड्मलकमलादिकचक कलस्यान्यत्रनिश्चयान्निश्चितम् ।

"ननु तदेवेदमरविन्दमिति सन्देहविपर्ययरहिततामरसप्रत्यभिज्ञादर्शनात्कथं सङ्कोचविकासदशामात्रभेदात्तदन्यत्वमि"ति, कृतमनया दुराशया शरीरेऽपि सुस्पष्टोपलभ्यमानशैशवयौवनवार्धकादिदशाभेदभिन्नस्वरूपे प्रत्यभिज्ञानदर्श-नात्, न च शरीरकुशेशयोर्विशेषलेशमपि पश्याम इति कुतस्तदेकत्वम्, भवतु वा पुण्डरीकस्याविनाशो निदर्शनमात्रमिदं तु वर्णितं न तु प्रतिबन्धः (द्धः ?) कश्चन हेतुरभ्यधायि, येन वंशदलकर्मणः कोकनदपल्लवकर्मसाम्यं कल्प्येत, क्रियात्वं त्वप्रयोजकमेव कर्मणां विचित्रकार्यहेतुत्वात्, यदि वा नान्यो वंशद-लविभागो नान्यश्च तत्कार्यो दलाकाशविभागः, किन्तु

एक एव विभागोऽयं भेदोऽस्याश्रयभेदतः ।
एकत्र देशेऽवस्थानाद्व्योम्नो वंशदलस्य च ॥
समानदेशे वृत्तित्वं मूर्तानां हि विरुध्यते ।
व्योम्नः सर्वगतत्वात्तु विद्यते तत्र सन्निधिः ॥
एकदेशाश्रयत्वे तु यदेकस्माद्विभागकृत् ।
तदेवान्यत इत्यस्ति न विभागो विभागजः ॥

प्रासङ्गिको विभागगुणान्तरत्वनिरासः ।

अपरे पुनर्विभागजविभागपराकरणोपारूढरभसाः सङ्गिरन्ते–तिष्ठतु तावद् दूरत एव विभागजो विभागः, कर्मजोऽपि न विभागो नाम कश्चिदस्ति, संयोग विरोधिनि तस्मिन्नभ्युपगम्यमाने मुद्गरादिवत्पूर्वसिद्धताऽवश्यंभाविनी तत-श्च पूर्वसिद्धो विभागः संयोगमुन्मूलयतीति घटमुद्गरयोरिव संयोगविभा-

गयोरेकत्र युगदुपलब्धिर्भवेन्न चैवमस्ति, तस्मात्संयोगाभावविषय एव विभक्तप्रत्यय इति न विभागालम्बनतां प्रतिपद्यते, सत्यपि विभागे तस्मिन्क्षणे संयोगस्य विनाशान्न भवति विभक्तप्रतिभासः, क्षणान्तरे च संयोगविनाशे सति भवतीत्यन्वयव्यतिरेकाभ्यां संयोगाभावविषय एवावसीयते न प्रत्यक्षगम्यता विभागस्य, संयोगभङ्गलिङ्गेन च तत्परिकल्पनक्रियैव तं हिनस्तीति पुरस्तात्प्रतिपादितम्।

"कथं तर्हि विभागजत्वं शब्दस्य भाष्यकार उदाहृतवान्?" उच्यते त्रिविधं कारणं कार्योत्पत्तिं विधत्ते—समवायिकारणम् असमवायिकारणं निमित्तकारणं चेति, तत्र समवायिकारणं तदुच्यते यत्राश्रितं कार्यमुपलभ्यते यथा पटस्य तन्तवः, असमवायिकारणन्तु द्विविधं कार्यैकार्थसमवायलक्षणप्रत्यासत्त्या प्रत्यासन्नं कारणैकार्थसमवायलक्षणया वा, तत्र कार्यैकार्थसमवायेन प्रत्यासन्नं यथा पटस्य तन्तुसंयोगः, कारणैकार्थसमवायेन तु प्रत्यासन्नं यथा पटरूपस्य तन्तुरूपमिति, अवधृतसामर्थ्यं च तदसमवायिकारणमाश्रयणीयमतो बुद्धिजन्मनि सत्यप्येकार्थसमवाये नान्येषामात्मगुणानामिच्छादीनामसमवायिकारणत्वमपि त्ववधृतसामर्थ्यस्यात्ममनःसंयोगस्यैवेति, समवाय्यसमवायिव्यतिरिक्तं तु कार्योत्पत्तौ निर्ज्ञातसामर्थ्यं यत्कारणं तन्निमित्तकारणमुच्यते,—इत्येवं स्थिते शब्दस्य नित्यत्वे निरस्ते कार्यत्वे च साधिते तदुत्पत्तौ आकाशं समवायिकारणं निमित्तकारणानि तु भूयांसि सन्त्येवासमवायिकारणं तु चिन्त्यम्, तच्चाकाशाश्रितमवश्यमन्यथा प्रत्यासत्त्यभावात् तद्गुणान्तराणां च विभुत्वादीनामनवधृतशक्तित्वाद्वंशदलपाटनसमनन्तरं च शब्दोत्पाददर्शनादेवं मन्यामहे—

क्रिया यदैव संयोगं हन्ति वंशदलाश्रितम्।
तदैव गगने कश्चित्करोत्यतिशयं ध्रुवम्॥
आकाशातिशयो यश्च क्रियाजः शब्दकारणम्।
असौ विभागनामेति शब्दे तज्जन्यतोच्यते॥

तदेवमेतद्यथागममाचार्यमतमभिहितमस्माभिः। एतच्च मतिमद्भिर्विचारणीयम्—किमाकाशातिशयमात्रमसमवायिकारणमुत यथा भेरीदण्डसंयोगकार्ये शब्दे भेरीगगनसंयोगस्यासमवायिकारणत्वमेवं वंशदलविभागकार्ये तस्मिन्दलगगनविभागस्येति, दलाकाशविभागोऽपि किं दलविभागज उत कर्मण एवेति, सर्वथा कश्चिदसाधारणो धर्मः संशयहेतुरुदाहर्तव्य इतीयता नः प्रयोजनम्।

विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः, अस्त्यात्मेत्येके नास्त्यात्मेत्यपरे, सेयं विप्रतिपत्तिरुपलभ्यमाना विशेषस्मरणद्वारेण संशयमावहति, न चेह कश्चिदनुगतो व्यावृत्तो वा धर्मः संशयकारणमपि तु विप्रतिपत्तिरेवेति, अत्रापि त्रिरूपपरिग्रहेण लक्षणवर्णनमेकेनैव वा पदेनेति पूर्ववदाचार्यद्वयमतमनुसरणीयम्।

उपलब्ध्यव्यवस्थातः खल्वयं भवति संशयः, सच्चोदकमुपलभ्यते यथा ह्रदादिषु क्वचिदसच्च भास्करकरनिकरप्रतिफलतरलितासु मरुस्थलीषु, तदेवमुपलब्धेरव्यवस्थितत्वात् क्वचिदुपलभ्यमाने भवति संशयः-'किमिदं सदुपलभ्यते किमसदिति, अनुपलब्ध्यव्यवस्थातश्च भवति संशयः-'किंचिदसदेव नोपलभ्यते नभःकुसुमादि किंचित्सदपि नोपलभ्यते मृदन्तरितशङ्कुमूलकादितदन्यत्रानुपलभ्यमाने संशेते पुमान्किमिदमसदेव नोपलभ्येत उत सदिति' अव्यवस्थाशब्देनात्र पूर्वं पर्यायेण वृत्तसदसदाश्रितविशेषादर्शनं सूचितम्, इदानीं पुनरर्थक्रियासमर्थतादिविशेषदर्शनशून्यचेतसामुपलब्ध्यनुपलब्ध्यदर्शनमात्रोपपत्तेस्संशयो वर्ण्यते, न चैवं सति सर्वत्रानाश्वास इति शङ्कनीयम्, यथानुभवं संशयाभ्युपगमात्, सर्वत्र च तदुत्पादकविशेषाग्रहणतत्स्मरणादिकारणसान्निध्यासंभवादिति, अत्रापि पदत्रयेणैकेन वा पदेन लक्षणोपपादनं पूर्ववद् द्रष्टव्यम्। "ननु चोपलब्ध्यनुपलब्धी सदसतोः समान एव धर्म इति पूर्वेण गतार्थत्वम्" नैतत् पूर्वनिर्दिष्टस्योर्ध्वत्वादेर्धर्मस्य ज्ञेयस्थत्वादुपलब्ध्यनुपलब्ध्योश्च ज्ञातृस्थत्वात्, अत एव च मानसमिमं संशयमाचक्षते न बाह्यधर्मिसंबद्धसाधारणोर्ध्वतादिधर्माधिगमाधीनसंशयवद् बाह्येन्द्रियजम्। "ननु चोपलब्धित्वमनुपलब्धित्वं चाऽत्र संशयकारणं तद्धि न ज्ञातरि वर्तते किन्तु बुद्धाविति कथमयं विशेषः?" सत्यमेवं किन्तु समानधर्मोऽप्युपलब्धितादिको यदाश्रितो तद्धि बोद्धरि वर्तते अतो विशेषात्पृथगेव कथ्यते यथा ह्यसाधारणतासमाश्रयः, एवंप्रकारमेव च विशेषमाश्रित्य किञ्चित्पञ्चविधत्वं विपञ्च्यते, परमार्थतस्तु सर्वत्रानुगतसंबन्धो दुष्परिहरः विशेषस्मरणजन्यत्वात्संशयस्य विशेषाणां च येन सह पूर्वं दर्शनमभूत्तस्मिन्ननुपलभ्यमाने स्मरणासंभवात्, अतस्तस्यानेकविशेषानुगामित्वात्समानत्वात्समानत्वमपरिहार्यम्, अत एवाक्षिप्तसामान्यवाचिसमानशब्दं सामान्यलक्षणे व्याचख्युराचार्या इत्यलमतिविस्तरेण।

इति पञ्चविधः प्रपञ्चतो मुनिना दर्शित एष संशयः।
फलवद्व्यवहारहेतुतामनुमानाङ्गतया बिभर्ति यः॥
अनुमानिरपेक्ष एव वा किल दृष्टे विषयेऽर्थसंशयः।
वहति व्यवहारवर्त्तिनीमिति पूर्वं च विचारितं बुधैः॥

इति(३) संशयपदार्थः।

यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम्॥
(गौ० अ० १ आ० १ सू० २४)

'यमि'त्यत्र देशकालपुरुषदशाभेदभिन्नप्रयोजनविशेषव्याप्तये वीप्सा द्रष्ट-

ष्या । अर्थोऽर्थ्यमान उच्यते न वस्तुरूप एव अभावस्यापि प्रयोजनत्वसम्भवात्, अधिकारोऽर्थस्य व्यवसायः, यं यमर्थमाप्तव्यं हातव्यं वाधिकृत्य व्यवसाय प्रवर्तते तत्प्राप्तये परिहाराय वा चेष्टते पुरुषस्तत्प्रयोजनमिति, तच्च गौणमुख्यभेदेन द्विविधम्—मुख्यं सुखप्राप्तिर्दुःखपरिहारश्च, तत्साधनं गौणम्, सुखसाधनमपि चन्दनघनसारमहिलादि प्राप्तव्यत्वान्मुख्यत्वेन यदा विवक्षितं भवति तदा तदवाप्त्युपाये गौणता द्रष्टव्या ।

तच्च प्रयोजनं देशकालपुरुषदशाभेदादव्यवस्थितम्, तद्यथा ग्रीष्मे मरुस्थले निशातमलातनिकरमिव किरति किरणमिषेण पूषणि तृषातुरस्य तुषारकणोत्करदन्तुरमम्बु परमं सुखसाधनं तदेव शिशिरे सकलजगत्कम्पकारिणि दारुणसमीरणशिथिलीकृतनीरेषु कश्मीरेषु श्लेष्मोपचयजनितजठरशिखिनः खेदाय जायते, तस्मादनियत एवायं सुखदुःखसाधनभावो भावानाम्, यद्यपि च यदेकदा सुखसाधनमिति विदितमुपयुक्तमतिक्रान्तं वस्तु तथापि तज्जातीयत्वलिङ्गावधृतसुखसाधनभावे भावान्तरेऽपि प्रवर्तन्त एव तदर्थिनः ।

"ननु प्रयोजनस्य प्रवर्तकत्वमयुक्तं सदसद्विकल्पानुपपत्तेः—सत्त्वे कर्णनासादिवन्न तदर्था प्रवृत्तिरसत्त्वे तु खपुष्पादिवन्नतराम्" । नैष दोषः, ईप्साजिहासाविषयीकृतस्य प्रवर्तकत्वात्, न हि तत्खपुष्पादिवदसाध्यं नापि शिरःपाण्यादिवत्सिद्धमेव अपि तु साध्यत्वेन बुद्ध्युपारूढं तत्प्रवर्तकमिति युक्तम्, तदेव च वाक्यार्थ इति पूर्वमुक्तम् ।

इत्थं प्रवर्तकत्वे प्रयोजनस्योपपादिते मुनिना ।
भग्ना भवन्ति सर्वे प्रेरकपक्षाः पराभिहिताः ॥
प्रयोजनमतोऽखिलैर्विधिवचोभिरादिश्यते
प्रयोजननिबन्धनास्तनुभृतामशेषाः क्रियाः ।
क्रिमेरपि यथा तथा किमपि जीवितं बिभ्रतः
प्रयोजनबहिष्कृतं न खलु चेष्टितं दृश्यते ॥
वैतण्डिकः प्रयतते निजपक्षसिद्ध्यै
तां चैष वेद परपक्षनिषेधलभ्याम् ।
तस्मादियं स्वमतसाधनवर्जिताऽपि
युक्ता प्रयोजनवती भवितुं वितण्डा ॥

इति (४) प्रयोजनपदार्थः ॥

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥

गौतमसूत्रम् अ० १ आ० १ सू० २५ ।

लौकिकपरीक्षकौ वादिप्रतिवादिनौ दृष्टान्तप्रस्तावलक्षणाद्वेदितव्यौ न

तु मूर्खपण्डितौ प्रकृतासङ्गतेस्तयोश्च सङ्गत्यभावात्, तयोर्यस्मिन्नर्थे भावस्व भावेऽभावात्मके वा बुद्धिसाम्यं—प्रयोज्यप्रयोजकभावव्यवस्थितसाध्यसाधनधर्माधिकरणत्वे साध्यव्यावृत्तिपूर्वकसाधनधर्मव्यावृत्ततायां वा तुल्यरूपा बुद्धिः स दृष्टान्तः, तस्य तथाविधधर्माधारत्वं तद्रहितत्वं वा लक्ष्यमाणान्मन्तव्यं, यथा चानुमानलक्षणे 'तत्पूर्वकमि'ति प्रतिबन्धग्रहणोपायमात्रं प्रतिपादितं तत्स्वरूपं त्ववयवलक्षणे निर्णीत'मुदाहरणसाधर्म्यात्साध्यसाधनं हेतुस्तथा वैधर्म्यादि'ति, एवमिह वादिप्रतिवादिप्रसिद्धिमात्रं दृष्टान्तस्य दर्शितं, रूपं तु तस्य द्विविधमपि तत्रैव वक्ष्यते—'साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्, तद्विपर्ययाद्वा विपरीतमिति' अनित्यः शब्दः कृतकत्वाद् यत्कृतकं तदनित्यं दृष्टं यथा घट इति साधर्म्यदृष्टान्तः, यत्पुनरनित्यं न भवति तत्कृतकमपि न भवत्येव यथाऽऽकाश इति वैधर्म्यदृष्टान्तः, यथोक्तलक्षणवैकल्यात्तु दृष्टान्ताभासता इति ।

आभासभेदविभवात्कथयिष्यते तु तेषामुदाहरणलक्षणवाक्प्रसङ्गे ।
आभासता वचनदोषकृताऽपि काचिदस्तीति साऽवयवलक्षणएव वाच्या ॥
द्विविधोऽपि च दृष्टान्तः सुदृष्टिभिर्यत्नतोऽधिगन्तव्यः ।
स हि निश्चलः फलनिधेरनुमानमहातरोः स्कन्धः ॥

इति (५)दृष्टान्तपदार्थः ॥

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥

(गौ० अ० १ आ० १ सू० २६)

तन्त्र्यतेऽनेन पदार्थस्थितिरिति तन्त्रं प्रमाणमुच्यते, अधिकरणमाश्रयः, तन्त्रमधिकरणं यस्य स तन्त्राधिकरणः प्रमाणमूल इत्यर्थः, अभ्युपगमः स्वीकारः तस्य संस्थितिरित्थम्भावव्यवस्था धर्मनियमः, इदमिति सामान्यनिर्देश इत्थमिति विशेषः, एवं च तन्त्राधिकरणाभ्युपगमसंस्थितिः प्रमाणमूलाभ्युपगमव्यवस्था सिद्धान्त इत्युक्ते प्रमाणमूलाभ्युपगमविषयीकृतः सामान्यविशेषवानर्थः सिद्धान्त इति सामान्यलक्षणमुक्तं भवति । अन्ये तु व्याचक्षते—तन्त्रमितरेतरसंबद्धस्यार्थसमूहस्योपदेशः शास्त्रम्, अधिक्रियते इत्यधिकरणं पक्ष उच्यते, अभ्युपगमो यथोक्त एव, संस्थितिशब्दः प्रत्येकमभिसंबध्यते, तन्त्रसंस्थितिरधिकरणसंस्थितिरभ्युपगमसंस्थितिरित्यनेन तन्त्रनिर्देशसाम्यात्सर्वतन्त्रसिद्धान्तयोः सूचनमितराभ्यां पदाभ्यामुत्तरयोरधिकरणाभ्युपगमसिद्धान्तयोः—इति, एतत्त्वपव्याख्यानम्, न ह्येवं सिद्धान्तचतुष्टयानुगतं किंचित्सामान्यलक्षणमुक्तं भवति—न चेदं विभागार्थं विशेषलक्षणार्थं वा सूत्रम्, तत्प्रतिपादनस्योत्तरसूत्रैः करिष्यमाणत्वादुक्तस्य च पुनर्वचने प्रयोज-

नाभावाद्त: पूर्वक्रमेणैव सिद्धान्तस्य सामान्यलक्षणवर्णनं श्रेयः ।
तस्य स्वकण्ठेन विभागमाह—

स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ (गौतमसूत्रम् अ० १ आ० १ सू० २७)

चतुष्प्रकारो हि सिद्धान्तः सर्वतन्त्रसिद्धान्तः प्रतितन्त्रसिद्धान्तोऽधिकरणसिद्धान्तः अभ्युपगमसिद्धान्तः । तत्र—

सर्वतन्त्राविरुद्धः स्वतन्त्रेऽधिकृतोऽर्थः (सर्वतन्त्रसिद्धान्तः १) ॥
(गौतमसूत्रम् अ० १ आ० १ सू० २८)

अत्र तन्त्रशब्देन शास्त्रमुच्यते, स्वशास्त्रे य उपदिष्टोऽर्थः सर्वशास्त्राविरुद्धश्च स सर्वतन्त्रसिद्धान्तः, यथा चाक्षुषं प्रमाणमिति, "नन्वत्रापि विवदन्ते ब्रह्मवादिनां हि सर्वं वेयमविद्या अविद्या च कथं प्रमाणमिति", न, व्यवहारावस्थायां तैरपि तत्प्रामाण्याभ्युपगमात्, संख्यालक्षणविषयविप्रतिपत्तिस्तु प्रतिशास्त्रं भवतु, चाक्षुषं प्रमाणमितीयति सर्ववादिनामविवादः ।

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥
(गौतमसूत्रम् अ० १ आ० सू० २९)

तन्त्रेऽधिकृतोऽर्थ इति वर्तते, यथाऽस्माकमीश्वरेच्छाप्रेरितपरमाणुनिर्मितानि पृथिव्यादीनि समानतन्त्रे कणव्रतमते तथैव सिद्धानि, परतन्त्रे च सांख्यादिशास्त्रे तथा नाभ्युपगम्यन्त इति, यथा वा गुणत्रयात्मिकायाः प्रकृतेर्महदहङ्कारादिक्रमेण भूतसर्ग इति सांख्यानां स्वतन्त्रसिद्धोऽर्थः समानतन्त्रेऽपि पातञ्जले योगशास्त्रे सिद्ध एव परतन्त्रे तु वैशेषिकादिमते न सिद्ध इति । "नन्वस्य कथं प्रमाणमूलता?" स्थाने प्रश्नः सत्यमेतत् आस्माकीने हि प्रतितन्त्रसिद्धान्ते प्रमाणमूलत्वं यथार्थमेव सांख्यसिद्धान्तस्तु प्रमाणमूलत्वाभावेऽपि परतन्त्रत्वख्यापनायोदाहृतः तदभिप्रायेण मूलता वक्तव्येति ।

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥
(गौतमसूत्रम् अ० १ आ० १ सू० ३०)

प्रक्रियते इति प्रकरणं पक्ष उच्यते, यस्यार्थस्य सिद्धौ सत्यां प्रकरणान्तरसिद्धिर्भवति सोऽधिकरणसिद्धान्तस्तदधिकरणानामर्थान्तराणां सिद्धेः ।

"कः पुनर्यत्सिद्धाविति सर्वनाम्ना प्रत्यवमृश्यते पक्षो हेतुर्वा ? किं चातः, पक्षः कथं पक्षान्तरसिद्धये कल्पते, हेतुना हि पक्षसिद्धिः क्रियते पक्षेण,

हेतोस्त्वधिकरणसिद्धान्तत्वे कथं सिद्धान्ताश्रया न्यायप्रवृत्तिरिति तदुद्देशप्रयोजनं वर्णितम्, न्यायो हि हेतुरेव स एव चाधिकरणसिद्धान्तो न च हेतुर्हेत्वाश्रय" इति ।

उच्यते—उभयथाऽप्यदोषः हेतुरपि क्वचित्पक्षीभवति, पक्षो हि हेतुर्भवत्येव तत्र तावदाश्रयेन हेत्वधीना पक्षसिद्धिरिति हेतुरेव सर्वनाम्नाऽवमृष्यते तत्सिद्धावन्यप्रकरणसिद्धेः स एवाधिकरणसिद्धान्तः ।

"कथं तर्हि तदाश्रया न्यायप्रवृत्तिः ?" उच्यते—हेतुरपि तदन्यतराभिन्न इव साध्यमानत्वात्पक्षीभवन्न्यायान्तराश्रयतां प्रतिपत्स्यतेऽपि वा पक्ष एव सर्वनाम्नाऽवमृष्यमाणो भवत्वधिकरणसिद्धान्तः, स च स्पष्ट एव न्यायस्याश्रयः, स च सिद्ध्यै पक्षान्तराण्याक्षिपन्नेव सिद्ध्यतीत्यधिकरणसिद्धान्ततां भजते, तस्योदाहरणम्—'इन्द्रियव्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादि'ति, अत्रेन्द्रियव्यतिरिक्ते ज्ञातरि सिद्ध्यति तदनुषङ्गोण्यर्थान्तराण्यपि सिध्यन्ति नानेन्द्रियाणि नियतविषयाणि गुणव्यतिरिक्तं द्रव्यमित्येवमादीनि ॥

अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः॥ (१।१।३१)

अत्रापरीक्षिताभ्युपगमादिति यथाश्रुतपञ्चमीनिर्देशमनुरुध्यमानाः प्रमाणमूलाभ्युपगमविषयीकृतोऽर्थः सिद्धान्त इति च सामान्यलक्षणमनुसरन्तः केचिदेवं व्याचक्षते—धर्मिणः शब्दादेर्नित्यत्वविचारचर्चायामपरीक्षितस्यैवाकाशविशेषगुणत्वादिधर्मपरीक्षारहितस्यैवाभ्युपगमात् किं सिध्यति ? उच्यते—तद्विशेषपरीक्षणं तद्गतनित्यानित्यत्वपरीक्षणं हि सामान्येन धर्मिण्युपादीयमाने व्योमविशेषगुणत्वादिधर्मपरीक्षारहिते सत्युपपद्यते, यदि पुनराकाशविशेषगुणत्वविशिष्टः शब्दो धर्मित्वेनोपादीयते परं प्रत्यसिद्धविशेषणः पक्षो भवेदिति, एवमपि कृते यदि पुरो धर्मिणं विकल्पयेत्कीदृशस्य सतः शब्दस्य भवता नित्यत्वं साध्यते द्रव्यस्य गुणस्य वेति, स एवं विकल्पयन्नर्थान्तरगमनात्तावत्पराजित एव भवति, जितमप्येनं पुनर्जेतुं स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञया च वादी ब्रवीति—'अस्तु द्रव्यं शब्द'—इति ।

एतत्तु व्याख्यानं न बुद्ध्यामहे, एवं व्याचक्षाणानामेषामभ्युपगमसिद्धान्त इति को नु व्यवस्थित इति ? यदि तावदनित्यः शब्द इति, द्रव्यत्वगुणत्वादिविशेषरहितशब्दाख्यधर्मिनिर्देशो यः प्रथममुपात्तः स एवाभ्युपगमसिद्धान्तस्तत्राभ्युपगमार्थः कीदृशः कश्च प्रतितन्त्रसिद्धान्तादस्य विशेषः ? अथास्तु द्रव्यं शब्दार्थ इति स्वबुद्ध्यतिशयाभिमानेन पश्चादभ्युपगम्यमानद्रव्यत्वविशिष्टशब्दनिर्देशोऽभ्युपगमसिद्धान्तस्तर्हि तत्र सूत्रमपरीक्षिताभ्युपगमादिति न योजितमन्यत्रैव तैः सूत्रार्थो नीत इति ।

तस्मादेवं व्याख्यायते-अपरीक्षिताभ्युपगम एव स्वमतिकौशलेन क्रियमाणेऽभ्युपगमसिद्धान्तः अस्तु द्रव्यं शब्द इति, प्रमाणमूलाभ्युपगमविषयीकरणं तु सामान्यलक्षणे प्रौढवाद्यभिप्रायेण योज्यम्, द्रव्यत्वमपि प्रमाणमूलं शब्दस्य भवतु तथाऽपि तस्यानित्यत्वमिति किल निरवयवं द्रव्यमनित्यं नास्त्येव शब्दस्य तु तादृशस्याप्यनित्यत्वमहं साधयामीति, कथं तर्हि पञ्चमी? किं पञ्चम्या वस्तु तावदीदृशं यथा व्याख्यातमस्माभिः, पञ्चम्यपि चेत्थं योज्यते-किमर्थं पुनरयमपरीक्षित एव शब्दद्रव्यत्वाभ्युपगमः क्रियत इति पृच्छत उत्तरं पञ्चम्याभिधीयते यस्मादपरीक्षिताभ्युपगमात्तद्विशेषानित्यत्वपरीक्षणमवकल्पते तस्मादपरीक्षिताभ्युपगमोऽभ्युपगमसिद्धान्त इति, न तु तद्विशेषपरीक्षणमेव सामानाधिकरण्यनिर्देशादभ्युपगमसिद्धान्त इति मन्तव्यं परीक्षणस्य सिद्धान्ताश्रितत्वात्, तस्माद्विशेषपरीक्षणार्थोऽपरीक्षिताभ्युपगमः प्रौढवादिना क्रियमाणोऽभ्युपगमसिद्धान्त इति सूत्रार्थः, इत्थमेव च तत्र तत्र प्रावादुकानां व्यवहारः।

इमाश्च सिद्धान्तभिदाश्चतस्रो न्यायप्रवृत्तेः प्रथमं निमित्तम्।
प्रवर्तते नैव परीक्षकाणामनाश्रया न्यायकथा कदाचित्॥

इति (५) सिद्धान्तपदार्थः।

इह हि स्वयमवगतमर्थमनुमानेन परस्मै प्रतिपादयता साधनीयस्यार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तावान्प्रयोक्तव्यः, तमेव च परार्थमनुमानमाचक्षते नीतिविदः।

"ननु नैव परार्थमनुमानं नाम किंचिदस्ति वक्त्रपेक्षया श्रोत्रपेक्षया वा तदनुपपत्तेः,

वक्त्रान्वमायि स ह्यर्थो नेदानीमनुमीयते।
श्रोतुः स्वार्थानुमानं तद्वाक्यावगतिहेतुकम्॥
यथा प्रत्यक्षतो धूमं दृष्ट्वाऽग्निमधिगच्छति।
तथा तदीयाद्वचनादिति कस्य परार्थता॥
आगमस्त्वेष भिद्येत कश्चिदर्थोपदेशकः।
कश्चिच्चतत्प्रत्ययोपायन्यायमार्गोपदेशकः॥" इति।

सत्यम्, न परमार्थतः परार्थमनुमानमुपपद्यते, किन्तु द्विविधः प्रतिपत्ता स्वयमवगतयथाप्रकृतलिङ्गव्याप्तिकस्तद्विपरीतश्च, तत्र स्वयमवधृतप्रतिबन्धं प्रति नोपदिश्यते एवमनुमानं स्वत एव तस्य प्रतीत्युत्पत्तेः, अनवधारितव्याप्तिकस्य तु व्याप्तिरेव व्युत्पाद्यत इति तं प्रति परार्थमनुमानं तदुपदेशकं वाक्यमेवाख्यायते, तथा हि-

वक्त्रा स्वप्रत्ययेनेदं न हि वाक्यं प्रयुज्यते।
परो मद्वचनादेव तमर्थं बुद्ध्यतामिति॥

किन्त्वेनमनुमानेन बोधयामीति मन्यते ।
सोऽपि तद्वचनान्नैव तमर्थमवबुध्यते ॥
किन्तु व्याप्तिमतो लिङ्गात्स्वयं तत्तु न पश्यति ।
तत्प्रतीत्यभ्युपायत्वात्परार्थमिदमुच्यते ॥

अतश्च श्रोतुः स्वार्थानुमानमेवेदं वक्ता तु तथा परं प्रतिपादयन्परार्थमनुमानं प्रयुङ्क्ते इत्युच्यते ।

न चानुवादमात्रं तद्वक्तुरित्युपपद्यते ।
यतो व्याप्रियते सम्यक्परस्य प्रतिपत्तये ॥

तेनानधिगतार्थोपदेशकत्वान्नानुवादमात्रं स्वागमापेक्षया त्वनुवादत्वे नेदानीमाप्तवचनमनुवादरूपं किंचिद्भवेत्सर्वस्य स्वोपलब्धिपूर्वकत्वादिति, तस्मात्परार्थानुमानवाक्योपपत्तेस्तदेकदेशा अवयवा युक्ता इति लक्ष्यन्ते—

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ (अ० १ आ० १ सू० ३२)

एतच्च सूत्रमेकमेव सामान्यलक्षणमवयवानामभिधत्ते, विभागं च प्रमाणानामिव प्रत्यक्षानुमानोपमानशब्दाःसाधनीयार्थप्रतिपत्तिपर्यन्तवचनकलापैकदेशत्वमवयवानां सामान्यलक्षणमाचष्टे । यद्यपि चैकवक्तृवचननिर्गतानां निसर्गभङ्गुराणामदीर्घायुषामपरिहार्यक्रमजन्मनां द्रुमाणामिव पारमार्थिकस्समूहो न समस्त्येव, तथाऽपि सिषाधयिषितार्थप्रतिपादनरूपैककार्योपयोगमूलीकृतात्मनां तेषां काल्पनिकः कलापः पूर्वमेव वाक्यकल्पनावसरे समर्थित इति तद्भागा अपि संभवन्त्येव । न च पदानामेवानुमानवाक्यावयवत्वम्, अपि तु खण्डवाक्यानामेकेन पदेन प्रतिज्ञोदाहरणादीनामभिधातुमशक्यत्वात, हेतुवचनं त्वेकमपि पदं क्वचिद्भवति कृतकत्वादिति, तदपि वा सविशेषणं प्रयुज्यमानं पदसमुदायेनैव प्रतिपाद्यते वस्तुत्वे सति कृतकत्वादिति, उदाहरणवचनमपि पटवदित्येवमालस्यादेव प्रयुज्यते तद्धि व्याप्तिदर्शनायैव वक्तव्यं यत्कृतकं तदनित्यं दृष्टं यथा घट इति, तस्मादवयवानामवयवत्वमेव लक्षणं न पदत्वम्, विभागो ऽपि प्रतिज्ञादिपदसन्निधाववयवश्रुतेरेवावगम्यते प्रतिज्ञादयः पञ्चावयवा न न्यूनातिरिक्ता इति । "नन्वत्र विवदन्ते केचिन्न्यूनतामवयवानामाचक्षते त्र्यवयवं द्व्यवयवं वा साधनवाक्यं वदन्तः, अन्ये तु जिज्ञासा संशयः प्रयोजनं संशयव्युदास इति पञ्चभिस्सह प्रतिज्ञादीन् दशावयवानाहुः" । उच्यते—न्यूनता यथाऽवसरं प्रतिसमाधास्यते, आधिक्यमप्ययुक्तं जिज्ञासादीनामशब्दस्वभावत्वेन वाक्यावयवत्वायोगात्, तथा ह्यप्रतीयमानेऽर्थे प्रतीतिप्रयोजनस्य प्रवर्तिका जिज्ञासा सा चेच्छास्वभावत्वादान्तरः प्रमातृधर्मो न वाक्यावयवः, अर्थक्रियासाधनेऽर्थे विमर्शः संशयः किमेवमयमथवैवमिति ज्ञानात्मकत्वान्न वाक्यावयवः,

प्रमातुः प्रमाणानि प्रवर्तमानानि प्रमेयमर्पयितुं पारयन्तीति सम्भावना शक्यप्राप्तिः साऽपि तथैव न वाक्यावयवं स्पृशेत्, (तत्त्वावधारणफलात्मकं प्रयोजनमपि न वाक्यैकदेशः ?) संशयव्युदासस्तु प्रतिपक्षोपालम्भः, स च वचनस्वभावत्वेऽपि न साधनवाक्यावयवः किन्तु वाक्यान्तरमेवेति न साधनवाक्यस्यावयवत्वं प्रतिपद्यते, तदिमे संशयादयः प्रवृत्तिहेतवो भवन्ति न वाक्यावयवा इति सूक्तं प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति। तेषाम्—

साध्यनिर्देशः प्रतिज्ञा ॥ (१।१।३३)

प्रतिज्ञेति लक्ष्यनिर्देशः, साध्यनिर्देश इति लक्षणम्, शुद्धस्य धर्मिणो धर्मस्य वा द्वयोर्वा स्वतन्त्रयोर्धर्मिविशिष्टस्य वा धर्मस्य साध्यत्वानुपपत्तेः धर्मविशिष्टो धर्मी साध्य इत्युमानलक्षणे निर्णीतमेतत्, तस्य निर्देशः परिग्रहवचनं प्रतिज्ञेति। "ननु सावधारणत्वाद्वाक्यानां कि साध्यनिर्देश एव प्रतिज्ञेत्यवधारणमुत प्रतिज्ञैव साध्यनिर्देश इति, यदि साध्यनिर्देश एव प्रतिज्ञेत्यवधार्यते तदायत एवकारकरणं ततोऽन्यत्रावधारणमिति प्रतिज्ञा नियम्यते साध्यनिर्देशं मा त्याक्षीदिति, साध्यनिर्देशस्त्वनियमित इति प्रतिज्ञामपहायापि भवेदित्यतिव्यापकं लक्षणम्, अथ प्रतिज्ञैव साध्यनिर्देश इत्यवधार्यते ततः साध्यनिर्देशो नियम्यते प्रतिज्ञां मा त्याक्षीदिति प्रतिज्ञा त्वनियमितेति साध्यनिर्देशमपहायापि भवेदिति साध्यनिर्देशेन प्रतिज्ञाया अव्याप्तत्वादव्यापकं लक्षणमि"ति। तदेतदयुक्तम्—न हि सर्वं वाक्यं सावधारणं भवति, यथैष पन्थाः स्रुघ्नं गच्छतीति न हि तत्रैष एवेति स्रुघ्नमेवेति वा गच्छत्येवेति वा नियन्तुं शक्यते इति। अथाप्यवधारणमवश्याश्रयणीयं तद्भवतु साध्यनिर्देश एव प्रतिज्ञेति, न चातिव्याप्तिः प्रतिज्ञामपहायान्यत्र साध्यनिर्देशस्यादर्शनात्, अनियमिताऽप्यसावन्यत्र न दृश्यत एवेति तस्मात्साध्यनिर्देश एव प्रतिज्ञेति स्थितम्, तद्यथा अनित्यः शब्द इति। "नन्वत्रापि किमनित्य एवेत्यवधारणमुत शब्द एवानित्य इति, तत्रानित्य एव शब्द इत्युक्ते तद्गतधर्मान्तरतिरस्कारात्कृतकत्वमपि तत्र न भवेदित्यसिद्धो हेतुः, शब्द एवानित्य इति त्ववधार्यमाणे घटादावनित्यत्वप्रतिषेधादन्वयशून्यता हेतोः स्यादिति"। नैष दोषः, निरवधारणस्यापि वचनप्रयोगस्य दर्शितत्वात्, अनित्य एव शब्द इत्यवधारणे वा नानित्यत्वव्यतिरिक्ततदविरुद्धकृतकत्वाद्यशेषधर्मान्तरनिषेधस्तत्र विधीयते किन्तु तद्विरुद्धनित्यत्वमात्रनिषेध एवानित्य एव शब्दो न नित्य इत्यर्थः. तदुक्तम्—

नियमस्तद्विरुद्धाच्च कल्प्यते नाविरोधिनः। इति।

तस्मान्न हेतोरसिद्धत्वम्। "ननु साधनवाक्ये प्रतिज्ञावचनमसमञ्जसमसाधनाङ्गवचनत्वात्, हेतुदृष्टान्तवचनाभ्यां हि साध्यसिद्धेस्ते एव वक्तव्योः

न च स्वप्रतिपत्तावुपलब्धं सर्वमेव परस्मै आख्येयम्, आख्याने वा धर्मिमात्रमाख्यायताम्, स्वप्रतिपत्तौ हि पूर्वं पर्वतादेः शुद्धस्य धर्मिणो ग्रहणं न तु सिषाधयिषितहुतवहादिधर्मविशेषरूषितवपुषः, एवमभ्युपगमेऽनुमानवैफल्यप्रसङ्गादतः कथं प्रथममेव साध्यधर्माध्यासितस्वरूपधर्मिनिर्देशकरणम्, अपि च विवादादेव प्रतिज्ञार्थो लभ्यते इति किं स्वकण्ठोक्तेन तेन प्रयोजनम्।" उच्यते-स्वप्रतिपत्तिमनुसरता परस्य प्रतिपत्तिरुत्पादनीयेति स्वप्रतिपत्तौ प्रथममुपलब्धो धर्मी तावदाख्येय एवानुद्दिश्यमाने हि धर्मिणि निरधिकरणो हेतुः क्व साध्यं साधयेत्, धर्म्यनवच्छिन्ने च धर्ममात्रेऽनुमानमनर्थकमविवादसिद्धत्वात्, अस्ति हि यत्र क्वचिदनित्यत्वमित्याश्रयासिद्धश्च धर्मिनिर्देशाद्विना हेतुर्भवेदित्यवश्यनिर्देश्यो धर्मः, यद्यपि च धर्मिमात्रदर्शनमेव प्रथममभूत्तथाऽपि किं साधयितुं हेतुः प्रयुक्तो भवेदित्युपप्लवशमनाय साध्यधर्मनिर्देशोऽपि कर्तव्यः, शब्दः कृतकत्वादिति हि प्रयुज्यमानं तदिदमन्धपदमिव साधनं भवेत्। "अथ व्याप्तिप्रदर्शननिपुणेन यत्कृतकं तदनित्यं दृष्टमिति दृष्टान्तवचसा, तस्मादनित्य इति निगमनवचनेन वा विरंस्यति स उपप्लव इति" तत्रापि श्रोतृबुभुत्सोपरमपरिश्रमफले साधनवाक्ये साधनाधिगमकाङ्क्षासमुत्पादनाय साध्यं निर्देष्टव्यं, न हि शब्द इत्येतावत्युक्ते तत्र साधनमाकाङ्क्षति कश्चिदिति साधनवचनावसरतत्प्रयोगसाफल्योत्पादनायैव नूनमनित्यः शब्द इति प्रतिज्ञावचनं प्रयोक्तव्यम्, यच्च विवादादेव प्रतिज्ञार्थस्य लब्धत्वमभिधीयते, तदभ्युपगमनमेव शब्दान्तरेण प्रतिज्ञायाः, यतो विरुद्धो वादो विवाद एक आह नित्यः शब्द इतरस्त्वनित्य इत्याह सोऽयं पक्षप्रतिपक्षपरिग्रहो विवादः प्रतिज्ञैव, स तु पक्षप्रतिपक्षपरिग्रहस्तदहरेव भवतु दिनान्तरे वेति किमनेन विशेषेण, तस्मादपरिहार्यं प्रतिज्ञावचनमिति सिद्धम्, प्रतिज्ञैव च पक्ष इत्युच्यते। तदेवंविधे पक्षलक्षणे प्रदर्शिते बलात्पक्षाभासाः प्रतिक्षिप्ता भवन्ति, तद्यथाऽनुष्णोऽग्निरिति प्रत्यक्षविरुद्धः पक्षः, न रूपग्राहि चक्षुरित्यनुमानविरुद्धः, शब्दविरुद्धस्तु बहुशाखः-ब्राह्मणेन सुरा पेयेत्यागमविरुद्धः, जनित्री मे वन्ध्या, पिता मे ब्रह्मचारीति धर्मधर्मिपदयोरेव विप्रतिषेधात्स्ववचनविरुद्धः, न चन्द्रः शशीति लोकप्रसिद्धिविरुद्धः, उपमानविरुद्धस्तु न गवयशब्दवाच्योऽयं गोसदृश इति, अप्रसिद्धविशेषणो नभःकुसुमकृतावतंसश्चैत्र इति, अप्रसिद्धविशेष्यः सुगन्धि गगनकमलमिति, अप्रसिद्धोभयः खपुष्पकृतशेखरो वन्ध्यासुत इति, यत्रापि विशेषणविशेष्ययोः प्रमाणान्तरतः स्वरूपं निश्चितमेव तन्निर्देशोऽपि पक्षाभास एव शीतं तुहिनमुष्णोऽग्निरिति साध्यत्वाभावेनानुमानप्रयोगावसरविरहादितीयमेव च सा सिद्धसाध्यतोच्यते इति, ये चैते प्रत्यक्षविरुद्धतादयः पक्षदोषाः, ये च वक्ष्यमाणाः साधनविकलत्वादयो दृष्टान्तदोषास्ते वस्तुस्थित्या सर्वे हेतुदोषा एव प्र-

पञ्चमात्रं तु पक्षदृष्टान्तदोषवर्णनम्, दृष्टान्तदुष्टतया च हेतोरेव लक्षणमन्वयव्यतिरेकयोरन्यतरद्धीयते इति सर्वे च ते हेतु दोषा एव।

अत एव च शास्त्रेऽस्मिन्मुनिना तत्त्वदर्शिना।
पक्षाभासादयो नोक्ता हेत्वाभासास्तु दर्शिताः॥
कश्चिद्धेत्वनपेक्षोऽपि पक्षमात्रप्रतिष्ठितः।
बाधोऽनुमानरूपस्य स्ववाक्यादिकृतो यथा॥

एवंलक्षणको हेतुरिति तत्स्वरूपावधारणे सति तदभिधायकं वचनं सुखमेव लक्ष्यते इत्यर्थात्मकहेतुलक्षणं तावदुच्यते—

उदाहरणसाधर्म्यात्साध्यसाधनं हेतुरिति॥ (१।१।३४)

"नन्वर्थात्मको हेतुरनुमानं तच्च लक्षितमेव पूर्वं तत्पूर्वकं त्रिविधमनुमानमिति"। सत्यं तस्य तत्पूर्वकमिति सर्वनामपरामृष्टप्रत्यक्षमूलतोपवर्णनेन प्रतिबन्धपरिच्छेदोपायमात्रनिरूपणं कृतमिह तु प्रतिबन्धस्वरूपमपि प्रतिपाद्यते, तत्रार्थात्मके हेतौ लक्ष्ये पञ्चधर्मीमपास्योदाहरणसाधर्म्ये साध्यसाधनं हेतुरिति सूत्रं पठन्ति, व्याचक्षते च–साधर्म्यं हेतुरित्युच्यमाने गन्धवत्त्वादेरसाधारणहेतोः साध्यधर्मिव्यक्तिभेदवृत्तित्वेन साधर्म्यरूपसंभवाद्विरुद्धस्य पक्षविपक्षवृत्तेस्तत्साधर्म्यस्वभावत्वाद्धेतुत्वं प्रसज्यत इति तन्निवृत्त्यर्थमुदाहरणग्रहणम्, उदाह्रियतेऽस्मिन्साध्यसाधनयोः प्रयोज्यप्रयोजकभाव इत्युदाहरणं दृष्टान्तः तेन साधर्म्यं, कस्येति? प्रकृतत्वात्प्रत्यासत्तेश्च साध्यस्य धर्मिण इत्यवगम्यते, उदाहरणसाधर्म्यं साध्यदृष्टान्तधर्मिसाधारणो धर्मो हेतुरिति नासाधारणादौ तथात्वप्रसक्तिरिति, एवमपि प्रमेयत्वादेरनैकान्तिकहेतोस्तथा भागासिद्धस्यानित्यत्वसिद्धये चतुर्विधपरमाणुपक्षीकरणे गन्धवत्त्वादेः प्रकरणसमकालात्ययापदिष्टयोश्चोदाहरणसाधर्म्यसम्भवाद्धेतुत्वं भवेदिति तद्व्यवच्छेदाय साध्यसाधनग्रहणम्, साध्यदृष्टान्तधर्मिणोश्च समानो धर्मः साध्योऽप्यनित्यत्वादिः भवत्येवेति तस्यापि हेतुता मा प्रसाङ्क्षीदिति साध्यसाधनग्रहणम्, लिङ्गसामान्यलाभार्थं साध्यसाधनं यदुदाहरणसाधर्म्यं स हेतुरिति, साध्यसाधनपदेन च प्रतिबन्धो लक्ष्यते स च सव्यभिचारादिषु नास्तीति न ते हेतवः, प्रतिबन्धश्च पञ्चलक्षणक इत्येकैकलक्षणाभावकृतहेत्वाभासपञ्चकनिर्देशादेव सूचितवानाचार्यः। "नन्वेवं तर्हि साध्यसाधनग्रहणमेव हेतुलक्षणमस्तु तद्धि सकलहेत्वाभासव्युदाससमर्थमिति किमुदाहरणसाधर्म्यग्रहणेन?" समानजातीयव्यवच्छेदार्थत्वात्, अहेतवो हि विजातीयास्तद्व्यवच्छेद. साध्यसाधनग्रहणात्समानजातीयस्य केवलव्यतिरेकिणो व्यवच्छेदायोदाहरणसाधर्म्यग्रहणमिति। "तत्किं केवलान्वयी हेतुरिति लक्ष्यत्वे न विवक्षितः?" न तथाविधस्य हेतोरभावात् अन्वयव्यतिरे-

कलश्यमत्रोदाहरणसाधर्म्यं वैधर्म्यसम्भवे तु सति साधर्म्यमप्यस्त्येवेति, न साव-धारणं वा विशेषविधिरूपेणैवेदमुदाहरणसाधर्म्यग्रहणं केवलान्वयिलक्षणं वर्ण-नीयमिति। "ननु यदि द्विविधो हेतुरिष्यते तर्हि सामान्यलक्षणमादौ वक्तव्यं ततो विशेषलक्षणमिति"। उच्यते—साध्यसाधनग्रहणमेव प्रतिबन्धसूचकं सामा-न्यलक्षणं भविष्यति, उदाहरणसाधर्म्यग्रहणं त्वन्वयव्यतिरेकिणो लक्षणमुत्तरसूत्रं च केवलव्यतिरेकिणः, केवलान्वयी हेतुर्नास्त्येवेत्येवं पञ्चमीमुपेक्ष्यार्थात्मकहेतु-लक्षणमाचख्युः। अपि वा भवतु तत्रापि संशयव्यवच्छेदफलः पञ्चमीपाठः,क-श्चिदेवमभिदधीत—साध्यसाधनमिति पर्यायपठनमात्रमेतन्न हेतुलक्षणम्, अपि च यत्रैव दृष्टान्तधर्मिणि हेतुधर्मप्रयुक्ततया साध्यधर्मोऽवधारितस्तत्रैव पुनरसावुपलभ्यमानस्तमुपस्थापयतु धर्म्यन्तरे तु तदुपलम्भाद्भवतु संशयः—'किं तत्साध्याविनाभूतमिह हेतोस्सत्त्वमुतान्यथे'ति, अस्येदमुत्तरमुच्यते उदाहरण-साधर्म्यादिति। अयमर्थः—देशकालव्यक्तिविशेषाणां व्यभिचारान्न तेषु प्रति-बन्धावधारणमपि तु सामान्यधर्मयोरेव,

व्यक्तिभेदाश्रयत्वे हि नैव व्याप्तिग्रहो भवेत्।
दृष्टान्तेऽप्यभ्यनुज्ञैवं भवता दीयते कथम्॥

तदभ्यनुज्ञानात्तु सामान्येन व्याप्तिग्रहणमङ्गीकृतमेव भवति। तस्मिंश्च सत्युदाहरणसाधर्म्यात्साध्यसाधनमेव भवति न संशयः संशयस्य विशेषग्र-हणकारणकत्वादिह चोदाहरणसाधर्म्यपदोपात्तं लिङ्गसामान्यमेव विशेषो गृह्यते इति कुतः संशयः, साध्यसाधनपदमपि न पर्यायमात्रमपि तु पञ्चलक्ष-णकप्रतिबन्धसूचनेन हेतोः हेतुत्वसमर्थनार्थमेतत्, कस्माद्धेतुर्हेतुर्भवति साध्य-साधनत्वाद्गमकत्वादित्यर्थः, साध्यसाधनता चास्य पञ्चलक्षणकात्प्रतिबन्धाद्वि-ना न निर्वहतीत्यसौ साध्यसाधनपदेन लक्ष्यते, सोऽपि च प्रयोज्यप्रयोजकभा-वगर्भस्साधनताङ्गतामेतीति तथाविध एव सूच्यते, अत एव चाप्रयोजक एवै-कः परमार्थतो हेत्वाभास इति वक्ष्यते, तदिदमीदृशं साध्यसाधनत्वं हेतोः कुतो भवतीत्युदाहरणसाधर्म्यादिति संशयं व्यवच्छिन्दन्त्या पञ्चम्या कथ्यते, अतश्च यदुच्यते परैः 'साधर्म्यं यदि हेतुः स्यान्न वाक्यांशो न पञ्चमी'ति तदिदमनु-पपन्नम्, पञ्चम्या अर्थात्मकत्वे हेतावनुपयोगात्तत्रापि वा तस्याः समर्थित-त्वात्, वाक्यांशे लक्षणान्तरकरणात् तच्चेदमिदानीमुच्यते उदाहरणसाधर्म्या-त्साध्यसाधनं हेतुः, यद्यपि च ज्ञानस्याप्युदाहरणसाधर्म्यात्कर्मभूतात्करणात्मक-त्वाद्वा भवत्यभिनिर्वृत्तिस्तथापि वाक्यावयवप्रकरणसामर्थ्याद् वचनमवसीयते। "यदि वाक्यावयवप्रकरणमिदं किमर्थं तर्ह्यर्थव्युत्पादनम्" उक्तमत्र तदौपयिक-त्वाद् इति, "साध्यसाधनग्रहणं वचनलक्षणे किमर्थम्? हेत्वाभासवचननिरसन-मर्थात्मकहेतुलक्षणादेव हि सिद्धम्" न हेत्वाभासवचनव्यवच्छेदकं पक्षधर्मत्व-

चनं कृतकत्वादित्येवमादि प्रयोक्तव्यमपि तु हेतुविभक्त्यन्तं कृतकत्वादित्येवमादि प्रयोक्तव्यमिति कृतकत्वेनेति कृतकोऽयमस्मादिति वाऽभिधातव्यमेवं हि तत्साध्यसाधनं भवतीति ॥

तथा वैधर्म्यात् ॥ (१।१।३५)

उदाहरणग्रहणमनुवर्तते साध्यसाधनमिति च, एतच्च तथाशब्दोपादानसामर्थ्याद्गम्यते उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः, अत्राप्यर्थात्मकहेतुपूर्वकत्वाद्वचनस्यार्थात्मक एव हेतुः प्रथमं लक्ष्यते इति तल्लक्षणाय पूर्ववत्पञ्चमीपाठशून्यमेव सूत्रं वर्णयन्ति, वैधर्म्यं हेतुरित्युच्यमाने पक्षवैधर्म्यस्यापि विपक्षवृत्तेरशेषाश्वव्यक्तिपक्षीकरणे तुरगा इमे विषाणादित्येवमादेर्हेतुत्वं स्यादित्युदाहरणग्रहणम, तथाऽप्यसाधारणादेरुदाहरणवैधर्म्यस्य हेतुता प्रसज्यते इति पूर्ववत्साध्यसाधनग्रहणं प्रतिबन्धसूचके सकलहेत्वाभासव्यवच्छेदके योजनीयम, तस्मादेव सकलहेत्वाभासव्यवच्छेदसिद्धेरुदाहरणवैधर्म्यग्रहणं समानजातीयान्वयव्यतिरेकिहेतुव्यवच्छेदसिद्धये व्याख्येयम् ।

"ननु च वैधर्म्यशब्दः केवलान्वयिनमेव हेतुमव्यतिरेकं व्यवच्छेत्तुमलं, तस्य वैधर्म्यशून्यत्वादन्वयव्यतिरेकिणोस्तु हेत्वोरुदाहरणसाधर्म्यस्यापि भावात्कथमनेन व्यावर्तनम् ?"

उच्यते—

वैधर्म्यशब्दोपादानात्केवलान्वयिनो यथा ।
निवृत्तिर्गम्यते तद्वदन्वयव्यतिरेकिणः ॥
साध्यसाधनशब्दो हि प्रतिबन्धोपलक्षणः ।
व्याख्यातः प्रतिबन्धश्च व्यतिरेकान्वयात्मकः ॥
वैधर्म्यसाधनेऽप्यस्मिन् स एव यदि वर्ण्यते ।
पूर्वत्र कथनाद्व्यर्थं वैधर्म्यग्रहणं भवेत् ॥
केवलव्यतिरेकाख्यप्रतिबन्धाभिधित्सया ।
वैधर्म्यवचनं तस्मात्सफलं व्यवतिष्ठते ॥
अध्याहृतैवकारं वा तद्व्युदासाय पठ्यताम् ।
विशेषविधिरूपेण व्याख्यानं वा विधीयताम् ॥
केवलान्वयिहेतुश्च न कश्चिदुपलभ्यते ।
तेन पूर्वोक्त एवास्य व्यवच्छेदो भविष्यति ॥

"नन्वेवं तर्ह्यनेनैव न्यायेन पूर्वसूत्रं केवलान्वयिलक्षणार्थं स्यात्, यथेह वैधर्म्यग्रहणं साधर्म्यव्यवच्छेदकमेवं तत्र साधर्म्यग्रहणं वैधर्म्यव्यवच्छेदाय स्यादिति"। उक्तमत्र न केवलान्वयी नाम हेतुः संभवतीत्यलक्षणीय एवासौ, तदेवमन्वयव्यतिरेकवतो हेतोर्लक्षणाय पूर्वसूत्रमिदं तु केवलव्यतिरेकिलक्षणाये-

ति स्थितम्, अर्थात्मकहेतुलक्षणपक्षेऽपि पञ्चमीपाठः पूर्ववत्संशयपराकरण-फलत्वेन वर्णनीयः, वचनात्मकहेतुलक्षणे ऽपि तथैव सूत्रं योज्यम्, यथोक्तवै-धर्म्यात्प्रवृत्तं वचनं साध्यसाधनं हेतुविभक्त्यन्तं प्रयोक्तव्यमित्यर्थः ।

केवलव्यतिरेक्याक्षेपः ।

तदेतदाक्षिपन्ति "लक्ष्ये सति लक्षणं वक्तव्यं भवति केवलव्यतिरेकी तु नाम न सम्भवत्येव हेतुरिति कस्येद लक्षणमुच्यते ? प्रतिबन्धेन हि हेतोर्गमक-त्वमुक्तं प्रतिबन्धश्च पञ्चलक्षणको व्याख्यातः, एकैकलक्षणविरहनिबन्धनाश्च पञ्च हेत्वाभासा भविष्यन्ति, तत्पक्षधर्मत्वविरहिण इवासिद्धस्य हेतोरन्वयशून्य-स्याऽपि (न)हेतुता युक्ता केवलव्यतिरेकमात्रशरणेन हेतुना साध्यसिद्धौ तथावि-धहेतुसुभिक्षसंभवाद्यद्यस्मै रोचते स तत्सर्वं साधयेत्, असाधारणस्य वा किमि-ति (न?) हेतुत्वं, व्यतिरेकवतोऽपि संशयः-'साध्याभावकृता तस्माद्व्यावृत्तिरुत वाऽन्यथा', अन्वये हि क्वचिद्गृहीतेऽन्यत्र हेतुव्यावृत्तिरवगम्यमाना साध्यव्या-वृत्तिकृतैवेत्यवधार्यते नेतरथा, इत्थमेव संदिग्धव्यतिरेकता व्यावर्तते नान्यथेति,

संदिग्धव्यतिरेके च साध्यसाधनता कथम् ।
लक्ष्याभावादतश्चेदं कथ्यते तस्य लक्षणम् ॥

643

तस्मान्न साधनग्रहणेन हेतुद्वयसामान्यलक्षणमभिधायोदाहरणसाधर्म्यग्रह-णेनान्वयव्यतिरेकिणो लक्षणमुदाहरणवैधर्म्यग्रहणेन च केवलव्यतिरेकिणो वर्णनीयमपि तु सूत्रद्वयेनैतस्यैवाऽन्वयव्यतिरेकवतो हेतोर्लक्षणं व्याख्येयम् । अन्वयव्यतिरेकयोर्गमकाङ्गत्वादेकेनान्वयनिरूपणमपरेण च सूत्रेणाव्यतिरेक-व्युत्पादनम्, अत एव च भाष्यकारः 'किमेतावद्धेतुलक्षणं नेत्युच्यते तथा वैध-र्म्या'दित्येकवाक्यतयैव व्याख्यातवान्, उदाहरणमपि च सूत्रद्वये तुल्यमेवान्वय-व्यतिरेकिहेतोरुक्तवा'नुत्पत्तिधर्मकत्वादि"ति ।

केवलव्यतिरेकिस्थापनम् ।

अत्र वदन्ति-यदि वयं यं कंचन शुष्कमेव केवलव्यतिरेकिणं हेतुमुपग-च्छेम तत एवमनुयुज्येमहि किन्त्वन्वयव्यतिरेकवानेव हेतुः क्वचित्साध्यवि-शेषे विशेषणविशेषवशात्केवलव्यतिरेकितामवलम्बत इति ब्रूमः, तद्यथेच्छा-दिगतं कार्यत्वमात्मसिद्धौ, तत्र हि कार्यत्वमाश्रितत्वमात्रेण व्याप्तमुपलब्धमन्व-यव्यतिरेकयुक्तमेव घटादेः कार्यस्याश्रितस्य दृष्टत्वात्, यत्र ह्याश्रितत्वं नास्ति तत्र कार्यत्वमपि नास्त्येव व्योमादौ, सोऽयमन्वयव्यतिरेकवानेव हेतुर्यदा परिदृ-श्यमानशरीराद्याश्रयव्यतिरिक्ताश्रयाश्रितत्वे साध्ये देहादिषु बाधकोपपत्तौ सत्यां (विलक्षण?)कार्यत्वादिति सविशेषणः प्रयुज्यते तदा केवलव्यतिरेकी सम्पद्यते, देहादिव्यतिरिक्तस्याश्रयस्यात्मनो नित्यपरोक्षत्वेनान्वयानुपलम्भा-

दिति, ईदृशस्य चान्वयमूलस्य तस्यां दशायां केवलव्यतिरेकितामुपगतस्य हेतुत्वानुपगमान्न पूर्वोक्तदोषावसरः, न हीदृशा हेतुना सर्वः सर्वं साधयितुमुत्सहते, न चासाधारणस्य हेतुत्वमित्थं स्थिते प्रसज्यते, पञ्चलक्षणत्वमपि पूर्वाश्रयापेक्षमस्य भविष्यति, यच्च संदिग्धव्यतिरेकित्वमाशङ्कितं तदप्यन्वयव्यतिरेकमूले केवलव्यतिरेकिणि निरवकाशं कार्यस्याश्रितस्योपलम्भादाश्रितत्वव्यावृत्त्या व्योमादौ च कार्यत्वव्यावृत्तिदर्शनादिदानीं घटादौ शरीरे वा सविशेषणकार्यत्वव्यावृत्तिर्दृश्यमाना विशिष्टाश्रयव्यावृत्तिगतैवावगम्यते इति न संदिग्धो व्यतिरेकः, एतच्चात्मसिद्धिप्रसङ्गे निर्णीतमिति निरपवादः केवलव्यतिरेकी हेतुरस्त्येव लक्ष्यते इति तल्लक्षणार्थमुत्तरसूत्रमन्वयव्यतिरेकिहेतुलक्षणार्थं च सूत्रं, केवलान्वयी हेतुर्नास्त्येव, सामान्यलक्षणं त्वनुमानलक्षणात्साध्यसाधनपदाद्वाऽवगन्तव्यम्, भाष्याक्षराणि तु कथमप्युपेक्षिष्यामहे। अथवा यथाकथंचिद्वा व्याख्यास्यामः, केवलव्यतिरेकिणं त्वीदृशमात्मादिप्रसाधने परममस्त्रमुपेक्षितुं न शक्नुम इत्ययथाभाष्यमपि व्याख्यानं श्रेयः॥

साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् (१।१।३६)

यथा 'तत्पूर्वकमनुमानमि'त्यत्र प्रतिबन्धग्रहणोपायमात्रं प्रतिपादितमिह तु प्रतिबन्धस्वरूपमुदाहरणसाधर्म्यवैधर्म्ययुक्तमेवं लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः इत्यत्र वादिप्रतिवादिप्रतिपन्नत्वं द्विविधस्यापि दृष्टान्तस्य सामान्यलक्षणमुक्तमिह तु प्रयोज्यप्रयोजकभावव्यवस्थितसाध्यसाधनधर्माधिकरणत्वमेकस्य द्वितीयस्य च तद्रहितत्वं लक्षणमुपपाद्यते। तत्र 'साध्यसाधर्म्यात्तद्धर्मभावी'ति साधर्म्यदृष्टान्तस्य लक्षणम्, वचनाधिकरणेऽप्यर्थात्मकदृष्टान्तचिन्तनं तदौपायिकत्वाद्धेतुवत्कर्त्तव्यम्, साध्यं धर्मविशिष्टो धर्मी तेन साधर्म्यं साधनधर्मो लिङ्गसामान्यं यत्तदुदाहरणसाधर्म्यं पूर्वमुक्तं तदेव द्विष्ठत्वादुभाभ्यां व्यपदिश्यते इतीह साध्यसाधर्म्यशब्देनोक्तम्, तस्मात्साध्यसाधर्म्याद्यस्तद्धर्मभावी तस्य साध्यस्य धर्मो नित्यत्वादिर्यस्मिन्भवति स तद्धर्मभावी, पञ्चम्या प्रयोजकत्वमुच्यते, हेतुधर्मप्रयुक्तः साध्यधर्मो यत्रास्ति स साध्यधर्मदृष्टान्त इत्यर्थः, स एव च वचसा कर्मतां प्रतिपद्यमान उदाहरणं भवतीत्यर्थवचनवाचिनोर्दृष्टान्तोदाहरणशब्दयोः सामानाधिकरण्यमविरुद्धम्, दृष्टान्त एकान्वयव्यापकेन वचनेनोद्यमान उदाहरणमित्युक्ते तदभिधायकं वचनमुदाहरणमुक्तं भवत्येव 'यद्यत्कृतकं तत्तदनित्यं दृष्टं यथा घट' इति।

"नन्वेवं यत्र हेतुकृता साध्यधर्मसत्ता यथा जलधरोन्नमनवृष्ट्यादौ तादृश एव दृष्टान्त उपदिष्टो भवेन्न यत्र साध्यधर्मकृता हेतुसत्ता यथा धूमानुमान इति"।

अदर्शनज्ञो देवानांप्रियः, नात्रोत्पत्त्यपेक्षया प्रयोज्यप्रयोजकभावो विवक्षितः किन्तु ज्ञप्त्यभिप्रायेण, ज्ञप्तौ च धूमः एवाग्नेः प्रयोजकतां प्रतिपद्यते, न हि

धूमाग्न्योः कार्यकारणभावेन गम्यगमकभावः किन्तु नित्यसाहचर्येणैव नियमनाम्ना सम्बन्धेनेत्यसकृदुक्तम् ।

धूमः स्वरूपतो नाम जायतां जातवेदसः ।
नाग्निस्तमाक्षिपत्येनं स एव ह्यग्निमाक्षिपेत् ॥
प्रयोजकत्वमग्नेश्च पञ्चम्या यदि कथ्यते ।
यत्र तत्राग्निरित्येवं तन्निर्देशः प्रसज्यते ॥
यस्य प्रयोजकत्वं हि चिख्यापयिषितं भवेत् ।
यच्छब्देन च पूर्वत्र स हि निर्देशमर्हति ॥
भवेदेवं च हेतुत्वं धूमं प्रति विभावसोः ।
न च तद्युज्यते वक्तुमनैकान्तिकदोषतः ॥
प्रयोजकत्वमिच्छन्ति तस्मान्नोत्पत्त्यपेक्षया ।

अपि तु ज्ञप्त्यभिप्रायं हेतोरेवोचितं तत्, तस्माद्धेतुधर्मप्रयुक्तः साध्यधर्मो य उत्थाप्यते स साध्यधर्मदृष्टान्तस्तद्वचनमुदाहरणमिति सिद्धम् ॥

तद्विपर्ययाद्वा विपरीतम् ॥ (१।१।३७)

दृष्टान्त उदाहरणमिति वर्तते, तदिति साध्यधर्मपरामर्शः, तच्च यद्यपि पूर्वसूत्रे लिङ्गसामान्यं तथाप्यत्र साध्यसाधर्म्यं द्रष्टव्यम्, तद्विपर्ययात्साध्याभावाद्विपरीतः अतद्धर्मभावी साधनरहितो यो दृष्टान्तः स वैधर्म्यदृष्टान्तः पूर्ववद्वचसः कर्मतामापद्यमानो वैधर्म्योदाहरणं भवति, विपरीतमित्युदाहरणापेक्षया नपुंसकलिङ्गनिर्देशः ।

"किमर्थं पुनः साध्याभावात्साधनाभावो वैधर्म्यदृष्टान्तः स वर्ण्यते न पुनः साधर्म्यदृष्टान्तस्थित्या साधनाभावादेव साध्याभाव इति" ।

उक्तमत्र—

व्याप्यव्यापकभावो यः साध्यसाधनधर्मयोः ।
स एव वैपरीत्येन मन्तव्यस्तदभावयोः ॥ इति ।

किं कारणम्? साधनधर्मे हि धूमे साध्यधर्मेणाग्निना व्याप्तेनाग्निः तत्र निवेशमलभमानोऽनन्यत्रावकाशत्वाद् धूम एव निवेशितः, एवं साध्यधर्माभावेऽनग्नौ साधनधर्माभावेनाधूमेन व्याप्ते सति धूमस्तत्र लब्धावकाशोऽनन्यगतित्वादग्नावेव निविशत इति, यदि तु साधर्म्यदृष्टान्तवत्तथैव व्याप्यव्यापकभावः व्याप्यते साधनाभावे साध्यं नास्तीति तदा धूमाभावेनानग्निना व्याप्तेनाग्निस्तत्रालब्धनिवेशो धूममवलम्बेतेति स्यात्, न चैतन्निर्वहत्यधूमेऽपि वह्निदर्शनादित्येवं सपक्षैकदेशवृत्तेर्हेतुत्वमपि प्रसिद्धं हीयते व्याप्तिवैधुर्यादिति, अपि च धूमाभावेनाग्न्यभावे व्याप्ते कथ्यमाने सत्यधूमो नियमितो भवत्यनग्निं मा हासीदित्यग्निस्त्वनियमितः स्वातन्त्र्यादधूममपि स्पृशेदिति व्यभिचारात्प्रतिबन्धो विप्लवे-

त, तदुक्तं–'यदा तु साध्याभावेन हेत्वभावो विरुध्यते साधनं व्यापितं भवेत्, साध्यं पुनः स्वतन्त्रत्वाद्धेतुभावेऽपि सम्भवेत्' इति(?)। तस्माद्यत्रापि समव्याप्तिकौ साध्यसाधनधर्माविति सपक्षैकदेशवृत्तित्वेनाहेतुत्वमाशङ्क्यते तत्रापि साधनधर्मस्य विपक्षाद्व्यावृत्तिमभिधित्सता साध्याभावे साधनाभावो दर्शयितव्यः, यत्रानित्यत्वं नास्ति तत्राकृतकत्वमपि नास्ति यथाऽऽकाश इति, यो ह्यविद्यमानविपक्षो हेतुः सोऽपि सुतरां ततो व्यावृत्तो भवति तदभावात्तत्रावृत्तेरिति, अतश्च सर्वपदार्थानित्यत्वं नास्ति, तत्र कार्यत्ववाद्येवमपि वैधर्म्यदृष्टान्तमप्रदर्शयन्न वार्यते–यत्र नित्यत्वं नास्ति तत्र कार्यत्वमपि नास्ति यथा शशविषाणादाविति, ते एते साधर्म्यवैधर्म्योदाहरणे अन्वयव्यतिरेकवति हेतावुभे अपि सम्भवन्ती विकल्पेन प्रयोक्तव्ये, एकेनैव व्याप्तेः प्रदर्शनात्किमन्येन कृत्यम्। केचित्तु व्याप्तिसौष्ठवप्रदर्शनाय द्वयोरपि प्रयोगमिच्छन्ति, भवतु मा वा भून्नेदं महद्विमर्दस्थानम्। "ननु हेतूदाहरणाधिकमिति निग्रहस्थानमिदमादिष्टम्" समानजातीयाभिप्रायं तद्भविष्यति, साधर्म्यदृष्टान्तानेकत्वे वा तन्निग्रहस्थानमित्यास्तामेतत्, इत्थं साधर्म्यवैधर्म्यदृष्टान्तरूपे व्युत्पादिते बलात्तल्लक्षणरहिता दृष्टान्ताभासा भवन्ति, तत्र साध्यविकलः साधनविकल उभयविकल इति वस्तुदोषकृतास्त्रयः साधर्म्यदृष्टान्ताभासाः, अनन्वयो विपरीतान्वय इति द्वौ वचनदोषकृतौ, यथा नित्यः शब्द अमूर्तत्वादित्यत्र बुद्धिवदिति साध्यविकलो दृष्टान्तः, परमाणुवदिति साधनविकलः, घटवदित्युभयविकलः, व्योम्नि नित्यत्वामूर्तत्वं विद्यते इत्यनन्वयः, यदमूर्तं तन्नित्यमिति वक्तव्ये यन्नित्यं तदमूर्तमिति विपरीतान्वय इति। वैधर्म्यदृष्टान्ताभासा अपि पञ्चैव–साध्याव्यावृत्तः साधनाव्यावृत्तः उभयाव्यावृत्त इति वस्तुदोषास्त्रयः, अव्यतिरेको विपरीतव्यतिरेक इति वचनदोषौ द्वौ, यथा तत्रैव हेतौ यत्र नित्यत्वं नास्ति तत्र मूर्तत्वमपि नास्ति यथा परमाणुष्विति साध्याव्यावृत्तः, बुद्धाविति साधनाव्यावृत्तः, यथाऽऽकाश इत्युभयाव्यावृत्तः, नित्यत्वामूर्तत्वे घटे न विद्यते इत्यव्यतिरेकः, यत्र नित्यत्वमपि नास्ति तत्रामूर्तत्वमपि नास्ति इति वक्तव्ये यत्रामूर्तत्वं नास्ति तत्र नित्यत्वमपि नास्तीति विपरीतव्यतिरेक इति। एते च वस्तुवृत्तेन हेतुदोषा एव तदनुविधायित्वादत एव हेत्वाभासवत्सूत्रकृता नापदिष्टाः अस्माभिस्तु शिष्यहिताय प्रदर्शिता एव॥

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः (१।१।३९)

उदाहरणमात्मलाभेऽपेक्षत इत्युदाहरणापेक्षः पक्षधर्मोपसंहार उपनयः, द्विविधश्चासौ तथेति न तथेति वा उदाहरणद्वैविध्यात्, तत्र साधर्म्योदाहरणापे-

दास्तथेत्युपनयो यत्कृतकं तदनित्यं दृष्टं यथाऽऽकाशः, न च न तथा कृतकः शब्द इति, अत्रापि निषेधद्वययोगाद्विधिरेव गम्यते ।

"ननु साध्यस्येत्यवाचकः सूत्रावयवः पक्षधर्मोपसंहारो ह्युपनयो न साध्योपसंहारः, साध्यो हि धर्मो धर्मी वा स्यान्न तयोरन्यतरस्याप्ययमुपसंहार इति" ।

उच्यते–साध्यो धर्म्येव न धर्म इह विवक्षितः, तत्रायं हेतोरुपसंहारस्तथा च कृतकः शब्द इति, सेयं साध्यस्येति सप्तम्यर्थे षष्ठी मन्तव्या साध्ये धर्मिणि हेतोरुपसंहार उपनय इति ।

"नन्वाधारविवक्षायामिह प्राप्नोति सप्तमी ।
सम्बन्धमात्रे वाच्ये वा कथमाधारतोच्यते ॥"
नैतत्सम्बन्धसामान्येऽप्युक्ते भवति धर्मिणा ।
योगो विशेषचिन्तायां तस्य त्वाधारता भवेत् ॥
विशेषेऽन्तर्निगूढे च प्रायः षष्ठी नियुज्यते ।
शेषो नामाविवक्षैव कारकाणामिति स्थितिः ॥
तथा च राज्ञः पुरुषो ब्राह्मणस्य कमण्डलुः ।
तरोः शाखेति सर्वत्र विशेषोऽन्तर्व्यवस्थितः ॥

अतश्च धर्माय जिज्ञाया धर्मजिज्ञासा सा हि तस्य ज्ञातुमिच्छेतिवत्सम्बन्धमात्रसमर्पिकाऽपि सेयं षष्ठी विशेषपर्यवसाना भविष्यतीति सूक्तं–'साध्यस्योपसंहार" इति,

उपनयाङ्गीकारे आक्षेपः ।

"ननूपनयवचनमनर्थकं पक्षहेतुदृष्टान्तवचनैः किं न पर्याप्तं यदर्थमुपनयवचनमुच्चार्यते ? यदि धर्मिणि हेतोः सत्त्वसिद्धये तदभिधानं तदपि वृथैव श्रमः पक्षधर्मवचनेनैव कृतकत्वादित्येवमादिना सिद्धत्वात्, अथ साध्यदृष्टान्तधर्मिणोः साध्यापादनाय तदुच्चारणं तदपि न चतुरस्रमुदाहरणसाधर्म्यादित्यनेनैव गतार्थत्वात्, उदाहरणसाधर्म्यवचनं हि हेतुवचनमेव भवेत्, अथ स्वप्रतिपत्तौ तदर्थदर्शनात्परं प्रति तद्वचनं तत्रापि परामर्शज्ञाने विवदन्ते, अपि च स्वयं दृधिभक्षणसमनन्तरं यदि कदाचिदनुमेयमितिरुपजायते तत्किं परस्मै तदुपदिश्यताम्, योऽप्ययं प्रतिज्ञाहेतूदाहरणोपनयनिगमनप्रयोगक्रम आश्रीयते सोऽपि स्वप्रक्रियानुरागनिर्मित एव न वस्तुबलप्रवृत्तः, तथा हि यद्यत्कृतकं तत्तदनित्यं दृष्टं कृतकश्च शब्द इतीयतो वचनात्को नाम शब्दानित्यतां नावगच्छेत्, वामे चात्र सत्यव्रतधनः प्रमाणं डिण्डिकरागं परित्यज्याक्षिणी निमील्य चिन्तय तावत्किमियताऽर्थं बुद्ध्यसे न वा, तस्मात्स्वप्रक्रियापक्षपातमपास्य पञ्चावयवमेवंक्रमकं वाक्यं प्रयुङ्क्ष्वेति" ।

उपनयाक्षेपसमाधिः ।

अत्रोच्यते—इदं तावद्भवान्पृष्टो व्याचष्टां किं स्वप्रतिपत्तिमनुसरन्तः परप्रतिपादनाय वाक्यवचनां कुर्मः उत परहृदयानुवर्तनेनेति ? तत्र पराभिप्रायस्य वैचित्र्यात्परोक्षत्वाच्च दुरवगमत्वेन न विद्मः किं विदध्महे किं भ्रुवमुत्क्षिपामः किमरत्निना परं पीडयामः उत हस्तसंज्ञया व्यवहरामः आहो हेतुमात्रमेव केवलं प्रयुञ्ज्महे किं वा त्र्यवयवं वाक्यमभिदध्मः उत पञ्चावयवादपि वाक्यादधिकमाख्यानकमस्मै वर्णयाम इत्येवमनवस्थितत्वात्पराभिप्रायस्य स्वप्रतिपत्तिमेवानुसरता परः प्रत्याय्यः, तत्र स्वप्रतिपत्तौ पर्वतादिधर्मी प्रथमं दृष्ट इति स प्रतिज्ञया कथ्यते, ततो धूमादिलिङ्गमुपलब्धमिति हेतुवचनेन तदावेद्यते, ततो यत्र धूमस्तत्राग्निर्यथा महानस इति व्याप्तिस्मरणमभवदिति दृष्टान्तवचसा तदभिधीयते, ततस्तथा चायं धूम इति परामर्शज्ञानमुदपादीति तदुपनयवचनेन प्रतिपाद्यते, ततस्तस्मादत्राग्निरित्यनुमेयज्ञानमुपजायते इति निगमनेन तदुच्यते, ततः परं प्रति पर्यवसानात्किमन्यदुपदिश्यतामिति, न च दधिभक्षणसदृशमतोऽन्यतममपि भवितुमर्हत्यनुमेयप्रतिपत्तावुपादेयत्वात्, येषामपि मते परामर्शज्ञानं नास्ति तैरप्युपनयवचनमवश्यमेवापरिहार्यमनुमेयप्रतिपत्तये, दृष्टान्ते दर्शितशक्तिरेव हेतुः प्रभवति नान्यथेत्यतो यद्यपि पक्षधर्मवचनेन हेतुसंबन्धमात्रमुपपादितं तथाप्यत्र नादृष्टान्तदर्शितशक्तिधर्मः स तस्मिन्धर्मिणि तथाविधो हेतुः स्यान्न वेत्यसिद्धाशङ्काशमनमुपनयवचनमन्तरेण न भवत्येतेत्यवश्यं प्रयोक्तव्यं तदिति । स्वप्रतीत्यनुसरणेन च वाक्यरचनायाः स्थितत्वात्क्रमोऽपि यथोक्त उपयुज्यते, अत एव च यत्कृतकं तदनित्यं दृष्टमित्यभिधानमनुपपन्नमनवगते धर्मिणि तद्वर्तिनि च हेतौ प्रथममेव व्याप्तिस्मरणासंभवेन तद्वचनायोगात्, तदिदमवयवविपर्यासवचनमप्राप्तकालनिग्रहस्थानमुपदेक्ष्यामः, अपि च 'यत्कृतकं तदनित्यं दृष्टं कृतकश्च शब्द इत्येतावदेव प्रयोक्तव्यमि'ति वदता भवता कृतकश्च शब्द इत्येतावदेव प्रयोक्तव्यमिति इतीदमुपनयवचनमनुज्ञातं कृतकत्वादिति पक्षधर्मवचनं तु निह्नुतम् , "कृतकश्च शब्द इत्येतदेव हेतुवचनमिति चेत्" न प्रयोजकस्य पञ्चम्यादिनिर्देशाहत्वादिति यत्किंचिदेतत् , यदप्युच्यते "विदुषां वाच्यो हेतुरेव केवल" इति, तदप्यचारु, विद्वद्भिर्विद्वत्त्वादेव हेतोरपि प्रज्ञानात्, अपूर्वा इमे विद्वांसो ये प्रतिज्ञावयवचतुष्टयस्यार्थं जानन्ति हेतुवचनस्य न विदन्तीति, तस्मात्पराशयस्य सर्वथा दुर्बोधत्वात्पूर्वोक्तेनैव क्रमेण स्वानुभवसाक्षिकेण वाक्यरचनां कृत्वा परः प्रत्याय्य इति ॥

हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ (१।१।३९)

हेतुधर्मिणि निर्ज्ञातशक्तिः साध्ये धर्मिण्यपदिश्यतेऽनेनेति हेत्वपदेश उप-

नयः, तस्माद्धेत्वपदेशात्प्रवृत्तं प्रतिज्ञायाः पुनर्वचनं निगमनं, निगम्यन्तेऽनेन पूर्वोक्ता अवयवा एकत्र साध्येऽर्थे समर्थ्यन्ते नियोज्यन्ते इति निगमनम्—तस्मात्कृतकत्वादनित्यः शब्द इति, तदिदं निगमनं साधर्म्यवैधर्म्यभेदेन हेतोर्दृष्टान्तस्य च तदपेक्षिणश्च तथा न तथेत्युपनयस्य द्वैविध्येऽपि प्रतिज्ञावचनवत्तुल्यमेव भवति ।

प्रतिज्ञावयवाक्षेपः ।

"ननु प्रतिज्ञावचनमेव तावदसाधनाङ्गवचनत्वादपार्थकम्, ~~तस्या एव तु पुनर्वचनं निगमनमसाधनाङ्गवचनत्वादपार्थकम्~~, तस्या एव तु पुनर्वचनं निगमनमधुना सफलं भविष्यतीति केयं कथा, प्रतिज्ञायाः पुनर्वचनमिति च न वाचको ग्रन्थः साध्यनिर्देशो हि प्रतिज्ञा सिद्धनिर्देशस्तु निगमनमिति, वाचके वा ग्रन्थे पौनरुक्त्यादेव निगमनस्य नैष्फल्यम्, स्वप्रतिपत्तौ च परामर्शज्ञानानन्तरं साध्यावगतिरेव भवन्ती दृश्यन्ते सा परस्याप्युपनयवचनश्रवणसमनन्तरमुपजायत एवेति किं तदुक्त्या प्रयोजनम्"।

उक्ताक्षेपसमाधिः ।

उच्यते-प्रतिज्ञायास्तावत्साफल्यं समर्थितमेव तस्याश्चेदं पुनर्वचनं सिद्धसाध्यभेदे सत्यपि धर्मिधर्मनिर्देशमात्रमास्यादुच्यते, सिद्धसाध्यभेदादेव च न पौनरुक्त्यकृतमसाफल्यं स्वप्रतिपत्तिसमये च परामर्शज्ञानानन्तरं साध्यबुद्धिरुत्पन्ना सा परस्मै कथ्यमाना न निष्प्रयोजना भवति,

तस्माद्धेतोरिदं साध्यमहमज्ञासिषं यथा ।
तथा त्वमपि जानीहि मा स्म विघ्नोऽत्र ते भवेत् ॥

एवमुक्ते संशयानस्य संशयः शाम्यति विपर्यस्तमतेश्च विपर्ययस्तदर्थश्च परार्थानुमानोपन्यासश्रमस्तदिदं विपरीतप्रसङ्गनिषेधार्थं निगमनमाहुः ।

ये तु यथाश्रुतसाध्यनिर्देशात्मकप्रतिज्ञापुनर्वचनसमर्थनलाभादपि प्रतिज्ञायाः सिद्धिमबुध्यमाना असाधारणशङ्काव्यवच्छेदाय निगमनवचनमिच्छन्ति, ते न सम्यगभ्ययुः, असाधारणाशङ्कायाः दृष्टान्तवचनेनैव निरस्तत्वात्, विशेषस्य हि हेतुत्वशङ्कायामसाधारणशङ्का स्याद्यत्कृतकं तदनित्यमिति दृष्टान्तवचसा सामान्यस्य हेतुत्वे कथिते कथमसाधारणत्वमाशङ्क्येत, यदि पुनरुपनयवचनेन साध्ये धर्मिणि हेतोरुपसंहारादसाधारणत्वमाशङ्क्येत तत्पुनर्दृष्टान्तधर्मिवृत्तित्वमस्य दर्शयितव्यम्, तस्मिन्दर्शिते पुनस्तद्वृत्तित्वाद्धर्मिण्यसिद्धत्वमाशङ्कनीयं पुनस्तद्व्यावृत्तये धर्मिणि हेतोरुपसंहारो विधेय इत्येवमसाधारणाशङ्काव्युदासाय प्रयोगः किन्तु पूर्वरीत्यैवेति, तस्माद्विवक्षितेऽर्थे यथोदिते क्रमनिवेशिनोऽवयवान् एकत्र संघटयितुं निगमनवचनं प्रयोक्तव्यम् ।

अवयवेषु प्रमाणाभिसंप्लवः ।

त इमे प्रतिज्ञादयो निगमनपर्यन्ताः पञ्चावयवा यथासम्भवमागमादिप्रमाणानुगृहीताः परस्परानुषक्ताश्च स्वार्थं साधयन्ति, तत्र मुख्यया वृत्त्या प्रतिपाद्येनानुमानेनैव सर्वेऽवयवा अनुगृह्यन्ते प्रपञ्चाय तु प्रमाणान्तरानुग्रह एषामुच्यते, प्रतिज्ञायास्तावदागमोऽनुग्राहक उपेयते उपदेशस्वभावत्वात्, अनित्यः शब्द इत्युक्त्वा त्वेवंविधे विषये ऋषिवदस्वतन्त्रत्वादनुमानमुपदिशन्ति, प्रतिज्ञावचनं तु तच्छायानुपातित्वाच्छब्दप्रामाण्यसिद्ध्यर्थे वा शास्त्रे तत्प्रतिज्ञायाः शब्दविषयत्वादागमानुगृहीतमुच्यते, हेतुवचनमनुमानेनानुगृह्यते, उदाहरणं तु प्रत्यक्षेण तन्मूलत्वाद्व्याप्तिपरिच्छेदस्य यथा गौस्तथा गवय इति च यथा घटस्तथा शब्द इत्यनया च्छाययोपमानकरणभूतवनेचरादिवचनसदृशत्वादुपमानमुपनयस्यानुग्राहकमभिधीयते, निगमनस्य तु सर्वावयवानामेकत्र नियोजनार्थत्वात्सर्वप्रमाणानुग्राह्यतैवेतरेतरानुषक्तत्वात्, प्रतिज्ञां विना निराश्रयो हेतुर्भवेदिति सा पूर्वं प्रयोक्तव्या अनित्यः शब्द इति, ततो हेतुं परो जिज्ञासत इति हेतुवचनमुच्चार्यते कृतकत्वादिति, हेतौ श्रुते क्वास्य व्याप्तिरवधृतेति दर्शयितुमुदाहरणमुच्यते यत् कृतकं तदनित्यं दृष्टं यथा घट इति, एवमुक्ते किमीदृशो निर्ज्ञातशक्तिरेष हेतुः साध्यधर्मिणि भवेन्न वेत्यसिद्धताशङ्कामपाकर्तुमुपनयः प्रसज्यते, ततोऽमुना क्रमेण तथापि साध्यप्रतीतिर्भवत्विति सर्वावयवानेकत्र साध्येऽर्थे समर्थयितुं निगमनमभिधीयते, अन्यतममवयवमन्तरेण सकलमिदमनुषक्तार्थवाक्यं स्यादिति पञ्चावयवमेव यथोपदष्टक्रमकं वाक्यं प्रयोक्तव्यम् ।

इत्यारब्धोपकारास्तदनुगुणफलैरागमादिप्रमाणै-
रन्योन्यापेक्षिणोऽमी नियतमवयवाः साधयन्त्यर्थजातम् ।
यश्चैतेषां प्रमेये वचसि च चतुरस्तस्य जातिप्रयोग-
प्रायैः शक्यो न पक्षः क्षपयितुमिति हि व्याहरद्वृत्तिकारः ॥

इति भट्टजयन्तस्य कृतौ न्यायमञ्जर्यां दशममाह्निकम् ।

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ (१।१।४०)

अविज्ञाततत्त्वेऽर्थे इति सामानाधिकरण्यनिर्देशादर्थ एवात्रान्यपदार्थो न पुरुषः, पुरुषो हि षष्ठ्या निरदेक्ष्यत अविज्ञातं तत्त्वमस्येति, तत्त्वपदोपादानेन धर्मिणः सामान्यधर्ममात्रविशिष्टस्य विज्ञातत्वं सूचयति, कारणोपपत्तित इति संशयज्ञानोल्लिख्यमानपक्षद्वयान्यतरपक्षोत्थापनानुकूलकारणावलोकनं तत्त्वस्योत्थापकमाह, अत एवाविज्ञाततत्त्वेऽर्थे भवन्तावपि बुभुत्साविमर्शौ न तर्कतां प्राप्नुतः, तत्त्वज्ञानार्थमिति साक्षात्प्रमाणतामस्य निरस्यति, प्रमाणानुग्रहं तु विशेषपरिशोधनद्वारेण विदधत्तत्त्वज्ञानाय कल्पते, तर्क ऊह इति

पर्यायोपादानस्य प्रयोजनं वक्ष्यामः, तेनायं सूत्रार्थः—अविज्ञाततत्त्वे सामान्यतो ज्ञाते धर्मिण्येकपक्षानुकूलकारणदर्शनात्तस्मिन् सम्भावनाप्रत्ययो भवितव्यतावभासस्तदितरपक्षशैथिल्यापादने तद्ग्राहकप्रमाणमनुगृह्य तान्सुखं प्रवर्त्तयँस्तत्त्वज्ञानार्थमूहस्तर्क इति, यथा वाह्यकेलिप्रदेशादावूर्ध्वत्वविशिष्टधर्मिदर्शनात्पुरुषेणानेन भवितव्यमिति प्रत्ययः ।

"ननु तत्त्वज्ञानार्थमित्युक्ते सति सामर्थ्यादविज्ञाततत्त्वता लभ्यते एवेति किमर्थं स्वकण्ठेन पुनरनूद्यते ?"

बाढं किंतु कचिद्विषये ज्ञाततत्त्वेऽपि पूर्वतर्केणावमृष्टे सत्युत्तरकालं तर्कितो मयाऽयमर्थ इति स्मर्यमाणतर्कविशेषणतया गृह्यमाणो विशेषणीभूतस्तर्कस्तत्त्वज्ञानार्थो भवतीति तद्व्युदासाय पुनरविज्ञाततत्त्वग्रहणम्, मार्गशोधनद्वारेण तर्कस्य तत्त्वज्ञानार्थत्वमिह विवक्षितं तच्चाविज्ञाततत्त्वेऽर्थे सम्भवतीति ।

"ननु नैव संशयनिर्णयान्तरालवर्ती तर्कप्रत्ययः कश्चिदस्ति, तथा हि यदि तावदनवगतविशेषस्य भवत्यसौ प्रत्ययस्तर्हि संशय एव भवेदवगतविशेषस्य भवन्निर्णयतामेव स्पृशेत्, पुरुष एवेत्येवकारार्थाद्युन्मेषरहितोऽपि प्रत्ययो निर्णयो न न भवितुमर्हति, तुरगपरिसरणसमुचितदेशदर्शनमपि यदि स्थाणुपक्षे स्थगयितुमलमिति मन्यसे तत्करचरणादिनरविशेषदर्शनवत्तन्निर्णयकारणमेव स्यात्, अथ तस्यामपि तुरगविहरणभुवि निखनति कश्चन स्थाणुमिति शङ्कसे, यद्येवं स्थाणुपक्षानपायात्पुनः संशय एव स्यादिति न तृतीयः पक्षः समस्तीति लक्षणाभावात्कस्येदं लक्षणमिति ?"

उच्यते—न खलु स्वमतिपरिकल्पितविकल्पवितानेन प्रत्यात्मवेदनायाः प्रतीतयो वरीतुं शक्याः, तथा हि—स्थाणुर्वा पुरुषो वेति प्रतीतिरेका पुरुष एवायमित्यन्या पुरुषेणानेन भवितव्यमिति मध्यवर्तिनी तृतीया संभावनाप्रतीतिः स्वहृदयसाक्षिकैव,

> साम्येन हि समुल्लेखः संशये पक्षयोर्द्वयोः ।
> निर्णये त्वितरः पक्षः स्पृश्यते न मनागपि ॥
> तर्कस्त्वेकतरं पक्षं विभात्युत्थापयन्निव ।

ननु सम्भावनाबीजवाजिवाहनदर्शनाद्वाहकेलिप्रदेशविशेषदर्शनं हि पुंसि सम्भावनामात्रमुपजनयितुमलं न तु शिरःपाण्यादिविशेषदर्शनवत्सर्वात्मना स्थाणुपक्षापसरणेन पुरुषनिर्णयाय प्रभवत्यतोऽयमगृहीतविशेषस्यैव भवति प्रत्ययो न तु संशयः एकतरपक्षानुकूलकारणोपपत्त्या जायमानत्वात्, कथं पुनः पाणिपादादिपुरुषविशेषवदश्ववाहनदेशविशेषो विशेषकार्यं न कुर्यात् करेणैवास्थाणुपक्षोत्सारणान्निर्णय एवायमिति कस्यैष पर्यनुयोगः, यथा हि शिरःपाण्यादिदर्शने सति पुरुषनिर्णयो भवति न तथा तुरगवहनदर्शने सति, अननुयोज्याश्च

पदार्था एवं भवतैवं मा भूतेति, यथा च देशान्तरे स्पर्धमान एव स्थाणुपक्ष आस्ते न तथा वाहकेलिभूमावपि तु शिथिलीभवति संभवत्प्रमादत्वाच्च न सर्वात्मना निवर्तते।

"ननु यदि न निवर्तते तर्हि स्पर्धतां मा वा स्पर्धिष्ट स्थितस्तावत्स्थाणुपक्ष इति संशय एवायमिति"

मैवम् स्थाणुपक्षः सर्वात्मना (न) निवर्तते नाप्यास्ते एवमेवायं त्रिशङ्कुरिवालम्बमानः प्रत्ययान्तरनिवृत्तये प्रभवतीति तथा प्रत्ययानुभवादेव परिकल्प्यते, वाहकेलिप्रदेशदर्शने हि यथा पुरुषविशेषाः स्मरणपथमवतरन्ति न तथा स्थाणुविशेषाः उभयविशेषस्मरणजन्मा च संशय इति सोऽयं वाहकेलिप्रदेशविशेषः शिथिलयति स्थाणुपक्षं न सर्वात्मनोच्छिनत्तीति तद्दर्शनात्कृतकतत्कारणप्रत्यय इति न तद्धृदयंगमं तेन क्रमेण निर्णय एवासौ तत्कारणतथात्वं न तर्क इति। अथ वा कार्योदाहरणत्वादस्य तत्रापि संशयनिर्णयान्तरालवर्ती तर्कप्रत्ययो द्रष्टव्यः स उदाहरणं भविष्यति।

"ऊह इति पर्यायाभिधाने किं प्रयोजनं" लक्षणप्रतिपादनमेव, तदेव हि तर्कस्य लक्षणं यदूहरूपत्वं इतरस्तु सूत्रे कारणविशेषाय फलनिर्देशः, कारणोपपत्तित इति कारणनिर्देशः, अविज्ञाततत्त्वेऽर्थे इति विषयनिर्देशः, तत्त्वज्ञानार्थ इति फलनिर्देशः।

अपि च तर्कशब्दं केचिदनुमाने प्रयुञ्जते, यथा स्मृतिकाराः पठन्ति—

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः॥ इति॥

तदिहापि तर्कोऽनुमानं मा विज्ञायीत्यूहग्रहणम्, ऊहोऽत्र तर्क उच्यते नानुमानं तत्त्वज्ञानार्थताऽप्यस्य प्रमाणानुग्राहकत्वेन न साक्षात्, तथैव चार्थं साधयितुमेव वादे प्रयुज्यते हृदयशुद्धिप्रकाशनार्थम्।

कापिलास्तु बुद्धिधर्ममूहमाहुः, स तत्सिद्धान्तप्रसिद्धसत्त्वरजस्तमोरूपप्रकृतिप्रभवभुवनसर्गादिव्यवहारनिराकरणवर्त्मना पूर्वमेव निरस्तः।

जैमिनीयास्तु ब्रुवते–युक्त्या प्रयोगनिरूपणमूह इति, इह हि किंचिदुपदिष्टदृष्टादृष्टस्वभावसकलेतिकर्तव्यताकलापं कर्म भवति यथाऽऽग्नेयोऽष्टाकपाल इति दर्शपूर्णमासकाण्डे पठितम्, क चित्पुनः प्रधानकर्ममात्रमुपदिश्यते इतिकर्तव्यता तु काचन नाम्नायते, यथा—'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम' इति, तत्र विचार्यते–किमितिकर्तव्यताविरहितयथाश्रुतप्रधानमात्रसंपादनेन तत्र शास्त्रार्थप्रयोगः परिसमाप्यते उत तदपि सेतिकर्तव्यताकं प्रधानमनुष्ठेयमिति, तत्रापूर्वप्रयुक्तत्वेन धर्माणां प्रतिकरणं भेदे स्थिते निरङ्गस्य प्रधानस्यानुष्ठेयत्वाद्विध्यन्ताधिकरणसिद्धान्तन्यायेन प्राकृतवद्वैकृतं कर्म कर्तव्य-

मिति सेतिकर्तव्यताकं तदनुष्ठीयते, एवं सामान्यातिदेशे स्थिते सति कस्य वैकृतस्य कर्मणः कुतः प्रकृतेर्धर्मा अधिगन्तव्या इति चिन्तायां द्रव्यदेवतादिचोदनासारूप्यपर्यालोचनोपनतहृदयसन्निधानप्राकृतकर्मविशेषसम्बन्धिन एव तत्र धर्मा भवितुमर्हन्तीति स्थापिते युगपदुपनिपतदनर्गलचोदकव्यापारोपनीतनिखिलाखण्डमण्डलविध्यन्तकाण्डाधिगम्यधर्मसंबन्धप्राप्तौ सत्यां ते धर्माः कथं प्रयोक्तव्या इति युक्त्या प्रयोगनिरूपणमूह उच्यते, येनेत्थं प्रयोक्तव्या इति धर्मा व्यवस्थाप्यन्ते, स च त्रिविधो मन्त्रसामसंस्कारविषयः, मन्त्रविषयस्तावद्यथाऽत्रैव सौर्ये चरौ प्रकृतिवद्भावेनाग्नेयादग्नये त्वा जुष्टं निर्वपामीति निर्वापमन्त्रः प्राप्तः कथं प्रयोक्तव्य इति विचारणायामुच्चारणमात्रेण मन्त्राणामनुपयोगात्प्रयोगसमवेतद्रव्यदेवतादिप्रकाशनद्वारेण तदुपयोगस्य व्यवस्थितत्वादिहाविकृत एवायमग्नये जुष्टमिति प्रयुज्यमानो मन्त्रः प्रयोगसमवायिनोऽर्थस्याप्रकाशनादसङ्गतो भवेत् सर्वात्मना चोत्सृज्यमानो मन्त्रो मन्त्रप्रकाशितकर्माननुष्ठानान्न प्रकृतिवत्कृतं भवेदित्यग्निपदोद्धारेण सूर्यपदप्रक्षेपेण मन्त्र ऊहेनेत्थं प्रयोक्तव्य इति गम्यते सूर्याय त्वा जुष्टं निर्वपामीति ।

"ननूहप्रवरनामधेयानाममन्त्रत्वादित्थमपि न मन्त्रेण स्मृतं कर्म कृतं स्यात्" नैतत्—एकदेशविकृतमनन्यवद्भवतीति न्यायात् । सामविषयस्तु गीतयः सामानीति स्थिते क्वचित्कर्मणि 'रथन्तरमुत्तरयोर्गायति, बृहदुत्तरयोर्गायती'ति श्रुतेः सा बृहद्रथन्तरगीतिर्यस्यामृचि योनिभूतायामुत्थिता ततोऽन्यस्यामपि प्रयुज्यते, तादृगक्षरापायेऽपि च सामगीतिर्ऋगन्तराक्षरेष्वपि प्रत्यभिज्ञायते रथन्तरमनेन श्लोकमिति व्यवहारदर्शनात् । संस्कारविषयः खल्वपि प्रकृतौ प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्तीति संस्कारश्चोदितः क्वचिच्च विकृतौ श्रूयते-'नखनिर्भिन्नश्चरुर्भवती'ति, तत्रोलूखलमुसलयोः प्रकृतौ पुरोडाशापेक्षिततुषकणविप्रमोकपूर्वकतण्डुलीभावसम्पादनद्वारेणोपयोगाद्विकृतावपि तत्कार्यापन्नानां नखानां प्रोक्षणाख्यः संस्कारः क्रियते इति, सोऽयं त्रिविध ऊहः ।

केचित्तु पञ्चविधमूहमाचक्षते 'धर्मस्यार्थकृतत्वाद् द्रव्यगुणसंस्कारव्यतिक्रमप्रतिषेधे चोदनानुबन्धः समवायादि'ति(९।२।४७जै०) सूत्रमनुसरन्तः, एतत्तु प्रतत्यमानमतिप्रसङ्गमावहति त्रिविधमेव चोहं याज्ञिका अनुमन्यन्ते इति ।

अत्र वदन्ति—सोऽयमूहशब्दः श्रोत्रियैरनुमाने प्रयुक्तो यथा स्मृतिकारैस्तत्र तर्कशब्दो यस्तर्केणानुसन्धत्त इति, तथा हि वैकृतं कर्म धर्मि तत्समवेतार्थप्रकाशकमन्त्रप्रयोगनिर्वर्त्यमिति साध्यो धर्मः कर्मत्वात्प्राकृतकर्मवत्, मन्त्रो वा तत्समवेतप्रकाशकः प्रयोज्यो मन्त्रत्वात्प्राकृतमन्त्रवदिति । प्राकृतेषु च कर्मसु तथा तथा व्याप्तिग्रहणात्सर्वोऽयमनुमानमार्ग एव, नखाः प्रोक्षणीयाः प्रयोगोपयोगितण्डुलनिर्वर्तकत्वादुलूखलमुसलवदिति, सामसु तु स्पष्ट-

मेव वचनमस्ति रथन्तरमुत्तरयोर्गायतीति तदभावेऽपि मन्त्रसंस्कारसमानयोगक्षेमत्वमेव ।

अपि च शब्दपृष्ठस्थितन्याये सहस्रव्युत्पादनात्मके मीमांसाशास्त्रे, तन्न्यायलभ्योऽर्थश्चोदनार्थ एवेति स्थापितम्, अतश्च यथोक्तोहलभ्यस्यार्थस्य चोदनार्थता मा निर्वर्तिष्टेति सोऽयमूहः शब्द एवान्तर्भावणीयः प्रमाणान्तरगोचरो वा धर्मः स्यात्, न्यायविशेषात्मकस्तूहो नानुमानादर्थान्तरं स्यात्, अग्नय इत्यस्य स्थाने सूर्यायेतिपदस्य प्रयोग ऊहस्य फलं नोहः, इह तु पूर्वोक्तया नीत्या प्रमाणव्यतिरिक्त ऊह उपपादितः, श्रोत्रियास्तु तदनभिज्ञतया न्याये न्यायफले वोहशब्दमुपचरितवन्त इत्यलं शास्त्रान्तरोद्गारगहनाभिः कथाभिः ।

तदेष मीमांसककल्प्यमानो नोहः प्रमाणव्यतिरेकमेति ।
प्रमाणसन्देहदशान्तरालवर्ती तु तर्कः कथितोऽत्र शास्त्रे ॥

इति (८)तर्कपदार्थः ।

तर्कानन्तरं निर्णयो भवति पठितश्चेति स लक्ष्यते—

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ अ०१ आ०१ सू०४१

अवधारणमपि तथा स्यादित्यर्थग्रहणम्, इन्द्रियादिजनितमपि तदवधारणमस्त्येव न्यायोपरमहेतोस्तु निर्णयस्योद्देशात्स एवानुमानजन्यो लक्षणीय इहेति पक्षप्रतिपक्षाभ्यामित्युक्तम्,

एकाधिकरणौ धर्मौ तुल्यकालौ विरोधिनौ ।
पृथक्परिग्रहौ पक्षप्रतिपक्षावुदाहृतौ ॥

"न हि ताभ्यां निर्णयः तयोरन्यतरविषयो हि भवति न तत्करणक एवेति" सत्यम्, इह तु पक्षप्रतिपक्षशब्दाभ्यां तद्विषयौ साधनतदुपालम्भौ लक्ष्येते, तौ च तस्मिन्करणमेव । "किमर्थं पुनर्लक्षणा ऽऽश्रीयते साधनोपलम्भाभ्यामेवेति कथं न सूत्रितम्" एवमभिधीयमाने पुनस्तयोर्विषयो मृग्यः लक्षणाप्रयोगे तु सोऽप्यवगतो भवेत्, मुख्यमभिधाय तदितरो लक्ष्यते । "भवत्वेवं द्वाभ्यां कथं तु निर्णयः एकमेव हि साधनं निर्णयाय कल्पते" एवमेतत्, न द्वितीयमपि साधनं निर्णयनिमित्तमाचक्ष्महे किन्तु तदुपालम्भं साधनं च: साधनोपालम्भश्च साधनोपालम्भौ ताभ्यां निर्णयः ।

एतदुक्तं भवति—स्वपक्षं प्रमाता निर्णयतीति न खल्वेवं न जाने च दूषणमुत्प्रेक्षमाणः स्वपक्षे साधनमधिगच्छन्परपक्षसाधने च दूषणमुत्प्रेक्षमाणः प्रमाता निर्णयतीति किं तूपालम्भस्य क इव निर्णयजन्मनि व्यापारः स हि परपक्षसाधनमवच्छिन्द्यादिति, अस्त्वेतत् तदुच्छेदद्वारेण अपि तु स्वपक्षसाधनमहिमानमाविष्कुर्वन्कल्पत एव निर्णयायेति युक्तो द्वयोरपि करणभावः ।

"नन्विदानीमर्थग्रहणमनर्थकमेवंविधसाधनाधीनजन्मा हि न निर्णयाभासः

सम्भवति, साधनोपालम्भलक्षणार्थावपि च पक्षप्रतिपक्षशब्दौ विषयमभिवदितुं ननु शक्नुत इत्युक्तमेवेति कोऽर्थोऽर्थग्रहणेन ?"

उच्यते–पक्षप्रतिपक्षयोस्तु द्वयोरन्यतरत्रार्थेऽवधारणं भवति नोभयत्र, स एव च परमार्थतोऽर्थ इतरस्तु भ्रान्तिकल्पित इति प्रदर्शनायार्थपदोपादानम् । लक्ष्यमाणसाधनोपालम्भनिष्ठत्वात्तु पक्षप्रतिपक्षशब्दयोर्विषयनिर्देशार्थमर्थपदमित्येके । "विमृश्येति किमर्थं" वस्तुस्वरूपकथनार्थमेव, अनुमानकरणको हि निर्णय इह लक्ष्यते इत्युक्तम् , अनुमानं च संशयविषये प्रवर्तते इति तर्कानन्तरमप्यनेनैवाशयेनास्योपादानम् , संशयादनन्तरं तर्कस्तर्कादूर्ध्वं च निर्णयो दृष्टः प्रवर्तमानोऽतस्स तत्पूर्वक उच्यते ।

निर्णये तु समुत्पन्ने बुभुत्सा विनिवर्तते ।
अत एव हि मन्यन्ते तदन्तं न्यायचिन्तनम् ॥

"भवत्वेवमिदं तु चिन्त्यतां–क्व नियमः किं विमर्शे किं पक्षप्रतिपक्षयोः किं निर्णय इति, त्रये ऽपि च नोपपद्यते इति, न विमृश्यैव निर्णयः अविमृश्यापि भावात् , न पक्षप्रतिपक्षाभ्यामेवेन्द्रियादेरपि तदुत्पादात् , न निर्णय एव तर्कस्यापि क्वचिदनिवृत्तेः" उक्तमत्रोद्देशसूत्रे तत्त्वज्ञानपदोपादानात्प्रमाणपदेन च तत्फलाक्षेपान्न निर्णयमात्रोद्दिष्टेन किमपि प्रयोजनं विशिष्टस्तु निर्णयो लक्षणत्वेन विवक्षितः ।

परीक्षाविषयो यो हि निर्णयो न्यायनिर्मितः ।
नियमत्रयमप्येतत्तस्मिन्न हि न युज्यते ॥

न हि (न) विमृश्यैव भवन्ति विमर्शपूर्वकत्वात्परीक्षायाः, अनुमानं च सन्दिग्धे विषये प्रवर्तते इति प्रायेण तद्व्यवहारः ।

यद्यपि क्वचिदसन्दिग्धेऽपि विषये दृष्टं प्रवर्तमानमनुमानमनलानर्थितायामतर्कितोपनतपर्वतनितम्बनिर्गतधूमदर्शनेन कृशानुकल्पनमिव, तथाऽपि वस्तुयोग्यतावशेन सन्दिग्धविषयमेवानुमानमिच्छन्ति न्यायविदः, प्रकृतश्च निर्णयः पक्षप्रतिपक्षाभ्यामेव निर्णय एवेति न शक्यते नियन्तुमन्यथा न्यायानुपरमादिति, शास्त्रे तु विनापि संशयादस्ति निर्णयः ।

यद्यपि च तत्रापि सूत्रकृता सर्वपरीक्षाणां संशयपूर्वकत्वमुपदेशातिदेशाभ्यामभ्यधायि, तथापि नासौ शास्त्रीयो निर्णयः परीक्षाकार्यत्वात् , यस्तु शास्त्रत एव क्वचिद्विषयनिर्णयः स विमर्शवर्जमुत्पद्यते, वादे ऽपि विमर्शरहितो भवति निर्णयः, उभौ निश्चितौ वादं कुरुतः सन्दिग्धस्य तत्रानधिकारात् , "कथं तर्ह्येष प्रवादः संशयच्छेदो वादस्य फलमिति? " प्रथममुभयोरपि निश्चितयोर्वादप्रवृत्तावन्तराले बलादापतति युक्तिद्वयोपनिपातवतः संशय इति वस्तुनिर्णयावसानत्वाद्वादस्य संशयच्छेदफलत्वमाचक्षते ।

यद्यप्यनिश्चितमतिः कुरुते न वादं श्रुत्वा तथापि दरकीयनयप्रवेशम् ।
अन्तर्मतद्वयबलाबलचिन्तनेन संशय्य निर्णयति नूनमसौ स्वपक्षम् ॥

इति (९)निर्णयपदार्थः ।

न्यायपरीक्षा/त्तारकवस्तुविचारयोग्यास्तिस्रः कथा वादिनो भवन्ति-'वादो जल्पो वितण्डे'ति, तत्र वादस्तावदुच्यते—

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ अ. १ आ. २ सू. १ ।

पक्षप्रतिपक्षौ व्याख्यातौ तयोः परिग्रहो ऽभ्युपगमो नियमः, एको वक्ति नित्यः शब्दः अपरस्त्वनित्यः शब्दः इत्याह—सोऽयं पक्षप्रतिपक्षपरिग्रहो :वादः, एतच्च रूपं कथात्रये ऽपि साधारणमिति विशेषमाह—प्रमाणतर्कसाधनोपालम्भ इति, प्रमाणैस्तर्केण च साधनं साधनोपालम्भश्चास्मिन्क्रियते इति प्रमाणतर्कसाधनोपालम्भः, न त्वीदृशी वितण्डा तस्याः प्रतिपक्षसाधनोपन्यासशून्यस्वभावत्वात् ।

"ननु प्रत्यक्षादेः प्रमाणस्य परप्रतीत्यनुपायत्वान्न तेन वादे साधनोपालम्भौ शक्यक्रियौ, तर्कस्य तु प्रतीतिसाधनत्वमपि तावन्न सम्भवति सम्भावनाप्रत्ययस्वभावत्वात्किमुत परप्रत्यायनाङ्गतेति नतरां तस्य साधनोपालम्भहेतुत्वम्" सत्यमेवमिह तु न प्रमाणशब्देन प्रत्यक्षादेरनुमानमपि तु:प्रमाणमूला अवयवा उच्यन्ते तैश्च सिद्ध्युपालब्धी क्रियेते, एवं तर्कस्य तु स्वतः साधनोपालम्भकरणकौशलशून्यात्मनो ऽपि प्रमाणानुग्राहकत्वात्पारम्पर्येण तद्धेतोराशयशुद्धिप्रदर्शनार्थमुपादानम्,

"यद्येवं प्रमाणपदेनैव तन्मूलावयवप्रतिपादनात्पञ्चावयवोपपन्नग्रहणमतिरिच्यते"

तत्र केचिदाचक्षते—प्रमाणतर्कसाधनोपालम्भ इति वादलक्षणे छलजातिनिग्रहस्थानसाधनोपालम्भ इति च जल्पलक्षणे श्रवणाद्वादे सर्वात्मना छलादिनिषेधप्रसक्तौ कतिपयनिग्रहस्थानोद्भावनाभ्युज्ञानार्थं पञ्चावयवोपपन्नग्रहणम्, अनेन च 'हीनमन्यतमेनाप्यवयवेन न्यूनम् । हेतूदाहरणाधिकमधिकमि'ति न्यूनाधिकयोरुद्भावनमनुज्ञायते, सिद्धान्ताविरुद्धग्रहणेनापि 'सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध' इति विरुद्धाख्यहेत्वाभासोद्भावनमनुज्ञातमित्येवं वादे त्रीणि निग्रहस्थानान्युद्भावनीयानि ।

अन्ये वदन्ति-"विरुद्ध एव हेत्वाभासो वादे चोद्यते नानैकान्तिकादि"रि"ति, कथमेतद् युज्यते 'निग्रहस्थानेभ्यः पृथगुपदिष्टा हेत्वाभासा वादे चोदनीया भविष्यन्ती'ति भाष्यकारवचनात्प्रमाणपदेन च तन्मूलावयवाक्षेपात्प्रमाण-

भासमूलनिरासे सति सकलहेत्वाभासोद्भावनमपि तत्र सिद्धमिति । "सिद्धान्ताविरुद्धग्रहणेन सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गो ऽपसिद्धान्त इत्यपसिद्धान्ताख्यनिग्रहस्थानानि वादे उद्भाव्यन्त इति" तदनुपपन्नं न हि त्रीणि वा अष्टौ वा वादे निग्रहस्थानानि चोदनीयानीति चोदना वैदिकी राजशासनं वा वस्तुपरिशुद्धिसाधनं सर्वमेव तत्र प्रयोगार्हम् , अयं तु विशेषः—जल्पे कस्यांचिदवस्थायां बुद्धिपूर्वकमपि छलादिप्रयोगः क्रियते वादे तु वृथा तेषां प्रयोगः, भ्रान्त्या तु कथंचित्प्रयुक्तानामवश्यमुद्भावनमनुद्भावने वस्तुपरिशुद्धेरभावात् ।

"कथं तर्हीदं पदद्वयं सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति" अपसिद्धान्तादिसम्यग्दूषणदिक्प्रदर्शनेनैवम्प्रकारवस्तुशुद्ध्यनुगुणनिग्रहस्थानजाताद्यनुज्ञानार्थमेवेत्यभियुक्ताः, अप्रतिभाविक्षेपादयो हि न वादे पराजयहेतवः क्षणान्तरेणाप्यागत्यानुस्मृत्य च साधनमुपालम्भं वा तत्र वदन्न पराजीयते, प्रतिज्ञाहान्यादि तु सम्यक्पराजयकारणमखिलमाभ्यां पदाभ्यामभ्यनुज्ञातमत्रेति ।

"नन्विदानीं प्रमाणतर्कग्रहणमपार्थकं पञ्चावयवोपपन्नपदेनैव प्रमाणमूलावयवोपदेशाद्वस्तुपरिशुद्ध्यनुगुणनिग्रहस्थानाभ्यनुज्ञानाच्च किमिव नोक्तम्" न अभिप्राये नैर्मल्यनिवेदनद्वारकवादजल्पविवेकप्रतिपादनार्थत्वात् , स्वप्रतिपत्तिसाधनमपि प्रत्यक्षादि वादे प्रयोक्तुमुचितमाशयशुद्धिमुपदर्शयितुमत्र वस्तुनि मम प्रथमं तर्क इत्थं प्रवृत्त आसीत्ततः प्रमाणमिदं प्रवृत्तमित्येवमपि तत्र वक्तव्यमत एव चान्यतरपक्षनिर्णयावसान एव भवति वादः, न जल्पवदलीकदूषणाडम्बरविरचितपरपरिभवपर्यवसानोऽपीति तथा बुद्धिपूर्वमाभासानामप्रयोग इति निर्मत्सरकथात्वमस्योक्तमित्यकलुषाकूतकथनाय प्रमाणतर्कपदम् ।

अपि च साधनोपालम्भव्यतिषङ्गप्रतिपादनमपि तस्य फलमुभावपि परस्परमनुबन्धेन वादिभ्यां परीक्ष्यमाणौ पक्षप्रतिपक्षौ वादतां प्रयोजयतो न तु स्वगृहे शास्त्रे वा विविच्यमानौ, प्रमाणैरेव जल्पे व्यवहार इति नियमशङ्कानिरसनमपि तत्पदोपादानप्रयोजनमुक्तमन्यैरिपि कृतमतिविस्तरेण सर्वथा वादलक्षणं सर्वं सुस्थम् ।

वादं च निर्णयफलार्थिभिरेव शिष्यसब्रह्मचारिगुरुभिः सह वीतरागैः ।
न ख्यातिलाभरभसप्रतिवर्धमानस्पर्धानुबन्धविधुरात्मभिरारभेत ॥

इति (१०)वादपदार्थः ॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥

गौतमसू. अ. १ आ. २ सू. २ ॥

यथोक्तोपपन्नग्रहणेन सर्वातिदेशे वादजल्पयोरविशेष इति शङ्कमानाः केचन पक्षप्रतिपक्षपरिग्रहमात्रातिदेशमेव व्याचक्षते, इयतस्तु पूर्वसूत्रानुवृत्त्याऽपि सिद्धेर्मन्दफलमेव यथोक्तोपपन्नवचनं भवेदिति समस्तातिदेश एव वरम्,

न च तत्रापि वादजल्पयोः साम्यं गम्यमानार्थम्, अतिदेशाच्छ्रौत एवार्थोऽतिदिश्यते न गम्यमानः तत्कृत एव च तयोर्भेदः, तथा च प्रमाणतर्कसाधनोपालम्भ इत्यत्र गम्यमानोऽर्थोऽभिप्रायनियमः स नातिदिश्यते, सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इत्यत्रापि बुद्धिपूर्वजात्यादिप्रयोगप्रतिषेधतदुद्भावननियमरूपो गम्यमानोऽर्थः सोऽपि नातिदिश्यत इति कुतस्तयोरविवेकः, अत एव च बुद्धिपूर्वकप्रयोगानुज्ञानाय छलजातिनिग्रहस्थानसाधनोपालम्भ इत्युक्तम्। "भवत्वेवं छलादीनां त्वसदुत्तरत्वात्कथमिव साधनोपालम्भहेतुत्वम्, परपक्षप्रतिक्षेपद्वारकमिति चेन्नासदुत्तरत्वेन 'प्रतिपक्षेऽपि तेषामसामर्थ्यादेवमपि च साधनग्रहणमनर्थकमेवेति" सत्यमेवं किन्तु कस्यांचिदवस्थायां स्वप्रतिपत्तिसाधनोपहिततत्त्वज्ञानरक्षायै तान्यपि व्याप्रियन्ते, यदा जानन्नपि परपक्षकृशिमानं स्वपक्षे द्रढिमानं च कश्चिदवसरे परप्रयुक्ते साधने दूषणं सपदि न पश्यति स्वपक्षसाधनं च झगिति न स्मरति तदा छलादिभिरप्युपक्रम्य परमभिभवत्यात्मानं च रक्षतीति।

"ननु यदि परश्छलादीनि जानीयात्तेषु चानुरूपमुत्तरमभिदधीत कथं जीयेत प्रत्युत जयत्येव" सत्यं तथाप्येकान्तपराजयाद्वरं सन्देह इति युक्तमेव तत्प्रयोगेण स्फुटाटोपकरणम्।

"नन्वीदृंशि प्रयोजनानि जिगीषतो जनस्य जनपदसदसि भवन्ति तस्यापि न निपुणमतिसदसि मुमुक्षोस्तु दूरापेतैव कथेयमिति कथमिह मोक्षशास्त्रे जल्पाद्युपदेशः"

नैतदेवम्, मुमुक्षोरपि क्वचित्प्रसङ्गे तदुपयोगात्, यथोक्तं तत्त्वाध्यवसायसंरक्षणासीनमनेकशिष्यगणोपास्यमानं रहस्यतत्त्वमुपदिशन्तं शान्तमानसमाचार्यमनार्यः कश्चिद्विपश्चिदाभासः कुतश्चिदागत्य दुरधिगतकतिपयाक्षरपरिचयजनितगुरुतरगर्वगद्गदया गिरा भोस्तपस्विन्किमाख्यायते हूङ्कारमान्वीक्षिकी सरलमतिप्रियेयं विद्या क्व वेदाः क्व वेदप्रामाण्यं क्वात्मज्ञानं क्वापवर्ग इत्यादि मन्दं विहस्य सहस्यसहसाट्टमेघ इव प्रकटितकाण्डदण्डकाशनितम्बवित्रासिताश्रममृगवर्गमुद्ग्राहयन्नाकुलयति, तदा जगज्जालमिन्द्रजालपण्डितविलसितमिति जानन्नप्याशाभ्यो यदि तदुपेक्षते न तिरस्करोति सद्यः सम्यक् साधनाप्रतिभासेऽपि यदि छलादिभिरेनं न शमयति तदा तस्मिन् गते तत उत्थाय शिष्यगणा ब्रूयुः कष्टमस्थाने क्लिष्टाः स्मः,

यो ऽसावस्माकमाचार्यः प्रख्यातो न्यायवित्तमः।
अद्य त्वागत्य सो ऽन्येन पण्डितेन पराजितः॥

तच्छ्रुत्वा जन इतरोऽपि सत्पथस्याशैथिल्यात्सपदि तमेव माऽनुयासीत् ।
तन्नूनं परिभवभूमिकामसह्यां नेतव्यः सदसि स वावदूकपाशः ॥
तद्विघातघटने निरर्गलं जल्पमन्त्रमुपदिष्टवान्मुनिः ।
आनुषङ्गिकमपि प्रयोजनं तस्य रागिजनतासु वर्णितम् ॥

इति (११)जल्पपदार्थः ।

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ अ. १ आ. सू. ३ ।

स एव यथोक्तलक्षणको जल्पो वितण्डा भवति, "को विशेष इति चेद्" आह-प्रतिपक्षस्थापनाहीन इति, उत्तरपक्षवादी वैतण्डिकः प्रथमवाद्यपसाध्यमानपक्षापेक्षया हस्तिप्रतिहस्तिन्यायेन प्रतिपक्ष इत्युच्यते तमसावभ्युपगच्छत्येव न तत्र साधनमुपदिशति परपक्षमेवाक्षिपन्नास्ते, "तर्हि साधनाद्विपक्षो ऽपि सोऽस्य नास्त्येवेति प्रतिपक्षहीनो वितण्डेत्युच्यतां किं स्थापनाग्रहणेन" नाभ्युपगममात्रेण तद्भावात्तमनभ्युपगम्य प्रलपतः कस्तस्य शृणुयात्, औपचारिको वा परमतपराकरणरूप एवास्य पक्षस्तस्मिन्हि सति स्वपक्षो हि तस्य सिध्येदिति, परमताक्षेपप्रवणप्रवृत्तश्च बलाद् द्वितीयपक्षवाद्येव वैतण्डिक इति, तदेवं पक्षो ऽस्यास्तीति साधनं तु नास्तीति सम्यक् सूत्रितं सप्रतिपक्षस्थापनाहीनो वितण्डेति ।

इत्युदाहृतमिदं कथात्रयं यत्परस्परविविक्तलक्षणम् ।
स्थूलमप्यनवलोक्य कथ्यते वाद एक इति शाक्यशिष्यकैः ॥

इति (१२)वितण्डापदार्थः ।

पक्षधर्मत्वादीनि पञ्च लक्षणानि हेतोरुक्तानि तेषामेकैकापायात्पञ्च हेत्वाभासा भवन्तीति तान् दर्शयितुमाह—

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ॥

गौतमसूत्रम् अ. १ आ. २ सू. ४ ।

अत्र हेत्वाभासश्रुतिरेव निर्वचनसहिता सामान्यलक्षणं बोधयत्यहेतवो हेतुवदाभासन्त इति हेत्वाभासाः, लक्षणैकदेशयोगाच्च हेतुवदाभासनमहेतोरप्युपपद्यते । सकललक्षणाऽपायेपि पञ्चमीनिर्देशादिभ्रमहेतुरित्येके, सव्यभिचारादिपदपर्यन्तवर्तिनी तु सैव श्रुतिर्विभागमवगमयति प्रमाणश्रुतिवदित्युक्तम्, पक्षधर्मादिलक्षणानां च क्रमनियमाभावात्साध्यसमविरुद्धसव्यभिचारातीतकालप्रकरणसमा हेत्वाभासा इति पाठो नाश्रितः ।

"ननु त्रय एव हेत्वाभासा इति शाक्याः" न प्रत्यक्षागमबाधितस्य सप्रतिपक्षस्य च हेतोः पूर्वप्रदर्शितत्वात् ।

"नन्वेकस्यैव रूपद्वयवैकल्यात्कथं न षष्ठादयस्तत्प्रभेदाः स्युः, यथा नित्यः शब्दश्चाक्षुषत्वादिति, एष हि पक्षे वृत्त्यभावादसिद्ध उच्यतामुत सामान्यादिर्विपक्षादप्रच्युतेः सव्यभिचार उत जात्यन्तरमेव ताभ्यामिति"

नैतदेवम्—एकैकरूपापायनिमित्तभेदपञ्चकप्रतिपादने कृते द्वित्रिरूपापायान्न रूपान्तरमवतरति किन्तु तेषामेव समावेशः स्यात्, अपि च प्रथमगृहीतान्यतमरूपवैकल्यलब्धके हेत्वाभासरूपेऽस्मिन्किं रूपान्तरनिरूपणेनेत्यास्तामेतत्।

"नन्वप्रयोजको नाम षष्ठो हेत्वाभासः समस्तीति न पुनरपि पञ्चत्वम्" न तस्यान्यथासिद्ध एवान्तर्भावं वक्ष्यामः, अवान्तरभेदविवक्षायां तु हेत्वाभासानामियत्तानिश्चयो न शक्यक्रियो न च सप्रयोजन इति पञ्चैव हेत्वाभासा इति सिद्धम्।

सव्यभिचारलक्षणम्।

तेषां सव्यभिचारस्तावदुच्यते।

अनैकान्तिकः सव्यभिचारः॥

गौ० अ० १ आ २ सू० ५।

व्यभिचार एकत्र व्यवस्थाऽनियमः तेन सह वर्तते इति सव्यभिचारो विपक्षादप्रच्युत इत्यर्थः, एकस्मिन्नन्ते भवन्नैकान्तिकः तद्विपर्ययादनैकान्तिक इति स एवार्थः, एवमिह लक्ष्यलक्षणपदयोर्यथाकाममभ्युपगमो न प्रत्यक्षादिवद्व्यवस्थया, सव्यभिचारपदे लक्ष्याभिधायिनि लक्षणवचनमनैकान्तिकपदमनैकान्तिकपदे तु लक्ष्यवाचिनि सव्यभिचारिपदं लक्षणप्रतिपादकं प्रसिद्धाप्रसिद्धविभागापेक्षया पिककोकिलवद् द्रष्टव्यम्, पिकः कोकिल इत्युक्ते यस्य पिकशब्दार्थः प्रसिद्धः स ततः कोकिलशब्दार्थमवभोत्स्यते प्रसिद्धकोकिलशब्दार्थश्च पिकशब्दार्थमिति।

"आह भवत्वेवमिदं तु चिन्त्यताम् अनैकान्तिक इति किमयं पर्युदासः प्रसज्यप्रतिषेधो वा? किं चातः, पर्युदासपक्षे स्वपक्षनियतादैकान्तिकादन्यः स एवानैकान्तिक इति स एवैको हेत्वाभासः स्यादतश्च पञ्चसंख्या विप्रलुप्येतेति, प्रसज्यप्रतिषेधे त्वैकान्तिकाभावस्य निवृत्तिरूपस्य हेत्वाभासता भवेन्न लक्ष्यत्वेनाभिमतस्य विपक्षवृत्तेर्हेत्वन्तरस्य प्रमेयत्वादेरिति"

उच्यते—प्रश्न एवायमनुपपन्नः संशयानो हि परं पृच्छति संशयश्चोभयथा दर्शनाद्भवति न च नामपदसंबद्धस्य नञो द्वयी वृत्तिर्दृष्टा, अश्राद्धभोजीत्यादौ हि भुजिना नञ्संबध्यते श्राद्धं न भुङ्क्ते इति न तु नाम्ना श्राद्धेनेति, आख्यातेनापि प्रयोज्यमानः क्वचित्प्रकरणसामर्थ्यानुरोधात्प्रत्ययार्थसंबन्धमवधूय धात्वर्थमेव केवलमालिङ्गन्पर्युदासवृत्तिर्भवति यथा नेक्षेतोद्यन्तमादित्यमिति, न तु ना-

न्ना संबध्यमानः क्वचिदपि पर्युदासवृत्तिमुल्लङ्घ्य प्रसज्यप्रतिषेधमात्रतामवलम्बमानो दृश्यते अब्राह्मणादौ सर्वत्र तदन्यावगतिदर्शनादिति कुतस्त्यः संशयः । अथ वा किमनयाऽवान्तरचिन्तया यथापृष्टं प्रकृत एवोत्तरमुच्यते एकस्मिन्ननित्यपक्षो वा नियत ऐकान्तिक एकपक्षवृत्तिरुच्यते ततोऽन्यः पक्षद्वयवृत्तिरनैकान्तिको भवत्येवं न सर्वे हेत्वाभासाः पक्षद्वयवृत्तय इति न संख्याहानिरतः पर्युदासपक्षे तावन्न दोषः, प्रसज्यप्रतिषेधे ऽप्यैकान्तिको न भवति स एवाहेतुरिति न निवृत्तिमात्रपरत्वम्, अश्राद्धभोजीति कृता पुरुष उच्यते न श्राद्धभोजनाभावमात्रमेवमिहापि तद्धितेनैकान्तनियतताप्रतिषेधविशिष्टो हेतुरेवोच्यते नाभावमात्रमित्येवमुभयथापि न दोषः, तस्योदाहरणम्—अनित्यः शब्दः प्रमेयत्वादिति, एष हि नित्यानित्यपक्षयोरन्यतरस्मिन्नपि न नियत इति विपक्षवृत्तित्वादनैकान्तिकस्तदेवं व्यतिरेकाख्यहेतुलक्षणशून्यो ऽनैकान्तिक उक्तो भवति ।

"ननु षट्प्रकाराः परैरनैकान्तिका इष्यन्ते सपक्षैकदेशवृत्तिर्विपक्षव्यापी विपक्षैकदेशवृत्तिः सपक्षव्यापी उभयपक्षैकदेशवृत्तिरुभयपक्षव्यापी, साधारणश्चतुष्प्रकारः असाधारणो विरुद्धव्यभिचारी चेति स कथमिह न निर्दिश्यते" ।

उच्यते—सपक्षव्याप्त्यादिभेददर्शनं तावदप्रयोजनकमशक्यं च हेत्वाभासानामवान्तरभेदेनानन्त्यात्, विपक्षाद्व्यावृत्तिर्यस्य नास्ति स सव्यभिचार इत्यन्यतमहेतुरूपरहितत्वमनैकान्तिकलक्षणमिह विवक्षितम्, तच्चोक्तमेव किमवान्तरभेदपरिगणनेन, असाधारणविरुद्धाव्यभिचारिणौ तु न संभवत एव हेत्वाभासाविति न व्याख्यायेते ।

"ननु साधारणादसाधारणस्यापि गन्धवत्त्वादेः संशयहेतुत्वदर्शनात्कथमसंभवः अनेकधर्मोपपत्तेश्च संशयो भवद्भिरपि व्याख्यायत एव"

नैतदेवम्, उभयविशेषसहचरितधर्मदर्शनं हि तदनुस्मरणप्रायं संशयमुपजनयति असाधारणस्तु असाधारणत्वादेव न तत्सहचरः कदाचिदुपलब्ध इति कथं संशयहेतुः । "कथं तर्ह्यनेकधर्मोपपत्तेरिति वर्णयिष्यते" वर्णितमेतद् वस्तुनो हि विशेषधर्मः कश्चिदसाधारणः केनापि धर्मान्तरेण सहचरितो दृष्टः सोऽयं शब्दे विभागजत्वाख्यो धर्मः केन (चित् ?) धर्मान्तरेण द्रव्यत्वेन गुणत्वेन वा सहचरितो भवेदितीत्थमनेकधर्मोपपत्तेः संशयोवर्णितः, तदिहापि गन्धवत्त्वमसाधारणमित्थमेव यदि संशयहेतुतया वर्ण्यते तर्हि साधारणाद्वस्तुधर्मत्वादेव संशयो भवेन्नासाधारणाद्गन्धवत्त्वात्, न हि तन्नित्यानित्ययोरन्यतरेणापि सहचरितमुपलब्धम्, वस्तुधर्मस्तु धर्मान्तरानुयायी दृश्यत इति वस्तुधर्मत्वमेव तत्कारणमतो नित्या भूर्गन्धवत्त्वादित्यसाधारणानैकान्तिको न वक्तव्यः, विरुद्धाव्यभिचार्यपि न वाच्य एव एकत्र धर्मिणि परस्परविरुद्धद्वयप्रयोजकहेतुद्वयोपनिपातस्यानुपपत्तेः ।

"ननु प्रत्यक्षो वायुः स्पर्शवत्त्वाद् घटवद्, अप्रत्यक्षो वायुररूपत्वादाकाशवदित्यस्ति हेतुद्वयसन्निपातः, स एव च विरुद्धाव्यभिचार्युच्यत इति" अत्र तावदेतदेव वक्तव्यम्—को ऽयमपूर्वः प्रामाणिकव्यवहार ईदृशो यदनुमानेन प्रत्यक्षत्वमप्रत्यक्षत्वं वा साध्यत इति इन्द्रियजप्रमितिविषयो हि प्रत्यक्षोऽर्थो भवति स एष वायुर्यदीन्द्रियजे प्रत्यये प्रतिभात्येव किमनुमानेनेति, किं चानयोरन्यतरो हेतुरवश्यमप्रयोजको वस्तुनो द्वैरूप्यानुपपत्तेः, हेतौ च प्रयुक्ते तद्गुणदोषपरीक्षणमेव प्रतिवादी विधत्तां कोऽवसरः प्रतिहेतूपन्यासस्य ।

"विडम्बनार्थस्तदुपन्यास इति चेन्न"

विडम्बनोपन्यासस्य जात्युत्तरप्रकारत्वात्, इह च हेत्वाभासा वास्तवा एवानुमानदोषाः प्रतिपाद्यन्ते, न च विरुद्धाव्यभिचारी नाम वास्तवो हेतुदोषः, एकत्र प्रयोजकविरुद्धहेतुद्वयसमावेशासंभवस्योक्तत्वात् ।

"कथं तर्हि प्रकरणसम इति चेत्" तत्रैव विशेषं वक्ष्यामः ।

"अथ हेतुप्रयोगरहितोभयवादिपरिगृहीतपक्षप्रतिपक्षोपन्यासमात्रं विरुद्धाव्यभिचारिणो रूपमुच्यते" सोऽयं विप्रतिपत्तेः संशयो भवति न हेत्वाभासात्वस्मादिति ।

"अपि च संशयजननमनैकान्तिकलक्षणमुच्यते चेत्" काममसाधारणस्य विरुद्धाव्यभिचारिणो वा यथा तथा संशयहेतुतामधिरोप्य कथ्यतामनैकान्तिकता न तु संशयजनकत्वं तल्लक्षणमिन्द्रियादेरपि तज्जनकत्वेन तथाभावप्रसक्तेरपि तु पक्षद्वयवृत्तित्वमनैकान्तिकलक्षणम्, स तु पक्षद्वयवृत्तित्वात्संशयमपि जनयतीतिवस्तुस्वभावोऽयमतोऽसाधारणविरुद्धाव्यभिचारिणोः कथंचित्संशयहेतुत्वेऽपि पक्षद्वयवृत्त्यभावान्नानैकान्तिकवर्गेऽन्तर्भावः ।

"क्व तर्हि तावन्तर्भविष्यतः" जात्युत्तराणामानन्त्यात्तत्रेति वक्ष्यामः ।

तस्मादसाधारणसंज्ञकस्य हेतोर्विरुद्धाव्यभिचारिणो वा ।
विपक्षवृत्तित्वमतर्कयन्तो वदन्त्यनैकान्तिकतां नयज्ञाः ॥

विरुद्धलक्षणम् ।

सिद्धान्तमभ्युपेत्य तद्विरुद्धो विरुद्धः ॥
गौ० अ० १ आ० २ सू० ६ ।

सपक्षविपक्षयोर्वृत्त्यवृत्ती हेतौ लक्षणमुक्तम्, ते यस्य विपर्यस्ते दृश्येते यः सपक्षे न वर्तते विपक्षे च वर्तते स साध्यविपर्ययसाधनाद्विरुद्धो भवति सोऽयमुच्यते सिद्धान्तमभ्युपेत्येति । सिद्धान्तशब्दो यद्यपि धर्मविशिष्टे धर्मिणि व्याख्यातः अयमित्थमित्यभ्युपगमविषयीकृतोऽर्थः सिद्धान्त इति, तथापीह

तदेकदेशसाध्यधर्मविषयो लक्ष्यते, तं सिद्धान्तसाध्यधर्ममभ्युपगम्य यो विरुणद्धि व्याहन्ति तद्विपर्ययं साधयति स विरुद्ध इत्यर्थः ।

"ननु समानकर्तृकयोः क्त्वाप्रत्ययः स्मर्यते इह च हेतोरचेतनस्याभ्युपगमे कर्तृत्वासम्भवात्पुरुषस्तत्कर्ता भवेत् सिद्धान्तं च विरुणद्धि हेतुरिति भिन्नकर्तृकत्वमुच्यते" समानकर्तृकत्वसिद्धये हेतोरेवाभ्युपगमे कर्तृत्वमुपचाराद्वर्णयिष्यते हेतुबलात्पुरुषेणाभ्युपगमः क्रियमाणो हेतुनैव कृतो भवति, एवं च स एवाभ्युपगन्ता स एव विरुणद्धीति न भिन्नकर्तृकत्वम् ।

"ननूपचारपरिग्रहश्चेदभिमतस्तत्र त्रितयं वक्तव्यम्– साध्येऽर्थे प्रमाणबाधो निमित्तं प्रयोजनं चेति" साध्येऽर्थे प्रमाणबाध उक्त एव हेतोरचेतनत्वम्, निमित्तमप्यस्ति हेतुसाधनको ह्युपगम इति, प्रयोजनं तु विशेषविरुद्धानां हेत्वाभासत्वनिवारणम्। सिद्धान्तशब्दस्य समुदायवाचिनो यदेकदेशेऽवस्थापनं तस्यापि विशेषविरुद्धव्यवच्छेद एव फलम्, विशेषविरुद्धानां हि हेत्वाभासत्वाभ्युपगमे सर्वानुमानोच्छेदप्रसङ्गः, न हि तथाविधो हेतुरिह जगति कश्चिदवाप्यते यः साध्यसिद्धयेऽभिधीयमानो धर्मस्य वा धर्मिणो वा विशेषं न कंचन बाधते, तथा हि अनित्यः शब्दः कृतकत्वादिति सकलतार्किकगृहप्रसिद्ध एव हेतुरनित्यतां साधयन्नपि यद्यत्कृतकं तत्तदश्रावणं दृष्टं यो यः कृतकः स स व्योमविशेषगुणो न भवतीति धर्मिणो विशेषं बाधते एवेत्यहेतुः स्यात्, न चैवं युक्तमिति न विशेषविरुद्धो नाम हेत्वाभासोऽभ्युपगन्तव्यः किन्तु साध्यस्वरूपविपर्ययसाधन एवेति, अत एव यथा तीर्थान्तरे वर्ण्यते विरुद्धश्चतुष्प्रकारो धर्मस्वरूपविपरीतसाधनो धर्मिस्वरूपविपरीतसाधनो धर्मविशेषविपरीतसाधनो धर्मिविशेषविपरीतसाधन इति तथेह नेष्यतेऽतिप्रसङ्गस्य दर्शितत्वादिति, अस्योदाहरणं नित्यः शब्दः कृतकत्वादिति ।

"नन्वेकैकलक्षणापायात्पञ्च हेत्वाभासा इत्युक्तम् अस्य च हेतोरुभे लक्षणे न स्तः, यथा ह्यस्य सपक्षे वृत्तिर्नास्ति तथा विपक्षादपि व्यावृत्तिः, यदि हि सपक्षादिव विपक्षादपि व्यावृत्त एव भवेद् गन्धवत्त्ववदसाधारण एव स्यादिति" सत्यमेवं किन्तु विपक्षादव्यावृत्तिर्व्यभिचारं प्रति प्रयोजकतां प्रतिपद्यते प्रतिपक्षगामी हि व्यभिचरित इत्युच्यते, सपक्षे वृत्तिविच्छेदस्तु विपर्ययसिद्धौ प्रयोजक इति सत्यामपि विपक्षवृत्तौ सपक्षवृत्तिविच्छेदनिबन्धनमेवास्य विरुद्धत्वमुच्यते विपक्षादप्रच्युतः स्वसाध्यमेव न साधयेत्सपक्षे त्ववर्तमानोऽसौ विपरीतमपि साधयतीति तल्लक्षणापायकृतमेवास्य विरुद्धत्वमाचक्षते इत्यलं सूक्ष्मेक्षिकया, तदित्थमुक्तं सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति।

अन्ये त्वन्यथा व्याचक्षते–किल साध्यधर्मविपर्ययसाधकवदपसिद्धान्तप्रति-

ज्ञाविरोधादयोऽपि सिद्धान्तविरोधिनः संग्रहीतुं युक्ता एव, ते चैवं व्याख्यायमाने न संगृहीताः स्युः, क्त्वाप्रत्ययसिद्धान्तशब्दौ च न समन्वितौ स्याताम्, तस्मादभ्युपगतसिद्धान्तविरोधी विरुद्ध इति सूत्रार्थे वर्णिते अभ्युपगतं सिद्धान्तं यो विरुणद्धि स विरुद्धः, तत्कालोपात्तप्रतिज्ञाविषयीकृतं वाऽवसरान्तरव्यवस्थापितं वेत्येतत्संग्रहश्च कृतो भविष्यति, सिद्धान्तशब्दश्च न सङ्कोचितो भविष्यति, क्त्वाप्रत्ययस्त्वसङ्गतत्वादुपेक्ष्यते एव भिन्नकर्तृकत्वादानन्तर्यस्य गम्यमानस्य चानुपयुक्तत्वादिति, तथा च भाष्यकारेण पूर्वाभ्युपगतसिद्धान्तानुगुणमेवोदाहरणमुक्तं–सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधादपेतोऽप्यस्ति विनाशप्रतिषेधादिति, अत्र हि प्रतिषिद्धनित्यधर्मत्वादित्ययं हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यमुं सिद्धान्तं विरुणद्धयनेन वा विरुध्यते–इति ।

एतत्त्वहृदयङ्गममिव व्याख्यानम्, अपसिद्धान्तप्रतिज्ञाविरोधादेर्निग्रहस्थानसूत्रे हेत्वाभासेभ्यः पृथगुपदेशात्किमिह तत्संग्रहेण, प्रत्युत संग्रह एव दोषः, यो हि मीमांसकोऽहमित्यभ्युपगम्यानित्यः शब्दः कृतकत्वाद् घटवदिति ब्रूयान्न तस्यायं हेतुर्विरुद्धो भवेदपि त्वपसिद्धान्तान्निगृह्येत, तस्मात्साध्यविपर्ययसाधन एव विरुद्ध उच्यते न तु पूर्वाभ्युपगतस्वसिद्धान्तविरुद्धः, न च निरभिप्राय एव सूत्रकृता क्त्वानिर्देशः कृतः किन्तु ततः प्रतीयमानमान तर्यमप्यपेक्षमाणेन यो हि सिद्धान्तमभ्युपेत्य प्रतिज्ञाय तत्सिद्धयर्थतयोपादीयमानस्तमेव विरुणद्धि स विरुद्धो हेत्वाभास इति प्राक्तनमेव व्याख्यानमनवद्यम् ।

अतः प्रतिज्ञाविपरीतसाधनाद्विरुद्धतामेति न हेतुरन्यथा ।
विशेषबाधादिनिबन्धनं पुनर्बहुप्रकारत्वममुष्य नेष्यते ॥

सत्प्रतिपक्षलक्षणम् ।

यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥

गौतमसूत्रम् अ० १ आ० २ सू० ७ ।

एकैकलक्षणापायनिमित्तहेत्वाभासपञ्चकप्रतिज्ञानादसत्प्रतिपक्षत्वलक्षणवैकल्यात्किल प्रकरणसमो नाम हेत्वाभासो वक्तव्यः, स च न सम्भवति सप्रतिपक्षस्य हेतोरभावादद्वयात्मकत्वाद्धि वस्तूनामेकत्र परस्परविरोधिधर्मद्वयप्रयोजकहेतुसमावेशो नास्तीत्यसकृदुक्तम्, अत एव विरुद्धाव्यभिचारी निरस्तः, अनुमानविरुद्धमनुमानं च नेष्यत एव, तत्कुतः सत्प्रतिपक्षो हेत्वाभासो ऽतश्च लक्ष्याभावात्कस्येदं लक्षणमित्याशङ्कयाह–यस्मादित्यादि, विचार्यमाणौ प्रागुक्तलक्षणकौ पक्षप्रतिपक्षौ प्रकरणम्, तस्य चिन्ता संशयात्प्रभृत्या निर्णयाद्यपि भवति तथापीह विमर्शात्मिकैव गृह्यते, सा यस्माद्भवति, कस्मात्सा भवति ? विशेषानुपलम्भात्, स एव विशेषानुपलम्भो यदि निर्णयार्थमुपदिश्यते तत्प्रकर-

गममनतिवर्तमानत्वात्प्रकरणसमो भवति-नित्यः शब्दः अनित्यधर्मानुपलब्धेरा- काशवत्, अनित्यः शब्दो नित्यधर्मानुपलब्धेर्घटवदिति, सोऽयं सप्रतिपक्षो हेतुरिह लक्ष्यो विद्यते, न च द्व्यात्मकानि वस्तूनि, प्रमातारस्तु रूपमेषां निय- तमवधारयितुमशक्नुवन्त एव भ्राम्यन्तीति, तथा ह्येको विशेषानुपलब्धेः पक्ष- धर्मान्वयव्यतिरेकावपश्यंस्ततस्तथेति साध्यं बुध्येत तथैव च परं प्रत्यायये- दिति, इतरोऽपि द्वितीयविशेषानुपलब्धेः साधनतां बुद्ध्वा प्रत्यवस्थानं च करो- तीति सप्रतिपक्षक एवैष प्रकरणसमो हेत्वाभासः, तथा च न तावदयं सम्यग् हेतुः प्रतिपक्षोपहतत्वेन स्वसाध्योपस्थानसामर्थ्यशून्यत्वात्, हेत्वाभासो ऽपि च भवन्न तावदसिद्धः साध्ये धर्मिणि शब्देऽनुपलभ्यमाननित्यधर्मत्वस्य हेतोः स- द्भावात्, नापि विरुद्धः साध्यविपर्ययसाधननिमित्तभूतासपक्षवृत्तिवियोगानुप- पत्तेः, नाप्यनैकान्तिकः पक्षद्वयसाधारणत्वानवधारणात्, संशयजनकत्वं तु न तस्य लक्षणमित्युक्तमेव ।

"नन्वेकस्मिन्पक्षे नियत ऐकान्तिकस्तद्विपर्ययादनैकान्तिकः स चायं नि- त्यानित्यपक्षयोरन्यतरत्रापि न नियत इत्यनैकान्तिक एव स्यात्, अपि चा हु'—अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैरिति, (श्लो० वा० २ सू ५४ श्लो०)तत्र यथेन्द्रियादेरबोधकत्वाद्वा संशयविपर्ययस्वभावावभाससमुत्पादनादौ- रात्म्याद्वा भवत्यप्रामाण्यव्यवहार एवमनुमानमपि तथैव वर्त्मना प्रमाणाभास- तामवलम्बते, तत्रासिद्धस्तावदलभमानो धर्मिणि वृत्तिं तत्र साध्यधर्मधियमाधा- तुमनधिकृत इत्यज्ञानफलत्वादप्रामाण्यमनुभवति, विरुद्धस्तु विपर्ययसाधन इति भवन्त एव प्रतिपन्नाः, संशयजनकस्त्वनैकान्तिको भवितुमर्हति न तु पारिभाषिकविपक्षवृत्तित्वमेव तस्य लक्षणमुचितमयमपि चान्यतरपक्षनियम- विरहिततनुरिति किमिति न भवति विमर्शमुपदधदनैकान्तिक इति त्रय एव हेत्वाभासाः"

उच्यते—न फलनियमेन लक्षणनियमः कर्तुं शक्यते, यद्यपि द्विविधं त्रिविधं वा भवत्यप्रमाणफलं तथापि न त्रिलक्षणके लिङ्गेऽविनाभावः परिसमाप्यते ऽपि तु पञ्चलक्षणक इति प्रसाधितोऽयमर्थः, तद्वैकल्याच्च हेत्वाभासानामपि पञ्चत्वमेव, फलं तु द्विविधमस्तु त्रिविधं वा न ह्यप्रतिपत्तिजनकं किंचिल्लिङ्ग- मुपलभामहे, न चाप्रतिपत्तिः प्रयत्नजन्या प्रागभावस्य निसर्गसिद्धत्वादित्यलम- वान्तरचिन्तनेन, न फलापेक्षो लिङ्गलक्षणनियमः तत्र यथा पक्षधर्मरहितत्वम सिद्धलक्षणमेष च हेतुः पक्षधर्मान्वयव्यतिरेकाणामन्यतमेनापि रूपेण न विकल इति कथमनैकान्तिकतां प्रतिपत्स्यते, व्यस्ततायां हि सर्वाण्येतानि सन्ति लक्ष- णानि समस्तं वस्तु नोपन्यस्तमेव हेतुत्वेन नित्यानित्यधर्मानुपलब्धेरिति ।

"ननु यद्यस्य पक्षधर्मान्वयव्यतिरेका निरपवादाः सन्ति कथं तर्हि न हेतु-

रेवायम्, इतरस्यापि पक्षधर्मान्वयव्यतिरेकाणां निरपवादानां सम्भवात्सोऽपि न कथं हेतुरस्त्विति चेद्" न वस्तुनो द्वैरूप्यानुपपत्तेः, एवमिमौ हेतू पक्षद्वयेऽपि बुद्धिं जनयन्तौ संशयमावहतो नानैकान्तिकवद्विपक्षवृत्तित्वेनेति हेत्वाभासान्तरत्वम्, एवंविधस्य चास्य प्रकरणसमस्य विरुद्धाव्यभिचारीति नाम यदि क्रियते तदपि भवतु न पुनरनैकान्तिकप्रभेदतामवलम्बते तल्लक्षणासंस्पर्शादुभयप्रतीतिजनकौ हीमौ हेतू भवतो नोभयपक्षवृत्तीति, नाप्ययं कालात्ययापदिष्टः प्रत्यक्षागमयोरन्यतरस्यापि बाधकस्यानुपलम्भात्, अनुमानं तु नानुमानस्य बाधकं भवितुं क्षममित्युक्तम्, न चेतरेतरबाधापेक्षयाऽनयोरसिद्धत्वमभिधेयम्, संशयजनकत्वेऽनुभवसिद्धे सति विशेषानुपलब्धेरप्रत्याख्येयत्वात्।

"ननु निश्चितस्य साधनप्रयोगाधिकारात्कथं चिन्तावान्साधनं प्रयुञ्जीत, निश्चितत्वं च तद्धर्मानुपलब्ध्योः परस्परमसिद्धत्वं स्थितमेव" नैतदेवम्, अन्यतरधर्मानुपलब्धेरेव पक्षधर्मान्वयव्यतिरेकान्पश्यन्नसौ निश्चिततां प्राप्तो न द्वितीयधर्मानुपलब्धेरसिद्धतां बुध्यमानः, अत एवायं भ्रान्तिमूलहेत्वाभासः द्वितीयधर्मानुपलब्धिसिद्धत्वनिश्चये तु सम्यग् हेतुरेव स्यात्, तदसिद्धत्वानवधारणेऽप्यसौ स्वस्य हेतोस्त्रैरूप्यदर्शनान्निश्चितमतिर्भूत्वा साधनं प्रयुञ्जान इतरेण तथैव निश्चितमतिना प्रतिप्रयोगे कृते तस्यापि त्रैरूप्यमुपलभमानः संशयमधिगच्छतीत्यलं प्रसङ्गेन, तदेवमसिद्धादिलक्षणवैपरीत्यात्प्रतीत्यनुगुणः प्रकरणसमो नामाऽसिद्धो हेत्वाभासः।

अपरे पुनरुदाहरणान्तरमस्य व्याहरन्ति—नित्यः शब्दः पक्षसपक्षयोरन्यतरत्वाद् आकाशवत्, अनित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात् घटवदिति।

"ननु पक्षसपक्षयोरन्यतरः पक्षो वा स्यात्सपक्षो वा स्यान्न तृतीयो न हि मित्रावरुणयोरन्यतरः सोमो भवितुमर्हति तत्र पक्षेऽन्यतरशब्दवाच्येऽनन्वयो न हि शब्दाख्यः पक्षो धर्मी धर्म्यन्तरे वर्तते, सपक्षे त्वन्यतराभिधेये पक्षधर्मता नास्ति न ह्याकाशादिः सपक्षः शब्दाख्ये धर्मिणि वर्तते"

उच्यते—न पक्षत्वादिति हेतुः प्रयुक्तः सपक्षत्वादिति वा येनैवं स्यात् किंतु पक्षसपक्षयोरन्यतरत्वादिति, ततश्च द्वयोरपि किमपि साधारणरूपं न हि वरुणो यष्टव्य इति यादृशी बुद्धिस्तादृश्येव मित्रावरुणयोरन्यतरो यष्टव्य इति, विशेषनिष्ठतायां तु बलादापाद्यमानायां सकलानुमानोच्छेदः, न चान्यतरत्वं शब्दमात्रारोपितरूपमवास्तवमिति वदितुमुचितमर्थासंस्पर्शितायाः प्रतिक्षिप्तत्वात्।

"अन्यतरत्वादित्यसिद्धो हेतुरिति चेत्किल पक्ष एवायं न पक्षसपक्षयोरन्यतर" इति।

तदयुक्तम्, यत एवायं पक्षस्तत एव पक्षसपक्षयोरन्यतरो न ह्यपक्षः पक्षस-

पक्षयोरन्यतरः स्यान्न ह्यवरुणो मित्रावरुणयोरन्यतर इत्युक्तमेव, पक्षो ऽपि च भवन्नेष न पक्षत्वादित्यनेन रूपेण हेतूक्रियते किन्त्वन्यतरत्वादितीत्थं च हेतूकरणे नैष दोष इति ।

सत्प्रतिपक्षस्योदाहरणान्तरम् ।

अपरमुदाहरणं- सन्सर्वज्ञ इतरतद्विपरीतविनिर्मुक्तत्वाद् घटवद्, असन्सर्वज्ञ इतरतद्विपरीतविनिर्मुक्तत्वात्खरविषाणवदित्यत्राप्याक्षेपप्रतिसमाधानप्रकारः पूर्ववदनुसरणीयो धर्म्यसिद्धता च यत्नतः परिचिन्तनीया ।

सत्प्रतिपक्षोदाहरणान्तरदूषणम् ।

एवं जातीयकं तूदाहरणं नानुमोदन्ते मतिमन्तः, यत्र हि हेतुना स्वयमर्थं सम्यगसम्यग्वा ऽनुमाय प्रमाता परप्रत्यायनाय तं हेतुं प्रयुञ्जीत स प्रयुज्यमानो वस्तुबलप्रवृत्ततया हेतूभवति हेत्वाभासीभवति वा तथा ह्यारोहपरिणाहवति पुरो ऽवस्थिते धर्मिणि स्थाणुगतविशेषानुपलम्भादेकस्य पुरुष इति भवति प्रतीतिरितरस्य तु पुरुषगतविशेषानुपलब्धेः स्थाणुरिति भवति मतिः, एवं यदा ऽसावेकः पुरुषत्वसिद्धये परं प्रति स्थाणुधर्माग्रहणं हेतुत्वेन ब्रूयादितरो ऽपि पुरुषधर्माग्रहणेन स्थाणुतां प्रतिष्ठापयन्प्रत्यवतिष्ठते तदा स्वप्रतीत्यनुसरणपुरःसरसाधनाभिधानाद् भ्रान्तिसंभवाच्च युक्तं तथाविधोदाहरणकीर्तनम्, एवं नित्यः शब्दोऽनित्यधर्मानुपलब्धेराकाशवत् अनित्यः शब्दो नित्यधर्मानुपलब्धेर्घटवदित्यपि द्रष्टव्यम्, यस्तु न वस्तुमूलः केवलोत्प्रेक्षामात्रावलम्बनः स्वप्रतीतिषु न दृष्टपूर्वः किं तदुपन्यासेन, एतेन सद्वितीयप्रयोगा अपि प्रत्युक्ताः, यथा क चित्साधनप्रयोगे कृते सति तत्रैवं परः प्रत्यवतिष्ठते यथा प्रस्तुतसाध्यधर्माधिकरणत्वशून्यधर्मिघटान्यतरसद्वितीयो घटः अनुत्पन्नत्वात्कुड्यवदिति, यथा प्रस्तुतेन सिषाधयिषितेन धर्मेण शून्यो यः प्रकृतो धर्मो घटश्च तयोरन्यतरेण न सद्वितीयो ऽयं घटरूपो धर्मी तत्र हेतुरनुत्पन्नत्वं तस्य कुड्यादौ व्याप्तिरिति, सत्यं वदत यद्यस्ति लोके कश्चिदीदृशः प्रतीतिक्रमः घटश्च धर्मो धर्मिघटयोरन्यतरेण सद्वितीय इत्यत्रान्यतरशब्दः सामान्यवचनो ऽपि धर्मिणि व्याख्येयो न हि घट एव घटेन सद्वितीयो भवितुमर्हतीत्यलमलीककल्पनाकौशलप्रख्यापनेन ।

सम्यग्वा यदि वा ऽन्यथा विदधते ये हेतवः संविदं
दृष्टाः स्वात्मनि ते प्रयोक्तुमुचिताः कामं परज्ञप्तये ।
ये तु स्वप्रतिपत्तिमेव न तथा कर्तुं क्षमाः कल्पना-
सामर्थ्यात्स्थितवस्तुशून्यघटनाः किं तत्प्रयोगे फलम् ॥

ये तु सूक्ष्मोत्प्रेक्षणक्षमप्रज्ञातिशयाभिधानदुर्विदग्धास्तथाविधानपि प्रयुञ्जते।

कृतकवचनाचातुर्यं तैः प्रदर्शितमात्मनो
भवति न पुनः शुद्धिः का चित्प्रमेयदिशः कृता ।
क चिदवसरे त्वेवंप्रायाः परभ्रमकारिणः
किल सफलतां दध्युर्जल्पे यथा कथितं पुरा ॥
तत्र त्वेतान्कथयति परः प्राज्ञमानी यदा वा
तस्याख्येयो निपुणमतिना पूर्वनीत्या समाधिः ।
द्राघीयस्या तदलमनया तार्किकंमन्यगोष्ठ्या
हेत्वाभासः प्रकरणसमस्त्वेष निर्णीत एव ॥

असिद्धलक्षणम् ।

साध्याविशिष्टः साध्यत्वात्साध्यसमः ॥

गौ. सू. अ. १ आ. २ सू ८ ।

अन्यतरवादिप्रसिद्धमन्यतरं प्रति यत्साधयितुमुपादीयते तत्साध्यम् तदविशिष्टो हेतुः साध्यसमः, कथं साध्येन तुल्यता हेतोरिति चेदाह साध्यत्वादिति, यथा साध्यमसिद्धत्वात्साध्यं तथा तत्सिद्ध्यर्थमुपात्तो हेतुरपि यो ऽसिद्धत्वात्साध्यः स साध्याविशिष्टत्वात्साध्यसम इत्युच्यते,

एतच्चान्यतरासिद्धस्यैव लक्षणम् यथा मीमांसकं प्रत्यनित्यः शब्दः कृतकत्वाद् घटवदिति, न चाक्षुषत्वादेरुभयासिद्धस्य, न हि तस्य साध्यत्वं सम्भवतीत्यर्थः,

सकलासिद्धभेदसंग्रहाय साध्यत्वादित्येतत्पदरहितं साध्याविशिष्ट इत्येवासिद्धलक्षणमुपवर्णनीयम् , साध्यस्य च रूपद्वयस्यासिद्धत्वं साध्यत्वं च तत्रासिद्धत्वमेव, तदविशिष्टत्वकारणमिहाश्रीयते सर्वासिद्धभेदसाधारणं न तु साध्यत्वमन्यतरासिद्धैकलग्नमिति, एवं चासिद्धत्वमेवासिद्धस्य लक्षणमुक्तं भवति, पक्षधर्मत्वं यस्य नास्ति साध्ये धर्मिणि यो न वर्तते हेतुः सोऽसिद्ध इति,

तस्य तु भूयांसो भेदा भवन्ति—हेतुस्वरूपे तावदन्यतरस्य वादिनो द्वयोर्वा अज्ञानं संदेहो विपर्यय इति, तथा तदाश्रये अपि धर्मिण्येकस्य वा द्वयोर्वा तथैवाज्ञानसंदेहविपर्यया इति, भूयसि च पक्षीकृते ऽर्थे तदेकदेशे क चिद्वृत्तिः तदितरत्रावृत्तिरिति, एकदेशवृत्तावपि द्वयोरेकस्य वा तथैवाज्ञानसंशयविपर्यया इति, एवंप्रकारभेदोदाहरणवर्णनमल्पप्रयोजनमिति न प्रस्तूयते,

"अन्यतरासिद्धेर्न विवदन्ते प्रमाणस्यापक्षपातित्वाद्यदि तावत्कृतकत्वं शब्दे प्रमाणतो निर्णीतं तर्हि मीमांसकस्यापि तार्किकस्येव तत्सिद्धमेव, अथ तत्र कृतकत्वनिश्चयनिपुणं नास्त्येव प्रमाणं तदा तार्किकोऽपि तूष्णीमास्तां द्वयोरप्यसौ चाक्षुषत्वादिवन्न सिद्ध्येद् हेतुः , वाङ्मात्रेण त्वसिद्धिक-

थनमसांप्रतमतिप्रसङ्गादेव"

सत्यमेवं न सर्वदाऽन्यतरासिद्धस्य हेत्वाभासत्वमभिदध्महे किं तु कं चित्कालमिति यदैकेन वादिना हेतौ प्रयुक्ते द्वितीयो वदति सम्प्रति न सिद्ध एष इति तदा हेतोः प्रयोगाद्वादिना तत्साधनमभिधेयमनभिधानात्स पराजीयते साधने तु तेनोक्ते तदसिद्धतोद्भावनवादी पराजीयते इति यावत्तत्सिद्धौ नोपन्यस्तं साधनं तावदेवासावन्यतरसिद्धचनन्तरं तु सम्यग् हेतुरुभयासिद्धो वा भविष्यतीति,

व्यधिकरणासिद्धस्तु यथोक्तभेदान्तर्गत एव, यथा नित्यः शब्दः काकस्य कार्ष्ण्यादिति,

क चित्पुनश्च व्यधिकरणासिद्धोऽपि भवति गमक इत्येके, तद्यथा बहलबहलः प्रचलजलधरश्यामलवपुरम्बरतलमाक्रामन्धूमप्रबन्धः क्षोणीध्रकन्दरादिविशेषधर्मत्वानवधारणेऽपि तत्र गमयितुमलमनलमिति, यथा वाऽग्निमानेष देशो धूमोपलब्धेरिति प्रयुज्यते तदोपलब्धेरात्मधर्मतया वैयधिकरण्येऽपि गमकताऽस्तीति ।

अन्यथासिद्धनिरूपणम् ।

अन्ये त्वन्यथासिद्धत्वं नाम तद्भेदमुदाहरन्ति यस्य हेतोर्धर्मिणि वृत्तिर्भवन्त्यपि साध्यधर्मप्रयुक्ता भवति न सोऽन्यथासिद्धो यथा नित्या मनःपरमाणवो मूर्तत्वाद् घटवदिति—

"ननु कथमयमन्यथासिद्ध उच्यते किमिति सम्यग् हेतुरेव न भवति किं परमाणुषु मूर्तत्वं न वर्तते किं घटादावनित्यतया व्याप्तं न दृश्यते किमाकाशादेः खपुष्पादेर्वा विपक्षान्न प्रच्यवते किं प्रत्यक्षेणागमेन वा बाध्यते किं प्रतिपक्षेण प्रतिबाध्यते येनाभासतां प्रतिभजते" न प्रतिबन्धाभावात् ।

"ननु पञ्चानां प्रतिबन्धलक्षणानां कतमदस्य श्लथीभूतम्" नान्यतमस्यापि शैथिल्यं ब्रूमः, "तत्किं पञ्चस्वपि लक्षणेषु प्रतिबन्धः समाप्यते तानि चासां सन्त्येव न चैष प्रतिबन्ध इति कैतवम्"

उच्यते प्रयोज्यप्रयोजकभावेन साध्यसाधनधर्मयोर्धूमाग्निवत्प्रतिबन्धोऽवधार्यते स चात्र प्रयोज्यप्रयोजकभावो नास्तीत्यत एवायमन्यथासिद्धोऽप्रयोजक इति कथ्यते,

"कथं पुनरस्याप्रयोजकत्वमवगतम्" उच्यते मूर्तत्वं हि सर्वगतेतरद्रव्यपरिमाणविशेषादिधर्मो वस्तुस्वभावमात्रनिबन्धनो न कृतकत्वादिवदनित्यतां प्रयोक्तुमुत्सहते, तथा हि परमाणुषु सिद्धेषु सत्सु तत्र वर्तमानं मूर्तत्वमनित्यतां साधयेदन्यथा त्वाश्रयासिद्धतामुपेयात्, सिध्यन्त एव सावयवकार्यानुमानमार्गेण लोष्टविभागावभासमानभागपरम्परापरिकल्पनक्रमेण वा पर-

माणवो निरवयवाः सिध्यन्ति, सावयवत्वे तदवयवाः परमाणवो भवेयुर्न ते, तेषामप्यवयवान्तरपरिकल्पनायामप्यवयवानन्त्याविशेषात्सर्षपस्य मेरोश्च साम्यमापद्यते, न च तदस्ति, तदेवं निरवयवेषु परमाणुषु निसर्गसिद्धमनाश्रितत्वमतश्चाश्रयविनाशावयवविभागादिविनाशकारणाभावात्स्वाभाविकविनाशवादनिराकरणाच्च कथं परमाणूनां नित्यतां स्पृशेत्, मूर्तत्वं तु वस्तुधर्मत्वाद्भवदपि प्रमेयत्वादिवन्न प्रयोजकम्,

इयांस्तु विशेषः–प्रमेयत्वमुभयपक्षस्पर्शादनैकान्तिकं भवदप्रयोजकम् इदं तु मूर्तत्वमनित्यव्यतिरिक्तवस्त्वन्तरपरिचयविरहितमपि न प्रयोजकमिति।

"नन्विदमपि प्रमेयत्ववद्विपक्षवृत्त्येव मूर्तत्वम्, क विपक्षे वर्तते? परमाणुष्वेव, ननु तेषां पक्षीकृतत्वात्कथं विपक्षता? न पुरुषेच्छानुरोधेन वस्तु विपरिवर्तते विपक्षो हि नाम स उच्यते यः सिषाधयिषितधर्माध्यासिततया दृढप्रमाणसिद्धः परमाणवश्चैतेऽनन्तरनिर्दिष्टनीतिक्रमेणानिर्णीतनित्यत्वाः परमार्थतो विपक्षा एवानित्यत्ववादिनः, स तु रागद्वेषकलुषितहृदयतया यदि तान्पक्षतया ब्रवीति ब्रवीतु नाम न तु सुस्पष्टासिद्धनित्यतानां परमाणूनां विपक्षभावो निवर्तते इति"

तदिदमनुपपन्नम् अनेन क्रमेण धूमानुमानस्याप्यनैकान्तिकत्वप्रसङ्गात्, धूमो हि महीभृति हुतवहविरहितवपुषि विपक्षे वर्तत एव, "न तत्र चित्रभानोरभावो निश्चित इति चेत्" किन्नु खलु सद्भावोऽस्य तत्र गृहीतः, तथा सति वा कृतमनुमानेन,

"अथ सत्त्वमसत्त्वं वा नावधारितमेव धराधरे धूमकेतोः" तर्हि संदिग्धा तत्र विपक्षता, निश्चितविपक्षवृत्तिवत् संशयितविपक्षवृत्तिरपि नानैकान्तिकतामतिवर्तत इति सर्वानुमानानामेव निवापाञ्जलिर्दत्तः स्यात्, न च वादिहृदय परिकल्पनोपारूढस्थितेरपि पक्षो नाम नास्ति तदभावे किमपेक्षः सपक्षविपक्षव्यवहारः, बुद्ध्यारूढत्वपक्षेऽपि न सपक्षविपक्षयोः पक्षत्वं न च वस्तूनामुभयात्मकता भवेत्, किं तु कं चित्कालमन्यतरासिद्धवद्विमतिपथापतितस्य वस्तुनः पक्षत्वमुपेयते, निर्णयजन्मना तु विमतिविरतौ नूनमन्यतरवर्गपतितो ऽसौ भविष्यतीति सर्वथा न तस्यां दशायां तेनानैकान्तिकत्वोद्भावनं युक्तम्,

"नन्वनेन पथा पृथक्कृते सपक्षविपक्षाभ्यां पक्षे न तत्रान्वयव्यतिरेकयोरन्यतरस्यापि ग्रहणं भवेत्, सपक्षे ह्यन्वयो गृह्यते विपक्षे च व्यतिरेकः, एष तु ताभ्यामर्थान्तरमिति तत्रागृहीतान्वयव्यतिरेकात्मकनियमो हेतुः षण्ढ इव न पुत्रजन्मनि समर्थ एव साध्यसाधने भवेत्" अलमनया डिम्भबिभीषिकया न हि सकलसपक्षविपक्षसाक्षात्करणकेकोल्लासपुरःसरं व्याप्तिग्रहणमिति पूर्वमेव निर्णीतोऽयमर्थः, न च तद्वर्जमिति व्याप्तिग्रहणं भवति येन षण्ढसुतसाम्यचोदनाऽवकाशः स्यात्, सामान्येन हि व्याप्तिर्गृह्यमाणा तत्रापि गृहीता भवत्येव, तेनापि च

कालान्तरे सपक्षविपक्षान्यतरवर्गानुप्रवेशिना भवितव्यमेव, विमत्यवस्था या तु पृथगेव ताभ्यामसाविति न तत्र वर्तमानो हेतुरनैकान्तिकीभवति, एतेनेश्वराद्यनुमानानामप्यनैकान्तिकत्वमपाकृतं वेदितव्यम् , तस्मान्नानैकान्तिकत्वेनागमकं मूर्तत्वमपि त्वन्यथासिद्धत्वेनैवेति ।

"नन्वेवमपि परमाणुप्रसाधनानुमानमहिमहतशक्तितया मूर्तत्वमनित्यत्वसिद्धावक्षमं जातमिति ततश्च कालात्ययापदिष्टत्वान्नान्यथासिद्धतामधिगच्छेत्"

नैतदेवम् कालात्ययापदिष्टो हि प्रत्यक्षागमापहृतविषय उच्यते अनुष्णः कृष्णवर्त्मा मदिरा द्विजैः पातव्येत्यादौ दर्शितो यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः स इति, न च परमाणुषु परमाणुतयैव सततपरोक्षेषु प्रत्यक्षमनित्यताविपर्ययग्राहि प्रवर्तितुं शक्तमागमस्तु नास्त्येवेति कुतः कालात्ययापदिष्टता ।

"ननु किमिदमवनिपतिवचनमुत वैदिकी चोदना यत्प्रत्यक्षागमयोरेव बाधकत्वमनुमानं प्रति नानुमानान्तरस्येति, परमाणुप्रसाधनानुमानं हि दृढमदृढस्य तदनित्यतानुमानस्य मूर्तत्वादेर्यदि बाधकं स्यात्को दोषः स्यादिति—

अथ मनुषे—नियम एवैष प्रत्यक्षानुमानयोर्विरोधे प्रत्यक्षमेव बलीय इति तदेवानुमानस्य बाधकमुचितं नानुमानान्तरमिति—

तदसत् अलातचक्रादौ प्रत्यक्षमप्यनुमानेनानन्यथासिद्धेन बाध्यत एव ।

ननु भ्रमणविरतौ परिमितपरिमाणोल्मुकग्राहि प्रत्यक्षमेव तत्र प्रत्यक्षस्य बाधकं नानुमानमिति,

मैवम् अनवरतपरिभ्रमणसमुद्भूतचक्रावभाससमय एवानुमानेन तद्भ्रान्ततानिश्चयात् ,

पूर्वप्रवृत्तमचक्राकारतदलातपरिच्छेदि प्रत्यक्षं बाधकमिति चेन्न,

पूर्वप्रवृत्तत्वेनैवातिक्रान्तत्वात् , तस्मादनुमानमेव चक्रज्ञानबाधकम् एवं चानन्यथासिद्धमनुमानमपि प्रत्यक्षस्य बाधकं भवति, यच्चानन्यथासिद्धतया मूलस्तम्भभूतमखिलानुमानप्रतिष्ठायतनं प्रत्यक्षमपि बाधते तदनुमानस्य तपस्विनः कथं न बाधकम् , अतश्च प्रत्यक्षागमग्रहणस्योपलक्षणार्थत्वादनुमानं बाधितमपि कालात्ययापदिष्टमेवेति"

तदेतदसमीचीनम् अनुमानादेर्बाध्यबाधकभावानुपपत्तेः, सर्वत्र खलु प्रमाणाभासरूपं बाध्यते न तु प्रमाणं नाम शक्यते बाधितुमलातचक्रादावपि प्रत्यक्षाभासस्य बाधकमनुमानं न प्रत्यक्षस्य एवमत्राप्यनुमानाभासस्य बाध्यता नानुमानस्य , तदिदानीमनुमानाभासत्वमस्य किंकृतमिति चिन्त्यताम् , "स्वलक्षणवैधुर्यादिति चेत्" किमनुमानान्तरेण बाधकेन, तद्बाध्यतया तु तदाभासत्वकथनमितरस्यापि तादृशमेव, "परमाणुषु प्रसाधनानुमानमनन्य-

थासिद्धमिदं तु मूर्तत्वमन्यथासिद्धमिति चेत्" आगतोऽसि मदीयं पन्थानमन्यथासिद्धत्वादेव च तदप्रामाण्ये सिद्धे किं तद्बाधया, "अन्यथासिद्धत्वमेव कथमिति चेत्" न घटादौ मूर्तत्वप्रयुक्तमनित्यत्वमपि तु कार्यत्वप्रयुक्तं कार्यस्य कारणविभागाद्वा तद्विनाशाद्वा विनाशोपलब्धेः कार्यत्वमेवानित्यत्वप्रयोजकमुक्तं न मूर्तत्वम्, मूर्तत्वे तु नित्यताक्षेपिणि परमाणुतैव हीयेतेत्युक्तम्, तस्मान्न मूर्तत्वमनित्यतायाः कारकं ज्ञापकं वेति भवत्यन्यथासिद्धम्,

"भवत्वेवम् असिद्धवर्गे तु कथमेष हेतुर्गण्यते" साध्यधर्मप्रयुक्ता धर्मिणि वृत्तिरस्य नास्तीति चेद्, यद्येवं पञ्चानामपि तत्प्रयुक्तवृत्तिरहितत्वादसिद्ध एवैको हेत्वाभासः स्यात् ।

अथ सत्यपि प्रयोजकत्वे विपक्षवृत्त्याद्यवान्तररूपभेदनिबन्धनानैकान्तिकत्वादिव्यपदेशपञ्चकभाज इमे हेत्वाभासा इष्यन्ते, हन्त तर्हि प्रकृतो ऽयं हेतुर्मूर्तत्वादिति किमनैकान्तिक उच्यतामथ कालात्ययापदिष्ट आहो स्विद्विरुद्ध उत प्रकरणसम इति, नैषामन्यतमो ऽपि वक्तुं शक्यते एतल्लक्षणानुपपत्तेरिति चेत्, काममसिद्धो ऽपि मा वादि पक्षे वर्तमानत्वेन तल्लक्षणस्यानुपपत्तेरिति, आस्तां तर्हि षष्ठ एवायं हेत्वाभासः सम्यग् हेतुतां तावद्यथोक्तनयेन नाश्नुत एव न च तेष्वन्तर्भवतीति बलात् षष्ठ एवावतिष्ठते ।

कथं विभागसूत्रमिति चेद् , अतिक्रमिष्याम इदं सूत्रम् , अनतिक्रामन्तः सुस्पष्टदृष्टमपीममप्रयोजकं हेत्वाभासमपन्हुवीमहि न चैवं युक्तमतो वरं सूत्रातिक्रमो न वस्त्वतिक्रम इति,

अथ वा न सूत्रकारनियमोल्लङ्घनं श्रेयः प्रमाद्यन्खलु परिमितदर्शी मादृशो ऽन्यथा ब्रूयान्न न्यायमहोदधेः पारदृश्वा भगवानक्षपादः, तदेनं हेत्वाभासमसिद्धवर्ग एव निक्षिपामः ।

"ननु पक्षे वर्तमानः कथं तत्र निक्षेप्तुं शक्यते" यथा साध्यधर्मप्रयोजकतया पक्षे ऽपि वर्तितुं युक्तम् तथा न वर्तत एवायं तत्रेत्यदूरविप्रकर्षेण भवत्येवायमसिद्धः, अत एवायमन्यथासिद्ध इत्युच्यते, यथा सिद्धः सिद्धो भवति तथा न सिद्धः अन्यथा तु सिद्ध इत्यनया नीत्योत्तानवृत्तिमात्रलम्भेऽप्ययमसिद्ध एव, अन्येषु तु हेत्वाभासेषु भङ्ग्या ऽपि नान्तर्भवतीत्युक्तमेतत्, अथ वा सर्वहेत्वाभासानुवृत्तमिदमन्यथासिद्धत्वं नाम रूपमिति न षष्ठो ऽयं हेत्वाभासः, तत्तु क्वचित्केवलमेव दृश्यते क्वचिद्व्यभिचारादिरूपान्तरसहचरितमतश्च व्यभिचारादिरूपापेक्षमेव पञ्चत्वमुपदिष्टवान्मुनिरिति न विभागसूत्रविरोध इत्यलमतिविस्तरेण ।

युक्तस्तस्मादन्यथासिद्धनामा हेत्वाभासः सो ऽयमेकप्रकारः ।
यस्योत्ताना विद्यमाना ऽपि पक्षे वृत्तिर्न स्यात्साध्यधर्मप्रयुक्ता ॥

हेत्वाभासकुटुम्बकस्य तदिदं सर्वस्य साधारणं
रूपं यद्यपि लक्षणान्तरकृतो भेदस्तथा नान्यतः ।
सामान्यं तु विशेषरूपरहितं नास्ति प्रमाणं यथा
मा भूदत्र तथेति नास्य विषयश्चोद्यस्य वस्तुस्थितिः ॥

अथ बाधितलक्षणम् ।

कालात्ययापदिष्टः कालातीतः ॥ गौ. सू. अ. १ आ. २ सू. ९ ।

यथाप्राप्तं हेतुप्रयोगकालमतीत्य यो हेतुरपदिश्यते स कालात्ययापदिष्टः कालातीत इत्युच्यते ।

तत्र केचिदाचक्षते—"प्रतिज्ञानन्तरं हि हेतुः प्रयोक्तुं युक्तः तत्र यः प्रतिज्ञायाः पूर्वमेव दृष्टान्तवचनादेरप्यूर्ध्वं वा प्रयुज्यते स कालात्ययापदिष्ट" इति । तदनुपपन्नम्—

अक्षतप्रतिबन्धस्य साध्यावगतिकारिणः ।
क्रमातिक्रममात्रेण न हेत्वाभासता भवेत् ॥

कियांश्चैष दोषः पदान्तरव्यवहितोच्चारणं नाम, व्यवहितमपि येन सह समुचितसमयमन्वेतुमधिकृतमितरदतिनिकटपठितमपि पराणुद्य दवीयसा ऽपि तेनैव संबन्धमनुभवति यथा—

अयसा पथि गच्छन्तीमौषधीं दीर्घलोचनाम् ।
दृष्टवानसि केदारं यो लुनासि मम प्रियाम् ॥ इति ।

अप्राप्तकालमेव तत्कथितं पृथगेव निग्रहस्थानम्, तच्च पुनरुच्यमानं न कञ्चन स्वार्थमावहति तस्मादप्रत्याख्यानमेतत् ।

अपर आह—"सविशेषणस्य हेतोः प्रयुज्यमानस्य यस्य विशेषणं कार्यकालमत्येति न तत्पर्यन्तमवतिष्ठते स कालात्ययापदिष्ट इति, यथा कालान्तरस्थायी शब्दः संयोगव्यङ्ग्यत्वाद्रूपवदिति, अत्र न व्यङ्ग्यत्वमात्रं हेतुत्वेन विवक्षितमपि तु सविशेषणं संयोगव्यङ्ग्यत्वं स चायं संयोगो व्यञ्जके दृष्टान्तधर्मिणि रूपे तदवगतिपर्यन्तस्थितिरुपलभ्यते दीपादिसंयोगः, साध्यधर्मिणि तु शब्दे न तदवस्थानमिति दूरतो हि दारुपरशुयोगविच्छिन्ने छेत्रा पुनरुद्यम्यमाने परश्वधे श्रूयते शब्द इति तदुपलब्धिकाले तदत्ययात्कालात्ययापदिष्टो ऽयं हेतुरिति" एतदपि न संगतमसिद्धत्वेनास्य हेत्वाभासान्तरत्वानुपपत्तेः ।

तस्मादयमर्थः हेतोः प्रयोगकालः प्रत्यक्षागमानुपहतपक्षपरिग्रहसमय एव तमतीत्य प्रयुज्यमानः प्रत्यक्षागमबाधिते विषये वर्तमानः कालात्ययापदिष्टो भवति तस्योदाहरणं पूर्वमेव प्रदर्शितम् ।

उष्णो न तेजोऽवयवी कृतकत्वाद् घटादिवत् ।
ब्राह्मणेन सुरा पेया द्रवत्वात्क्षीरनीरवत् ॥

यच्च किं चिदभिधेयमत्र तत्सर्वमुक्तमनुमानलक्षणे ।
अप्रयोजकनिरूपणे पुनः किंचनोदितमतो विरम्यते ॥
हेत्वाभासास्त एते ऽवगतिनियमितानन्यसङ्कीर्णरूपा
निर्णीताः पञ्च ये ऽर्थे विदधति महतीं शुद्धिमभ्यस्यमानाः ।
पक्षादौ वृत्तिभेदाकलनगुरुतरक्लेशनिष्पद्यमाना
नेयत्ता त्वेतदीया क्व चन फलवती नादृता तेन तज्ज्ञाः ॥

इति (१३) हेत्वाभासपदार्थः समाप्तः ।

अथ छलनिरूपणम् ।

तत्त्वाध्यवसायसंरक्षणं जल्पवितण्डयोः प्रयोजनमुक्तम्, तदङ्गभूतानि छलजातिनिग्रहस्थानानि, यद्यपि च वादे केषां चिदभ्यनुज्ञानमस्ति तथापि जल्पवितण्डे एव तेषां प्राचुर्येण क्षेत्रमिति तदौपयिकतया तत्स्वरूपनिरूपणं युक्तमित्युद्देशक्रमेण छलस्य तावल्लक्षणमाह—

वचनविघातो ऽर्थविकल्पोपपत्त्या छलम् ॥
गौ. सू. अ. १ आ. २ सू १० ।

छलस्य भेदवत्त्वात्सामान्यलक्षणानि च वक्तव्यानि तानीह सर्वाणि स्वकण्ठेन किल तत्पूर्वकमनुमानमित्यत्र त्रिचतुराक्षरसमर्पितापरिमितविषयवितण्डानुमानलक्षणलब्धनिरतिशयसूत्रकरणकौशलस्य मे किमधुना शिष्यजनमनःक्लेशकारिणा संक्षिप्ताभिधानदोहदेनेति मन्यमानः सूत्रकृदुक्तवान् तत्र वचनविघात इति सूत्रं सामान्यलक्षणप्रतिपादकम्, परस्य वदतो वचनविघातो ऽभिधाननिरोधः छलम्, किमास्यपिधानादिना नेत्याह, अर्थविकल्पोपपत्त्येति, वक्तुरनभिप्रेतमर्थान्तरमुक्ते वचसि समारोप्य तन्निषेधं छलवादी करोति, कथमर्थान्तरारोपणमिति चेद्, अर्थविकल्पोपपत्त्या विकल्पमानार्थघटनयेत्यर्थः,

किमुदाहरणं विशेषलक्षणेषु वक्ष्यामः, इहैव कस्मान्नोच्यते असंभवादिति ब्रूमः, न हि निर्विशेषं सामान्यमुपपद्यत इति तदुदाह्रियमाणं बलाद्विशेषनिष्ठमेवावतिष्ठते, अन्येष्वपि गौर्न पदा स्प्रष्टव्येति सामान्योपदेशेषु नामूर्त्तायामाकाशनिर्विशेषवपुषि जातौ स्पर्शप्रसक्तिस्तन्निषेधो ऽवकल्पते किं तु व्यक्तिष्वेवेति विशेषविषय एव सर्वत्र क्रियायोग इति तत्रैवोदाहरणवर्णनं युक्तम्,

"कथं तर्हि सकलहेत्वाभाससार्थसामान्यलक्षणमप्रयोजकमनपेक्षितसव्यभिचारविरुद्धादिविशेषमप्युदाहरणद्वारेण दर्शितमनित्याः परमाणवो मूर्तत्वाद् घटवदिति"

उच्यते प्रमाणे तर्हि प्रत्यक्षादिविशेषनिरपेक्षं कथं प्रमाणसामान्यं नोदाहृतम्, न च तत्सामान्यादन्यत्रापि तथाऽस्त्विति वक्तव्यम्, न हि चाक्षुषेण पश्चाशङ्कवितुमर्हति(?) तस्मान्नैवं वक्तुं शक्यम्, यथा विरुद्धादिविशेषरूपरहितमप्रयोजकत्वं हेत्वाभासे सामान्यरूपं दृश्यते तथा प्रमाणेष्वपि प्रत्यक्षादिविशेषरूपरहितं तद्रूपं दृश्यतां यथा वा प्रमाणेषु तन्न दृश्यते तथा हेत्वाभासेष्वपि मा दर्शीति वस्तुस्वभावानामनुयोगक्षेत्रताऽनुपपत्तेः,

अपि चाप्रयोजकत्वं सामान्यं विरुद्धादिविशेषेष्विव तद्रूपरहितेषु स्वविशेषेष्वपि संभवद् दृश्यते, अत एव तदपि स्वविशेषनिष्ठमेवोदाहृतम् अनित्याः परमाणवो मूर्तत्वादिति न त्वाकाशवदनवलम्बनमेव किंचिदप्रयोजकत्वसामान्यमिति, तस्मात्सुष्ठूक्तं न सामान्यलक्षणे शक्यमुदाहर्तुमिति ।

एवं सामान्यलक्षणमभिधाय च्छलस्य विभागमाह—

तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च ॥

गौ. सू. अ. १ आ. २ सू. ११ ।

निगदव्याख्यातं सूत्रम्, विभागसामान्यलक्षणयोश्चोपदेशपौर्वापर्यनियमो नास्तीति पूर्वमेवोक्तम् ।

वाक्छललक्षणम् ।

अथ विभागक्रमेण विशेषलक्षणान्याह—

तत्राविशेषाभिहिते ऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥

गौ. सू. अ. १ आ. २ सू. १२ ।

सम्भवद्विशेष्यविशेषणसाधारणार्थसमर्पणकौशलशालिनि श्लेषालंकारतावति शब्दे प्रयुक्ते सति वक्तुरभिप्रेतमर्थमपह्नुत्य ततोऽर्थान्तरं परिकल्प्य तन्निषेधवचनं वाचि निमित्तभूतायां छलं वाक्छलम्,

नवकम्बलो ऽयं माणवक इति नवः कम्बलो ऽस्य नव कम्बला अस्येति च विग्रहदशा दृश्यमानविशेषमपि समासपदमिदमर्थद्वये ऽप्यविशिष्टम्, तत्राभिनवकम्बलयोगं वक्तुरभिप्रेतं प्रमाणोपपन्नं च निह्नुत्य नवसंख्यासंम्बन्धमध्यारोप्य तत्प्रतिषेधेन परः प्रत्यवतिष्ठते कुतोऽस्य नव कम्बला इति, तदेतत्साधारणशब्दे वाचि छलं वाक्छलमिति, यथा च कस्यांचिदवस्थायां जल्पादौ छलादिप्रयोगो युक्त इति तद्व्युत्पादनमेवं परप्रयुक्तस्यापि सतश्छलादेः प्रतिसमाधानमभिधेयमिति तदपि व्युत्पाद्यते,

नव कम्बला अस्येति मम विवक्षितमिति कुतः प्रतिपन्नमायुष्मता, किमयमभिनवकम्बलयोगप्रतिपादको न भवत्येव बहुव्रीहिः पक्षद्वये ऽपि च सम्भ-

 6643

वति, यदि तावदर्थप्रकरणादिसामर्थ्यपर्यालोचनया ऽवसितनियताभिधेयवृत्तिशब्दव्यवहाराभिज्ञोऽसि तदर्थसिद्धमर्थमभिनवकम्बलसंबन्धमेव बुद्ध्वा तूष्णीमास्स्व ।

अथ शुष्कतार्किककुटुम्बकगर्भदास इव शब्दवृत्तानभिज्ञ एव त्वं तर्हि पक्षद्वयसंभवे संशयानो मामेव पृच्छ किं ते विवक्षितमिति निषेधकः सन्वक्तुमुपक्रमसे ।

"ननु त्वमप्यक्षप्राप्त्यादिफलपर्यन्तशब्दप्रयोगप्रवृत्तः किमिति साधारणमिदमन्धपदप्रायं वचः प्रयुङ्क्ते"

अयि बालिश तवैतदन्धपदम्—

> अर्थप्रकरणाधीननियतस्वार्थवृत्तिताम् ।
> यो न जानाति शब्दानां स एवमपभाषते ॥
> इदमर्थद्वये तावत्साधारणपदं भवेत् ।
> जातिशब्दाः पुनर्व्यक्तिसहस्राक्षेपकारिणः ॥
> स्पृशन्ति नियतं वाच्यं ते ऽपि प्रकरणादिना ।
> ब्राह्मणान्भोजयेत्यादौ तद्बालेन न शिक्षितम् ॥
> तस्माच्छब्दार्थसंदेहे प्रयोक्ता वत्स पृच्छ्यते ।
> न त्वर्थान्तरमारोप्य तन्निषेधो विधीयते ॥

सामान्यच्छललक्षणम् ।

संभवतोऽर्थस्यातिसामान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलम् ॥

गौ. सू. अ. १ आ. २ सू. १३ ।

अतिव्यापकं सामान्यमतिसामान्यं तद्योगात्तत्सम्भवात्क्वचिद् व्यक्तार्थस्य कस्य चित्संभवतः संभाव्यमाननिष्पत्तेर्वक्त्राऽभिहितस्य सतो या ऽसद्भूतार्थकल्पना वक्तुरनभिप्रेतातिसामान्यहेतुत्वकल्पना तया च प्रत्यवस्थानं तत्सामान्यनिमित्तं छलं सामान्यच्छलम् ।

यथा क्वचिदुचितोपचारवचनाराध्यमानगुणवद्ब्राह्मणकुले तत्कथाबहुले राजकुले कश्चित्सुजन्मा कंचिदग्रजन्मानं स्तौति अहो नु खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न इति, तस्मिन्प्रसङ्गे तथाविध एवापरस्तमुत्साहयन्कथयति सम्भवति ब्राह्मणे विद्याचरणसम्पदिति, तत्र पिशुनश्छलवाद्याह यदि ब्राह्मणे विद्याचरणसम्पत्सम्भवति तर्हि व्रात्ये ऽपि ब्राह्मणत्वजात्यनपनयनात्संभवेदिति तत्रेदमतिव्यापकं ब्राह्मणत्वसामान्यं यतो विद्याचरणसम्पदमत्येति च स्पृशति तद्योगाद् ब्राह्मणव्यक्तौ सम्भवतो विद्याचरणसम्पद्रूपस्यार्थस्य वक्त्रा ऽभिहितस्य सतस्तत्र वक्त्रभिमतामेवातिसामान्यहेतुतामारोप्य च्छलवादी प्रत्यवतिष्ठत इति,

THE KUPPUSWAMY SASTRI RESEARCH INSTITUTE, MYLAPORE, MADRAS-4

अत्रोत्तरम् केन ब्राह्मणत्वस्य हेतुत्वमभिहितं यदनैकान्तिकीकुर्वन्प्रत्यवस्थितोऽसि, संभावनावचनमिदं स्तुत्यर्थमुपन्यस्तम्, विद्याचरणसंपदः पात्रं हि ब्राह्मणाः सति ब्राह्मणत्वे पूर्वजन्मोपचितसुकृतपरिणामाद्भवति विद्याचरणसम्पत्, न तु तदेव तस्या हेतुरिति, यथा सम्भवन्त्यस्मिन्क्षेत्रे शालय इति क्षेत्रप्रशंसापरे वाक्ये प्रयुक्ते नैवं वक्तुमापद्यते यदि क्षेत्रमेव शालिसम्भवहेतुस्तत्र विनापि हलबलीवर्दादिसामग्र्यां महत्यवग्रहे ऽपि शालयो ऽस्मिन्सम्भवेयुरिति, तदिदमर्थवादादिगत्यनभिज्ञस्य भवतो भाषितमित्यास्तामेतत्,

इदं तु भवन्तं पृच्छामि भो महात्मन्—

स्वभावशुद्धा परिनिश्चितार्थसंस्पर्शिनी पुण्यसहस्रलभ्या ।
केनेदृशी सर्वजनानुकूला कल्याणिनी ते निरमायि वाणी ॥

उपचारच्छललक्षणम् ।

धर्मविकल्पनिर्देशे ऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥

गौ. सू. अ. १ आ. २ सू. १४ ।

अभिधानस्य धर्मो ऽनेकप्रकारो मुख्यया वृत्त्या गौण्या वा लाक्षणिक्या वा यदर्थे प्रत्यायनं तदनेन विकल्पमानेन धर्मेण गौणेन लाक्षणिकेन वा निर्देशे प्रयोगे कृते यो ऽर्थसद्भावप्रतिषेधो मुख्यार्थनिषेधः स उपचारनिमित्तं छलमुपचारच्छलम् ।

यथा मञ्चाः क्रोशन्तीत्युक्ते च्छलवाद्याह कथमचेतनाः काष्ठरचनात्मानो मञ्चाः क्रोशन्ति मञ्चस्थाः पुरुषा एते क्रोशन्ति न मञ्चा इति ।

अत्र समाधिः–वृद्धव्यवहाराच्छब्दार्थव्युत्पत्तिः तत्र न केवलयैव मुख्यया वृत्त्या शब्दाः प्रवर्तमाना दृश्यन्ते वृत्त्यन्तरव्यवहारस्यापि सुप्रवर्तितत्वात्, न च निर्निमित्तमेव परशब्दं परत्र प्रयुक्तवन्तो वयं सहचरणादिसूत्रनिवेदितनिमित्तनिकुरुम्बान्यतमनिमित्तपूर्वकत्वादस्य प्रयोगस्य स्थानादयं तद्वदुपचारः,

"सत्यं गौणलाक्षणिकादिशब्दप्रयोगावगतिबाह्य एव य एवं प्रत्यवतिष्ठते, गौणलाक्षणिकयोः कथं विशेष इति एतत् कथ्यताम्" सत्यं गोशब्दः स्वार्थमभिधाय सास्नादिमन्तं तदीयान् गुणानेव जाड्यमान्द्यादीन् न मूत्रादींल्लक्षयति न तावत्येव विरमति स तु सामानाधिकरण्येन वाहीकेऽपि प्रवर्तते, गौर्वाहीक इत्येवं प्रयुज्यमानः स गौणो भवति, यस्तु स्वार्थाभिधानानन्तरं तदितरमर्थं गुणमगुणं वा लक्षयत्येव न सामानाधिकरण्येन परत्र प्रयुज्यते शब्दः स लाक्षणिको भवति गङ्गायां घोषः प्रतिवसतीति, तथा चोक्तं । गौणे ऽपि प्रयोगे न लक्षणेत्य(यमित्य)लं शास्त्रान्तरोद्गारगहनाभिः कथाभिः—

मुख्यमर्थमथ लाक्षणिकं वा गौणमप्यवगमस्य च शब्दः ।
लोकवेदविहितं व्यवहारं सन्तनोति तदभिज्ञमतीनाम् ॥
कुर्यादाक्षेपं यश्च भाक्ते प्रयोगे वाच्यं मत्वा ऽर्थं तत्र वक्तुर्न दोषः ।
तेन त्वास्मीयं शब्दवृत्तानभिज्ञं रूपं व्यक्तं स्यादत्र वृद्धाः प्रमाणम् ॥

अथ छलपरीक्षा ।

एवं छलस्य विशेषलक्षणान्यभिधाय तत्परीक्षायामाक्षेपं करोति—

वाक्छलमेवोपचारच्छलं तदविशेषात् ॥

गौ. सू. अ. १ आ. २ सू. १६ ।

न खलु वागुपचारच्छलयोः कश्चिद्विशेषः अनेकधा शब्दार्थे सम्भवति वक्त्रभिमतादर्थादन्यस्य कल्पनं तत्प्रतिषेधनं चोभयत्रापि समानमवान्तरविशेषकृतनानात्वाभ्युपगमे वा तदानन्त्यप्रसङ्गः ।

अत्र समाधिमाह—

न तदर्थान्तरभावात् ॥ गौ. सू. अ. १ आ. २ सू. १७ ।

नैतदेवं 'वाक्छलमेवोपचारच्छलमिति ततोऽर्थान्तरत्वात्, वाक्छले हि नवकम्बल इति नवसु कम्बलेषु नवे च कम्बले मुख्यार्थ एव शब्दः स राम इत्यादिवत्, ततस्त्वेकतरं वक्तुरनभिप्रेतं छलवादिना ऽऽरोप्य निषिध्यते, उपचारच्छले तु काष्ठसन्निवेशे मुख्यार्थे मञ्चशब्दः पुरुषे भक्त्या प्रवृत्तः मुख्यमभिधाय च गौणः प्रत्याय्यो भवति न त्वेष क्रमः साधारणशब्देष्विति महान्भेदः, वाक्छले चार्थसत्त्वैव निषिध्यते कुतो ऽस्य नव कम्बला इतीह तु सतो मञ्चस्य क्रोशनशक्तिर्निषिध्यते ।

समाधिरपि साधारणशब्दानभिज्ञतां परस्य प्रदर्शयता वाक्छले वाच्यः उपचारच्छले तु गौणादिशब्दवृत्त्यनभिज्ञतामिति महान्विशेषः ।

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ॥

गौ. सू. अ. १ आ. २ सू. १८ ।

छलस्य द्वित्वमभ्यनुज्ञाय त्रित्वं भवता प्रतिषिध्यते यतः सामान्यच्छलं पार्श्वे कृत्वा वागुपचारच्छलयोरभेदमुपहितवानसि यथा चायं तदविशेषादिति त्रित्वप्रतिषेधस्तथा द्वित्वस्यापि किंचित्साधर्म्यस्य सामान्यच्छले ऽपि भावात्, तथा हि यदि तावद्वाचि निमित्तभूतायामिदं प्रवृत्तं छलमिदं चेति तदभेदं मन्यसे तर्हि सामान्यच्छलमपि मा वोचः तदपि हि न शरीरे मनसि बुद्धौ वा निमित्ते अपि तु वाच्येवेति वाक्छलमेवैकं स्यात्, अथैवं सत्यपि तद्विशेषो दृश्यमानो न पराणुद्यते सामान्यच्छले ऽपि न शब्दार्थो ऽन्यथा कृतः किं तु

सामान्यस्य हेतुत्वमनुक्तमारोपितमिति पृथगिष्यते तर्हि वागुपचारच्छले अपि भिद्येते एवेति दर्शितमतो युक्तं भवत्विदम् , न चानन्त्यामयत्तानियमकारिणो निमित्तत्रयस्य दर्शितत्वात्—अवान्तरभेदकृतं तु तदानन्त्यमिष्यते एव जातिवदित्यलं प्रसङ्गेन ।

तस्मात्परस्परविविक्तनिजस्वरूपमीदृक् छलत्रितयमेतदिहोपदिष्टम् ।

तस्य क्वचित्स्वयमपि क्रियते प्रयोगो वाच्यः परैरभिहितस्य तथा समाधिः ॥

इति (१४) छलपदार्थः ।

इति श्रीमद्भट्टजयन्तकृतौ न्यायमञ्जर्यामेकादशमाह्निकम् ॥ ११ ॥

अथजातिप्रकरणम् ।

छलानन्तरं जातेरुद्देशात्तस्याः सामान्यलक्षणं तावदाह—

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥

गौ. अ. १ आ. २ सू. १८ ।

अत्र त्रैकाल्यसमादिसकलविशेषसंग्रहाय साधर्म्यवैधर्म्यादिनिरपेक्षमेव प्रत्यवस्थानपदं जातिसामान्यलक्षणप्रतिपादकमाहुः, प्रतीपमवस्थानं प्रत्यवस्थानं तावन्मात्रमेव च यत्किंचिदुत्तरं परप्रयुक्ते हेतौ जायमानत्वाज्जातिरित्यभिधीयते,

तदनुपपन्नम्—प्रत्यवस्थानमात्रस्य साधर्म्यादिनिरपेक्षस्य जातित्वे हेत्वाभासोद्भावनमपि जातितामश्नुवीत ।

अथ तस्य सम्यगुत्तरत्वादिह च निर्विशेषणप्रत्यवस्थानमात्रोपपादनात्फल्गुप्रायमसदुत्तरं जातित्वेन विवक्षितमित्युच्यते, तथापि छलस्य जातित्वप्रसक्तिरपरिहार्यैव, तद्व्युदासाय तु तदन्यत्वे सतीत्यादिकं यदि किंचिदध्याह्रियते तदमुष्य श्रूयमाणस्य साधर्म्येण वैधर्म्येण वा प्रत्यवस्थानमस्तीति नैष दोषः साधर्म्यवैधर्म्याभ्यामित्यसमासकरणेन दिक्प्रदर्शनस्य सूचनात् । साधर्म्येण वैधर्म्येण वा कथमेष हेतुर्हेतूभवतीति वा किमनेन क्रियते इति वा यदेवंप्रकारप्रत्यवस्थानं हेतुप्रतिबिम्बवर्त्मना क्रियते सा भविष्यति जातिरित्युच्यमाने सकलविशेषसंग्रहः त्रैकाल्यसमादिष्वपि यादृशस्य तादृशस्य साधर्म्यवैधर्म्यप्रकारस्य योजयितुं शक्यत्वात् , न ह्युदाहरणसाधर्म्यं साध्यसाधनमिह विवक्षितं तद्वैधर्म्यं वा साधर्म्यादिमात्रं तु तत्रापि नात्यन्ताय दूरगमिति यथाश्रुतं साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरिति सामान्यलक्षणं युक्तम् ।

अथ भेदवत्त्वाज्जातेश्चतुर्विंशतिधा विभागमाह—

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्र-

विदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्य-
नुपलब्धिनित्यानित्यकार्यसमाः ॥
गौ. अ. ५ आ. २ सू. २ ।

अत्र समा इति स्त्रियां पुंसि च तुल्यत्वान्निर्देशस्य जात्यपेक्षया स्त्रीनिर्देशो वा प्रतिषेधापेक्षया वा पुंनिर्देशो वर्णनीयः, विशेषलक्षणसूत्रेषु पुनः प्रायेण पुंलिङ्गनिर्देशो दृश्यते स तु प्रतिषेधापेक्षया तेषु व्याख्येय इति तद्व्याख्यानावसर एव वक्ष्यामः ।

जातिव्युत्पादनपरीक्षा—

"नन्वास्तां तावद्विशेषलक्षणवर्णनम् इदमेव त्वादौ चिन्त्यताम्--किमर्थमेवंविधमसदुत्तरजातं शास्त्रे व्युत्पाद्यते,

एवंप्रकाराणां च धूलिप्रक्षेपसदृशानां सारेतरपरीक्षणक्षमविचक्षणोपेक्षणीयानामसदुत्तराणामानन्त्याच्चतुर्विंशतिसंख्याऽपि कथमिति मनसि महान्विस्मयो ऽस्माकम्,

यदपि च तत्त्वाध्यवसायसंरक्षणं तत्प्रयोजनमभिधीयते तदपि न हृदयंगमम्, असदुत्तरोपन्यासेन तत्त्वाध्यवसायस्य संरक्षितुमशक्यत्वात्,

अथ विकटाटोपप्रकटनपाटवोपहितापरसंमोहनद्वारेण तद्रक्षणमास्थीयते तर्हि ष्ठीवितहसितांसमर्दनकौपीनावरणविदारणचरणावस्फोटनाद्यपि व्युत्पाद्यतामिह मोक्षविद्यायाम्,

तथा ऽपि चेदं विचार्यताम् क जातिप्रयोगैः प्रत्यवस्थेयम्, सम्यक्साधने परेण प्रयुक्ते तदाभासे वा, न तावत्साधनाभासे तस्य हि येन निमित्तेनासिद्धत्वादिना साधनाभासत्वमुपनतं तदेव तत्र प्रयोक्तुमुचितं न जातयः, तेनैव च परः पराजीयते, नापि सम्यक्साधने तत्र प्रयुक्तानामपि तासामकिंचित्कार्यकरत्वात्, न हि जातिप्रयोगकलुषितमपि सम्यक्साधनमसाधनीभवितुमर्हति ।

अथैकान्तपराजयाद्वरं संदेह इति ताभिरुपक्रमते तत्रापि स तथोपक्रममाणः कमिव प्रत्याययेत्, नीतिविदस्तावज्जानन्त्येव सोऽयं यथोचितमभिवदितुमपारयन्किमप्यालजालमालपितुं प्रवृत्त इति, शाकटिकादिप्रत्यायनार्थं तु प्रत्यन्तगह्वरजनपदेषु ग्राम्यसदसि लाभादिकामस्य कस्य चित्प्रयोजनवद्भवेदपि कदा चिन्न तु मोक्षशास्त्रे तथाविधोपदेशः पेशल इति"।

अत्राभिधीयते--समाहितमेतद्भगवता सूत्रकारेणैव तत्त्वाध्यवसायसंरक्षणार्थं कण्टकशाखापरिवरणवदिति वदता, जल्पवितण्डाङ्गभूतानि च च्छलादीनि, तदुक्तं-'छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प' इति, भाष्यकृदप्याह-

'छलजातिनिग्रहस्थानानां पृथगुपदेश उपलक्षणार्थः,उपलक्षितानां स्ववाक्ये परिवर्जनं परवाक्ये च पर्यनुयोगः,जातेस्तु परेण प्रयुज्यमानायाः सुवचः समाधिः स्वयं च सुकरः प्रयोग' इति, यदा हि मुमुक्षोरागमाद्वा युक्तितो वा तत्त्वज्ञानमुत्पन्नं न चाद्यापि भावनाभ्यासप्रसादसमासादितद्रढिमातिशयं वर्तते तस्यामवस्थायां यदि केन चित्किमप्यनुमानप्रायमभिधाय तदा व्याकुलीक्रियते तदासौ विदितयुक्त्यागमगौरवो ऽपि सपदि तदुत्पादिते तत्त्वज्ञाने मनागसंभावनालेशमिवाधिगच्छेत्, तस्मिन्वा दृढप्रत्यये ऽपि तत्पार्श्ववर्तिनः शिथिलास्था भवेयुः, अतो झगिति स दूषणमपश्यन्प्रतिपक्षं जातिप्रयोगैरप्यसौ शमयेदेव नोदासीतेत्युक्तं जल्पलक्षणे, परोदिता वा जातीः प्रत्यभिज्ञाय तत्क्षणमेव परिहरेदिति सफलं जातिव्युत्पादनम्, यथा क चिदचिरव्युप्तसस्ये संप्रत्युद्भिद्यमानकोमलाङ्कुरनिकरदन्तुरितसीमनि केदारे तदुपद्रवो द्रुततरगामिनो यतः कुतश्चन चतुष्पदाद् द्विपदाद्वा ऽभिशङ्क्यते इति तत्परिहाराय समन्ततो निरन्तरकण्टकशाखासंततिपरिचरणमाधीयत एवमिहापि जात्यादिप्रयोगः, तद्द्वारकं तत्त्वाध्यवसायसंरक्षणं कर्तव्यम् ।

यत्तु विकल्पितं क जातेः प्रयोगः सम्यक्साधने तदाभासे वेति, तदुच्यते-सम्यग् दूषणमपश्यता किल जात्यादि प्रयोक्तव्यं तच्च सम्यक्साधने तदभावादेव भवतु साधनाभासे वा प्रमादादिना वेति को ऽत्र विशेषः, मुमुक्षोस्तु ज्ञाततत्त्वस्य तत्प्रतिकूलवादिना केन चिदाक्षिप्तस्य तत्प्रयुक्ते तत्त्वप्रतिक्षेपबलात्साधनाभास एव सम्यग् दूषणमपश्यतो जातिप्रयोगावसरः, ज्ञात्वापि साधनाभासतां यथा तथा सत्वरमेव निर्भर्त्स्यतामयं दुराचार इति पार्श्वस्थितसुकुमारमतिशिष्यजनोत्साहजननाय जात्याद्याडम्बरविरचनमुचितमेव मुमुक्षोः, मुमुक्षुं प्रति च शास्त्रारम्भादाक्रम्येन तदपेक्षया साधनाभासविषय एव जातिप्रयोगः, अत एव च भाष्यकृता प्रथमं साधनाभास एव जात्युदाहरणं दर्शितम्, लाभादिकामानां तु सम्यक्साधने ऽपि प्रयुक्ते युक्त एव जात्याद्युपक्रमः, इतरथा हि निःसंशय एव पराजयः स्यादित्येतच्चानुषङ्गिकं प्रयोजनमित्युक्तम्।

यत्पुनरभिहितमसदुत्तरकथने कथं न चपेटादिकं प्रयुज्यते इति, तदप्यसत्तस्यात्यन्तमलौकिकत्वात्, लोको हि तदेवं मन्यते--

नूनमेष न जानाति वक्तुं सदृशमुत्तरम् ।
अन्यथा वाचमुत्सृज्य पाणिना प्रहरेत्कथम् ॥
खेदयेद्वादिनं यस्तु हस्तपादादिचापलैः ।
स संसद्युच्यते सद्भिर्भण्ड एव न पण्डितः ॥
जात्योपक्रममाणस्तु न तथैव विहस्यते ।
न हि संदूषणच्छाया तत्रात्यन्तमसंगता ॥

तत्र कौपीनवसनापासनादिसाम्यं जात्युत्तराणामिति, यत्तु कस्तैः प्रत्याख्य-व इति, न सर्वः सर्वज्ञकल्पो भवति न च शाकटिकतुल्यः, सन्ति हि मध्यमदशावर्तिनो जनास्त आराधयिष्यन्त इत्यलं प्रसङ्गेन।

यत्पुनरसदुत्तराणामानन्त्यात्कथं चतुर्विंशतिसंख्येति, तत्राप्युच्यते—सत्यप्यानन्त्ये जातीनामसंकीर्णोदाहरणविवक्षया चतुर्विंशतिप्रकारत्वमुपवर्णितं न तु तत्संख्यानियमः कृत इति।

तदत्र साधर्म्येण प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतोः तत्साधर्म्यसमा जातिः, सा च साधर्म्यहेतौ वैधर्म्यहेतौ च प्रयुज्यते, वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमा जातिः, उत्कर्षापकर्षाभ्यां प्रत्यवस्थानमुत्कर्षापकर्षसमे जाती इत्येवं सर्वत्र योज्यम्, स्थापनहेतुतश्चाविशेष्यमाणत्वं जातिवाद्यभिप्रायेण तासां द्रष्टव्यम्, जातिवादी ह्येवं वदति यथा भवत्प्रयुक्तं साधनं तथेदमपि किमिति न भवतीति, अत एव हेतुप्रतिबिम्बनद्वारक एव जात्युपन्यास इत्युक्तम्।

साधर्म्यवैधर्म्यसमयोर्लक्षणे।

अथ विशेषलक्षणान्याह, तत्र—

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमः॥

गौ. अ. ५ आ. १ सू. २।

प्रतिषेधापेक्षया पुंलिङ्गनिर्देश इति तत्र तत्र द्रष्टव्यम्, साधर्म्येण वैधर्म्येण वा साधनमभिधाय सिषाधयिषितपक्षोपसंहारे साधनवादिना कृते साध्यधर्मविपर्ययोपपादनाय साधर्म्येण प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः साधर्म्यसमः प्रतिषेधः, तत्रैव साधर्म्येण वैधर्म्येण वोपसंहारे तथैव वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः प्रतिषेधः।

उदाहरणं तु अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् यत्प्रयत्नानन्तरीयकं तदनित्यं दृष्टं यथा घट इति साधर्म्येण हेतौ प्रयुक्ते जातिवादी साधर्म्येणैव प्रत्यवतिष्ठते—नित्यः शब्दो निरवयवत्वाद् निरवयवं द्रव्यमाकाशादि नित्यं दृष्टमिति, न चात्र विशेषहेतुरस्ति घटसाधर्म्यात्प्रयत्नानन्तरीयकत्वादनित्यः शब्दो न पुनराकाशसाधर्म्यान्निरवयवत्वान्नित्य इति, वैधर्म्यहेतावपि साधनादिना प्रयुक्ते अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् यदनित्यं न भवति तत्प्रयत्नानन्तरीयकमपि न भवत्याकाशादिवदित्यत्रैतदेव पूर्वोक्तं साधर्म्यवैधर्म्यप्रत्यवस्थानद्वयमुदाहर्तव्यमिति।

यथा च कचिदवसरे स्वयं प्रयोगो जातीनामुपयुज्यत इति तत्स्वरूपव्युत्पादनमुपक्रान्तमेवं परप्रयुक्तानां तासामुत्तरमपि वक्तव्यमतस्तद्व्युत्पादनार्थमाह—

गोत्वाद्गोसिद्धिवत्तत्सिद्धिः॥ गौ. अ. ५ आ. १ सू. ३।

साधर्म्यवैधर्म्ययोरिदमुत्तरम् , यदि साधर्म्यमात्रं वैधर्म्यमात्रं वा साध्यसाधनं प्रतिज्ञायेत स्यादियमव्यवस्था भवेच्च भवत्प्रयुक्तानामीदृशामपि स्थापनहेतोरविशेषः, विशिष्टं तु साधर्म्यं वैधर्म्यं वा प्रयोजकमुच्यमानं नैवंविधैः प्रत्यवस्थानैरुपहन्यते, यथा सत्यपि सत्तादिसामान्यसंबन्धे सत्यपि शुक्लादिगुणसंबन्धे सत्यपि चलनादिकर्मयोगे न गौस्तथा तत्साधर्म्यात्सिध्यति अश्वादिवैधर्म्याद्वा किं त्वव्यभिचारिणो गोत्वादिसंबन्धादेव तथेहाप्यस्खलितनियमं साधर्म्यं वैधर्म्यं वा साध्यसिद्धिनिबन्धनं न साधर्म्यादिमात्रमिति ।

उत्कर्षसमादीनां षण्णां लक्षणानि—

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ॥ गौ. अ. ५ आ. १ सू. ४ ।

दृष्टान्तधर्मं साध्ये धर्मिणि योजयन्नसन्तमध्यारोपयन्नुत्कर्षेण प्रत्यवस्थानं यत्करोति स उत्कर्षसमः प्रतिषेधः, यथा अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवद् अनित्यः शब्दो घटवदेव मूर्तोऽपि भवति न चेन्मूर्तो घटवदनित्योऽपि तद्धर्मो मा भूदिति मूर्तस्य धर्मान्तरस्य प्रसञ्जनमुत्कर्षः ।

दृष्टान्तधर्मविकल्पेनैव साध्यधर्मिणि सिद्धस्यापि धर्मस्यापकर्षेण प्रत्यवस्थानमपकर्षसमः, पूर्वस्मिन्नेव प्रयोगे घटः खलु प्रयत्नानन्तरीयकत्वादश्रावणोऽस्तु न चेदश्रावणो घटवदनित्योऽपि मा भूदिति सतः श्रावणत्वस्यापसरणमपकर्षः ।

ख्यापनीयो वर्ण्यः प्रतिपिपादयिषितः साध्यधर्मः तद्विपर्ययादवर्ण्यः सिद्धो दृष्टान्तधर्मः तावेतौ वर्ण्यावर्ण्यसमौ प्रतिषेधौ भवतः, यदि शब्दो नित्यत्वेन वर्ण्यते साध्यते घटोऽपि वर्ण्यतामिति वर्ण्यसमः, घटश्चेन्न वर्ण्यते शब्दोऽपि मा वर्णीत्यवर्ण्यसमः ।

धर्मान्तरविकल्पेन प्रत्यवस्थानं विकल्पसमः प्रतिषेधः, तत्रैव प्रयोगे प्रयत्नानन्तरीयकं किं चिन्मृदु दृष्टं दुकूलराङ्कवशय्यादि किं चित्कठिनं कर्परपरश्वधादि एवं प्रयत्नानन्तरीयकं किं चिदनित्यं भविष्यति घटादि किं चिन्नित्यं शब्दादीति ।

उभयोरपि साध्यदृष्टान्तयोः साध्यत्वापादनेन प्रत्यवस्थानं साध्यसमः प्रतिषेधः, यदि यथा घटस्तथा शब्दः प्राप्तं तर्हि यथा शब्दस्तथा घट इति शब्दश्चानित्यतया साध्य इति घटोऽपि साध्य एव स्यादन्यथा हि न तेन तुल्यो भवेदिति ।

अत्र पञ्चानामुत्तरम्—

किंचित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥
गौ. अ. ५. आ. १. सू. ५ ।

किञ्चित्साधर्म्यादुपसंहारः सिध्यति यथा गौरेवमयं गवय इति न तु सर्वथा रूपभेदस्तयोः कर्तुं शक्यः, प्रमाणावगतस्वभावभेदानां भावानामितरेतररूपसंकरस्य कर्तुमशक्यत्वात्, एवं स्वप्रतिबिम्बसामर्थ्यसुस्थिते स्वसाध्यमुत्थापयति स्थापनाहेतौ साध्यदृष्टान्तयोर्धर्मविकल्पमापादयता वैधर्म्यं च किंचिदभिदधता प्रतिषेधः कर्तुं लभ्यत इति ।

अथ षष्ठस्योत्तरम्—

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ गौ. अ. ५ आ. १ सू. ६ ।

यदुच्यते घटो ऽपि शब्दवत्साध्यो भवत्विति तन्नैवम्, लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः तेनाविपरीततया शब्दोऽतिदिश्यते यथा घटः प्रयत्नानन्तरीयकः सन्ननित्यः एवं शब्दो ऽपीति, एवं साध्यातिदेशाद् दृष्टान्त उपपद्यमाने न तस्य साध्यत्वाभिधानमुपपद्यते ।

प्राप्त्यप्राप्तिसमयोर्लक्षणे—

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वादप्राप्त्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ गौ. अ. ५ आ. १ सू ७ ।

प्राप्त्यप्राप्तिविकल्पनपूर्वकमुभयत्रापि दोषापादनं प्राप्त्यप्राप्तिसमौ प्रतिषेधौ भवतः, हेतौ साधनवादिना प्रयुक्ते पर आह—सो ऽयं हेतुः प्राप्य वा साध्यं साधयेदप्राप्य वा ? प्राप्य चेद् द्वयोर्लब्धस्वरूपयोरप्राप्तिर्भवतीति किं कस्य साध्यं साधनं वेत्यविशेषः, अप्राप्य तु साधकत्वमनुपपन्नमतिप्रसङ्गात् , न ह्यप्राप्य प्रदीपः प्रकाश्यं प्रकाशयतीति ।

अनयोरुत्तरम्—

घटादिनिष्पत्तेः पीडने चाभिचारादप्रतिषेधः ॥

गौ. अ ५ आ. १ सू. ८ ।

नायं प्रतिषेध उपपद्यते उभयथाऽपि कारणस्य भावदर्शनात् दण्डचक्रसूत्रादिकारकाणि प्राप्य मृदं घटादिकार्यं निष्पादयन्ति दृश्यन्ते अभिचारकर्मणा च श्येनादिना दूरस्थस्यापि शत्रोः पीडनं सम्पाद्यत इति ।

· प्रसङ्गप्रतिदृष्टान्तसमयोर्लक्षणे—

दृष्टान्तस्य कारणानपदेशात्प्रत्यवस्थानाच्च प्रतिदृष्टान्ते प्रसङ्गप्रतिदृष्टान्तसमौ ॥ गौ. अ. ५ आ. १ सू. ९ ।

अत्र प्रसङ्गापादनेन प्रत्यवस्थानं प्रसङ्गसमः प्रतिषेधः, पूर्वोदाहृत एव हेतौ यद्यनित्यत्वे प्रयत्नानन्तरीयकत्वं साधनं प्रयत्नानन्तरीयकत्व इदानीं किं साधनं तत्साधने किमिति दृष्टान्तस्य घटादेरनित्यतायां कारणं किंचिदपदिश्यते तेन

तत्कारणान्वेषणातिप्रसङ्गात्प्रसङ्गसमो ऽयं प्रतिषेधः, प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः ।

यथा घटः प्रयत्नानन्तरीयकः सन्ननित्यो दृष्ट एवमाकाशं प्रयत्नानन्तरीयकं नित्यं दृश्यते तद्वच्छब्दो ऽपि नित्यः स्यादिति, कः पुनराकाशस्य प्रयत्नानन्तरीयकत्वं वदेत् कूपखननादिना ऽऽकाशकरणं मन्वान एवं ब्रूयादपि कश्चित् ।

"नन्वेवमपि व्यभिचारोद्भावनमेतत्सम्यगुत्तरं नासदुत्तरप्रकारो जातिप्रयोगः" नैतदेवम्, न हि हेतोरनैकान्तिकत्वमुद्भावयन्नसौ साधुरिव जातिवादी प्रत्यवतिष्ठते ऽपि तु दृष्टान्तबलेन नित्यत्वमेव साधयन्नुत्थित इति जातिप्रयोग एवायम्, हेत्वाभासा अपि स्वरूपनिग्रहपुरःसरमपरहेतुप्रतिबिम्बवर्त्मना प्रदर्श्यमाना जातितां प्रतिपद्यन्त एव ।

अत्र प्रसङ्गसमस्य तावदुत्तरमाह—

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत्तद्विनिवृत्तिः ॥ गौ.सू.५ आ.१सू.१०।

असिद्धं हि नाम साध्यते न सिद्धं प्रयत्नवैफल्यात्, सान्धकारे सद्मनि पिठरादिपदार्थदर्शनाय प्रदीपमुपाददते लौकिका न दीपदर्शनार्थं दीपान्तरपरम्परामाहरन्तीति, अन्तरेणापि हि दीपान्तराणि दृश्यत एव प्रदीपः, एवं लौकिकपरीक्षकाणां घटादौ प्रयत्नानन्तरीयकत्वस्य सिद्धत्वात्तत्र कारणापदेशो निष्प्रयोजन इति तस्मान्नायमतिप्रसङ्गापादनस्य विषयः ।

अथ प्रतिदृष्टान्तसमस्योत्तरम्—

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥

गौ. अ. ५ आ. १ सू. ११ ।

प्रतिदृष्टान्त एव साधकबुद्ध्या यदि त्वयोपन्यस्तस्तर्हि विशेषहेतुर्वक्तव्यो ऽनेन हेतुना प्रतिदृष्टान्त एव साधको न दृष्टान्त इति न चासौ विशेषे हेतुरुच्यते तस्मान्न प्रतिदृष्टान्तः सिद्धिहेतुरिति दृष्टान्त एव साधको भवति, प्रतिदृष्टान्तहेतुत्वे ऽपि स्थिते सत्यहेतुर्दृष्टान्तो न हि साधकः स्यात्, न च तदस्तीत्युक्तमतो न हेतुर्दृष्टान्तः,

अथ यथा प्रतिदृष्टान्तो न साधक एवं दृष्टान्तो ऽपि मा भूदित्यनया नीत्या प्रत्यवतिष्ठसे हन्त तर्हि प्रतिदृष्टान्तस्य तावदहेतुत्वं स्वकण्ठेन कथितमिति तस्मिन्नसाधके दृष्टान्त एव साधक इति ।

अनुत्पत्तिसमस्य लक्षणम्—

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥

गौ. अ. ५ आ. १ सू. १२ ।

अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः प्रतिषेधः, प्राक्तन एव प्रयोगे जाति·

वाद्याह अनित्य इत्युत्पत्तिधर्मक उच्यते यश्चोत्पत्तिधर्मकः तस्योत्पत्तेः पूर्वमनुत्पत्त्या भवितव्यमनुत्पन्ने च शब्दाख्ये धर्मिणि प्रयत्नानन्तरीयकत्वं धर्मः क वर्ततामलब्धपदवृत्तेश्च कथमनित्यत्वं साधयत्वसिद्धे चानित्यत्वे शब्दस्य बलान्नित्यत्वमेव भवति कारणाभावादित्यनित्यत्वसिद्धिकारणस्य प्रयत्नानन्तरीयकत्वस्याभावादित्यर्थः, तथा च शब्दोत्पादककारणाभावादनुत्पन्ने शब्दे निराश्रयो हेतुरिति ।

अस्योत्तरम्—

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥

गौ. अ. ५ आ. १ सू. १३ ।

शब्दाख्यधर्मिणः सिद्धस्य सतो नित्यत्वमनित्यत्वं वा विचार्यते तदसिद्धौ हि नित्यत्वमपि कस्य भवानभिदधीत, उत्पन्नस्य चास्य तथाभावो भवति नानुत्पन्नस्य, उत्पन्नः खल्वयं शब्द इति भवति नानुत्पन्नः, प्रागुत्पत्तेरलब्धात्मनः किमुच्यते, लब्धस्वरूपस्य पुनरनित्यत्वकारणप्रयत्नानन्तरीयकत्वसद्भावादयुक्त एवायं प्रतिषेधः ।

संशयसमस्य लक्षणम्—

नित्यानित्यत्वसाधर्म्यात्संशयसमः ॥ गौ. अ. ५ आ. १ सू. १४ ।

नित्यानित्यसाधर्म्योपन्यासेन संशयापादनप्रवणं प्रत्यवस्थानं संशयसमः प्रतिषेधः, अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्यस्मिन्नेव हेतौ अस्ति शब्दस्यानित्यत्वसाधर्म्यं प्रयत्नानन्तरीयकत्वमस्ति च नित्येन सामान्येन साधर्म्यमैन्द्रियकत्वमतः किमनित्यसाधर्म्यात्प्रयत्नानन्तरीयकत्वादनित्यः शब्द उत नित्यसाधर्म्यादैन्द्रियकत्वान्नित्य इति संशय एवं परः प्रत्यवतिष्ठते, न च साधर्म्यसमप्रयोग एवायमाशङ्कनीयः संशयापादनप्रवणत्वादस्येति ।

अस्योत्तरम्—

साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशये ऽत्यन्तसंशयो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥

गौ. अ. ५ आ. १ सू. १५ ।

स्थाणुर्वा पुरुषो वेति स्थाणुपुरुषयोश्च साधर्म्यादूर्ध्वत्वादेः संशयो भवति न तु शिरःपाण्यादिवैधर्म्यात्प्रत्युत ततो ऽसौ निवर्त्तते यदि पुनरुभयथापि साधर्म्यादिव वैधर्म्यादपि संशयः स्यात्तथा सत्यनन्तसंशयः प्राप्नोति, इह च विशेषदर्शनस्थानीयमनित्यतासाधनं शब्दे प्रयत्नानन्तरीयकत्वमस्तीति नित्यत्वं सामान्यगतं संशयकारणत्वमिति नाभ्युपगम्यते तस्मादप्रतिषेधो ऽयं नित्यसामान्यसाधर्म्यनिबन्धनसंशयापादनरूपः ।

प्रकरणसमस्य लक्षणम्—

उभयसाधर्म्यात्प्रक्रियासिद्धेः प्रकरणसमः ॥
गौ. अ. ५ आ. १ सू. १६ ।

पक्षप्रतिपक्षौ निर्णयलक्षणे व्याख्यातौ तावत्र प्रकरणं प्रकरणमनतिवर्त्तमानः प्रकरणसमः प्रतिषेधो भवति, पूर्वस्मिन्नेव प्रयोगे नित्यः शब्दो निरवयवत्वादाकाशवदित्येवञ्जायतीयकं प्रतिप्रयोगमुपन्यस्यन्स्वपक्षमुत्थापयति जातिवादी, साधर्म्यग्रहणं चोपलक्षणं वैधर्म्येणापि प्रतिप्रयोगोपन्यासे प्रकरणसम एव प्रतिषेधो भवत्युभयवैधर्म्यात्प्रक्रियासिद्धेः प्रकरणसम इति, मूलहेतावपि साधर्म्येण वैधर्म्येण वा प्रयुक्ते प्रयोगद्वयमेतद्बोद्धव्यम् ,

"ननु ते एवैते साधर्म्यवैधर्म्यसमे जाती साधर्म्यहेतौ वैधर्म्यहेतौ वा प्रयुज्यमानत्वाच्च तवोत्थिते इति ताभ्यामेव गतत्वान्नाभिनवो ऽयं जातिप्रयोगः चतस्रश्चैता जातय इत्येकत्वमपि न सङ्गतम्"

उच्यते—तत्र परपक्षप्रवणप्रतिषेधतयैव प्रत्यवस्थानमुदाहृतमिहैव साधनच्छाययेति, अत एव प्रकरणसमो ऽयं जातिरनित्यपक्षवन्नित्यपक्षो ऽपि प्रतिक्रियते ऽस्यामिति, उद्भावनभङ्गिभेदाच्च जातिनानात्वमसङ्कीर्णोदाहरणविवक्षया चतुर्विंशतिभेदत्वं वस्तुतस्तु तासामानन्त्यमित्युक्तम् ।

अत्रोत्तरम्—

प्रतिपक्षात्प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥
अ. ५ आ. १ सू. १७ ।

निर्णयोत्पत्त्या प्रकरणं पर्यवसितं भवति प्रागुक्तनिर्णयात्तदवस्थानमेव तदिह प्रकरणमुत्थापयता भवतोभयसाधर्म्यं तदुत्थापनकारणमभिहितमुभयसाधर्म्यात्प्रक्रियासिद्धेरिति ब्रुवता उभयसाधर्म्यं च मदुक्तमपि साधर्म्यमस्त्येव अन्यथोभयशब्दार्थः कः, एवं च तदभ्यनुज्ञातं भवतीति तत्प्रतिषेधो नोपपद्यते प्रतिषेधोपपत्तौ वा नोभयसाधर्म्यं प्रकरणकारणं सिध्यतीति निर्णयोत्पत्तिनिमित्तं च प्रकरणोपरमाय न किञ्चिदुक्तमुभयसाधर्म्याभिधानादिति ।

अहेतुसमस्य लक्षणम्—

त्रैकाल्यानुपपत्तेर्हेतोरहेतुसमः ॥ गौ. अ. ५ आ. १ सू. १८ ।

कालत्रयानुपपत्त्या हेतुमाक्षिप्य क्रियमाणः प्रतिषेधो ऽहेतुसमो भवति, हेतुः साधनं साधनं च साध्यात्पूर्वं साधनं तदसति साध्ये कस्य साधनम् अथ पश्चाद् असति साधने कस्येदं साध्यम् अथ युगपत्साध्यसाधने भवतः न तर्हि तयोः सव्येतरगोविषाणयोरिव साध्यसाधनभावो भवेदित्ययं हेतुरहेतोर्न विशिष्यते ।

अस्योत्तरम्—

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥

गौ. अ. ५ आ. १ सू. १९ ।

न त्रैकाल्यासिद्धिः, कस्माद् ? हेतुतः साध्यसिद्धेः उत्पत्तौ तावदयमपर्यनुयोगः पूर्वसिद्धेन हेतुना तन्त्वादिना पश्चाद्भाविनो ऽसत एव कार्यस्य पटादेः सिद्धिरित्युक्तत्वात्, 'बुद्धिसिद्धं तु तदसदि'ति ज्ञप्तावपि परिहृत एव दोषः उपलब्धिहेतोरुपलब्धिविषयस्य पूर्वापरसहभावानियमाद्यथादर्शनं व्यवस्थेति प्रमाणपरीक्षायामभिधानात् दृश्यते च निर्वर्तनहेतुना निर्वर्तनीयस्य निर्वृत्तिरुपलब्धिहेतुना चोपलभ्यस्योपलम्भ इति प्रमाणसिद्धे वस्तुनि को ऽयमाक्षेपः ।

प्रतिषेधे च तुल्यो ऽयमनुयोग इत्याह—

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥

आ. गौ. ५ आ. १ सू. २० ।

प्रतिषेधो ऽपि प्रतिषेध्यात्पूर्वं पश्चात्सह वा भवेदिति विकल्प्यमाने न प्रतिषेध्यं प्रतिषेद्धुमुत्सहत इति ।

अर्थापत्तिसमस्य लक्षणम्—

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ अ. ५ आ. १ सू. २१

अर्थादापद्यते प्रतिपक्षसिद्धिरित्येवं क्रियमाणः प्रतिषेधो ऽर्थापत्तिसमो भवति, पूर्वस्मिन्नेव प्रयोगे यदि घटसाधर्म्यात्प्रयत्नानन्तरीयकत्वादनित्यः शब्दः अर्थादापद्यते आकाशसाधर्म्यान्नित्य इति, अस्ति चास्य नित्येन साधर्म्यमाकाशादिना द्रव्येण निरवयवत्वमिति, उद्भावनप्रकारभेदाच्च जातिभेद इत्युक्तम् ।

अस्योत्तरम्—

अनुक्तस्यार्थादापत्तेः पक्षहानेरुपपत्तिः ॥ अ. ५ आ. १ सू. २२ ।

अनुपपादितसाधनमनुक्तमर्थादापद्यत इति वदतः पक्षहानिरप्युपपद्यते मामकानित्यपक्षसिद्धौ हि सत्यामर्थादापद्यते तावकस्य नित्यपक्षस्य हानिरिति ।

दोषान्तरमाह—

अनैकान्तिकत्वाच्चार्थापत्तेः ॥ अ. ५ आ. १ सू. २३ ।

उभयपक्षसमर्थेयमर्थापत्तिः विपर्ययेणापि प्रयोक्तुं शक्यत्वात्, नित्यः शब्दो निरवयवत्वादित्येवमप्युक्ते शक्यं वक्तुं यदि नित्याकाशसाधर्म्यान्निरवयवत्वान्नित्यः शब्दः अर्थादापद्यते यदनित्यघटादिसाधर्म्यात्प्रयत्नानन्तरीयकत्वादनित्य इति—न चैवमपि काचिदर्थसिद्धिः न खलु वै घनस्य ग्राव्णः पतनमित्युक्ते ऽर्थादापद्यते द्रवस्य वारिणः पतनाभाव इति ।

अविशेषसमस्य लक्षणम्—

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेरविशेषसमः ॥ अ. ५ आ. १ सू. २४ ।

अविशेषोपपादनेन प्रत्यवस्थानमविशेषसमः प्रतिषेधः, यदि शब्दघटयोरेकधर्मः प्रयत्नानन्तरीयकत्वमस्तीति तयोरनित्यत्वाविशेष उच्यते तर्हि सर्वभावानामविशेषप्रसङ्गः, कथं सद्भावोपपत्तेः सत्तासंबन्धादित्यर्थः, सो ऽयमविशेषसमः प्रतिषेधः ।

एतस्योत्तरम्—

क्वचित्तद्धर्मोपपत्तेः क्वचिदनुपपत्तेः प्रतिषेधाभावः ॥ गौ. अ. ५ आ. १ सू. २५ ।

क्वचिदविशेषापादनहेतुरुपपद्यते धर्मः क्वचित्तु नोपपद्यत इत्येवमयमप्रतिषेधः, शब्दघटयोरेको धर्मः प्रयत्नानन्तरीयकत्वमस्ति येन तयोर्धर्मान्तरमविशेषरूपमुपपद्यते न तु सर्वभावानामीदृशमविशेषकारणं धर्मजातमस्ति, यत्तु सद्भावोपपत्तेरिति तेन किं धर्मान्तरमविशेषरूपं साध्येत अनित्यत्वमेवं चेत्तदयं प्रतिज्ञार्थो व्यवतिष्ठेतानित्याः सर्वे भावाः सत्त्वादिति, न चायमनुपपत्तेः दृष्टान्तानुपपत्तेः सर्वभावानां पक्षीकृतत्वाद् दृष्टान्तो न कश्चिदवशिष्यते, न च प्रतिज्ञातैकदेश एव दृष्टान्तीकर्तुं शक्यते सिद्धसाध्यभेदात्साध्यः प्रतिज्ञातो ऽर्थो भवति सिद्धश्च दृष्टान्तः, न च दृष्टान्तरहितो हेतुः स्वसाध्योपस्थापनसामर्थ्यमश्नुते, न च सौगतोक्तनीत्या नित्येभ्यो व्यापकानुपलब्ध्या सत्त्वं व्यावर्तितमनित्येष्वेव प्रतिष्ठां लभते यैव विपक्षाद्व्यावृत्तिः स एव साध्येनानुगम इति वक्तव्यम्, तन्नीतेः प्रागेव प्रतिक्षेपात्, प्रत्युक्तं हि विस्तरतः क्षणभङ्गसाधनमिति, किंचिद्धि सत्त्वयोगि भावरूपमनित्यं भवति किंचिन्नित्यमिति नायमेकान्तः सत्त्वादनित्याः सर्वभावा इति, अपि च सर्वभावानामनित्यत्वे साध्यमाने तदन्तर्गतत्वाच्छब्दस्याप्यनित्यत्वमभ्युपगतं भवेदित्येवमप्ययमप्रतिषेधः ।

उपपत्तिसमस्य लक्षणम्—

उभयकारणोपपत्तेरुपपत्तिसमः । अ. ५ आ. १ सू. २६

उभयकारणोपपत्त्या पक्षद्वयोपपत्तिवर्णनमुपपत्तिसमः प्रतिषेधः, यद्यनित्यत्वकारणं प्रयत्नानन्तरीयकत्वमुपपद्यते शब्दस्येत्यनित्यः शब्दो नित्यत्वकारणमपि निरवयवत्वमस्योपपद्यते इति नित्यः स्याद् उभयत्रापि कारणोपपत्तेः,

"ननु सैवेयं साधर्म्यादिसमा प्रकरणसमा वा जातिर्न भेदान्तरम्" मैवम् उद्भावनप्रकारेण भेदात्परपक्षोपमर्दबुद्ध्या साधर्म्यादिसमा जातिः प्रयुज्यते पक्षान्तरोत्थापनास्थया प्रकरणसमा अप्रतिपत्तिपर्यवसायित्वाशयेनेयमुपपत्तिसमेति ।

अत्रोत्तरम्—

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः । अ. ५. आ. १ सू. २७

उभयकारणोपपत्त्या प्रतिषेधमभिदधता पक्षद्वयकारणोपपत्तिरनुज्ञाता भवति सा चेदनुज्ञाता कथमेकतरपक्षप्रतिषेधः, एकतरपक्षप्रतिषेधश्चेत्कथमुभयकारणोपपत्तिः उभयपक्षकारणोपपत्तिरेकतरपक्षप्रतिषेधश्चेति विप्रतिषिद्धम्, व्याघातादेव तत्प्रतिषेधो विकल्पयिष्यत इति चेत्समानो व्याघातस्तेन हि परपक्षवत्स्वपक्षोऽपि प्रतिहन्यत एव न हि व्याघात एकं पक्षं साधयत्येकं बाधत इति ।

उपलब्धिसमस्य लक्षणम्—

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः प्रतिषेधः ॥
गौ. सू. अ. ५ आ. १ सू २८ ।

यदेतदनित्यतायां शब्दस्य प्रयत्नानन्तरीयकत्वं कारणमपदिष्टं तस्याभावेऽपि प्रबलप्रभञ्जनजवभज्यमानजरत्पादपपातप्रभवे शब्दे दृश्यत एवानित्यत्वमन्यत्रापि विद्युदादौ विनाऽपि प्रयत्नानन्तरीयकत्वमुपलभ्यत एवानित्यतेति ।

अत्रोत्तरम्—

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥
गौ. सू. अ. ५ आ १ सू २९ ।

अत्रैतावदेव तावद्वक्तव्यं सपक्षैकदेशवृत्तित्वमिदमस्य हेतोरुद्भावितं न च सपक्षैकदेशवृत्तिरगमकः, प्रयत्नानन्तरीयकत्वमनित्यत्वप्रतिबद्धं न पुनरनित्यत्वं प्रयत्नानन्तरीयकत्वेन यत्प्रयत्नानन्तरीयकं तदनित्यमिति हि व्याप्तिर्न तु यदनित्यं तत्प्रयत्नानन्तरीयकमिति, यथा यत्राग्निस्तत्र धूमो न यत्र धूमस्तत्राग्निरिति, एवं प्रयत्नानन्तरीयकत्वमन्तरेण समीरणपात्यमानवनस्पत्यादिशब्दे विद्युदादौ वा येयमनित्यतोपलब्धिर्न सा तस्य हेतुतामपहन्तीति, अपि च प्रयत्नानन्तरीयकत्वादिति कारणाद् उत्पत्तिरियमभिधीयते न तु कारणं नियम्यते प्रयत्न एवेति तत्र पवननोदनजनिततरुशब्दवत्सत्यपि प्रयत्ने कारणान्तरं तदुत्पादकम्भविष्यति कारणान्तरजन्येऽप्यनित्यत्वं शब्दे विद्युदादौ वा न विरुद्धमिति, कथं पुनरिदमेव गम्यते प्रयत्नादिभिरसन्नुत्पाद्यते शब्दो न पुनः सन्नभिव्यज्यत इति, सतोऽनुपलब्धौ निमित्ताभावात्, आवरणं निमित्तमिति चेन्न, मूलोदकादिषु मृद इव शब्दे कस्यचिदावरणस्याग्रहणात्, तस्मान्न मूलोदकादिना तुल्यः शब्द इत्यसन्नेव प्रयत्नादिना क्रियते इति ।

अनुपलब्धिसमस्य लक्षणम्—

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः प्रतिषेधः ॥ गौ. सू. अ. ५ आ. १ सू ३० ।

यदुक्तमावरणानुपलम्भादसत्याश्चानुपलम्भादसत्यावरणे प्रागुच्चारणादसन्नेव शब्दः प्रयत्नेनाभिनिर्वर्त्यत इति तदयुक्तमावरणानुपलब्धेरप्यनुपलम्भात्तस्याश्चानुपलम्भादभावः अनुपलब्धेरभावादुपलब्धिर्भवति प्रतिषेधद्वयेन विधेरेव प्रतीतेः, आवरणोपलब्धेश्चावरणसत्ता सिध्यतीति प्रकृतमेव शब्दस्याग्रहणं नासत्त्वकृतमित्यभिव्यञ्जकत्वकृतमेवास्य प्रयत्नादि कारणमिति।

अस्योत्तरम्—

अनुपलम्भात्म(क)त्वादनुपलब्धेरहेतुः॥ गौ. सू. अ. ५ आ. १ सू ३१

आवरणानुपलब्धिर्नास्त्यनुपलब्धेरिति योऽयं हेतुरुक्त स न हेतुः अनुपलम्भस्वभावत्वादनुपलब्धेरुपलम्भप्रतिषेधार्थकत्वादित्यर्थः, अस्तित्वनास्तित्वे हि भावानामुपलम्भानुपलम्भाभ्यामवस्थाप्येते यदुपलभ्यते तदस्ति शशवद् यन्नोपलभ्यते तन्नास्ति तद्विषाणवत्, नोपलभ्यते च शब्दस्यावरणं मूलोदकादेरिव मृत्तिकेत्यनुपलम्भान्नास्तीति गम्यते, अनुपलम्भो ह्ययमावरणविषयो नानुपलब्धिविषयः स आवरणस्यैव भावं गमयति नानुपलब्धेरित्यनुपलब्धेर्भावादावरणमेव नास्तीति।

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम्॥

गौ. सू. अ. ५ आ. १ सू. ३२।

ज्ञानविकल्पाः प्रतीतिप्रकारास्तेषां भावाभावौ प्राणिसंवेद्यौ भवतः, अस्ति मे ज्ञानं नास्ति मे ज्ञानमित्येवं सर्वः प्रत्यक्षानुमानागमज्ञानानि प्रमाणफलानि स्मरणसंशयादिज्ञानानि च प्रमाणफलान्यनुभवतीति, सा चेयमावरणानुपलब्धिरुपलब्धिवदध्यात्मं संवेद्यते नोपलभे शब्दस्यावरणं मृदमिव मूलोदकादेरिति, तदेवं बाह्यपदार्थभावाभाववदान्तरज्ञानभावाभावयोरपि प्रत्यक्षत्वादपर्यनुयोगोऽयमनुपलब्धेरनुपलम्भादावरणमस्ति शब्दस्येति तस्मात्प्रागुच्चारणादसन्नेव शब्द इति सिद्धम्।

अनित्यसमस्य लक्षणम्—

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः॥

गौ. सू. अ. ५ आ. १ सू ३३।

सर्वभावानित्यत्वप्रसङ्गेन प्रत्यवस्थानमनित्यसमः प्रतिषेधः, अनित्येन घटेन साधर्म्यमस्ति शब्दस्येति तस्यानित्यत्वमुच्यते तर्हि सर्वभावानामपि घटेन किमपि साधर्म्यमस्तीति सर्व एवानित्याः स्युः, अविशेषसमैवेयं जातिरिति चेत्, तत्र हि सत्तायोगात्सर्वभावानामविशेष आपादितः इह तु घटसाधर्म्यादेवानित्यत्वमापादितम् इति उद्भावनभङ्गिभेदाच्च जातिनानात्वमित्यसकृदुक्तम्।

अत्रोत्तरम्--

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात् ॥

गौ. सू. अ. ५ आ. १ सू. ३४

अतिप्रसङ्गमापादयतो ह्येतद्विवक्षितं घटसाधर्म्याद्सिद्धिरनित्यत्वस्येति, यदि च घटसाधर्म्यादनित्यत्वस्यासिद्धिस्तर्हि तावकस्यास्य प्रतिषेधवाक्यस्याप्यसिद्धिः प्रतिषेध्यवाक्यसाधर्म्यात्, अस्ति हि प्रतिषेधवाक्यस्य प्रतिषेध्येन साधर्म्यं प्रतिज्ञाद्यवयवयोगित्वमिति, किं च—

दृष्टान्ते साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथा भावान्नाविशेषः ॥ गौ. सू. अ. ५ आ. १ सू. ३५

न हि साधर्म्यमात्रं साधनं भवति अपि तु दृष्टान्तधर्मिण्यवधृतसामर्थ्यं साधर्म्यं वैधर्म्यं वा तथाविधं चेत्सर्वभावानामस्ति भवतु तेषामनित्यत्वं को दोषः नास्ति चेत्को ऽयमतिप्रसङ्गः, न हि दृष्टान्तधर्मिणि प्रज्ञातसामर्थ्यं साधर्म्यमुभयथा भवति पक्षान्तरं स्पृशति तेन साधर्म्यविशेषस्य हेतुत्वात्तस्य च सर्वत्रासंभवान्न सर्वानित्यत्वम्, अविशेषसमायां जातौ यत्साधनमुक्तं तदिहापि वक्तव्यमिति ।

नित्यसमस्य लक्षणम्—

नित्यमनित्यभावादनित्ये नित्य(त्वो)पपत्तेर्नित्यसमः ॥

गौ. सू. अ. ५ आ. १ सू. ३६

अनित्यत्वसाध्यधर्मस्वरूपविकल्पनेन शब्दनित्यत्वापादानं नित्यसमः प्रतिषेधः, अनित्यः शब्द इति प्रतिज्ञाते सति जातिवादी विकल्पयति किमिदमनित्यत्वं शब्दस्य नित्यमथानित्यमिति, यदि तावदनित्यं तत्कदाचित्प्रच्यवते तत्प्रच्युतेर्नित्यः शब्दः, अथ नित्यमनित्यत्वं तर्हि धर्मस्य नित्यत्वात्तस्य च निराधारस्यानुपपत्तेस्तदाश्रयस्य शब्दस्यापि नित्यत्वमनित्यत्वे हि शब्दे विनष्टे न तदाधारो धर्मो वर्ततेति ।

अस्योत्तरम्—

प्रतिषेध्ये नित्यमनित्यभावादनित्यत्वोपपत्तेः प्रतिषेधाभावः ॥

गौ. सू. अ. ५ आ. १ सू. ३७

प्रतिषेध्ये नित्यमनित्वस्य भावश्चेदुच्यते तदनित्य एवासावुक्तो भवति अनित्योपपत्तेश्च तत्प्रतिषेधो नोपपद्यते नित्यमनित्यत्वं शब्दस्येति च ब्रवीषि नित्यतां च तद्योगादस्योपपादयसीति महानयमायुष्मतो भ्रमः, अथ निरधिकरणो धर्मः कथं स्यादिति तदुच्यते अनित्यत्वं हि नाम निरोधः प्रध्वंसाभाव

इत्यनर्थान्तरम्, अनित्यत्वादभाव इति तु व्यवहारमात्रम्, सा चेयमनित्यता शब्दावच्छिन्ना न शब्दाधिकरणा न खलु घटाभावो घटाश्रितो भवितुमर्हति भावस्वभावा हि धर्मा धर्म्याश्रिता भवन्ति नाभावः अभावस्त्वाश्रितो ऽपि न प्रतियोग्याश्रितो भवति किं त्वर्थान्तरवृत्तिर्भूप्रदेश इव घटाभाव इति नित्यानित्यत्वविरोधाच्च, नित्यत्वमनित्यत्वं चैकत्र धर्मिणि विरुध्यते तत्कथमभिधीयते नित्यमनित्यत्वस्य भावान्नित्यः शब्द इति ।

कार्यसमस्य लक्षणम्—

प्रयत्नकार्यानेकत्वात्कार्यसमः ॥ गौ. सू. अ. ५ आ. १ सू. ३८

प्रयत्नकार्यनानात्वोपन्यासेन प्रत्यवस्थानं कार्यसमः प्रतिषेधः, अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते पर आह प्रयत्नस्य हि कार्यद्वैविध्यमुपलब्धं किं चिदसदेव प्रयत्नेन निर्वर्तते यथा घटादि किं चित्सदेवावरणव्यपनयनादिना प्रयत्नेनाभिव्यज्यते यथा मृदन्तरितमुदकादि, एवं प्रयत्ननानात्वादिह प्रयत्नेनाविद्यमानः शब्दो निर्वर्त्येत घटवदुत विद्यमान एवाभिव्यज्येत मृदन्तरितसलिलादिवदिति संशयः, न चेयं संशयसमा जातिर्हेत्वर्थविकल्पनेनेह प्रत्यवस्थानात्, तथा हि निरवयवत्वाद्याकाशसाधर्म्योपन्यासेन संशय आपादित इह तु साधनवाद्युक्तप्रयत्नानन्तरीयकत्वहेत्वर्थनिरूपणेनेति, उद्भावनप्रकारभेदश्च जातीनां वैचित्र्यकारणमित्युक्तमेव ।

अत्रोदाहरणम्—

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणानुपपत्तेः ॥

गौ. सू. अ. ५ आ. १ सू. ३९

यद्यपि प्रयत्नकार्यान्यत्वमुपलभ्यते तथा ऽपि प्रकृते शब्दे प्रयत्नस्याभिव्यक्तावहेतुत्वं न प्रयत्नतः शब्दमभिव्यनक्ति किं त्वभूतप्रादुर्भावमेव विधत्ते कस्माद् अनुपलब्धिकारणानुपलब्धेः यत्र हि सतः पदार्थस्य प्रयत्नोऽभिव्यक्तिहेतुस्तत्र तस्य सतः सलिलादेरनुपलब्धिकारणमस्ति मृदादिव्यवधानं तदपोहमाचरता प्रयत्नेन तदभिव्यक्तिः सम्पद्यते शब्दस्य तु न किं चिदनुपलब्धिनिबन्धनं व्यवधानादि संभवतीति वर्णितमतस्तस्यासत एवात्मलाभनिमित्तमुच्चारणादिप्रयत्नो न सतो व्यक्तिनिमित्तं तस्मादनित्यः शब्द इति स्थितम्,

तदेवमनेन चतुर्विंशतिजात्युदाहरणप्रतिसमाधानोपदेशवर्त्मना शब्दानित्यत्वसाधने परकीयमुपालम्भजातमेवंप्रायमखिलमपाकृतमाम्रसेकपितृतर्पणन्यायेन भवति भगवता सूत्रकारेण, इदमपरमिदानीमुपदिश्यते चतुर्विंशतावपि जातिषु जातिवादिना प्रयुक्तासु मूलसाधनोवादी विस्पष्टानुमानोदन्वपरीक्षणपुरःसरं सत्यमेवोत्तरं यथोपदिष्टमभिदधीत न तु जातिप्रयोगानुकारिदुरुत्तरालापचा-

फलेन षट्पक्षीं प्रवर्तयेत तस्यां हि प्रस्तुतायामुभयोरपि वादिप्रतिवादिनोरसिद्धि-रसद्वादित्वात्,

कथं पुनः षट्पक्षी प्रवर्तत इति तत्पथं दर्शयितुमाह—

प्रतिषेधेऽपि समानो दोषः ॥ गौ. सू. अ. ५ आ. १ सू. ४०

स्थापनाहेतुवादिना प्रथमपक्षस्थेन स्थापनाहेतुः प्रयुक्तः अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादिति, ततोजातिवादी द्वितीयपक्षस्थः प्रयत्नकार्यानेकत्वादिति प्रयत्नानन्तरीयकत्वमभिव्यङ्ग्ये ऽपि शब्दे भवतीति हेतोरनैकान्तिकत्वमित्याह, तदधुना तृतीयपक्षस्थः स्थापनाहेतुवादी यदि यथोपदिष्टमावरणानुपलब्धिक्रममनुस्मृत्य विशेषमुपदर्शयन्ननैकान्तिकतामुद्धरति ततस्तावत्येव पर्यवस्यति कथेति चतुर्थादिपक्षावसरविरहान्नावतरत्येव षट्पक्षी, यदि तु तं क्रममपहायैव तृतीयपक्षस्थो ऽसौ वदति हेतोश्चेदनैकान्तिकत्वमुद्भावयसि अनैकान्तिकत्वाद साधकः स्यादिति नन्वयं तावकः प्रतिषेधो ऽप्यनैकान्तिकः किं चित्प्रतिषेधति किं चिन्नेति हेतोः साधकत्वं प्रतिषेधति न स्वरूपमिति अत एवेत्थं प्रतिषेधस्यानैकान्तिकता सो ऽपि हि नाभिव्यक्तिपक्षमेव साधयेत्प्रतिपक्षे ऽपि प्रयत्नसाफल्योपपत्तेरुभयत्रापि च विशेषहेतोरनपदेशात्, एवमनैकान्तिकत्वमभिहितवति साधनवादिनि प्रतिषेधवादिना ऽपि वचनावसर इत्यवतरति षट्पक्षी।

स हि चतुर्थपक्षस्थ एवं वदति—

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥

गौ. सू. अ. ५ आ. १ सू. ४१

विविधः प्रतिषेधो विप्रतिषेध इहोच्यते न व्याघातः प्रकृतसङ्गतेरभावात्, यो ऽयं प्रतिषेधे ऽपि समानानैकान्तिकदोष उच्यते स प्रतिषेधप्रतिषेधे ऽपि भवत्प्रयुक्ते समानः सो ऽपि पूर्ववदनैकान्तिक एवेति, ततः पञ्चमं पक्षमवलम्ब्य मूलसाधनवादी मतानुज्ञामुद्भावयति सा च—

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानदोषप्रसङ्गो मतानुज्ञा ॥ गौ सू. अ. ५ आ. १ सू. ४२

प्रतिषेधे ऽपि समानदोष इति समुद्भावितं दोषमनुद्धृत्य तं प्रतिषेधं सदोषमभ्युपेत्य मदुक्ते प्रतिषेधे विप्रतिषेधे समानदोषप्रसङ्गमापादयतस्ते मतानुज्ञा निग्रहस्थानं भवति, चोरो भवानित्यभियुक्तेन चौर्यमात्मनो निराकरणीयं न तु भवानपि चोर इति परः प्रतिपत्तव्य इति, एवं पञ्चमपक्षस्थे मूलसाधनवादिनि कथितवति परः षष्ठं पक्षमास्थाय पुनरभिधत्ते यदि स्वपक्षदोषानुद्धरणपुरस्सरपरपक्षदोषोपादानोपनतमतानुज्ञानिग्रहस्थानपात्रमहमादिश्ये हन्त तर्हि तवापि तदेव निग्रहस्थानमवतरति त्वमप्येवमकार्षीस्तथा हि द्वितीयपक्षस्थेन मया

प्रयत्नकार्यानेकत्वादिति यदनैकान्तिकत्वमुद्भावितं तदनुद्धृत्यैव प्रतिषेधे ऽपि समानो दोष इति मय्येव प्रतीपमापीपदस्तदेवं त्वत्त एव शिक्षित्वा ऽहमपि चतुर्थपक्षस्थस्तथैव त्वयि दोषमर्पितवानिति मम चेन्मतानुज्ञा प्रथमतरं तवासौ भवेदिति तदेतदाह—

स्वपक्षतल्लक्षणापेक्षोपपत्त्युपसंहारहेतुनिर्देशे परपक्षदोषाभ्युपगमात्समानो दोषः ॥ गौ. सू. अ. ५ आ. १ सू. ४४

स्वपक्षो मूलसाधनवाद्युक्तः प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति, तल्लक्षणस्तत्समुत्थानस्तद्विषयः प्रयत्नकार्यानेकत्वादिति प्रतिषेधः, तमपेक्षमाणस्तमनुद्धृत्यानुज्ञाय प्रवृत्तः प्रतिषेधेऽपि समानो दोष इत्युपपद्यमानः परपक्षे ऽनैकान्तिकत्वदोषोपसंहारस्तस्य च हेतुनिर्देश इत्ययमनैकान्तिकः प्रतिषेध इति, तस्मिन्सति पक्षकथितानैकान्तिकत्वदोषाभ्युपगमात्तदनुद्धरणेन तस्यैव प्रतीपदोषोद्भावनात्समानो मतानुज्ञादोष इति षष्ठः पक्षः, सेयं षट्पक्षी तस्यां प्रथमतृतीयपञ्चमाः स्थापनाहेतुवादिनः पक्षाः, द्वितीयचतुर्थषष्ठाः प्रतिषेधवादिनः, एते च साध्यसाधकतया परीक्ष्यमाणाः पौनरुक्त्यमतानुज्ञादिदोषापहतत्वादन्यतरस्यापि वादिनः साध्यसिद्धये न प्रकल्पन्ते, तथा हि चतुर्थषष्ठयोः पक्षयोरर्थाविशेषात्पुनरुक्तदोषप्रसङ्गः, चतुर्थे पक्षे परस्य समामदोषत्वमुच्यते षष्ठे ऽपि तथैव समानः, तृतीयपञ्चमयोस्तृतीये पक्षे परोक्तं समानदोषत्वमभ्युपगम्यते पञ्चमे ऽपि मतानुज्ञामुद्भावयता तदङ्गीकृतमेव भवति तृतीयचतुर्थयोश्च परोक्तदोषानुद्धरणान्मतानुज्ञेत्येवं षटपक्ष्यामुभयोरसिद्धिः । तस्मात्सदुत्तरैर्दोषचिकित्सा साधीयसी नासदुत्तरैः षट्पक्षीप्रसङ्गादिति,

नन्वसदुत्तरकथने ऽपि कथं षट्पक्ष्यामेव विश्रामः शतपक्षी सहस्रपक्षी वा कथं न प्रवर्तते को ऽत्र नियम इति चेदुच्यते—इयत्येव निवर्त्यते वचनावकाश इति नानन्तपक्षता संभवति, तथा हि—पूर्वोत्तरपक्षवादिनौ भवत एव को ऽत्र विचारः, तत्र स्थापनाहेतुवादिना तावत्प्रथमं स्वपक्षसाधने ऽभिहिते दूषणवादिना तत्र दूषणे वर्णिते तृतीये वचसि वर्तमानः साधनवादी सम्यङ्नीत्योपक्रममाणस्तद् दूषणमुद्धर्तुं शक्नुयान्नेति तस्यामेव दशायां प्राड्विवाकायते(१) निर्णयः, असदुत्तरोपन्यासे तु तृतीयवचसा तेन कृते दूषणवाद्यपि लब्धावकाश-

(१) प्राड्विवाकायते इति । अर्थिप्रत्यर्थिनौ पृच्छतीतिप्राट् तयोर्वचनं विरुद्धमविरुद्धं च सभ्यैस्सहविविनक्तिविवेचयतिवेतिविवाकः प्राट्चासौ विवाकश्च प्राड्विवाक इति तदुक्तं विवादानुगतं पृष्ट्वा ससभ्यस्तत्प्रयत्नतः । विचारयति येनासौ प्राड्विवाकस्ततस्स्मृत इति मिताक्षरा ।

स्वत एव शिक्षित्वा चतुर्थे वचसि वर्तमानस्तत्प्रतीपं योजयति ततः स्थापनाहेतुवादी प्रतीपयोजनायामफलायां दुरन्तायां समन्वयफलायामशक्यक्रियायां च निरुद्योगः किं चिदभिनवं दूषणमुत्प्रेक्ष्य पञ्चमे वचसि स्थितो मतानुज्ञामाह, ततस्तामपि परपक्षमनतिवर्तमानां पश्यन् प्रतिषेधवादी षष्ठे वचसि स्थित्वा तां तत्पक्षे योजयतीत्येवं वृत्ते दूषणान्तरासंभवात्प्रतीपयोजने च भग्नरसत्वात्तूष्णीमेवासितुमुचितमिति तावत्येव भवति वचनविरतिर्न शतसहस्रादिपक्षप्रसङ्गः प्रवर्तत इत्यतः षट्पक्षीमेव प्रदर्शितवानाचार्यः, स चान्तेवासिनं बोधयितुमेवमुपादिशदेनेन पथा प्रवर्तेत भवानन्येन मा प्रवर्तिष्टेति ।

वाच्यमुत्तरमतो निरवद्यं जातिवादिनमपि प्रति तज्ज्ञैः ।
कश्मलोत्तरगिरा न तु कार्या पक्षषट्कपरिकल्पनगोष्ठी ॥

यादृग्यक्षो बलिरपि तथेत्येवमाधाय बुद्धौ
यस्तु ब्रूयात्कलुषमफलस्तस्य शुद्धोऽपि हेतुः ।
षट्पक्षादिप्रसरणपरिम्लानकान्तिर्न बुद्धिं
शक्तः स्वार्थे जनयितुमसावग्रतः प्राश्निकानाम् ॥

इतीदं व्याख्यातं निजसरणिसांकर्यरहितं
स्वरूपं जातीनां स्फुटमिह चतुर्विंशतिविधम् ।
अमूषां तत्त्वज्ञः परविरचितानां परिहृतौ
स्वयं चोपन्यासे न हि सदसि संमुह्यति नरः ॥

इति १५ जातिपदार्थः ।

निग्रहस्थान प्रकरणम्—

जात्यनन्तरं निग्रहस्थानोद्देशात्तल्लक्षणप्रतिपादनार्थमाह ।

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ गौ. सू. अ. ५ आ १ सू. ६०

निग्रहः पराजयस्तस्य स्थानमाश्रयः कारणमित्यर्थः, किं च पराजयनिमित्तं विप्रतिपत्तिरप्रतिपत्तिश्च विपरीता कुत्सिता विगर्हणीया प्रतिपत्तिर्विप्रतिपत्तिः, साधनाभासे साधनबुद्धिः, दूषणाभासे दूषणबुद्धिः अप्रतिपत्तिस्त्वारम्भविषये ऽनारम्भः, आरम्भस्य विषयः साधने दूषणं दूषणे चोद्धारः तयोरकरणमप्रतिपत्तिः, द्विधा हि वादी पराजीयते यथा कर्तव्यतामनारभमाणो विपरीतं वा प्रतिपाद्यमानः, अत एव न कर्मकरणयोर्निग्रहमाविशन्ति न हि ताभ्यां किंचिदपराद्धं स्वविषये प्रयुज्यमानयोः सामर्थ्यानपायात्, कर्ता तु प्रमाद्यन्नप्रयोज्यं प्रयुञ्जानः प्रयोज्यमप्रयुञ्जानो वा निग्रहमर्हति, प्रायेण चातत्त्ववादिनो निगृह्या भवन्ति, तत्त्ववाद्यपि कदा चन जल्पे वितण्डायां वा सम्यक्साधनमप्यपदिश्य प्रतिवादिप्रतिपादितदूषणाभासनिराकरणसरणिमनुगुणामपश्यन्निगृह्यत एव

THE KUPPUSWAMY SASTRI RESEARCH INSTITUTE, MYLAPORE, MADRAS

अत एव भाष्यकृतोक्तं तत्त्ववादिनमतत्त्ववादिनं चाभिप्लवन्ते निग्रहस्थानानीति, असमासकरणमनेकनिग्रहस्थानभेदावरोधार्थम् ।

अत एवानन्तरमाह—

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ गौ. सू. अ. ५ आ. २ सू. ६१ ।

तदिति साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विप्रतिपत्त्यप्रतिपत्त्योश्च परामर्शः, नानाकल्पो विकल्पः प्रकारभेद इत्यर्थः, साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानप्रकारस्य बहुत्वाज्जातिबहुत्वम् ।

तद् द्वाविंशतिधा विभज्य दर्शयति—

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगो ऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि गौ. सू, अ. ५ आ. २ सू, १ ।

अत्राननुभाषणमज्ञानमप्रतिभा विक्षेपः पर्यनुयोज्योपेक्षणमित्यप्रतिपत्त्या संगृहीतानि शेषाणि विप्रतिपत्त्या, पुनरुक्तमधिकमित्यसमासकरणेन विप्रतिपत्त्यैव वा ऽभिमतमसमासक्लिष्टकल्पनया सापि हि कुत्सितैव प्रतिपत्तिर्यत्पुनरुक्तमधिकं वा प्रयुज्यत इति, असङ्कीर्णोदाहरणविवक्षया च द्वाविंशतिभेदसङ्कीर्तनमवान्तरभेदैस्तु जातिवदानन्त्यमेव तेषामिति,

अत्र कीर्तिराह द्वाविंशतिधा निग्रहस्थानानि विभज्यन्ते तेषां च प्रतिपदमिदानीं विशेषलक्षणानि वर्ण्यन्त इति न मृष्यामहे कुतः—

असाधनाङ्गवचनमदोषोद्भावनं द्वयोः ।
निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते ॥

वादिना सिषाधयिषितपक्षसिद्धये साधनमभिधेयं स चेदसाधनाङ्गं ब्रूयान्निगृह्यते, प्रतिवादिना ऽपि वाद्युक्ते साधने दूषणमुद्भावनीयं स चेददोषमेव दोषत्वेनोद्भावयेन्निगृह्यते, ते एव द्वयोर्वादिप्रतिवादिनोर्निग्रहस्थाने अतो ऽन्यथा निग्रहकरणमन्याय्यमेव, प्रतिज्ञाहान्यादिषु तत्प्रभेदेषु च प्रतिपदमयुक्ततां दर्शयिष्यति, कति चिच्चात्र शिशुप्रलापप्राया निग्रहस्थानानि निर्दिष्टानि, वादशास्त्रे लक्ष्यन्त इति परममप्रतिष्ठानम्,

अत्रोच्यते संक्षेपविवक्षया द्वे एव निग्रहस्थाने इति वयमपि किं नोक्तवन्तो विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति, एतच्च सामान्यलक्षणमखिलभेदसंग्रहक्षमं भवति न भवदुक्तम्, तथा हि उत्तराप्रतिभानेन वादिप्रतिवादिनोरन्य-

तर: पराजीयते न वा, न पराजीयते इति इति कथमुच्यते किं मूक इव जित्वा गच्छतु निगृह्यते चेत्किमनेनापराद्धं न साधनाङ्गमुक्तं न दोष उद्भावित:,

अथ प्रसज्यप्रतिषेधेनोद्भावनमादौ व्याख्याय पुनरदोषोद्भावनमावृत्त्या पर्युदासेन वर्ण्यते तर्हि ते एवैते विप्रतिपत्त्यप्रतिपत्ती उक्ते स्याताम्, दोषानुद्भावनमप्रतिपत्ति:, एवमसाधनाङ्गवचनमपि विकल्पनीयम्, प्रसज्यप्रतिषेधवृत्त्या साधनाङ्गस्यावचनमिति चेत्सेयमप्रतिपत्ति:, अत: शब्दान्तरेणाक्षपादपादेभ्य एव शिक्षित्वा तदेव निग्रहस्थानद्वयमनेन श्लोकेन निबद्धं न पुनरभिनवमल्पमपि किं चिदुत्प्रेक्षितमिति, न च यथासंख्यनियमेन द्वयोर्द्वे निग्रहस्थाने कल्पनीये अपि तु यथासम्भवमुभयोरपि यथावसरं तत्तन्निग्रहस्थानमादेष्टव्यम्, द्वाविंशतिभेदत्वं च निग्रहस्थानानामसङ्कीर्णोदाहरणविविवक्षया कथ्यते न नियमायेत्युक्तमेव, परस्परविसदृशं च लक्षणमेषामिदानीमुपदिश्यत एव तत्रैव चायुक्तत्वमेषां बालिशप्रलापकल्पत्वं वा पराक्रियते एवेत्यलमतिप्रसङ्गेन।

प्रतिज्ञाहानेर्लक्षणम्—

एवं सामान्यलक्षणं विभागं चाभिधाय विशेषलक्षणान्याह—

प्रतिदृष्टान्तधर्मानुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानि:॥

गौ. सू. अ. ५ आ. २ सू. २।

प्रतिज्ञासिद्धये वादिना साधने ऽभिहिते तत्र प्रतिवादिना च दूषणे उद्भाविते तृतीये वचसि तु वर्तमानो वादी यदि प्रतिदृष्टान्तधर्मं स्वदृष्टान्ते ऽनुजानाति तदस्य प्रतिज्ञा हीयत इति प्रतिज्ञाहानिर्निग्रहस्थानं भवति:, तद्यथा अनित्य: शब्द: ऐन्द्रियकत्वाद् घटवदित्युक्ते पर आह सामान्यमैन्द्रियकमपि नित्यं दृष्टमित्यनैकान्तिको हेतुरिति, तत्र साधनवाद्याह सामान्यमैन्द्रियकं नित्यं तर्हि तथैव घटो ऽपि नित्यो ऽस्त्विति, अयमस्यैवं वदतो भ्रम: किल नित्यानित्यपक्षवृत्तिरनैकान्तिकतामेष विजह्यादिति, तदेवमस्य ब्रुवत: प्रतिज्ञाहानिर्भवति घटस्य हि नित्यत्वे तद्दृष्टान्तबलादेव शब्दो ऽपि नित्य: स्यादिति,

तत्र कीर्तिराह प्रतिज्ञैव तावदसाधनाङ्गवचनमिति तदभिधानं निग्रहस्थानं भवितुमर्हति न तद्धानि:, न च हानिरप्यस्ति यदि नाम घटस्य दृष्टान्तीकृतस्य प्रतिदृष्टान्तधर्मं नित्यत्वमयमभ्युपैति किमियता शब्दानित्यत्वप्रतिज्ञामवजह्याति, अपि च हेत्वाभासा अपि निग्रहस्थानवर्गे गणिता एव स चायमनैकान्तिकहेत्वाभासप्रयोगादेव पराजीयते न प्रतिज्ञाहान्येति तस्या विषयान्तरं वक्तव्यम्,

अत्रोच्यते प्रतिज्ञायास्तावदसाधनाङ्गवचनता नास्तीत्यवयवलक्षणे निर्णीतमेतत्, प्रतिज्ञासिद्ध्यर्थ एव सर्ववादिनां प्रयास: अनिर्दिष्टा च साधयितुमशक्यैवेति न तद्वचनमसाधनाङ्गवचनम्, लौकिकेष्वपि चर्णादानादिविवादपदेषु प्रतिज्ञाहानिमेव मुख्यं पराजयकारणमाहु:,

यदाह नारदः—

सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरँस्तामुत्तरो भवेदिति ॥

प्रतिदृष्टान्तधर्मं च स्वदृष्टान्ते ऽभ्युपगच्छन्नुत्सृजत्येव प्रतिज्ञाम्, नित्यत्वं हि सामान्यवद् घटस्यापि सहते तद्दृष्टान्तबलेन च तद्धर्मं शब्दे सिषाधयिषतीति नूनमिवार्नी नित्यत्वमेव घटधर्मः शब्दे सिद्ध्येदिति कथं तदनित्यत्वप्रतिज्ञा ऽस्य न हीयते, यत्तूक्तं हेत्वभासप्रयोग एव निग्रहनिमित्तं न प्रतिज्ञाहानिरिति स्यादेतदेवं यदि द्वितीये वचसि व्यवस्थितेन प्रतिवादिना व्यभिचारोद्भावनया प्रत्यवस्थितो वादी तावत्येव विरमेत्, स तु तृतीये वचसि वर्तमानस्तदुद्धरणबुद्ध्या तथाविधमभिधत्ते येन प्रतिज्ञां जहाति, अतश्च व्यभिचारपरिहरणलोभाभिहितप्रतिदृष्टान्तधर्माभ्यनुज्ञावचनोपनततदर्थप्रतिज्ञाहानिनिबन्धन एवास्य निग्रहो युक्तो न हेत्वाभासप्रयोगकृत इति अयमेव मुख्यः प्रतिज्ञाहानेर्विषयः।

प्रतिज्ञान्तरस्य लक्षणम् —

प्रतिज्ञातार्थप्रतिषेधे धर्मे विकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ गौ. सू. अ. ५ आ. २ सू. ३ ।

प्रतिज्ञातार्थप्रतिषेधे परेण कृते तत्रैव धर्मिणि धर्मान्तरं साधनीयमभिदधतो वादिनः प्रतिज्ञान्तरं नाम निग्रहस्थानं भवति, अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते पूर्ववत्सामान्येन व्यभिचारोद्भावनया प्रत्यवस्थित आह, सामान्यमैन्द्रियकं यन्नित्यं तद्युक्तं तद्धि सर्वगतम् असर्वगतस्तु शब्द इति प्रतिज्ञां कुर्वन् प्रतिज्ञान्तरेण निगृहीतो भवति,

"अत्राह नेदमप्रस्तुतप्रतिज्ञान्तरकरणम् अपि तु परोद्भावितव्यभिचारनिवारणं विशेषणोपादानमेतत्, एतदुक्तं भवति असर्वगतत्वे सत्यैन्द्रियकत्वादनित्यः शब्द इति तदिदमसर्वगतत्वं प्रतिज्ञासिद्ध्यर्थमुपात्तं कथं निग्रहस्थानम्, यो हि मीमांसकं प्रत्यनित्यः शब्दः कृतकत्वादित्युक्तवांस्तेन कृतकत्वं सिद्धमित्युपलब्धे कृतकत्वे स प्रतिज्ञान्तरं कुर्वाणो निगृह्येत, यस्तु पूर्वप्रतिज्ञामवधीर्य तदनौपयिकमकस्मादेव प्रतिज्ञान्तरमारभेत तदा उन्मत्त एव भवेत्, न चोन्मत्तप्रलापानां शास्त्रे लक्षणकरणं युक्तम्, स्पष्टे निग्रहहेतौ हेत्वाभासाभिधाने सम्भवति किमिति प्रतिज्ञान्तरं निग्रहस्थानमुच्यत इति"

अत्रोच्यते प्रतिज्ञासिद्धये हेतुदृष्टान्तौ प्रयोक्तव्यौ न पुनः प्रतिज्ञान्तरं करणीयमिति स्थितिः, इह च यो हेतुरनेनोपात्तस्तस्मिन्परेणानैकान्तिकीकृते सति न तत्परिहारप्रकारमनुगुणमयमास्थितवान्, अपि त्वसर्वगतत्वप्रतिज्ञामन्यामधिरूढः ।

"ननु विशेषणमेतदनैकान्तिकत्वपरिहारार्थं न प्रतिज्ञान्तरमित्युक्तम्" ना-

सिद्धत्वात् सिद्धं हि विशेषणं भवति, नित्यत्ववादिनं च प्रति शब्दस्यासर्वगतत्ववादिनं च प्रतिशब्दस्यासर्वगतत्वमसिद्धम्, साध्यते चेत्तर्हि प्रतिज्ञान्तरमेवेदं हेत्वाद्यवयववैलक्षण्यात् प्रतिज्ञालक्षणस्य च साध्यनिर्देशस्योपपत्तेः, अनैकान्तिकत्वपरिहृतये हि हेतुविशेषणं सिद्धं च वाच्यं न तु धर्मिविशेषणं साध्यं चेति, अन्यतरासिद्धे तु हेत्वाभासे तत्समर्थनं प्रक्रमानुरूपमेवेति न प्रतिज्ञान्तरं निग्रहस्थानं भवति, इह तु अनैकान्तिकत्वपरिहाराय यतमानो मार्गमनुगुणमपश्यन् स्खलित इव निगृह्यते, न च हेतूदाहरणादिप्रयोगनिपुणमतेरपि प्रमादेवम्विधमभिधानं न सम्भवति, न च प्रतिज्ञामात्रेण सिद्धिमिच्छन्नेवं ब्रवीति अपि तु व्यभिचारं परिजिहीर्षन्निति, न चायमुन्मत्तप्रलाप एव प्रस्तुतानुगुण्यबुद्ध्या प्रयोगात्, अपि चानित्यः शब्दश्चाक्षुषत्वादित्युभयासिद्धो नाम हेत्वाभासो भवद्भिरपि शास्त्रे लक्षित एव, स उन्मत्तप्रलापो न भवति, यथोदाहृतं प्रतिज्ञान्तरमुन्मत्तप्रलाप इत्यपूर्व एष भिक्षोः स्वदर्शनरागः परदर्शनद्वेषो वा, को हि नाम शिशुरपि शब्दे चाक्षुषतां ब्रूयात्, इदं सम्भवत्येवाभिधानं केवलं हेतुविशेषणे सिद्धे च वक्तव्ये प्रमाद्धर्मिविशेषणं साध्यं वा ऽयमुक्तवानिति, निमित्तान्तरमिदमस्य निग्रहे निरूपितं द्वितीय एव तु वचसि कथाविरतौ हेत्वाभासप्रयोगादेव निग्रहमाप्नुयादिति प्रतिज्ञाहानिप्रस्ताव एवोक्तम्।

प्रतिज्ञाविरोधस्य लक्षणम्—

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः॥ गौ. सू. अ. ५ आ. २ सू. ४।

यत्र प्रतिज्ञा हेतुना विरुध्यते हेतुर्वा प्रतिज्ञया स प्रतिज्ञाविरोधो नाम निग्रहस्थानं भवति, गुणव्यतिरिक्तं द्रव्यमिति प्रतिज्ञा, रूपादिभ्यो ऽर्थान्तरस्यानुपलब्धेरिति हेतुः, सोऽयं प्रतिज्ञाहेत्वोर्विरोधो यदि गुणव्यतिरिक्तं द्रव्यं न तर्हि रूपादिभ्यो ऽर्थान्तरस्यानुपलब्धिरथ रूपादिभ्यो ऽर्थान्तरस्यानुपलब्धिर्न तर्हि गुणव्यतिरिक्तं द्रव्यं रूपादिभिश्चार्थान्तरस्यानुपलब्धिरिति व्याहतम्।

"अत्राह नेदं प्रतिज्ञाहेत्वोर्विरोधोदाहरणं भवितुमर्हति हेतोरसम्भवात्, सम्भवे हि हेतुः प्रतिज्ञां विरुणद्धि तया वा विरुध्यते, इह तूपलब्धिलक्षणप्राप्तस्यानुपलब्धिर्न समस्त्येव रूपादिभ्योऽर्थान्तरस्य पृथक्त्वेनोपलब्धियोग्यत्वानुपपत्तेः, सम्भवन्नपि चैवम्विधे विषये प्रतिज्ञाविरोधे हेतुर्न द्वयीं दोषजातिमतिवर्तते विरुद्धत्वमसिद्धत्वं वा, गुणव्यतिरिक्तद्रव्यवादिनो हि भेदेनाग्रहणगतार्थत्वान्न पृथग्वक्तव्यमिदं निग्रहस्थानम्, यदन्यदन्यैरुदाहरणमभाणि नित्यः शब्दः सर्वस्यानित्यत्वादिति तदप्यसाधु, वैधर्म्यदृष्टान्तस्यानेन प्रकारेण कुशिक्षितैरभिधानात्, तथा हि सर्वशब्दोऽत्र सावयववचन इति निरवयवत्वं हेतुर्विवक्षितो नित्यः शब्दो निरवयवत्वात्सावयवस्यानित्यत्वादिति सो ऽयमपि शिक्षितवैधर्म्यदृष्टान्तप्रदर्शनताप्रक्रमैर्विपर्ययेण वैधर्म्यदृष्टान्त एव कथितः सर्वस्यानित्यात्वादिति, तदुक्तं स हि दृष्टान्त एवोक्तो वैधर्म्येण सुशिक्षितैरिति,

तस्मान्नेदमपि प्रतिज्ञाहेतुविरोधोदाहरणमिति"

अत्रोच्यते यदुक्तं हेतोरसंभवान्नेदं निग्रहस्थानं तदचारु–पञ्चम्यन्तनिर्दिष्टस्य हेतोः प्रदर्शितत्वात्, निरवद्यहेत्वभावात्तु यदि तदसंभव उच्यते तर्हि हेत्वाभासव्याकरणमप्यकरणीयं भवेत्, पुरुषबुद्धिप्रमादनिबन्धनहेत्वाभासप्रयोगवत्तु तथाविधमप्यभिधानं संभवत्येव ।

यत्पुनरभ्यधायि "संभवन्नपि हेतुरयमसिद्धविरुद्धयोरन्यतरो भवेन्न दूषणान्तरमि"ति। तत्र ब्रूमः सत्यमेतत् किं तु हेतुस्वरूपनिरूपणावसरे सपदि तद्गतदोषादोषदर्शनाद्विरुद्धता तस्याभिधीयते, यथा भवद्भिर्नित्यः शब्दः कृतकत्वादिति विरुद्धहेतोर्वर्ण्यते क्वचित्सिद्धसाध्यत्वदृष्टान्तहीनतादिदोषान्तरसंभवेऽपि तदवधीरणया विरुद्धत्वमेव दर्शितम्, यथा वा हेत्वाभासलक्षणे कथितमस्माभिः अनित्यः शब्दश्चाक्षुषत्वादित्यस्यानैकान्तिकत्वदोषे सत्यपि प्रथमतरमसिद्धतैव हृदयपथमवतरति तेनासिद्धोऽयमुच्यते न सव्यभिचार इति, एवमिहापि हेतुगुणदोषविचारे क्रियमाणे विरुद्धादिहेत्वाभासतैव नास्य कथ्यते, यदा तु परार्थानुमानवाक्यस्य पञ्चावयवस्य परमतेन वा त्र्यवयवस्य परस्परान्वितपदार्थसमुदायात्मा वाक्यार्थश्चिन्त्यते तत्रेतरेतरव्याहतार्थवादिनोः प्रतिज्ञाहेतुपदयोरसंसर्गोत्तद्विरोध एव झटिति मनसि विपरिवर्तते इति स एव निग्रहनिमित्तं भवितुमर्हति, यत इतरेतरविरोधिनमनन्वितमर्थमभिवदति वाक्येऽप्रतिपत्तिर्विप्रतिपत्तिर्वा भवेदित्यद एव निग्रहस्थानम्, अपि च साध्यविपर्ययसाधक एव विरुद्धहेतुरुच्यते यः प्रतिज्ञामेव बाधते इह तु प्रतिज्ञया हेतुर्बाध्यते प्रतिज्ञा वा हेतुनेति विकल्प्यमानत्वान्निग्रहस्थानान्तरमेवेदम्, इत्थमस्यैवोदाहरणस्योपपत्तेरुदाहरणान्तरनिरूपणं वृथाटाट्यैव, भाट्टैस्तु भवदीयं निरालम्बनसाधनं प्रतिज्ञाविरोधोदाहरणं वर्णितम्, निरालम्बनाः सर्वे प्रत्ययाः प्रत्ययत्वादिति यतः प्रत्ययत्वहेतुग्राहकज्ञानस्य सालम्बनत्वे तेनैव प्रतिज्ञा विरुध्यते तन्निरालम्बनत्वे तु हेत्वभाव एव स्यादिति, तदुक्तम्—

> विरुद्धश्चाक्षपादोक्तो विरोधो हेतुसाध्ययोः ।
> यमदृष्ट्वा परैरुक्तमदूषणमिदं किल ॥ इति ।

तत्सर्वथा सुलभोदाहरणमिदं प्रतिज्ञाहेतुविरोधाख्यं निग्रहस्थानमिदं स्थितम्।

प्रतिज्ञासंन्यासस्य लक्षणम्—

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ॥

गौ. अ. ५ आ. २ सू. २५ ।

पक्षसाधने परेण दूषिते तदुद्धरणाशक्त्या प्रतिज्ञामेव निन्हुवानस्य प्रतिज्ञासन्न्यासो नाम निग्रहस्थानं भवति, अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते तत्रैव सामान्येनानैकान्तिकतायामुद्भावितायां प्रतिब्रवीति क एवमाह नित्यः शब्द इति,

सो ऽयमेवं ब्रुवन् प्रतिज्ञासन्न्यासात्पराजीयते ।

"अत्राह अतिस्थूलः खल्वयं प्रमादः को हि नाम प्रतिवादिप्राश्निकसन्निधाने प्रतिज्ञां कृत्वा तदैव तेषामेवाभ्रष्टसंस्काराणां पुरतोऽपस्मारकाद्यनुपप्लुतमतिस्तामेव निन्हुवीत, अपि च द्यूतपराजितपणरहित एव कितववदासीनः प्रतिज्ञामजहदपि हेतावनैकान्तिके किमसौ न निगृह्यते, न हि प्रतिज्ञायास्त्यागात्यागौ तदीयौ निग्रहानिग्रहयोः प्रयोजकावपि तु हेतुगुणदोषावेव, स चायं साधनव्यभिचारादेवासिद्धपक्षः पराजीयत इत्यलं सन्न्यासेनेति"

अत्रोच्यते परोद्भावितहेत्वनैकान्तिकत्वदूषणोद्धरणरणरणकतरलितमतेर्भवेदप्ययं प्रमादः, एवं ह्यसौ वदति न मयोक्तं संयोगवियोगव्यङ्ग्यः शब्दो न भवति न त्वनित्य इति, अयमाशयोऽस्यैवं वदतः किल संयोगविभागानभिव्यङ्ग्यत्वे मया पक्षीकृते सामान्येन व्यभिचारो न भविष्यतीति तदपि हि तादृशमेव स्वाश्रयव्यङ्ग्यत्वादिति मुह्यतो नातिस्थूलममुमीदृशं प्रमादं प्रतिपन्नस्य भवत्येव निग्रहः, अप्रमादिनोस्तु निग्रहो नाम नास्त्येव कश्चिदिह लोके परलोके वा, यत्तु तदीययोः प्रतिज्ञात्यागात्यागयोरप्रयोजकत्वादनैकान्तिकत्वेनैवासौ निगृह्यते स्यादिति, तदैवं यदि व्यभिचारोद्भावनया समनन्तरमसौ तूष्णीमेवासीत तथाविधं तु प्रलापस्तस्यैव पराजयहेतोः सन्निकृष्टत्वात्तैरेव निगृहीतो भवति नानैकान्तिकप्रयोगेणेति ।

हेत्वन्तरस्य लक्षणम्—

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥

अ. ५ आ. २ सू. ६ ।

अविशेषाभिहिते हेतौ प्रतिषिद्धे तद्विशेषणमभिदधतो हेत्वन्तरं नाम निग्रहस्थानं भवति, यथा सांख्यस्येत्थं वदतः एकप्रकृतीदं व्यक्तं परिमाणाद् घटादिवद्विविधं च परिमाणं विकारेषु दृष्टमियत्तालक्षणमङ्कुरादेः फलान्तरस्य चतुरस्रता च पटादेः मृत्पूर्वकस्य, तदेतत्परिमितं निराकारजातमेकप्रकृतिकं दृष्टमितस्यतः सर्वमिदमेकप्रकृति भवितुमर्हति, या च सैका प्रकृतिस्तत्प्रधानमिति, अस्य हेतोर्व्यभिचारो नानाप्रकृतीनामपि परिमाणदर्शनादिति, तत्परिजिहीर्षया विशेषणमाह समन्वयादिति, सुखदुःखमोहसमन्वितं हि सर्वं व्यक्तं परमितं दृश्यत इति, तस्य प्रकृत्यन्तररूपसमन्वयाभावादेकप्रकृतित्वमिति, तदिदं हेत्वन्तरं निग्रहस्थानं प्रागुक्तस्य विशेषस्य हेतोः स्वयमेवाहेतुत्वमर्षणादिति ।

"अत्राह किमयं दग्धो दह्यते मृतो वा मार्यते अनैकान्तिकहेतूपन्यासेनैव खल्वयं तपस्वी निगृहीतो ऽसाधनाङ्गवचनादिति किं हेत्वन्तराख्यनिग्रहस्थानान्तरोदीरणेनेति"

अत्रोच्यते युक्तमेव तद् द्वितीये वचसि कथासमाप्तौ यथा तु भवानाह,

यदा तु व्यभिचारनिराकरणाय विशेषणमपरमधिकमधुना ऽभिधातुं प्रवृत्तस्तदा तदुपादानादेव निगृह्यत इति पिष्टपेषणं संप्रत्येवायमिष्यते, पुरुषशक्तिपरीक्षात्मके च जल्पे निग्रहस्थानमिदं वादे तु विशुद्धाशयतया वस्तुनि परीक्ष्यमाणे विशेषणान्तरोपादाने ऽपि तद्विचारः प्रस्तोतव्यो न निग्रहः कार्य इत्यभियुक्ताः ।

अर्थान्तरस्य लक्षणम्—

प्रकृतादर्थादप्रतिसंबद्धमर्थान्तरम् ॥ अ. ५ आ. २ सू. ७ ।

प्रकृतादर्थादर्थान्तरं तदनौपयिकमभिदधतोऽर्थान्तरं नाम निग्रहस्थानं भवति, यथा कश्चिद्वैयाकरणवित् स्फोटात्मानं शब्दं चेतसि निधाय तन्नित्यत्वसिद्धये नित्यः शब्दो निरवयवत्वादित्यभिधित्सुरेव दुरितकर्मादिभिरनैकान्तिकतामाशङ्कमानो ऽर्थान्तरं नाम निग्रहस्थानं जिगमिषुस्तत्रैव वाक्यशेषच्छाययोत्तिष्ठति नित्यः शब्दो निरवयवत्वादिति वयं पाणिनीयाः प्रपन्ना इति ये भगवतः पाणिनेः छात्राः, कः पुनर्भगवान्पाणिनिरिति ?

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तमाचार्यो नः स पाणिनिः ॥

कः पुनर्महेश्वरो यतोऽक्षरसमाम्नायमधिजगाम पाणिनिरिति ?

अस्त्युद्भटजटाजूटकोटिप्रथितचन्द्रमाः ।
विश्वस्थितिलयोत्पादहेतुरेको महेश्वरः ॥

अपि च—

अचिन्त्यवेशाभरणस्य तत्त्वतो यदृच्छया यस्य निशासु ताण्डवम् ।
स भस्मभक्तीनि बिभर्ति मौलिना कृताञ्जलिः पादरजांसि वासवः ॥

कीदृशं पुनस्ताण्डवं तनोति खण्डपरशुरिति ?

इत्थंचारी क्रमो यस्मिन्नित्थं च करवर्तनाः ।
इत्थं यत्र घटोच्छेदा दात्रपादास्तथेदृशाः ॥

इत्येकैकमुपदेशयन्नुत्थाय नृत्यति, तदेतदर्थान्तरं निग्रहस्थानमसाधनाङ्गवचनमिति, कीर्तिनाऽप्यनुमोदितम् , द्वयोरपि च वादिप्रतिवादिनोः प्रकृताननुगुणमभिदधतोर्भवत्यदो निग्रहस्थानम् , यथाक्रममेकस्य साधनमनवद्यमपश्यतो द्वितीयस्य दूषणमिति ।

निरर्थकस्य लक्षणम्—

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ अ. ५ आ. २ सू. ८ ।

अभिधेयरहितवर्णानुपूर्वीप्रयोगमात्रं निरर्थकं नाम निग्रहस्थानं भवति, अनित्यः शब्दः कचटपानां गजडदबत्वाद् घझढधभवदित्येवंप्रकारम्, इदमपि वादिप्रतिवादिनोः प्रकृताननुगुणमभिदधतोर्भवत्यदो निग्रहस्थानम् , यथाक्रमं साधनं दूषणं च यथोचितमभिधातुमजानतोः पूर्ववदुभयोरपि निग्रहस्थानम् ।

"अत्राह सो ऽयमुन्मत्तप्रलाप एव शास्त्रे लक्षयितुमुपक्रान्तो न ह्यनुन्मत्त-

नामीदृश्यत्तराणि मुखान्निर्गच्छन्त ईदृशां च निर्देशे कपोलवादित्रकच्यामिवाडनादीन्यपि कामं शास्त्रे निर्दिश्यन्ताम्, अपि च वर्णक्रमनिर्देशवदिति मतुपा निर्देश एष सूत्रे वदिति वतिप्रयोगो वा, मतुप्पक्षे सर्वं वर्णक्रमनिर्देशयुक्तं निग्रहस्थानं भवेदिति हस्तसंज्ञादिभिरिदानीमुद्ग्राहणिकाः प्रस्तूयेरन्, अथानर्थकक्रमनिर्देशयुक्तमिति व्याख्यायते तथाऽपि नियमानुपपत्तिः, न ह्यर्थरहितवर्णोच्चारणमेव प्रकृतानुपयोगान्निरर्थकमेव वर्णक्रमनिर्देशस्यापि च क्वचित्प्रकरणे सार्थकता दृश्यत एव प्रत्याहारवत्, वतिपक्षे तु भवति दिक्प्रदर्शनमेतत्किं त्वर्थान्तरेणैव गतार्थत्वात्पृथङ् न वक्तव्यम्"

अत्रोच्यते मतुपा वतिना वाभिधेयशून्यत्वमात्रमत्र विवक्षितम् अभिधेयशून्यं वचो निरर्थकमित्युक्तमिति भवति, एष एव चार्थान्तरादस्य विशेषः तत्राभिधेयस्य भावे ऽपि प्रकृतानुपयोग इह त्वभिधेयमेव नास्तीति यत्र क्वचित्प्रकरणवशेन वर्णक्रमनिर्देशस्यापि सार्थकता तदिहोदाहरणम्, उदाहरणं यदि स्फुटं पृच्छसि न कुप्यसि चेत्तद्भवदीयं सर्वमेव वचनमिहोदाहरणं सौगतदर्शने शब्दानामर्थासंस्पर्शित्वात्, स्वलक्षणे तेषामप्रवृत्तेः अपोहस्य चातितुच्छत्वात् सर्वं तदभिधानं निरर्थकम्, अत एव चोन्मत्तप्रलापतः शाक्यभिक्षवो ऽपि परिशुद्धबोधिनः परलोकयाथार्थ्यदर्शिनः शौचाचारव्यवहारेष्वबाह्या महान्तो विद्वांसः काममर्थशून्यमपि कथयन्तो नोन्मत्ता भवितुमर्हन्ति, एवमन्यस्यापि प्रज्ञाप्रमादात्कचटतपादि व्याहरतो नोन्मत्तता भविष्यति, यच्चोक्तमीदृशां गणने का परिनिष्ठेति तत्परिहृतमसकृदसङ्कीर्णोदाहरणविवक्षया द्वाविंशतिभेदत्वमाश्रितमिति, कपोलवदनादीनि पुनरकथास्वभावत्वादचिन्त्यान्येव, यस्य चास्मिन्कथाप्रसङ्गे गण्डवादित्रादि चेतसि परिस्फुरति तस्यान्यदतिजघन्यमपि हृदयमवतरेदित्यलमसंबद्धगोष्ठ्येति ॥

अविज्ञातार्थस्य लक्षणम्—

पर्षत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥

अ. ५ आ. २ सू, ९ ।

यत्साधनवाक्यं दूषणवाक्यं वा त्रिरभिहितं पर्षदा प्रतिवादिना च न विज्ञायते श्लिष्टशब्दप्रयोगमिति तीव्रमुच्चारितमित्येवंप्रकारमविज्ञातार्थं नाम निग्रहस्थानं भवति असामर्थ्यसंवरणाय च धूर्तैरिदमाश्रीयते ।

"अत्राह अर्थासंप्रत्ययस्य समानत्वात्को ऽस्य निरर्थकाद्भेदः, अथ प्रकृतोपयोगयोग्यमर्थमसौ वदति तदा पर्षत्प्रतिवादिनोरमेधाविता कामं भवेन्न तु विदुषो वक्तुं विवदतः पराजयो भवितुमर्हति, किंकृतश्चैष त्रिरुच्चारणनियमः किं राजाज्ञया उत वाक्येनेति न विद्मः"

अत्रोच्यते निरर्थके सर्वेण सर्वमर्थशून्यत्वा इह तु भवन्नर्थो नावगम्यते द्रुतोच्चारणादिव्यतिकरवशादिति कथमविशेषः, तत्र च कल्प्यते नूनमसामर्थ्य-

मात्मीयं संवरीतुमना एवमभिधत्ते न हि समर्थो विद्वान्विस्पष्टं न वक्तीति, त्रित्वनियमो ऽपि न वेदवचननरपतिशासननिबन्धनः किं तु वस्तुस्थित्युपनत एव, यतः सकृद् द्विरप्यभिहितमप्यनवधानादिना न गृहीतमिति संभाव्यते त्रिस्तु यदुक्तं न ज्ञायते तत्र वक्तुरेव जाड्यम् अनेकप्राश्निकादिसमाजे कथितमवश्यं केनाप्यवगम्यते सर्वैरनवगमात्तु वक्तैव निगृह्यते, चतुर्धा पञ्चकृत्वो वा ऽभिधाने त्विष्यमाणे निरवधिताऽभिधानस्य प्रसज्यत इति युक्तस्त्रिर्वचननियम इति।

अपार्थकस्य लक्षणम्—

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम् ॥ अ. ५ आ २ सू. १०

पूर्वापरासंगतपदकदम्बकोच्चारणादप्रतिष्ठितवाक्यार्थमपार्थकं नाम निग्रहस्थानं भवति, तद्यथा दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधोरुकमेतत्कुमार्याः स्फैय्यकृतस्य पिता प्रतिशीन इति ।

"अत्राह असंबद्धवाक्यमसंबद्धं प्रकरणं च निग्रहस्थानान्तरं कस्मान्नोक्तम् , एतेनैव गतार्थत्वादिति चेद्, यद्येवमनर्थकेनैव गतार्थत्वादपार्थकमपि पृथङ् न वक्तव्यम्"

"अत्रोच्यते निरर्थकेन पदार्थेन वाक्यार्थः केवलं वर्णा एव शुष्का उच्चार्यन्ते अर्थान्तरे ऽपि समन्वितपदार्थे व्यवस्थापितवाक्यार्थमप्रकृतं तूच्यते, इह तु पदार्थसंप्रत्यये ऽपि तदन्वयासंभवेन वाक्यार्थानवसाय इति स्पष्टो भेदः, प्रकृतविवादास्पदीभूते वस्तुनि को वा विशेष इति चेत् , उक्तमत्र संक्षेपविवक्षायां द्वे एव निग्रहस्थाने असंकीर्णोदाहरणविवक्षया तु द्वाविंशतिभेदत्वं प्रकृतवस्तुसिद्धिस्तु द्वाविंशतावपि तुल्यैव ।

यत्तु असंबद्धं वाक्यमसंबद्धं प्रकरणं च पृथगुपसंख्येयमिति तन्न, असंबद्धपदार्थेनैव तत्संग्रहात् , यदि त्वसंबद्धवाक्यमसंबद्धप्रकरणं चावश्यं वक्तव्यं तदुक्तमेव भवदीयं शास्त्रम् , तथा हि वैभाषिकाणामस्ति बाह्यार्थः स च प्रत्यक्षः, सौत्रान्तिकानां च सन्नप्यनुमेयः, योगाचाराणां साकारं ज्ञानमेव न बाह्यार्थः स च प्रत्यक्षः, माध्यमिकानामाकारशून्यं स्वच्छं ज्ञानम् , एवमितरेतरानन्वितवाक्यप्रकरणमिदमशेषमेव शाक्यशास्त्रम् आह च, दशदाडिमवाक्यस्य बौद्धशास्त्रस्य चाप्यबद्धस्य प्रतिष्ठा केन लभ्यते ।

अप्राप्तकालस्य लक्षणम्—

अवयवविपर्यासवचनमप्राप्तकालम् ॥ अ. ५ आ. २ सू. ११ ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनवचनं क्रममुल्लङ्घ्यावयवविपर्यासेन प्रयुज्यमानमप्राप्तकालं नाम निग्रहस्थानं भवति ।

"अत्राह न हि पदार्थानां वाक्येषु नियतः क्रमः कश्चिदस्ति, नियतक्रमका हि वर्णाः पदतामापद्यन्त इति युक्तं तदन्तरेण तदर्थानवगमात् , न हि दघ इत्यु-

क्ते घटार्थावगतिर्भवति वाक्येषु तु देवदत्त गामभ्याज दण्डेन दण्डेन शुक्लां गामभ्याज देवदत्तेति क्रमान्तरेणापि तथैवार्थप्रतिपत्तेः किं क्रमेण, अनुमानवाक्ये तु पञ्चावयवा इत्येतदेव तावत्प्रथममसांप्रतं प्रतिज्ञाद्यवयवानामसाधनाङ्गवचनत्वात् , तत्र तेषां पञ्चावयवानामपि प्रयोगः प्रयोगे ऽपि च क्रमो विवक्षितःतदुल्लङ्घनं निग्रहस्थानमिति महती मूर्खप्रक्रियेति"

अत्रोच्यते वाक्यान्तरेषु क्रमापेक्षा भवतु मा वा भूद् नानेन नः प्रयोजनम् , अनुमानवाक्ये त्वार्थः क्रमो बलादापतति स्वप्रतिपत्त्यनुसारेण परप्रतिपत्तेरुत्पादनात् स्वप्रतिपत्तौ च धर्मिदर्शनतद्गतहेतुधर्मावधारणप्रतिबन्धस्मरणपरामर्शज्ञानसाध्यनिश्चयानां क्रमेण दर्शनात्परं प्रमाणतयैव तदभिधानं कर्तव्यमिति सविस्तरमवयवलक्षणे निर्णीतमेतत् , असाधनाङ्गवचनत्वमपि प्रतिज्ञावयवानां तत्रैव निरस्तम् , अतः क्रमस्येह युक्तियुक्तत्वात्तदतिक्रमो भवत्येव निग्रहस्थानम् ।

न्यूनस्य लक्षणम्—

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ अ. ५ आ. २ सू. १२ ।

पञ्चावयवे वाक्ये प्रयोक्तव्ये स्थिते तदन्यतमेनाप्यवयवेन हीनं प्रयुञ्जानस्य न्यूनं नाम निग्रहस्थानं भवति ।

"अत्राह प्रतिज्ञाद्यवयवजातमसाधनाङ्गवचनमित्यतस्तदनभिदधतो न निग्रहः प्रत्युत तद्वतो निग्रहो युक्त इति"

अत्रोच्यते अनन्तरमेवैतत्परिहृतं विस्तरतश्चावयवलक्षणे, तथा हि श्रोतुराकाङ्क्षानिवृत्तये ऽनुमानवाक्यं प्रयुज्यते, प्रथमं तदाकाङ्क्षाविषयः साध्यधर्मविशिष्टो धर्मी प्रदर्श्यते, ततः कारणाकाङ्क्षया हेतुवचनमभिधीयते, क्वास्य प्रतिबन्धो दृष्ट इति बुभुत्सायामुदाहरणमुपपाद्यते, इत्थमेष सिद्धप्रतिबन्धो हेतुर्धर्मिणि भवेन्नवेति शङ्कायामुपनयवचनमुच्चार्यते, तदनन्तरं सर्वावयवानामेकत्रोपसंहाराय निगमनं प्रयुज्यत इत्यन्यतमस्याप्रयोगान्निग्रहार्हता भवत्येवेत्यलमत्रैव वस्तुनि पदे पदे कलहप्रस्तावेनेति ।

अधिकस्य लक्षणम्—

हेतूदाहरणाधिकमधिकम् ॥ अ. ५ आ. २ सू. १३ ।

एकेनैव हेतुना दृष्टान्तेन वा प्रतिपादिते ऽर्थे हेत्वन्तरं दृष्टान्तान्तरं वा प्रयुञ्जानस्याधिकं नाम निग्रहस्थानं भवति, एतच्च वादे तावद्वीतरागकथात्मके वस्तुनि निर्णयफले नेष्यत एव, जल्पे ऽपि नियमाद्युपगमनेन वदतो वादिन इदं निग्रहस्थानम् , यो हि न मया साधनमधिकाभिधेयमुदाहरणं वेति नियमस्योद्ग्राहयति स एव तथा निगृह्यते नान्य इति, एतच्च कीर्तिना ऽप्येवं कथितं प्रपञ्चकथायां तु न दोष इति ।

"अपर आह नियमाभ्युपगमे नायं दोषः प्रतिपत्तिद्रढिम्ने तदभिधानादिति"

तदयुक्तमभ्युपगतनियमत्यागादसौ निग्रहार्हो भवेत्, कश्चायं प्रतिपत्तिद्रढिमा ? प्रथमप्रयुक्तस्य हि हेतोरदृढप्रतिपत्तिकारिणो हेतुत्वमेव न स्यादुत्पन्नस्य प्रत्ययस्य पुनरुत्पादनं युक्तम्, तत्र पूर्वहेतुरद्रढिम्ने नाप्युत्तरो द्रढिम्ने तस्मान्नियमाभ्युपगमे ऽधिकाभिधानं दोष एव, अपरं मतमकृतनियमस्यापि दोष एव प्रपञ्चकथायामप्येकेन हेतुना दृष्टान्तेन वा कृते निर्णये द्वितीयस्य वैयर्थ्यम्, निर्णीतस्य निर्णयानुपपत्तेरनिर्णयकारिणश्च प्रथमस्य हेतोः प्रयोगानर्हत्वादिति ।

पुनर्वचनस्य लक्षणम्—

शब्दार्थयोः पुनर्वचनं पुनर्वचनमन्यत्रानुवादात् ॥

अ. ५ आ. २ सू. १४

अर्थादापन्नस्य स्वशब्देन पुनर्वचनं शब्दार्थस्य वाऽभिहितस्य पुनरभिधानं पुनरुक्तं नाम निग्रहस्थानं भवति, अनुवादं वर्जयित्वा शब्दपुनरुक्तं तावद्यत्र पूर्वोच्चारित एव शब्दः पुनरुच्चार्यते यथा नित्यः शब्दो नित्यः शब्द इति, अर्थपुनरुक्तं तु यत्र सो ऽर्थः पूर्वमन्येन शब्देनोक्तः पर्यायान्तरेण पुनरुच्यते यथा नित्यः शब्दो निरोधधर्मको ध्वान इति, यद्यपि च शब्दपुनरुक्ते ऽप्यर्थपौनरुक्त्यमस्त्येव, तथा ऽपि शब्दपूर्वकत्वादर्थप्रत्यभिज्ञायाः प्रथमतरं शब्दप्रत्यभिज्ञानात्तत्पौनरुक्त्यमेव तदुच्यते, जात्यपेक्षश्च शब्दपौनरुक्त्यव्यवहारो न व्यक्त्यपेक्षः क्षणभङ्गित्वाद्वर्णानां पुनः प्रयोगासंभवात्, अनुवादे तु पौनरुक्त्यमदोषो यथा हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति, अर्थादापन्नस्यापि स्वशब्देन पुनर्वचनं भवत्येव पुनरुक्तं यथा असत्सु मेघेषु वृष्टिर्न भवतीत्युक्ते अर्थादापद्यते सत्सु भवतीति किमर्थं स्वकण्ठेन पुनरुच्यते, अर्थप्रतीत्यर्थो हि शब्दप्रयोगः प्रतीते ऽर्थे किं तेनेति, एतच्च नियमाभ्युपगमे निग्रहस्थानं वेदितव्यमकृतनियमस्य तु नातीव महानयमपराधः ।

"अत्राह नार्थपुनरुक्तादन्यच्छब्दपौनरुक्त्यमुपपद्यते शब्दसाम्येऽप्यर्थभेददर्शनात्, स्मरत गिरिशं गिरिशो गौरी यस्यासमस्मरद्वेषस्य इव यदीयस्य भुवा न गरीयस्या समस्मरद्वेषस्येति तस्मादर्थत एव पौनरुक्त्यं न शब्दतः, अपि च विस्तरकथासु कदा चनाश्रवणशङ्कया पुनरभिधानं नाम कियान्प्रमादः, अर्थादापन्नस्य च स्वशब्देन पुनर्वचनं यदि निग्रहस्थानमुच्यते तर्हि प्रतिज्ञावचनमेव प्रथमं निग्रहस्थानम्, अधिकपुनरुक्तयोर्वा विशेष इति वक्तव्यम्, यादृशं तादृशं च विशेषलेशमाश्रित्य पृथगभिधाने निग्रहस्थानभेदपरिगणनमशक्यक्रियं स्यात्, अनुवादश्च य उच्यते हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति तत्तु प्रतिज्ञैव तावदसाध्वी तस्याः पुनर्वचनं साधु भविष्यतीति केयं कथा"

अत्रोच्यते यदुक्तमर्थपुनरुक्तादन्यन्न शब्दपुनरुक्तमिति तदेवमेव, पृथङ्निर्देशस्त्वनया विवक्षया—यो हि शक्त्यतिशयविख्यापयिषया सकृत्प्रयोक्तव्यमिति

प्रतिज्ञाय जल्पं प्रवर्तयति स शब्दपुनरुक्तेनापि निगृह्यत इति, नियम्यवादिनश्च निग्रहात्ततो ऽन्यस्य सम्यगश्रवणाशङ्कया पुनर्वदतो ऽपि न दोषः, अर्थाक्षिप्तकथनमपि कृतनियमस्यैव दोषो नान्यस्येत्यत एव न वादे निग्रहस्थानमिदम् अपि तु जल्पवितण्डयोरेव विजिगीषुकथयोस्तयोश्च सप्रयोजनत्वं कथान्तरत्वं च पुरा समर्थितमेव।

यत्तु प्रतिज्ञोच्चारणमर्थाक्षिप्तत्वात्तदनुवादश्च निगमनवचनमफलतरमिति, तदवयवलक्षणे विस्तरेण समाहितम्, अधिकपुनरुक्तयोस्त्वयं विस्पष्ट एव विशेषः अन्यं हेतुमन्यं वा दृष्टान्तं तत्रैव साध्ये ऽभिदधदधिकवादी भवति तमेव हेतुं दृष्टान्तं वा पुनर्वदन् पुनरुक्तवादीति, यस्त्वेवंविधविशेषाश्रयणे परिगणनमघटमानमिति तदवान्तरविशेषविवक्षयैव असङ्कीर्णोदाहरणदर्शनाय द्वाविंशतिनिर्देश इत्युक्तम्।

अननुभाषणस्य लक्षणम्—

विज्ञातस्य पर्षदा त्रिरभिहितस्याप्रत्युच्चारणमननुभाषणम् ॥

अ. ५ आ. २ सू. १७

पर्षदा विदितस्य वादिना त्रिरुच्चारितस्यापि यदप्रत्युच्चारणं तदननुभाषणं नाम निग्रहस्थानं भवति, अप्रत्युच्चारयन्किमाश्रयं दूषणमभिधीयते।

"ननु यदननुभाष्यापि तत्रोत्तरं ब्रूयात्किमिति निगृह्यते न च यो ऽनुभाषितुमसमर्थः स उत्तरमपि दातुमक्षमो भवति विचित्रत्वात्पुरुषशक्तीनाम्" नैतदेवम् अननुभाषणे तदुत्तरविषयापरिज्ञानात्कोत्तरं प्रयुज्येत प्रयुक्तं वा कथमवधार्यते, न चैवं ब्रूमो यावत्किं चिद्वादिना सविकारमभिधीयते तदखिलमखिन्नानतिरिक्तमनुज्झितक्रमकमेकं प्रति वाप्रमी तथैवानुभाषेतेति यस्तु समस्तानुभाषणं तथा कुर्यादपि नाम तेन स्वकौशलमेव केवलमुपदर्शितं भवति मेधावित्वं न त्वेवमकुर्वन्नसौ प्रत्यवेयादिति, स्तोकस्तोकमनुभाषमाणः तथैव च क्रमेण दूषयन्न निग्रहमाप्नुयादिति।

"अत्राह यदि वादी स्वपक्षसाधनविवरणवर्त्मना बहुतरमपरमप्रकृतमर्थमुपक्षिपेत्तत्किं प्रतिवादिना सर्वमनुभाषणीयम्, हेतुमात्रं त्वनूद्य दूषणमुद्भावयतो नास्य निग्रहो युक्तः, दूषणविषयं तु हेतुमात्रमपि यो ऽनुभाषितुमकौशलः स उत्तरविषयापरिज्ञानादुत्तरमपि प्रतिपत्तुमसमर्थ एवेत्यप्रतिभया निगृह्यतां किमननुभाषणेन, अपि च त्रिरभिहितस्येति केयं परिभाषा ? यथा च वादिना परावबोधार्थं वाक्यं प्रयुक्तं परोपद्रवार्थं वा तत्र परावबोधार्थे वाक्ये परावबोध एवाभिधानावधिः न द्विस्त्रिर्वा नियमः यावत्कृत्वः प्रयुक्ते वाक्ये परस्यावबोधो जायते तावत्कृत्वः प्रयोक्तव्यम्, परोपद्रवार्थं तु वाक्योच्चारणमक्षत एव धर्मः प्राश्निकान्यथा तथा सङ्केतेनापि बोधयित्वा दुःश्लिष्टकष्टशब्दप्र-

योगाद्याडम्बरविरचनया ऽप्यान्ध्यमुत्पाद्य परानुपरुध्येतेति महत्कश्मलमेतत्, न चेदृशं शास्त्रे व्युत्पादनार्हम् , तस्माद्बहुकृत्वो ऽप्यभिधाय प्रतिवादी बोधयितव्यो न तु द्विरुच्चारितमप्रत्युच्चरन्निग्रहीतव्य इति "

अत्रोच्यते न खलु सकृदेव सकलमपरविरचितवचनसन्दर्भानुभाषणमविचलितक्रमकमस्माभिरपि कर्तव्यतयाऽऽदिष्टमपि तु यथोचितदूषणविषयानुभाषणमात्रमेव ।

यस्तु स्तोकमप्यनुभाषितुमप्रगल्भस्तस्योत्तरप्रतिभानमपि नास्तीति यदुच्यते, तदसम्यक् , अन्यदननुभाषणमन्यदुत्तराप्रतिभानम् , कस्य चिदशेषमनुभाषितवतो न मुच्यते ऽनेनोत्तराप्रतिभानम् , उत्तराप्रतिभानमनन्तरं वक्ष्यते ।

यत्तु त्रिरुच्चारणपरिभाषा कुतस्त्येति विकल्पितं तदविज्ञातार्थनाम्नि निग्रहस्थाने प्रतिविहितम् , वीतरागकथात्मके वादे शिष्टादिभिः सह क्रियमाणे काममस्तु परावबोधावधि वाक्योच्चारणम् , जल्पे तु विजिगीषुकथायां पुरुषशक्तिपरीक्षणादवश्यमुच्चारणनियम आश्रयणीयः, तत्र सकृद्वा द्विर्वा ऽभिहितस्याग्रहणमनवधानादिनापि संभवन्न निग्रहाय कल्पते, त्रिरभिहितस्य तु सर्वैरग्रहणे वक्तुरेवापराधः, अन्यैर्गृहीतस्य प्रतिवादिना ऽग्रहणे तस्य निग्रहः, वारत्रयादप्यूर्ध्वमभिधाने त्वाश्रीयमाणे जल्पादौ कथासमाप्तिरेव न स्यात् , छात्रशाला ह्यसौ भवेन्नोद्ग्राहणिकं तदिति ।

अज्ञानस्य लक्षणम्—

अविज्ञातं चाऽज्ञानम् ॥ अ. ५ आ. २ सू. १८

परिषदा विज्ञातस्यापि वादिवाक्यस्य प्रतिवादिना यदविज्ञानं तदज्ञानं नाम निग्रहस्थानं भवति, अविदितोत्तरविषयो हि कोत्तरं ब्रूयादिति ।

अत्राह "अज्ञानमप्रतिभेति नानयोर्विशेषं पश्यामः"

अत्रोच्यते भिन्नविषयत्वाददोषः उत्तरविषयाप्रतिपत्तिरज्ञानम् उत्तराप्रतिपत्तिस्त्वप्रतिभेति ।

"ननूत्तरविषयं यो न जानाति स उत्तरमपि न जानात्येव" नैवम् उत्तरविषयं जानन्नपि कश्चिदुत्तरं न जानातीति लोकदृष्टमेतत् , एवं तर्हि अननुभाषणेन गतार्थमज्ञानमज्ञाते हि परकीये वाक्यार्थे तदनुभाषणे सामर्थ्याभावदर्शनात् , सन्ति हि केचिद्ये ऽनुभाषितुमशक्नुवन्तः पत्रिकादिलिखितं तदावेदयन्तीति, एवं त्रयाणामपि च न पौनरुक्त्यम् , उत्तरविषयाप्रतिपत्तिरज्ञानम् , प्रतिपत्तावपि तदप्रत्युच्चारणमननुभाषणम् , अनुभाषिते ऽप्युत्तराप्रतिपत्तिरप्रतिभेति,

"ननु यद्यज्ञानसाम्ये ऽपि विषयभेदमाश्रित्य निग्रहस्थाननानात्वमित्थमभिधीयते तर्ह्यज्ञानप्रकारवैचित्र्याद्भेदान्तराण्यपि वक्तव्यानीति" उक्तमत्र सा-

रसंग्रहविवक्षया द्वे एव निग्रहस्थाने विप्रतिपत्तिरप्रतिपत्तिश्चेति, इतरेतरविसदृशोदाहरणदिक्प्रदर्शनाय द्वाविंशतिभेदत्वमुच्यते, अवान्तरविशेषैस्तु तदानन्त्यमभ्युपगम्यत एव, तथा च द्वाविंशतिवर्गे हेत्वाभासाश्चेति पठितम्, ते च स्वरूपेणैव तावत्पञ्च सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासा इति, अवान्तरभेदाश्च तेषामतिबहवः सन्त्येव, इह त्वेकमेव तन्निग्रहस्थानमादिष्टं हेत्वाभासाश्च यथोक्ता इति, तस्मादित्थं समासव्यासवर्णनादलं पदे पदे पर्यनुयोगेनेति ।

अप्रतिभाया लक्षणम्—

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ अ. ५ आ. सू. १९ ।

परपक्षे गृहीते ऽपि तस्मिन्नुत्तराप्रतिभानमप्रतिभा नाम प्रतिवादिनो निग्रहस्थानं भवति, अज्ञानादिभ्यो भिन्नता ऽस्य वर्णितैव, कीर्तिरिपि चैतदनुमन्यत एव निग्रहस्थानन्, "ननूत्तरमप्रतिपद्यमानः सदसि प्रतिवादी कथमासीत" यत्किं चिद्विकत्थमानः, तद्यथा—

हृत्पुण्डरीकविकसत्सकलानवद्यविद्यावदातवदनः क जनो ऽस्मदादिः ।
कायं बटुः कतिपयाक्षरलेशलिप्तजिह्वान्वितः कथमनेन सहाभिदध्मः ॥
दानार्द्रगन्धगजकुम्भकपाटभेदिभीमस्फुरन्नखशिखाशिखरः क सिंहः ।
कामी समीरणविधूतपुराणपर्णपातोद्भवद्भयविलोलदृशः कुरङ्गाः ॥

इत्यादि यद्वा तद्वा प्रलपन्नास्ते ।

विक्षेपस्य लक्षणम्—

कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः ॥ अ. ५ आ. २ सू. २०

उद्ग्राहणिकामुपक्रम्य वा तद्ग्राहयितव्यं मयेति प्रतिश्रुत्य वाभिमुखं प्रतिवादिनि सन्निहितेषु प्राश्निकेषु कार्यव्यासङ्गं व्यपदिशतीदं मे करणीयमपहीयते गच्छामीत्यभिधाय कथां विच्छिनत्ति यः स विक्षेपेण पराजीयते, अन्यतरनिग्रहान्ता हि कथा भवति स चेत्थं कथां कुर्वन्नात्मनैवात्मानं निगृह्णाति, प्रतिश्यायेन मे कण्ठोपरोध उदपादि पदमपि वक्तुं न युज्यते जननी मे जीवितं जहाति स्म तां श्मशानभुवं प्रापय्य वह्निसात्करोमीति ।

"अत्राह यदि तावत्परमार्थत एव मातृमरणादि कार्यमस्योपस्थितं तत्किमिति तपस्वी पराजीयते, उद्ग्राहणिकाजितो मा भूदिति किमसौ मृतां मातरमपि मा धाक्षीदिति महत्सुभाषितमिति, पीनसापरुद्धस्थानकरणो वा कथं वाचमुदीरयतु, अथासामर्थ्यस्थगनाय वितथमपि कथयति तथाविधमसौ कार्यव्यासङ्गं तर्हि सत्यं निगृह्यते न तु विक्षेपेण किं तु अन्येनैव, वादी तावत्कर्तव्यव्याजव्यपदेशादर्थान्तरगमनादिना निगृह्यते प्रतिवादी स्वप्रतिभयैवेति, अतिप्रसङ्गश्चैवंप्रकाराणां निर्देशे भवेदिति"

अत्रोच्यते कथामुपक्रम्य प्रतिज्ञां वा हेतुमभिधाय तद्विवरणसरणिमिषमवलम्ब्य किं चिदर्थान्तरमुपन्यस्यति यत्तदर्थान्तरमुदाहृतमादावेव इह तु कथापूर्वरङ्गे कथायां वा किमपि करणीयनिभमभिधाय सभयमपसरति सदस इति कथमिव तत्तुल्यता भवति, अप्रतिभया ऽपि श्रुतपूर्वपक्षः पराजीयते, इह तु पूर्वपक्षमेव न शृणोति वा न करोति वा प्रथममेव पलायत इति महान्विशेषः, अतिप्रसङ्गस्त्वसकृत्पराकृतः, यत्तु हेत्वाभासेष्वन्तर्भावमस्य कीर्तिरकीर्तयत्तदतीव सुभाषितम्, क हेत्वाभासः क कार्यव्यासङ्गः संप्रधारणैव रमणीयेयम्, अहेतोर्हेतुवदाभासनं कीर्तिना दृष्टमिति परमं नः कुतूहलम् ।

मतानुज्ञाया लक्षणम्—

स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥

गो. सू. अ. ५ आ. २ सू. २१

स्वपक्षे परापादितदोषमनुद्धृत्याभ्युपगम्य परपक्षे तमेवापादयतः परमतानुज्ञा नाम निग्रहस्थानं भवति, यथा चोरो भवान्पुरुषत्वात्प्रसिद्धचोरवदित्युक्ते सत्याह भवानपि चोरः पुरुषत्वादिति, सो ऽयमेवं वदन्नात्मनः परापादितं दोषमभ्युपगतवानिति मतानुज्ञया निगृह्यते ।

"अत्राह अनैकान्तिके हेतौ परेणोक्ते तदुद्भावनमनेन प्रकारेण प्रतिवादी करोतीति किमिति निगृह्यते वाद्येव हेत्वाभासप्रयोगान्निग्राह्य इति"

अत्रोच्यते उक्तमादावेव स्वपक्षे दोषमनुद्धृत्येति, एवं हि तेन वक्तव्यमनैकान्तिकोऽयं हेतुरचौरे ऽपि पुरुषत्वदर्शनादिति एवं हि स दोष उद्धृतो भवति एवं त्वनभिधाय भवानपि चोरः पुरुषत्वादिति वदन्ननुजानात्येव परमतमतो ऽनैकान्तिकत्वे वक्तव्ये तदुद्भावनानुक्रममवधीर्य प्रसङ्गमापादयन्निग्रहार्हो भवत्येवेति, वादिनश्चानैकान्तिकहेतुप्रयोगे ऽपि तदनुद्भावनान्न पराजयः प्रतिवादिन एव ह्येदं सन्निकृष्टं निग्रहस्थानमिति ।

पर्यनुयोज्योपेक्षणस्य लक्षणम् —

निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥

गो. अ. ५ आ. २ सू. २२

पर्यनुयोज्यो नाम निग्रहोपपत्त्या चोदनीयः इदं ते निग्रहस्थानमुपनतमतो निगृहीतो ऽसीत्येवं वचनीयः तं य उपेक्षते नानुयुङ्क्ते स पर्यनुयुज्योपेक्षणान्निगृह्यते ।

"अत्राह कः कस्येदं निग्रहस्थानमापादयति किं पर्यनुयोज्य उत तदुपेक्षकः, उपेक्षकस्तावदस्य पर्यनुयोज्यतां न जानाति जानन्वा कथमेनमुपेक्षेत उपेक्ष्य वा किमात्मन एव निग्रहस्थानमुद्भावयन्नेवमाचष्टामेष पर्यनुयोज्यो ऽपि मयोपेक्षित इति निगृहीतो ऽस्मि, पर्यनुयोज्यो ऽपि कथमात्मीयमवद्यं प्रकाशयेदिदं मे दूषणं त्वया भवता नोद्भावितमतो भवान् जित इति, स खल्वेवमभिदधद्‌गूथमेव्यं पाणौ निधाय परं कलङ्कयितुकामः परं कलङ्कयन्नेवात्मकलङ्कमनुभवत्येवे-

ति, अपि च नेदं निग्रहस्थानान्तरमपदिश्यते किं त्वप्रतिभैवेति, तथा हि यदि तावदुत्तरपाक्षिकः पूर्वपाक्षिकं साधनाभासमभ्याचक्षाणमुपेक्षेत तत्र दूषणं नोद्भावयेत् तदुत्तराप्रतिपत्त्या स निगृह्यते न पर्यनुयोज्योपेक्षणेन, वस्तुतस्तु द्वयोरपि तत्र जयपराजयनिर्धारणमनुपपन्नमेकस्य साधनाभासवादित्वादितरस्य च तदुत्तराप्रतिभानात्, अथ पूर्वपाक्षिकं दूषणाभासवादिनं दोषप्राप्तमुत्तरपाक्षिको न निगृह्णाति तथा दूषणाभासवादित्वादितरस्य च तदनुद्भावनादिति"

अत्रोच्यते नाप्रतिभायाः सम्यक्साधनविषयत्वात्, सम्यक्साधने च प्रयुक्ते तदुत्तरस्याप्रतिपत्तिरप्रतिभा भवति साधनाभासे तु प्रयुक्ते तदाभासतानुद्भावनात्पर्यनुयोज्योपेक्षणं भवति, अत्र हि साधनाभासवादी पर्यनुयोज्य एवेति विशेषः, यत्तु वस्तुवृत्तेन न कस्य चिज् जयः पराजयो वेति तदेवमेव, किं तु जल्पे पुरुषशक्तिपरीक्षायामिदं निग्रहस्थानमुच्यते, तदुद्भावयिता तु यद्विकल्पितस्तत्राप्युच्यते पूर्वपाक्षिकेण साधनाभासे प्रयुक्ते उत्तरपाक्षिकेण तस्मिँस्तथात्वेनानुद्भाविते प्राश्निकानामपृष्टानां वक्तुमवसराभावात्स एव साधनाभासवादी कदाचिद्ब्रूयात्त्यादेवं ब्रूयान्मयाऽस्य शक्तिं जिज्ञासमानेन साधनाभासप्रयोगः कृत एष तु मूर्खस्तं न जानातीति तदा कथं न निगृह्यते, एतेन दूषणाभासवाद्यपि व्याख्यातः, अथ दोषभयाभ्यर्थिताः सभापतिनियुक्ता वा प्राश्निकास्तथा कियन्तो निगृह्णन्त्येव पर्यनुयोज्योपेक्षिणम्, साधनाभासवादिनो हि धूर्ततया तदभिधानं सम्यक्साधनमसाधनादर्थसंशयाद्वा संभवति उत्तरपाक्षिकस्य उत्तरानुद्भावनं मोहादेवेति स एव पराजीयते ॥

निरनुयोज्यानुयोगस्य लक्षणम्--

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥

अ. ५ आ. २ सू. २३ ।

अनुज्झितयथोचितक्रममुपपन्नवादिनमप्रमादिनमनिग्रहार्हमपि निगृहीतोऽसीति यो ब्रूयात्स एवाभूतदोषोद्भावनान्निगृह्यते ।

"अत्राह यदि तावदुत्तरपाक्षिकः पूर्वपाक्षिकमदुष्टसाधनमभूतैरेव दोषैरभियुङ्क्ते तथा सति भूतदोषोद्भावनस्योत्तरस्याप्रतिपत्तेरप्रतिभयैव स निगृह्यतां किं निरनुयोज्यानुयोगाख्यन्यूनतानिग्रहस्थानकथनेन, भूतदोषाभियोगपक्षे तु पूर्वपाक्षिक एव साधनाभास(प्र)योगात्पराजीयते, अनुयोज्यः खल्वसौ न निरनुयोज्यानुयोगस्य विषयो भवितुमर्हति"

अत्रोच्यते अहो नु खल्वयं तपस्वी पर्युदासस्य प्रसज्यप्रतिषेधस्य च विशेषमपश्यन्नप्रतिमात्रं मुष्णाति भूतदोषाप्रतिभानमन्यदन्यदन्यथाभूतदोषप्रतिभानम्, एकत्राप्रतिपत्तिरितरत्र विपरीतप्रतिपत्तिः, तत्र भूतदोषाप्रतिपत्तिरप्रतिभा, अभूतदोषप्रतिपत्तिरननुयोज्यानुयोगः, अपि च असाधनाङ्गवचनमदोषो-

मावनं च यद् भवता निग्रहस्थानमाख्यातं तत्र प्रसज्यप्रतिषेध एव केवल आ-
ीयमाणे हेत्वाभासा अपि च निग्रहस्थाने भवेयुः, साधनाङ्गस्यानभिधानं मौ-
र्यमेव केवलं निग्रहस्थानं भवेत् , साधनाङ्गवचनमदोषोद्भावनमपि पर्युदास-
याख्यानार्हं भवत्येव ततश्च भूतदोषानुद्भावनमप्रतिभा अभूतदोषोद्भावनं च
रयोज्यानुयोगः ।

अथाभूतदोषोद्भावनेऽपि भूतदोषाप्रतिभानमस्त्येवेति तदेवास्तु निग्रह-
थानमित्युच्यते तर्हि मूकत्वमेवैकं निग्रहस्थानं स्यादसाधनाङ्गवचनेऽप्येवं
क्तुं शक्यत्वादित्युक्तमेव ।

अपसिद्धान्तस्य लक्षणम्—

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः ॥

अ. ५ आ. २ सू. २५ ।

यं कंचन प्रथमं सिद्धान्तमभ्युपगम्य कथामुपक्रमते कथाप्रसङ्गाच्च सिषाध-
येषितार्थसमर्थने रभसेन दूषणोद्धरणाशङ्कया वा सिद्धान्तविरुद्धमभिधत्ते सो-
ऽपसिद्धान्तेन पराजीयते, यद्यथा सांख्यः प्रतिवादिनि सन्निधाने नासतो विद्य-
ते भावो नाभावो विद्यते सत' इति स्वसिद्धान्तं प्रथमं प्रतिज्ञाय प्रधानसिद्धये
साधनप्रयोगं करोति—व्यक्तं विकारजातमेकप्रकृति समन्वयदर्शनात् , मृदन्वि-
ता हि मृद्विकाराः कुण्डपिठरशरावप्रभृतय एकप्रकृतिका दृष्टा एवमस्यापि गवा-
वादिविकारजातस्य सुखदुःखमोहान्वयदर्शनात् तदात्मकैकप्रकृतिप्रभवत्वेन भ-
वितव्यम्—एवमुक्तवानसौ नैयायिकेनानुयुज्यते—अथ का प्रकृतिर्नाम का च विकृ-
तेरिति, अविदितप्रकृतिविकृतिस्वरूपो हि कथं विकृतीनामेकप्रकृतित्वमेकत्वं
जानीयादिति, एवमनुयुक्तः कापिल आह—यस्यावस्थितस्य धर्मान्तरनिवृत्तौ
धर्मान्तरं प्रवर्तते सा प्रकृतिः यत्तद्धर्मान्तरं प्रवर्तते सा विकृतिरिति, सोऽयमेवं
ब्रुवन्प्रागभ्युपगतसदसन्निरोधप्रभवाभावसिद्धान्तविरुद्धाभिधानादपसिद्धान्तेन नि-
गृह्यते, यदि पूर्वधर्मनिरोधे धर्मान्तरप्रादुर्भावस्तदा नासतो विद्यते भावो
नाभावो विद्यते सत इति स्वसिद्धान्तो हीयते, अथ सिद्धान्तो न त्यज्यते तर्हि
प्रकृतिविकारानिश्चयाद्धेत्वसिद्धौ साध्याभावः प्रसज्यत इति ।

"अत्राह हेतुप्रयोगं कृतवति कापिले नैयायिकस्तदसिद्धतोद्भावनया प्रत्यव-
स्थितां प्रकृतिविकृतिस्वरूपप्रश्नस्य कोऽवसरः ? तदिदमर्थान्तरगमनमस्य भ-
वं पृच्छतः अर्थान्तरगमनं स्वग्रन्थे निग्रहस्थानं लिख्यते, अथ चाऽधुना
नैव व्यवह्रियत इति कोऽयं नयः, यदि तु सांख्यमतं निराचिकीर्षितं तद-
द्वैत्र हेतोरुद्भाव्यतां प्रकृत्यन्वयस्य विकारेषु संभवादिति, विकारा हि प्र-
तेनिवृत्तिधर्मकाः न चैवंप्रकारमव्यक्तधर्ममव्यक्तान्वये हि विकाराणां प्रवृ-
निवृत्त्यात्मकत्वं हीयेतेत्येवमसिद्धत्वाद्धेतोर्हेत्वाभासप्रयोगादेव सांख्यो निगृ-
इति न निगृहस्थानान्तरमपसिद्धान्त इति"

अत्रोच्यते सत्यमसिद्धो भवत्वयं कापिलकल्पितो हेतुः प्रकृतितद्विकृति
प्रश्नप्रक्रमणेनापि तदसिद्धमवधारयितुं शक्यत एव, किन्तु हेतुस्वरूपेऽवधारि
तद्दूषणमभिधानीयमनवधारितस्य दूषयितुमशक्यत्वादिति तत्प्रश्नो नार्थान्त
रगमनम्, प्रश्नोत्तरमेव भाषणः परामर्शो निकटतरपरिस्फुरदपसिद्धान्ताभिध
तनिबन्धननिग्रहान्तरविषयतां प्रतिपन्न इति हेत्वाभासवर्त्मनि न दूरं गम्यते।

क्वचिदपि परनिग्रहस्य हेतौ हृदयपथं प्रथमं किलावतीर्णे।
अपरमपि न कारणं विचिन्त्यं किमिव फलं खलु पिष्टपेषणस्य॥

हेत्वाभासाश्च यथोक्ताः॥ अ. ५ आ. २ सू. २५

हेत्वाभासास्तु पूर्वोक्तलक्षणैरेव लक्षिताः
निग्रहस्थानतां यान्ति यथोक्ता इत्यतोऽब्रवीत्॥

प्रमाणस्य प्रमेयत्वं प्रमेयस्य प्रमाणता।
यथा लक्षणभेदेन न तथैतेषु दृश्यते॥

भेदेनोक्ताः किमर्थं त इति निगदिता पूर्वमेवात्र युक्ति-
र्वादे ह्येते प्रयोज्याः प्रगुणनयविदा तत्त्वशुद्धिं विधातुम्।
एतेषां धर्मकीर्तेरपि च न विमतिर्निग्रहस्थानताया-
मित्थं द्वाविंशतिर्नो गुरुभिरभिहिता निग्रहस्थानभेदाः॥

इति (१६) निग्रहस्थानपदार्थः

इत्येवं सूत्रकारागममनुसरता ऽनुज्झता भाष्यभूमिं
स्थाने स्थाने परेषां मतमतुलगति क्षिण्वता तार्किकाणाम्।
कां चिद्वाक्यार्थचर्चामपि विरचयता ऽनुक्रमेणावतीर्णा
निर्णीताः स्वे निबन्धे निपुणमिह मया षोडशैते पदार्थाः॥

न्यायोद्गारगभीरनिर्मलगिरा गौरीपतिस्तोषितो
वादे येन किरीटिनेव समरे देवः किराताकृतिः।
प्राप्तोदारवरस्ततः स जयति ज्ञानामृतप्रार्थना-
नाम्ना ऽनेकमहर्षिमस्तकवलत्पादो ऽक्षपादो मुनिः॥

वादेष्वाप्तजयो जयन्त इति यः ख्यातः सतामग्रणी-
रन्वर्थो नववृत्तिकार इति यं शंसन्ति नाम्ना बुधाः।
सूनुर्व्याप्तदिगन्तरस्य यशसा चन्द्रस्य चन्द्रत्विषा
चक्रे चन्द्रकलावचूलचरणध्यायी स धन्यां कृतिम्॥

नमः शशिकलाकोटिकल्प्यमानाङ्कुरश्रिये।
प्रपन्नजनसंकल्पकल्पवृक्षाय शंभवे॥

इति श्रीजयन्तभट्टकृतायां न्यायमञ्जर्यां द्वादशमाह्निकम्॥ १२॥

समाप्ता चेयं न्यायमञ्जरी॥